Complete or incomplete—Complete.

उपक्रमः—

No. 53 कोशवत्.

उपसंहारः—

No. 45 कौशवत्.

प्रतिपाद्यविषयः—

No. 41 एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन्नरण्यगानं समग्रं दृश्यते.

No. 57 (3234/5).

सामसंहितारहस्यगानम् (ऊह्यगानम्.)

Sāma-saṁhitā-rahasya-gānam (Ūhya-gānam).

Substance—Palm-leaf.
Size—$17\frac{1}{8} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—283-307.

Lines on a page—10.
Letters in a line—75.
Age of Ms.—Ancient.
Condition of Ms.—Good.

Correct or incorrect—Appears to be correct.

Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ †† अभित्वाशूरनोनुमोवा। स्व। चत्वारि सामानि रथन्तराणि।

अभियुक्तोपदेशैश्च पूर्वैः पूर्वैश्च लक्षणैः।
इदानीं विहितं साम्नामारण्यानां यथाक्रमम् ॥

रहस्ये प्रकृतिः स्तावाद्यमाद्यायां वृत्सर्वत्र रथन्तरे सर्वमाभवति स्पर्शागमस्त्योर्व . . . स्तोभे प्रत्यय इत्याभावः। तस्थुषश्चेत्यनुब्राह्मणं स्वाध्याये ?

आर[भि]त्वाशू[र]नो[नुमो]वा। आका[दु]ग्धा इ[व]धे[नव] ईक्षा [नमस्यजग]तः। सुकः[वार्ड]शाम्। आइधं[इ]शा[नमा]इन्द्रा। सूकीषा। ओतवा ५ ह। ह्वापउवा ॥

उपसंहारः—

आतीका। जरैभ्री[षा]प्रेइ। इकंडा। प्रधै[ना]इ[द्रापा]इम्। अकिमृ। चातांथाः। पको[व]मा[नमहा]होइ। त्वान्दनाउवा। इट्टू[स्थिइ]कूंडा ॥ दी १२, उत् ३, मा ३४, जी ॥

क्षुद्राः ॥ रहस्यं पूर्णम् ॥

प्रतिपाद्यविषयः—

No. 41 एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशोऽस्मिन्गेयगानापराभिधं रहस्यगानं समग्रं दृश्यते। अत्रापि उपक्रमोपसंहारग्रन्थभागयोर्दृश्यमानानां स्वरमात्रसूचकानां गानाघटकानां वर्णानां शिरसि (') एवं चिह्नितम् ॥

एतच्चिह्नान्तर्गतो ग्रन्थभागो न रहस्यगानघटकः.

'सप्तगानं विलिखितं तिर्मलार्यस्य सूनुना ।
छन्दोगश्रीनिवासेन शाण्डिल्यान्वयजेन तु ॥'
इति लेखकलिखितं पद्यमेकमन्ते दृश्यते.

No. 58 (2478/3).

सामसंहितारहस्यगानम् (ऊह्यगानम्).

Sāma-saṁhitā-rahasya-gānam (Ūhya-gānam).

Substance—Palm-leaf.
Size—$16\frac{3}{4} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—71.
Lines on a page—6.
Letters in a line—62.

Age of Ms.—Ancient.
Condition of Ms.—Tolerably good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ † अभित्वा शूरनोनुमोवा । स्वयोनि । चत्वारि रथन्तराणि । अभिर(यु)क्षोपदेशौ . . . . . ।
इदानीं विदि(हि)तं साम्नामारण्यानां यथाक्रमम् ॥
अथ रहस्ये प्रकृतिः, रथन्तरे स्तावाद्यमाद्यायां वृत्सर्वत्र रथन्तरे सर्वमाभवति ॥

ओम् ॥ आरभित्वा शूरनोनुमोवा । आकादुग्धा इव देनवईशानमस्य जगतः । सुकःवार्ईशाम् । आधंइशानमाइन्द्रा । सूकीस्थूषाओतवाऽहा । हापउवा ॥

उपसंहारः—

No. 57 कोशवत्.

प्रतिपाद्यविषयः—

No. 41 एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.

† नायं भागो रहस्यगानग्रन्थान्तर्गतः । अतोऽयं [ ] एतच्चिह्ने प्रवेशितः.

वक्तव्यविशेषः—

No. 57 कोशे द्रष्टव्यः.

No. 59 (1943).

सामसंहितारहस्यगानम् (ऊह्यगानम्.)

Sāma-saṁhitā-rahasya-gānam (Ūhya-gānam).

Substance—Palm-leaf.
Size—13 × 1¼ inches.
Character—Nāgarī.
Folios—54.
Lines on a page—6.
Letters in a line—58.

Age of Ms.—Old.
Condition of Ms.—Sound.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 58 कोशवत्.

उपसंहारः—

त्रिंकशत् । धाकामा । विठोराजाताइ । वाकक्प । तकागा । यछौधीयाताइ । प्रकृति । वकिस्तोः । अटोद्भाः इः । एचा । मागाहाः । दी ५, उ ना मा १६, वूसा ९ ॥ प्रायश्चित्तानि ॥ षष्ठपर्व समाप्तम् ॥

हरिः ओम् ॥ अंहोअंहोहत्वामिद्धिहवामहाए ॥

प्रतिपाद्यविषयः—

No. 41 एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन्नूह्यगानापराह्वयं रहस्यगानं प्रायश्चित्तान्तं दृश्यते । अन्तिमं च क्षुद्रपर्व न दृश्यते । अत्राप्युपसंहारग्रन्थभागे दृश्यमानानां स्वरसूचकानां गानाघटकानां वर्णानां शिरसि (') एवं चिह्नितम् ॥

No. 60 (334/3).

सामसंहितारहस्यगानम् (ऊह्यगानम्).

Sāma-saṁhitā-rahasya-gānam (Ūhya-gānam).

Substance—Palm-leaf.
Size—19⅝ × 1½ inches.
Character—Nāgarī.
Folios—4.
Lines on a page—7.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 58 **कोशवत्**.

उपसंहारः—

नः रैकंवसाप्रेउदाधाः । अकथा । एकाआस्मꣳ । ओदूवा । इंरैद्रवसाप्रेउदाधाः । आकथा ॥ दी १३ । उ १५ । मा १७ णे । सा ३ ॥

प्रतिपाद्यविषयः—

No. 41 **एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

कोशेऽस्मिन् ऊह्यगानापराभिधं रहस्यगानं प्रथमप्रश्ने असमग्रद्वितीयदशत्यन्तं परिदृश्यते । अत्रापि कोशे निर्दिष्टोपसंहारग्रन्थभागे दृश्यमानानां स्वरमात्रसूचकानां गानाघटकानां वर्णानां शिरसि (ˈ) इदं चिह्नं कृतम् । अतस्ते न गानघटका इत्यवधेयम् ॥

No. 61 (2489).

सामसंहितोहगानम्.

Sāma-saṁhitā-ūha-gānam.

Substance—Palm-leaf.
Size—17 × 1½ inches.
Character—Nāgarī.
Folios—257.

Lines on a page—7.
Letters in a line—65.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—Appears to be correct.

Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ आमहीयवम् । उच्चाताइ जातमन्धसाः ॥ स्वा ॥ उफच्चाताइ जातमन्धसाः । दिछूवाइसाद्भ्रे । मिकःयाददाइ । उरोग्रंशर्मा । मकःइश्रवाउ । वाचा । सफनाआइन्द्रायायज्यवाइ । वछूरूणायाग्रे । मकःरुद्रियाः । वकैरिवोवाइत् । पकः राइस्रवाउ । वाचा । एफनावाइश्वानिअर्यआ । द्युछून्नानाइमाग्रे । नुषाणां । सिरोषासन्ताः ॥ वकःनामहाउ । वाचा । स्तौशेषे ॥—दी ९ । उ ५ । मा २१ । न सा १ ॥

उपसंहारः—

दाचोनायवारीयाणां । दाधिनाग्रेयवाग्रे । रीकग्रेयाणां । द्वाधिइतायोभूदमून्तोम् । तिछूयाइपूवाग्रे । होधितामन्द्रतमाविशि । होकःता । मंकःद्रातामाः । हिंकविटीशा । ओकवा । हेद् ॥ दी २८ । उ ८ । मा २८ डै । साम ७ ॥

अर्गलस्समाप्तः ॥ क्षुद्रं समाप्तम् ॥ हरिः ओम् ॥

प्रतिपाद्यविषयः—

No. 41 एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् सामसंहितोहगानं समग्रं दृश्यते । इदं चोहगानं पौरुषेयमेव, तथात्वेऽप्यस्य सामस्वरूपस्य तदाधारभूतानां तिसृणामृचां च वेदत्वादनध्यायाध्ययनं निषिध्यते । एतदूहगानकर्तुरस्मरणं च जीर्णकूपारामादिष्विव चिरकालव्यवधानादुपपद्यते । कर्त्रस्मरणमूलैव ह्यध्यापकानामूहगाने वेदत्वप्रसिद्धिः । यथा बह्वृचा महाव्रतप्रयोग-

प्रतिपादकमाश्वलायनीयं कल्पसूत्रमरण्येऽधीयानाः पञ्चमारण्यकमिति वेदत्वेन व्यवहरन्ति, तद्वदिहाप्यवधेयम् ॥

किञ्चास्य पौरुषयत्वादेव 'यद्योन्यां तदुत्तरयोर्गायति' इति विधिरप्युपपद्यते ॥ तस्मात् बह्वृचानां पञ्चमारण्यकवत्सामगानामूहगानमपि पौरुषेयमेवेति सायणार्यपरिशीलितोऽयं पन्थाः ॥

अत्रापि कोशे निर्दिष्टोपक्रमोपसंहारग्रन्थभागयोर्दृश्यमानानां स्वरमात्रसूचकानां गानाघटकानां वर्णानां शिरसि (·) एवं चिह्नं कृतम् ॥

No. 62 (3234/4).

सामसंहितोहगानम्.

Sāma-saṁhitā-ūha-gānam.

Substance—Palm-leaf.
Size—$17\frac{1}{8} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—151–282.
Lines on a page—10.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms.—Leaves are worm-eaten here and there.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ उफचामूताइजा [तमन्ध] साः । दिछूवाइ [साद्] भूप्रे । मिकः[याद्]दाइ । उरो [ग्रंश] मौ । मकः हाइ [श्र] वा उ । वाचा । सफ[ना] आ इन्द्रा [यायज्या] वाउ । वछू[रूणा]याप्रे । मकः [रुद्धि]या । वकै [रि] वोवाइत् । पकः [रा] इ [स्रवा] उ । वाचा । एफनावाइ । श्वानिअ [र्यं] आ । द्युछू[ज्ञा]नाइमाप्रे । नुकः [षा]णां । सिरोषा [स]न्ताः । वकः[नाम]हाउ । वाचा । स्तौशेषे ॥ दी । उत् ५ । मा २१ । न १ ॥

उपसंहारः—

दा चो ना[य] वारीयाणाम् । दाधिनाग्रे[य]वाग्रे । रीकग्रे [या] णां । द्वा इधि[इ] तायोभू[दम्] तोम् । रेछ्व [या] इ [षू] वा । हौंघिता[मंद्रत]मो [वि]शि । होकः ता । मकः[न्द्राता]माः । हिंकविटीशा । ओकुवा । हेदू ॥ दी २८ । उत् ८ । मा १८ । डै ॥

क्षुद्राः ॥ ऊहगानं समाप्तम् ॥

प्रतिपाद्यविषयः—

No. 41 एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् सामसंहितोहगानं समग्रं दृश्यते ॥ अत्रापि कोशे निर्दिष्टोपक्रमोपसंहारग्रन्थभागयोर्दृश्यमानानां स्वरमात्रसूचकानां गानाघटकानां वर्णानां शिरसि (ˉ) एवं चिह्नं कृतम् ॥

No. 63 (365/1).

सामसंहितोहगानम्.

Sāma-saṁhitā-uha-gānam.

Substance—Palm-leaf.
Size—16¾ × 1¼ inches.
Character—Nāgarī.
Folios—204.
Lines on a page—6.
Letters in a line—54.

Age of Ms.—Appears to be old.
Condition of Ms.—Good.
Correct or incorrect—Seems to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

हरिः ओम् ॥ वृषा पावस्व धारया ॥ यो ॥ उच्चाताइजातामन्धसाः॥ आमहीयवम् ॥ वृषा पावस्वा धारया । माछूरूत्वातांग्रेइ । चकः

मात्सराः । विरोश्वादाधा । नकःओजसाउ । वाचा । तंफत्वाधार्तारा-
मोणियोः । पाछूवामानाग्रे । सुकःवार्ईशाम् । हिरोन्वेवाजाइ । षुकः
वाजिनाउ । वाचा । आफयाचाइत्तोविपानया । हाछूराइःपावाग्रे ।
स्वकःधारया । युरोजंवाजाइ । षुकः चोदयाउ । वाचा । स्तोशेषे ॥ —
दी १३ । उ ६ । मा १२ । टा । सा १ ॥

उपसंहारः —

No. 61. कोशवत्.

प्रतिपाद्यविषयः—

No. 41 एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन्बृहगाने संवत्सरैकाहाहीनसत्रप्रायश्चित्तक्षुद्रपर्वाणि दृश्यन्ते । प्रथमं तु दशरात्रपर्व न दृश्यते ॥ अत्रापि कोशे निर्दिष्टोपक्रमग्रन्थभागे दृश्यमानानां स्वरमात्रसूचकानां गानाघटकवर्णानां शिरसि (·) एवं चिह्नं कृतम् ॥

No. 64 (1694).

सामसंहितोहगानम्.

Sāma-saṁhitā-ūha-gānam.

Substance—Palm-leaf.

Size—20 × 1¼ inches.

Character—Grantha.

Folios—134.

Lines on a page—6.

Letters in a line—64.

Age of Ms.—Appears to be old.

Condition of Ms.—The leaves, except the first and the last, are in good condition.

Correct or incorrect—Generally correct.

Complete or incomplete—Incomplete.

उपक्रमः--

No. 61 कोशवत्.

उपसंहारः—

अकःस्यपीत्वासूवाः । विरदा । औचीहोवा । अस्यापीत्वासु । वाकैर्वीदाः । साकासुप्रकेतोअभिया । क्रा . . . . . । तारशा । औचीहोवा । ईताडा ॥

दी १५ । उत् ७ । मा १७ । फे ॥

एकाहं समाप्तम् ॥ हरिः ओम् ॥

प्रतिपाद्यविषयः—

No. 41 एतन्मूलभूतसंहिताकोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशोऽस्मिन्बृहगाने दशरात्रसंवत्सरैकाहपर्वाणि दृश्यन्ते ॥ अत्रापि कोशे निर्दिष्टोपसंहारग्रन्थभागे दृश्यमानानां स्वरमात्रसूचकानां गानाघटकानां वर्णानां शिरसि (·) एवं चिह्नं कृतम् ॥

No. 65 (2572/1).

सामसंहिताभाष्यं वेदार्थप्रकाशाख्यम्

Sāma-saṁhitā-bhāṣyam, styled Vedārtha-prakāśa.

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—14 × 1⅝ inches.
Character—Nāgarī.
Folios—139.
Lines on a page—8.
Letters in a line—62.
Age of Ms.—Old.
Condition of Ms.—Broken.
Correct or incorrect—Almost correct.
Complete or incomplete—Incomplete.

उपक्रमः—

हरिः ओम् ॥ वागीशाद्यास्सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद्भक्तमहीपतिः ।
आदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुस्सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥
सामवेदार्थमेषोऽत्र प्रकाशयति सादरम् ।
उद्गातुस्तत्र जिज्ञासोरपि तेन कृतार्थता ॥
यज्ञो ब्रह्म च वेदेषु द्वावर्थौ काण्डयोर्द्वयोः ।
अध्वर्युमुख्यैर् ऋत्विग्भिश्चतुर्भिर्यज्ञसम्भवैः ॥
निर्मिमीते क्रियासङ्घैरध्वर्युर्यज्ञियं वपुः ।
तदलङ्कुर्वते होता ब्रह्मोद्गातेत्यमी त्रयः ॥
शस्त्रयाज्यानुवाक्याभिर्होताऽलङ्कुरुतेऽध्वरम् ।
आज्यपृष्ठादिभिः स्तोत्रैरुद्गाताऽनुकरोत्यमुम् ॥
त्रयाणामपराधं तु ब्रह्मा परिहरेत्सदा ।
ऋचां त्व इति मन्त्रेण सोऽर्थस्सर्वोऽभिधीयते ॥
यज्ञं यजुर्भिरध्वर्युर्निर्मिमीते ततो यजुः ।
व्याख्यातं प्रथमं पश्चादृचो व्याख्यानमीरितम् ॥
ऋगाश्रितत्वेन साम्नां व्याख्यानमथ वर्ण्यते ।
अनुनिष्ठासुजिज्ञासावशाद्याख्याक्रमो ह्ययम् ।
जाते देहे भवत्यस्य कः कान्ति(कटका)दिविभूषणम् ॥
आश्रितं मणिमुक्तादि कटकादौ यथा तथा ।
यजुर्जाते यज्ञदेहे . . . . द्विभूषणम् ॥
सामाख्या मणिमुक्ताद्या ऋक्षु तासु समाश्रिताः ॥

ननु— अध्वर्युहोत्रुद्गातृब्रह्मकर्तव्यप्रतिपादको यो मन्त्रस्तस्यार्थो योजनीय इति चेत्स योज्यते ॥

"ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां निमिमीत उ त्वः" ॥

इत्येष मन्त्रः ॥ तस्यायमर्थः—त्वशब्दः सर्वनामसु पठित एकशब्दपर्यायश्च । एको होतृनामकऋत्विक् तत्रतत्र विप्रकीर्णानामृचां यज्ञानुष्ठानकाले सङ्गीभावमापाद्य पुष्टिं कुर्वन्नास्ते ॥

उपसंहारः—

स त्वमसुरैरपहृतं गव्यं गोसम्बन्धि अश्वयं अश्वेषु भवं व्रजं समूहं अभितन्विषे अभितो व्याप्नोषि । 'तनु विस्तारे' छान्दसे लिटि 'तनिपत्योश्छन्दसि' इत्युपधालोपः । किञ्च हे धृष्णो शत्रुधर्षणशील सोम त्वं वर्मी कवचीव शूरः आरुज असुरानाजहि । 'अपि या अन्तरश्मनि' 'अप्या अन्तरश्मनः' इति पाठौ ॥

॥ इति पञ्चमस्याध्यायस्य एकादशः खण्डः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे छन्दोव्याख्याने पञ्चमोऽध्यायः.

॥ समाप्ता च संहिता ॥

प्रतिपाद्यविषयः—

श्रीसायणार्यप्रणीतेऽस्मिन् सामसंहिताभाष्ये अग्नीन्द्रादिस्तुतिपराणामृचां तत्तत्क्लिष्टशब्दव्युत्पादनपूर्वकं ललितयैव शैल्या विवरणं दृश्यते॥

वक्तव्यविशेषः—

कोशोऽस्मिन् छन्दआर्चिकापराभिधेयस्य पवमानपर्वान्तस्य सामसंहितापूर्वार्चिकस्य सायणीयं भाष्यं दृश्यते ॥

No. 66 (A 234).

* सामसंहिताभाष्यम्.

Sāma-saṁhitā-bhāṣyam.

Author—Bharataswāmin.	Size—14¼ × 8 inches.
Substance—Paper.	Character—Telugu.

Folios--60.
Lines on a page—27.
Letters in a line—24.
Age of Ms.—Not too very modern.
Condition of Ms.—Good.
Correct or incorrect—Appears to be incorrect.
Complete or incomplete—Complete.

Subject in brief:—

This manscript contains a commentary written in a very lucid manner, on the full text of Pūrva-ārchika. The author is Bharataswāmin who describes himself as the son of Nārāyaṇa and Yajñadāmbā and a protege of the Hoysala King, Rāmanātha.

उपक्रमः—

वागर्थोहर(भय)रूपेण भासमानं परेश्वरम् ।
वन्दे पुरुषमुत्संज्ञमृक्सामाभ्यामभिष्टुतम् ॥
नत्वा नारायणं देवं तत्प्रसादासधीगुणः ।
साम्नां श्रीभरतस्वामी काश्यपो व्याकरोत्ऋचः ॥
भोसलाधीश्वरे पृथ्वीं रामनाथे प्रशासति ।
व्याख्या कृतेयं क्षेमेण श्रीरङ्गे वसता मया ॥
श्रवणेनानुगृह्णन्तु सन्तस्तां वीतमत्सराः ।
अपश्यन्तस्सतो दोषानुत्पश्यन्तोऽसतो गुणान् ॥
मन्त्रैस्तद्ब्राह्मणार्षेयच्छन्दोदैवतविद्द्विजः ।
अर्थज्ञश्चाश्नुते भद्रं यतो नजइधान्यमून्युत(ज्ञेयान्यमून्यतः) ॥

तथाहि श्रूयते—'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण' इत्यारभ्य 'तस्मादेतानि मन्त्रेमन्त्रे विद्यात्' इत्यन्तम् ॥

उपसंहारः—

अथ पुरीषपदानि । तानि सर्वाण्यैन्द्राण्येव । तत्तद्गुणयोगात्तत्तन्नियामकत्वेन वाऽग्न्यादिपदैस्संबोध्य स्तूयते—एवा एवं हि त्वं उक्त ग-(गु)णोऽसि । ए[वै]वेति पुनरुक्तिरादरार्थेति । एवं हि त्वं हे अग्ने अग्रस्य नेतरिति, एवं हि त्वं हे इन्द्र परमेश्वर, एवं हि त्वं हे पूषन् पोषक

विश्वस्येति, एवं हि भवन्ता(न्तो) हे देवा इति, सर्वदेवानां वलरूपेणावस्थानादेन्द्रस्संवोध्यत इति ॥

इति श्रीभरतस्वामी महानाम्नि(म्नीः) यथामति ।
व्याख्या (ख्यत्)स्खलितमस्यात्र क्षमतां वलवृत्रहा ॥
इति श्रीभरतस्वामिनः कृतौ सामवेदभाष्ये महानाम्नीविवरणम् ॥

प्रतिपाद्यविषयः—

भरतस्वामिप्रणीतेऽस्मिन् सामसंहिताभाष्ये अग्नीन्द्रादिस्तुतिपरस्य आरण्यकमहानाम्न्यार्चिकसहितस्य पूर्वार्चिकस्य समग्रस्य सुवोधयैव शैल्या तत्तत्क्लिष्टशब्दव्युत्पत्तिप्रदर्शनपूर्वकं साधु विवरणं दृश्यते ॥

वक्तव्यविशेषः—

भरतस्वाम्याह्वयोऽयं सामसंहिताभाष्यप्रणेता काश्यपगोत्रजो नारायणार्ययज्ञदाम्वयोस्सूनुः भोसलाधीश्वरं रामनाथभूपालं समाश्रितः श्रीरङ्गवासी भाष्यमिमं प्राणैपीदिति—

'इत्थं श्रीभरतस्वामी काश्यपो यज्ञदासुतः ।
नारायणार्यतनयो व्याख्यत्साम्नामृचोऽखिलाः ॥'
'भोसलाधीश्वरे पृथ्वीं रामनाथे प्रशासति ।
व्याख्या कृतेयं क्षेमेण श्रीरङ्गे वसता मया ॥'

इति छन्दआर्चिकान्ते भाष्यारम्भे च परिदृश्यमानपद्याभ्यामवसीयते । भाष्यादावेव 'नत्वा नारायणं देवं' इति पद्येन नारायणनमनकथनादयं भाष्यकारो वैष्णवश्चेति ज्ञायते । भाष्येऽस्मिन् क्वचित्क्वचिदर्थविवरणावसरे सायणीयभाष्यतो वैलक्षण्यमपि दृश्यते । कोशोऽस्मिन् छन्दआर्चिकारण्यकार्चिकमहानाम्न्यार्चिकानां भाष्यं समग्रं दृश्यते । कोशेऽस्मिन् परिदृश्यमानं लेखनं च बह्वशुद्धसंदूषितमिति ॥

No. 67 (2975).

सामसंहिताभाष्यम्.

Sāma-saṁhitā-bhāṣyam.

Author—Bharataswāmin.	Size—15¾ × 1¾ inches.
Substance—Palm-leaf.	Character—Grantha.

Folios—35+11-52.
Lines on a page—7.
Letters in a line—38.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomple—Incomplete.

उपक्रमः—

No. 66 कोशवत्.

उपसंहारः—

सखा(घा)तं सघ? एव तं प्रसिद्धं वृषणं वर्षुकं रथं इन्द्रस्याधि . . . . . पात्रं हार्यो(रियो)जनाख्यं सोमग्रहं पूर्णं सोमेन चिकेतति ज्ञापयेत्। तुभ्यं . . . . यो यज्ञं

प्रतिपाद्यविषयः—

No. 66 कोशे द्रष्टव्यः.

वक्तव्याविशेषः—

कोशेऽस्मिन्नादौ १—४० ऋचां भाष्यं गलितम्। देवनागराक्षरमुद्रितसायणभाष्यकोशरीत्याऽत्र कोश इदं भरतस्वामिभाष्यं प्रथमाध्याये पञ्चमखण्डमारभ्य चतुर्थाध्यायेऽष्टमखण्डे चतुर्थ्यां ऋचः समाप्तिपर्यन्तं दृश्यते ॥

(2) ब्राह्मणम्.

No. 68 (1970/3.)

आर्षेयब्राह्मणम्.

Ārṣeya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{8}{8} \times 4\frac{7}{8}$ inches.
Character—Nāgarī.
Folios—57-73.
Lines on a page—7.
Letters in a line—50.

Age of Ms.—Old.
Cnodition of Ms.—Not very good

Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम्॥ अथ खल्वयमारुषः(र्षः) प्रदेशो भवत्यृषीणां नामधेय-गोत्रोपधारणं स्वर्ग्यं यशस्यं धन्यं पुष्ट्यं (ष्यं) पुष्ट्यं पशव्यं ब्रह्मवर्चस्यं स्मार्तमायुष्यं प्राक्प्रतराशिकमित्याचक्षते। तदप्येवमाहुर्य इदमुपधारयत एकैकस्यर्षेर्दिव्यं वर्षसहस्रमतिथिर्भवत्यभिनन्दितः प्रतिनन्दितो मतः पूजितस्ततः स्वाध्यायफलमुजीवतीति। अथापि ब्राह्मणं भवति—

उपसंहारः—

अन्त्यं वैकल्पिकं तन्मित्रावरुणयोश्चक्षुरित्याचक्षते। श्रोत्रं च तदेवैके। द्वितीयोऽतीषङ्गस्तन्मित्रावरुणयोः श्रोत्रमित्याचक्षते। चक्षुश्च तदेवैके। तृतीयोऽबीषङ्गस्तदिन्द्रस्य शिर इत्याचक्षते। आदित्यस्योन्नयन्तं तदादित्यात्मेत्याचक्षते। ऐन्द्र्यो महानाम्न्यः प्रजापतेर्वा विष्णोर्वा विश्वामित्रस्य वा सिंमा वा मट्टण्या* वाऽध्वरमा वा शक्वर्यो वा शक्वर्यो वा॥

इत्यार्षेये षष्ठोऽध्यायः॥ आर्षेयब्राह्मणं समाप्तम्॥

प्रतिपाद्यविषयः—

आर्षेयब्राह्मणेऽस्मिन् तत्तत्सामसाक्षात्कर्तृऋषिदेवतानामानि केवलं निर्दिश्यन्ते। न तु ब्राह्मणान्तरवदत्र किञ्चिदपि प्रयोगक्रमादिकमभिधीयते॥

वक्तव्यविशेषः—

"अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम्।
षड्विंशाख्यं द्वितीयं स्यात्ततः सामविधिर्भवेत्॥
आर्षेयं देवताध्यायो मन्त्रं वोपनिषत्ततः।
संहितोपनिषद्वंशो ग्रन्था अष्टावितीरिताः॥"

* मण्डन्या, मट्टण्या, मह्वया, इति कोशान्तरेषु पाठा दृश्यन्ते.

"प्रौढादिब्राह्मणान्यादौ त्रीणि व्याख्याय तुर्यकम् ।
आर्षेयं ब्राह्मणं चाद्य सायणो व्याचिकीर्षति ॥"

इत्येतदार्षेयब्राह्मणसायणभाष्ये परिदृश्यमानैः श्लोकैः सामवेदीयेष्वष्टसु ब्राह्मणेष्वेतत्तुरीयं ब्राह्मणमिति ज्ञायते ॥

आधुनिकास्तु—शाखान्तरेषु प्रतिशाखमेकस्यैव ब्राह्मणस्य दर्शनादस्यां सामशाखायामप्येकेनैव ब्राह्मणेन भवितव्यम् । तच्च छान्दोग्यब्राह्मणाख्यं पञ्चविंशत्यध्यायघटिततााण्ड्यापराभिधप्रौढाख्येन अध्यायपञ्चकात्मकषड्विंशाख्येन च पूर्वभागेण तथाऽध्यायद्वयघटितमन्त्राख्येन अध्यायाष्टकात्मकोपनिषदभिख्येन चोत्तरभागेण सहितं संकलनया चत्वारिंशदध्यायात्मकं ब्राह्मणान्तरवत् श्रौतगार्ह्योभयकर्मविधायकमभ्युपेयम् । ततश्च सामविधानार्षेयदैवतसंहितोपनिषद्वंशब्राह्मणानामनुब्राह्मणत्वमेव । तथाच 'अनुब्राह्मणादिनिः' इति पाणिनीयस्मरणमप्युपपद्यते । अन्यथा क्वाप्यन्यत्र अनुब्राह्मणग्रन्थादर्शनात्तदभित्तिचित्रायितमेव स्यात् । निदानसूत्रादावनुब्राह्मणपदोपादानमप्येतदभिप्रायकमेव । एवं चास्यार्षेयब्राह्मणस्यानुब्राह्मणत्वमेवेत्यभिप्रयन्ति ॥

कोशेऽस्मिन्नार्षेयब्राह्मणं समग्रं दृश्यते ॥

७४-७५ पत्रयोः तत्तत्खण्डानामाद्यवाक्यानि प्रातिलोम्येन संगृहीतानि दृश्यन्ते ॥

No. 69 (2497/4).

आर्षेयब्राह्मणम् .

Ārṣeya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—78-88.
Lines on a page—9.
Letters in a line—62.
Age of Ms.—Old.
Condition of Ms.—Tolerably good.
Correct or incorrect—Almost correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 68 **कोशवत्**.

उपसंहारः—

No. 68 **कोशवत्**.

प्रतिपाद्यविषयः —

No. 68 **कोशवत्**.

वक्तव्यविशेषः—

No. 68 **कोशवत्**.

No. 70 (3007/4).

आर्षेयब्राह्मणम्.

Ārṣeya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—136–144.
Lines on a page—9.
Letters in a line—58.

Age of Ms.—Old.
Condition of Ms.—Ends of the leaves are broken.
Correct or incorrect—Almost correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 68 **कोशवत्**.

उपसंहारः—

No. 68 **कोशवत्**.

प्रतिपाद्यविशयः—

No. 68 **कोशवत्**.

वक्तव्यविशेषः—

No. 68 **कोशवत्**.

No. 71 (3647/4).

आर्षेयब्राह्मणम्.

Ārṣeya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$17\frac{8}{8} \times 1\frac{4}{4}$ inches.
Character—Grantha.
Folios—45-59.
Line on a page—7.
Letters in a line—58.

Age of Ms. —Old.
Condition of Ms.—Tolerably good.
Correct or incorrect—Almost correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 68 **कोशवत्**.

उपसंहारः—

No. 68 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 68 **कोशवत्**.

वक्तव्यविशेषः—

No. 68 **कोशवत्**.

No. 72 (3321/2).

* आर्षेयब्राह्मणम्.

* Arṣeya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$15\frac{1}{16} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—56-65.

Lines on a page—$8\frac{1}{2}$.
Letters in a line—48.
Age of Ms.—Appears to be old.
Condition of Ms.—Good.

Correct or incorrect—Not so very incorrect.	Complete or incomplete—Complete.

Subject in brief :—

This work is similar, in subject-matter, to the work of the same name mentioned under No. 68. But the treatment is more brief and the wordings are entirely different here and there.

उपक्रमः—

ओमित्येतत्परमेष्ठिनः प्राजापत्यस्य साम परमेष्ठिनो वा प्राजापत्यस्य ब्रह्मणो ब्रह्म वाचो वा सत्यं साम स्वर्गस्य लोकद्वारविवरणं देवानां वौघः ? त्रयस्य वेदस्याप्यायनमयातयामाक्षरस्थं साम वासिष्ठो हिंकारः प्राजापत्यो वा गवां वा ॥ अथात ऋषीणां नामधेयगोत्रोदाह [र] णं स्वर्ग्यं धन्यं पुण्यं पौत्रियं पशव्यमायुष्यं प्राक्प्रातराशिकम् ॥

उपसंहारः—

मृत्योश्चतुरनुगानम् । आदित्यस्य व्रतशुक्रियाणि । भ्राजंभ्राजे विकर्णभावे महादिवाकीर्त्यमादित्यं व्रतम् ॥ १८ । ७ । ऐन्द्रा महानाम्न्यः महामान्यः ? सिमा शक्वर्यः । म. वै. ॥ १८ ॥ ऐन्द्रष्षोडशी तवश्शाव्यं श्रेष्ठसाम सुभेषजम् । वावाश्नो व्याहृतिसामानि सप्तदश । प्राजापत्यं गायत्रम् ॥ १९ ॥ इत्यारण्यकं पर्व ॥

आर्षेयब्राह्मणं समाप्तम् ॥

प्रतिपाद्यविषयः—

No. 68 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

No. 68 कोशे दृश्यमानार्षेयब्राह्मणादेतत्कोशपरिदृश्यमाने ब्राह्मणे बहुशस्तत्रतत्र आनुपूर्वीवैलक्षण्यं दृश्यते ॥

प्रायश इदं तत्समानार्थं तत्संग्रहरूपं तत्समाननामधेयं समग्रं च परिदृश्यते ॥

No. 73 (A 468/3).

* आर्षेयब्राह्मणम्.

* Arṣeya-Brāhmaṇam.

Substance—Paper.
Size—12½ × 7¾ inches.
Character—Telugu.
Folios—84-94.
Lines on a page—20.
Letters in a line—16.

Age of Ms.—Recent.
Condition of Ms.—Good.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Complete.

उपक्रमः—

No. 72 **कोशवत्.**

उपसंहारः—

No. 72 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 72 **कोशवत्.**

वक्तव्यविशेषः—

No. 72 **कोशवत्.**

No. 74 (53/3).

आर्षेयब्राह्मणम्.

Arṣeya-Brāhmaṇam.

Substance—Palm-leaf.
Size—16¾ × 1⅝ inches.
Character—Nāgarī.
Folios—27-41.
Lines on a page—6.
Letters in a line—62.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 68 कोशवत्.

उपसंहारः—

No. 68 कोशवत्.

प्रतिपाद्यविषयः—

No. 68 कोशवत्.

वक्तव्यविशेषः—

No. 68 कोशवत्.

No. 75 (A 312).

* आर्षेयब्राह्मणभाष्यम् आर्षेयदीपाख्यम्.

* Ārṣeya-Brāhmaṇa-bhāṣyam, styled, Arṣeya-dīpa.

Author—Bhaṭṭa-bhāskara.
Substance—Paper.
Size—13 × 8½ inches.
Character—Grantha.
Folios—48.
Correct or incorrect—Not so very correct.
Lines on a page—40.
Letters in a line—20.
Age of Ms.—Not too modern.
Condition of Ms.—Good.
Complete or incomplete—Complete.

Subject in brief:—

This work by Bhaṭṭa-bhāskara contains an abridged commentary on Arṣeya-Brāhmaṇa, unlike the detailed commentary of Sāyaṇa on the same. This Bhaṭṭa-bhāskara is different from the Bhaṭṭa-bhāskara who is the author of Yajur-Veda-bhāṣya.

उपक्रमः—

हरिः ओम् ॥ वेदसाम्नामृषिच्छन्दःप्रकाश[म]थ देवताः ।
आर्षेयाद्यनुसारेण भूत्यै भास्करयज्वनाम् ॥

काश्यपान्वयसंभूतभास्कराभिधयज्वना ।
अनेकऋषिदृष्टानां भ . . . . . प्रकीर्त्यते ॥
प्रतीहारार्षेयकल्पसूत्रदृष्टश्रुतावपि ? ।
प्राकृती(ता)नामृचां साम्नामृषिश्छन्दोऽथ देवता ॥
इदंताप्रत्ययो नाम इयत्ता च विचार्यते ।
आर्षेयभरत . . . . सामानुसारतः ॥

'ऋषीणां नामधेयगोत्रोपधारणं स्वर्ग्यं यशस्यं धन्यं . . . . . पङ्क्तिपावनो भवति' इत्यन्वयव्यतिरेकाभ्यामृष्यादेरवश्यवेद्यत्वप्रतिपादनादृक्सामयोः क्रमेण ताः प्रतिपाद्यन्ते । अत्र तावन्निदानकारेण 'साम्नां छन्दो देवता चास्ति नास्तीति गौतमः । यच्छन्दस्यामृचि गीयते तदस्यच्छन्दः । यद्दैवत्यायां साऽस्य देवता' इति प्रतिपादितम् । ऋषयस्तु ऋक्सामयोर्भिद्यन्ते । छन्दोदेवतयोर्न भेदः ॥

उपसंहारः—

'शाक्करैराद्यैः षड्भिः पादैर्यतिषक्ता एताः शक्वर्यः पञ्च पुरीषपदैश्च युक्ताः साम्नः ? प्राजापत्यः । ऋग्वच्छन्दोदेवते । पुरीषपदानि सर्वाण्यैन्द्राण्येव । तत्तन्नियामकत्वेनाग्न्यादिपदैः सर्वदेवानां बलरूपेण . . . . इन्द्रं वै (इन्द्र एव) संबोध्यत इति ॥

इति श्रीमद्भट्टभास्कराध्वरीन्द्रविरचिते सामवेदार्षेयदीपे
शुक्राख्यं सप्तमं पर्व समाप्तम् ॥

प्रतिपाद्यविषयः—

अत्र आर्षेयब्राह्मणनिर्दिष्टं तत्तत्साम्नां ऋषिच्छन्दोदेवतानामादिकं तत्तदृक्सामप्रदर्शनपूर्वकं संगृह्यते ॥

वक्तव्यविशेषः—

इदं च भाष्यं सायणीयभाष्यवन्न प्रातिस्विकरूपेण आर्षेयब्राह्मणस्य विवरणरूपम् । परं तु प्रायश्छायाव्याख्यानरूपमिति तद्भाष्यतयाऽत्र संयोजितम् । अत एवात्रादौ 'आर्षेयाद्यनुसारेण' इत्यभिहितम् । अयं च भट्टभास्करो यजुर्वेदभाष्यप्रणेतुरन्य इति ज्ञायते । यतस्स यजुर्वे-

दभाष्यप्रणेता यजुर्वेदभाष्य एव स्वात्मानं कौशिकान्वयसंभूतं व्यपदिशति। अयं तु काश्यपान्वयसंभूत इति ग्रन्थारम्भे दर्शनादवसीयते ॥

No. 76 (C 460.)

ऐतरेयब्राह्मणम्.

Aitareya-Brāhmaṇam.

Substance—Paper.
Size—$7\frac{1}{4}\times4\frac{1}{2}$, $8\frac{1}{2}\times4\frac{5}{16}$ inches.
Character—Deva-nāgarī.
Folios—226.
Lines on a page—11.
Letters in a line—38.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता आग्नावैष्णवं पुरोळाशं निर्वपन्ति दीक्षणीयेमेकादशकपालं सर्वाभ्य एवैनं तद्देवताभ्योऽनन्तरायं निर्वपन्त्यग्निर्वै सर्वा देवता विष्णुस्सर्वा देवता एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च तद्यदाग्नावैष्णवं पुरोळाशं निर्वपन्त्यन्तत एव तद्देवानृध्नुवन्ति तदाहुर्यदेकादशकपालः पुरोळाशः ॥

उपसंहारः—

तमेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने कैशिरये भार्गायणाय राज्ञे प्रोवाच तं ह पञ्च राजानः परिमम्रुः ततः सुत्वा महज्जगाम तस्य व्रतं न द्विषतः पूर्व उपविशेद्यदि तिष्ठन्तं मन्येत तिष्ठेतैव न द्विषतः पूर्वस्संविशेद्यद्यासीनं मन्येतासीतैव न द्विषतः पूर्वः प्रस्वप्याद्यदि जाग्रतं मन्येत जाग्रियादेवापि ह यद्यस्याश्रममूर्धा द्विषन् भवति क्षिप्रं हैवैनं स्तृणुते स्तृणुते ॥

इति ऐतरेयब्राह्मणे अष्टमपञ्चिकायां पञ्चमोऽध्यायः ॥

प्रतिपाद्यविषयः—

अस्मिन् ब्राह्मणे अष्टौ पञ्चिका दृश्यन्ते। आहत्य च तासु ४० अध्यायास्सन्ति।

तत्र प्रथमेऽध्याये—अग्नेर्विष्णोश्च सर्वदेवताप्राथम्यसर्वोत्तमत्वाभ्यां प्रशंसनपूर्वकं तद्देवताकाया इष्टेर्विधिः अग्नाविष्णुदेवताकपुरोडाशनिवापप्रशंसनं इत्यादिकं दृश्यते.

द्वितीयाध्याये—प्रायणीयपदार्थः प्रायणीयोदयनीययोः प्रशंसा तदुपयोगिन्याख्यायिका अग्नधादियागविधानमित्यादिकं दृश्यते.

तृतीये—सोमक्रयणे दिङ्नियमः तत्र प्रत्यवायः सोमक्रयणादूर्ध्वं पठितव्या ऋचः सोमप्रवहणाद्यङ्गभूतमन्त्रा इत्यादिकं दृश्यते.

तुरीये—प्रवर्ग्योपपादकाख्यायिकदिकं दृश्यते.

पञ्चमे—सोमक्रयविधानोपयोग्याख्यायिकादिकं दृश्यते.

षष्ठे—यूपप्रशंसार्थाख्यायिकादिकमभिधीयते.

सप्तमे—पर्याग्निकरणाख्यस्य कर्मणो विधानोपयोग्याख्यायिकादिकं कथ्यते.

अष्टमे—अपोनप्त्रीयं तच्छेषभूता उपांश्वादिग्रहाश्चाभिधीयन्ते.

नवमे—द्विर्देवत्यग्रहादिकं तूष्णींशंसनप्रशंसादिकं च परिदृश्यते.

दशमे—आहावनिविदादिसूक्तविधिः अच्छावाकादिशंसनं च दृश्यते.

एकादशे—प्रउगप्रशंसा वषट्कारप्रैषादिप्रशंसादयश्च दृश्यन्ते.

द्वादशे—आहावप्रभेदादयः परिदृश्यन्ते.

त्रयोदशे—सोमक्रयोपयोगिकथामरुत्वतीययागादिकं दृश्यते.

चतुर्दशे—अग्निष्टोमस्सर्वयज्ञक्रतूनां योनित्वेनास्तूयत प्राक्परस्तात्। देवै स्स्तोमैस्संस्तुतोऽसौ चतुर्भिर्वाचा मन्द्रैर्मध्यमैरुत्तमैश्च॥

पञ्चदशे—संस्थेष्टीनां वाग्यमश्चर्त्विजां च यागा देवीदेविकानां विशेषाः। संस्थोक्थ्यस्य स्तोत्रशस्त्रप्रकल्पिः शस्त्रण्याहुः शस्त्रिणां होतृकाणाम्॥

षोडशे—षोडशीसंस्थाप्रशंसादि दृश्यते.

सप्तदशे—अतिरात्रक्रतूपयोगिन आश्विनशस्त्रस्य विधानोपयोग्याख्यायिकादिकमभिधीयते.

अष्टादशे—अभिप्लवः स्यात् षडहोऽथ मासस्त्रयहोऽथ पूर्वस्स्वरसामनामा । गवां च शस्त्रस्य ततः प्रशंसा मध्ये दिवाकीर्त्यमहश्च तस्य ॥

एकोनविंशे—द्वादशाहविधानाय तदुपयोग्याख्यायिकादिकं प्रदर्श्यते.

विंशे—द्वादशाहान्तर्गतनवरात्रविधानादिकं दृश्यते.

एकविंशे — द्वादशाहान्तर्गततृतीयाहचतुर्थाहनिरूपणाज्यशस्त्रवि। धानादिकं दृश्यते.

द्वाविंशे – पञ्चमाहषष्ठाहौ निरूप्येते.

त्रयोविंशचतुर्विंशयोः—सप्तमाहनवमाहदशमाहेषु मन्त्रलिङ्गादिकथनादिकं दृश्यते.

पञ्चविंशे – सायंकाले यजमानकर्तव्यविधानपूर्वकं अग्निहोत्रविधिः कथ्यते.

षड्विंशे—ब्रह्मकर्तव्योपयोग्याख्यायिकाद्यभिधीयते.

सप्तविंशे—होतृकशस्त्रविधानोपयोग्याख्यायिकादिः परिदृश्यते.

अष्टविंशे—ऋक्प्रशंसादिकं दृश्यते.

एकोनत्रिंशे—माध्यंदिनीयशस्त्रक्लृप्तधादिकमभिधीयते.

त्रिंशे—षडहयागोपयोगिनः शिल्पनामकशस्त्रस्य विधानं दृश्यते.

एकत्रिंशे – पशुविभागतत्प्रशंसादिकं दृश्यते.

द्वात्रिंशे—आहिताग्नेर्मरणविषयविचारोऽभिधीयते.

त्रयस्त्रिंशे—हरिश्चन्द्रोपाख्यानादिर्दृश्यते.

चतुस्त्रिंशे—यज्ञविषयकप्रशंसादिकं दृश्यते.

पञ्चत्रिंशे—क्षत्रियस्य सोमभक्षविरहहेतुप्रदर्शकोपाख्यानं दृश्यते.

षट्त्रिंशे—राजसूये स्तोत्रादिकथनं दृश्यते.

सप्तत्रिंशे—दीक्षितस्य क्षत्रियस्याभिषेकविधानादिकं दृश्यते.

अष्टत्रिंशे – प्रासङ्गिकैन्द्राभिषेकः कथ्यते.

एकोनचत्वारिंशे – अभिषेकसंभाराः प्रतिपाद्यन्ते.

चत्वारिंशे—ब्राह्मणपौरोहित्यप्रशंसनं ब्राह्मणपुरोहितसंपादनप्रशंसनमित्यादिकं सर्वमभिधीयते.

वक्तव्याविशेषः—

कोशोऽस्मिन् ऐतरेयब्राह्मणं समग्रं दृश्यते। इदमिदानीमेतद्ब्राह्मण-प्रवक्तृविषये किंचित्प्रस्तूयते—

'एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः' इत्यैतरेयारण्यके श्रवणात् कस्यचिद्दषेरितराख्यायां पत्न्यां समुत्पन्नो महिदासनामा महर्षिः ऋक्शाखीयस्यास्य ब्राह्मणस्य प्रवक्तेति ज्ञायते॥

सोऽयमैतरेयो महिदासो भार्यान्तरपुत्रेष्वेव स्नेहातिशयं वहता पित्रा कस्यांचिद्यज्ञसभायां भार्यान्तरपुत्रानेवोत्सङ्गे स्थापयता दूरीकृतः स्वजननीस्मृतया भूदेव्या तस्यामेव सभायामात्मनो वैमात्रेयापेक्षया पाण्डित्याधिक्यमवगम्य्य समधिगतादेव्यसिंहासन एतद्ब्राह्मणप्रतिभा-सनरूपं वरमप्यधिगत्य ब्राह्मणमेतत्प्रकाशयामासेति श्रीमत्सायणार्यै-रप्यत्र संप्रदायविदाख्याता काचनाख्यायिका प्रादर्शि॥

अत्र केचिदाधुनिका एतद्ब्राह्मणप्रवक्तुर्महिदासस्य श्रीसायणार्या-भिहिताख्यायिकायां यज्ञसभायां पित्रुत्सङ्गादूरीकरणदर्शनात् दासान्त-नामधेयपरामर्शात् ऋष्यादिपदं विहाय विद्वानिति विशेषणश्रवणाच्च दासीपुत्रत्वमभिप्रयन्ति॥

तत्रेदं कौतुकाद्विमृश्यते। किमस्य महिदासस्य पित्रुत्सङ्गादूरीकरणं तस्य दासीपुत्रतामापादयति। तथा सत्यौत्तानपादेर्ध्रुवस्यापि पित्रुत्सङ्गा-दूरीकरणस्य पुराणेषु स्मरणाद्दासीपुत्रत्वं स्यात्। न हि तत्कस्यापि सम्मतम्॥

नन्वस्य महिदासस्य यज्ञसभायां पित्रा निजोत्सङ्गादूरीकरणं दासी-पुत्रत्वादेवेति चेत्, न दृश्यत इदं सायणार्यप्रदर्शितायामाख्यायिकायां महिदासो दासीपुत्रत्वात्पितुरुत्सङ्गमधिरोढुं नाशक्नोदिति, किंतु 'तदी-यस्य तु पितुर्भार्यान्तरपुत्रेष्वेव स्नेहातिशयो न तु महिदासे' इति स्नेहा-भाव एव तत्र कारणं प्रदर्शितम्। दृष्टं हि नामैतल्लोकेऽनेकपत्नीकस्य कस्यांचिद्भार्यायां तत्सूनुषु वैदास्यम्। ईदृश्या लोकरीतेरभ्युपगमादे-वाख्यायिकादृश्यमानस्य महिदासावमाननस्योपपत्तौ कथं तावन्मात्रं तस्य दासीपुत्रतां साधयेत्। स्नेहाभावे परं निदानं दासीपुत्रत्वमेवेति तु प्रमाणेनैव साधनीयम्। न च तादृशं प्रमाणमुपलभामहे॥

तथाऽस्य महिदासस्य दासान्तनामधेयमात्रेण दासीपुत्रताकल्पने दिवोदाससुदासप्रभृतयः पुराणेषु स्मर्यमाणाः क्षत्रियप्रवरा अपि दासीपुत्त्रा भवेयुः। अतोऽस्य भूदेव्यनुग्रहविशेषादेव दिव्यज्ञानावाप्तेः प्रदर्शिताख्यायिकायामुपलम्भात् भूदेव्यां भक्तिवशादेवास्य तादृशं नामधेयं प्रावर्ततेति स्वरसतरमुपपद्यते ॥

एवमेतन्मातृनामधेयस्येतरापदस्य द्विजेतरार्थकत्वकल्पनमपि प्रमाणानुपलम्भपराहतम्। तस्याश्चेतरानाम्न्याः पतिप्रीतिविषयत्वाभावात्तादृशनामधेयप्रवृत्तिरित्यभ्यूह एव प्रदर्शिताख्यायिकाबलात्समुचित इति नात्र विशेषतो वक्तव्यम् ॥

एवं 'विद्वानाह महिदासः' इत्यैतरेयारण्यकवाक्ये महिदासस्य ऋषिरिति विशेषणं परित्यज्य विद्वानिति विशेषणश्रवणमप्यस्य न दासीपुत्रतां साधयति। ऋषधातुश्च 'ऋषी गतौ' इति हि धातुपाठे निर्दिष्टः। तत्र विदधातुवत् गत्यर्थकतया ज्ञानार्थक इत्यवश्यमूरीकरणीयम्। गत्यर्थानां ज्ञानार्थकत्वस्य वैयाकरणसमयसिद्धत्वात्। अत एव वेदपर्याय ऋषिशब्दः 'तदुक्तमृषिणा' इत्यादौ श्रूयते। ततश्च प्रकृते कर्तर्थकौणादिकप्रत्ययन्तस्य ऋषिशब्दस्य ज्ञात्रर्थकत्वं संपद्यते। तथा च ऋषिरिति विशेषणेऽपि ऋषिपदं ब्राह्मणमेवाभिधत्त इति न नियमः। अत एव श्रीमद्वाल्मीकिरामायणेऽयोध्याकाण्डे वैश्याच्छूद्रायामुत्पन्ने करणाख्यसङ्करजातीये तत्पितरि वैश्ये च 'ऋषेर्हि न्यस्तदण्डस्य' 'नाशकत्तीव्रमायासमकर्तुं भगवानृषिः' इत्यादावृषिपदं प्रयुक्तं दृश्यते।

किंच सायणार्यैरेव तद्भाष्ये 'उक्तार्थदार्ढ्याय महर्षिवाक्यं दर्शयति' इत्यवतार्य 'महिदासस्तादृशो महर्षिः' इति महिदासो महर्षिपदेनैव विशेषितः। ततश्च विद्वानिति विशेषणे ऋषिरिति विशेषणे वा वैलक्षण्याभावादस्य महिदासस्य दासीपुत्रताग्राहकं प्रमाणं गवेषणीयम्। किंचात्रैतरेयोपनिषद्भाष्यादौ श्रीमदानन्दतीर्थमुनिप्रभृतयो महिदासमेनं भगवतो विष्णोरवतारमाचक्षते। अतोऽस्य महिदासस्य दासीपुत्रत्वकल्पनं चिरन्तनानां विपश्चितामहृदयङ्गममित्यलं प्रपञ्चेन ॥

तस्माद्द्विजातिभिरनुष्ठेयस्य महतो यागाख्यकर्मण इतिकर्तव्यताप्रतिपादकस्यास्य ब्राह्मणस्य दासीपुत्रप्रवक्तृकत्वकल्पने प्रमाणानुप-

लम्भाद्द्विजातिप्रवरेणैव महिदासेन प्रकाशितमेतदैतरेयं ब्राह्मणमिति वयमुत्पश्याम इति ॥

No. 77 (4230).

ऐतरेयब्राह्मणम्.

Aitareya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$15\frac{5}{8} \times 1\frac{1}{4}$ inches.
Character—Nāgarī.
Folios—157-210+1-156.
Lines on a page—5.
Letters in a line—64.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 76 **कोशवत्.**

उपसंहारः—

No. 76 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 76 **कोशवत्.**

वक्तव्यविशेषः—

No. 76 **कोशवत्.**

No. 78 (4309).

ऐतरेयब्राह्मणम्.

Aitareya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$10\frac{1}{2} \times 1\frac{5}{8}$ inches.
Character—Nāgarī.
Folios—151.

Lines on a page—9.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good

Correct or incorrect—Appears to be correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 76 कोशवत्.

उपसंहारः—

No. 76 कोशवत्.

प्रतिपाद्यविषयः—

No. 76 कोशवत्.

वक्तव्यविशेषः—

No. 76 कोशवत्.

No. 79 (C 173).

ऐतरेयब्राह्मणम्.

Aitareya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$9\frac{5}{8} \times 4\frac{3}{4}$ inches.
Character—Nāgarī.
Folios—294.
Lines on a page—7.
Letters in a line—34.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 76 कोशवत्.

उपसंहारः—

No. 76 कोशवत्.

प्रतिपाद्यविषयः —

No. 76 कोशवत्.

वक्तव्यविशेषः —

No. 76 कोशवत्.

No. 80 (4546/1).

ऐतरेयब्राह्मणम्.

Aitareya Brāhmaṇam.

Substance—Palm-leaf.
Size—$16\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—110.
Lines on a page—8.
Letters in a line—68.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 76 कोशवत्.

उपसंहारः—

No. 76 कोशवत्.

प्रतिपाद्यविषयः —

No. 76 कोशवत्.

वक्तव्यविशेषः—

No. 76 कोशवत्.

No. 81 (B 2).

ऐतरेयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Aitareya-Brāhmaṇa-bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyana.
Substance—Paper.
Size—$6\frac{1}{8} \times 7\frac{3}{4}$ inches.
Letters in a line—22
Age of Ms.—Not so very modern.
Condition of Ms.—Good.
Character—Telugu.
Folios—114.
Lines on a page—12.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

प्रधानस्य हविषो यो (या) ज्यानुवाक्ये विधाय स्विष्टकृद्रूपणाङ्गस्य (स्य यागस्य) फलविशेषाय छन्दो विशेषयुजे(क्ते)याज्यानुवाक्ये विधातुकामः प्रथमं [द्वे] ऋचौ विधत्ते—

"गायत्र्यै(त्र्यौ)स्विष्टकृतः संयो(या)ज्ये कुर्वीत तेजस्कामो ब्रह्मवर्चसकामः" इति। 'स हव्यवाळमर्त्यः' इत्येका गायत्री, 'अग्निर्होता पुरोहितः' इत्यपरा गायत्री, ते उभे स्विष्टकृद्यागस्य संयो(या) ज्ये कुर्यात्। कीदृशोऽधिकारी? तेजः शरीरकान्तिः, ब्रह्मवर्चसं श्रुताध्यापनसंपत्तिः, तदुभयकामोऽधिकारी। संयाज्यशब्दार्थमाश्वलायन आह—'स्विष्टकृतः संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्' इति। स्विष्टकृत्संबन्धिन्यौ पा (या) ज्यानुवाक्ये इत्यर्थः॥

उपसंहारः—

सा श्रीः आदित्यप्राप्तिरेव भोग्यवस्तुसंपत्तिः। तदाहिन्य (दित्य) मण्डले(लं) आधिपत्यं स्वामित्वप्रापिकां(पकम्) 'आदित्य एषां भूतानामधिपतिः' इति श्रवणात्। मण्डलं ब्रध्नस्याप्यादित्यस्य विष्टपं स्थानभूतम्। तदेतन्मण्डलं प्रजापतेरप्यायतनं स्थानं, आदित्यमण्डले प्रजापत्युपासनस्याभिधानात्। तदेव मण्डलं स्वाराज्यं पारतन्त्र्याभावात्। उपसंहृति—'बुद्धौन्ये (ऋध्नोत्ये) नमेवैताभिरेकविंशत्या' इति। एकविं-

शतिसंख्याभिरेताभिरृग्भिरेव यजमानं समृद्धं करोत्येव । अभ्यासोऽध्यायपरिसमाप्तयर्थः ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणे पञ्चमाध्याये चतुर्थः खण्डः ॥

प्रथमपञ्चिका समाप्ता.

प्रतिपाद्यविषयः—

कोशोऽस्मिन् परिदृश्यमाने ऐतरेयब्राह्मणीयप्रथमपञ्चिकाभाष्ये No. 76 कोशे प्रदर्शिताः प्रथमपञ्चिकागता विषयाः सुलालितयैव शैल्या तत्रतत्र प्रमाणोपन्यसनपुरस्सरं साधु विव्रियन्ते ॥

वक्तव्याविशेषः—

कोशोऽस्मिन्नैतरेयब्राह्मणसायणभाष्यं समूलानुवादं प्रथमपञ्चिकायां प्रथमाध्याये पञ्चमखण्डप्रभृति प्रथमपञ्चिकासमाप्त्यन्तं परिदृश्यते ॥

No. 82 (413).

ऐतरेयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम् .

Aitareya-Brāhmaṇa-Bhāṣyam.

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Telugu.
Folios—168.
Lines on a page—8.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms.—Almost good.
Correct or incorrect—Fairly correct.
Complete or incomplete—Incomplete.

उपक्रमः—

शकटादधस्ताद्दत्विज उपावहरेयुः । युक्तः शकटे बद्धः । विमुक्तः शकटाद्वियोजितः । उभयोरनड्वाहोर्विमोचने दोषमुपन्यस्यति—"यदुभयोर्विमुक्तयोरुपावहरेयुः पितृदैवत्यं राजानं कुर्युः" इति राज्ञस्सो-

मस्य पितृभिः स्वीकृतत्वादयं सोमो देवयोग्यो न भवेत्। उभयोरनङुहोः शकटयोगेऽपि दोषमाह—'यद्युक्तयोरयोगक्षेमः प्रजा विन्देत्ताः परिप्लवेरन्' इति ॥

उपसंहारः—

'यदु द्वे सूक्ते शस्त्वा शंसति [सं] प्रतिष्ठयोरेव तदुपरिष्टात्प्रजननं दधाति प्रजात्यै' इति। यदु यस्मादेव कारणाद्वैश्वानरीयं मारुतं चेति द्वे सूक्ते शस्त्वा पश्चादे ौ स्तोत्रीयानुरूपौ शंसति तस्मात्कारणाद्वित्वम्। संप्रतिष्ठयोः स्थितिहेत्वोः पादयोरेवोपरिष्टादूर्ध्वं प्रजननं प्रजोत्पादकमिन्द्रियं दधाति। तच्च प्रजात्यै प्रजोत्पादनाय संपद्यते।

वेदनं प्रशंसति—'प्रजायते प्रजया पशुभिर्य एवं वेद' इति ॥

॥ इति त्रयोदशाध्याये एकादशः खण्डः ॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने भाष्ये ऐतरेयब्राह्मणभागस्य पदार्थवाक्यार्थौ तत्र तत्र प्रमाणोपन्यासादिपुरस्सरं सम्यङ्निरूप्येते। एतत्प्रतिपाद्यविषयश्च एतन्मूलभूते No. 76 कोशे द्रष्टव्यः ॥

वक्तव्यविशेषः —

कोशेऽस्मिन् समूलानुवादमैतरेयब्राह्मणसायणभाष्यं प्रथमपञ्चिकायां तृतीयाध्याय तृतीयखण्डप्रभृति तृतीयपञ्चिकायां तृतीयेऽध्याये एकादशखण्डसमाप्तयन्तं दृश्यते ॥

No. 83 (A 1).

ऐतरेयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Aitareya-Brāhmaṇa-Bhāṣyam.

Author—Sāyaṇa.
Substance—Paper.
Size—$16\frac{1}{4} \times 8\frac{1}{4}$ inches.
Character—Telugu.
Folios—102.
Lines on a page—18.
Letters in a line—22.
Age of Ms.—Appears to be old.
Condition of Ms.—Good.

Correct or incorrect—Incorrect.	Complete or incomplete—Incomplete.

उपक्रमः—

हरिः ओं॥ राजक्रयब्राह्मणमुक्तमादौ
वह्नेः प्रणीति [प्रति] पादिकाश्च।
तथा हविर्धानविवर्तनार्था
अग्नेश्च सोमस्य च या ऋचः स्युः॥

अथ षष्ठ्य (ष्ठा) ध्यायेऽग्नीषोमीयपशुर्वक्तव्यः। तत्रादौ यूपं वक्तुमाख्यायिकामाह—"यज्ञेन वै देवा ऊर्ध्वाः स्वर्गं लोकमायंस्तेऽबिभयुरिमं नो दृष्ट्वा मनुष्याश्च ऋषयश्चानु [प्र] ज्ञास्यन्तीति, तं वै यूपेनैवायोपयंस्तं यद्यूपेनैवायोपयंस्तद्यूपस्य यूपत्वं, तमवाचीनाग्रं निमित्योर्ध्वा उदायंस्ततो वै मनुष्याश्च ऋषयश्च देवानां यज्ञवास्त्वम्या (भ्या) यन्यज्ञस्य किञ्चिदेसिष्या (षिष्या) मः प्रज्ञाता इति ते वै यूपमेवाविन्दन्नवाचा (चीना) ग्रं निमित्तं (तं) ते विदुरनेन वै देवा यज्ञमपू (यू) युपन्निति तमुवा (त्खा) योर्ध्वं न्यमिन्वंस्ततो वै ते प्र यज्ञमजानन् प्र स्वर्गं लोकम्" इति। पुरा कदाचिद्देवा ज्योतिष्टोमं यज्ञमनुष्ठाय तत्फलभूतं स्वर्गं प्राप्ताः तत्र चावस्थाय भीतिं प्राप्ताः। केनाभिप्रायेणेति स उच्यते॥

उपसंहारः—

याज्यया प्रक्षिप्तं हविर्वृष्टिपर्यवसितं भवति। तथाच स्मर्यते—
अग्नौ क्षिप्ताहुतिस्सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥

इति। वृष्टिश्च विद्युत्पुरस्सरत्वाद्विद्युदेव, यस्मान्मेघे उत्पन्ना विद्युद्वृष्टिं संपाद्य तेद्वा (तद्वा) रेणान्नं प्र[य]च्छति। तस्माद्वृष्टिर्विद्युदेव। वेदनं प्रशंसति—'स एवं विद्वोन (द्वाने) तन्मयो देवतामयो भवति भवति' इति एतन्नध्यायोवसत (न्मयो वसन्त) ग्रीष्मादिविष्क (द्यु) दन्तवस्तूय (सुम) यो भूत्वा तदभिमानिदेवतानां भोगं प्राप्नोति। अभ्यासोऽध्यायसमाप्त्यर्थः॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे तैत्तिरेय-
ब्राह्मणे दशमाध्याये नवमः खण्डः॥
द्वितीयपञ्चिका समाप्ता॥

प्रतिपाद्यविषयः—

No. 76 कोशे एतद्भाष्यभूलभूते निर्दिष्टा द्वितीयपञ्चिकास्थविषया एवैतत्कोशपरिदृश्यमाने भाष्ये सरलशैल्या प्रमाणोपन्यासादिमुखेन मूलार्थप्रकाशनपूर्वकं विव्रियन्ते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् समूलानुवादमैतरेयब्राह्मणसायणभाष्यं द्वितीयपञ्चिकामात्रस्य दृश्यते ॥

No. 84 (B 3).

ऐतरेयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Aitareya-Brāhmaṇa Bhāṣyam.

Author—Sāyaṇa.
Substance—Paper.
Size—$7\frac{7}{8} \times 6\frac{1}{4}$ inches.
Character—Telugu.
Folios—110.
Lines on a page—16.
Letters in a line—18.

Age of Ms.—Appears to be modern.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

संस्थेष्टीनां वाग्यमश्च . . . यागा देवी [देवि] कानां विशेषाः । संस्थोक्थस्य स्तोत्रशा(श) स्त्रप्रक्लृप्तिः शा(श) स्त्राण्याहुः शा(श) स्त्रिणां होतृकाणाम् ॥

ज्योतिष्टोमभेद उक्थ्यः समापितः । अथ षोळशी उच्यते । तद्विषयं शंसनं विधत्ते—" देवा वै प्रथमेना. इन्द्राय वज्रं समभरंस्तं द्वितीयेनाह्नाऽसिञ्चंस्तं तृतीयेनाह्ना प्रायच्छंस्तं चतुर्थेऽहन् अहरत्तस्माच्चतुर्थेऽहन् षोळशिनं शंसति " इति ॥ अ [ग्नि] ष्टोमोक्थ्यादिसंस्थाविशेषः स्वतन्त्रक्रतुत्वाद्यथा पृथगनुष्ठातुं योग्यस्तथा षोळशी स्वतन्त्रः क्रतुः ॥

उपसंहारः—

जातवेदस्यायामृच्यच्युतत्वलिङ्गं दर्शयति—'जातवेदसे सुनवाम सोममिति जातवेदस्याऽच्युता' इति। प्रथमेऽहन्यस्या ऋचो विहितत्वादच्युतत्वम्। सूक्तान्तरे लिङ्गं दर्शयति—"यज्ञेन वर्धत जातवेदसमिति जातवेदस्यं वृधन्वद्वितीयेऽहनि द्वितीयस्याह्नो रूपमह्नो रूपम्" इति। जातवेदोदेवताकत्वं तु(वृ)धन्वल्लिङ्गं चात्र विस्पष्टम्। अभ्यासोऽध्यायपरिसमाप्त्यर्थः॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणे विंशाध्याये चतुर्थः खण्डः॥

चतुर्थपञ्चिका समाप्ता.

प्रतिपाद्यविषयः—

एतद्भाष्यमूलभूते No. 76 कोशे प्रदर्शिता ऐतरेयब्राह्मणीयचतुर्थपञ्चिकागता विषया एवैतत्कोशपरिदृश्यमाने भाष्ये प्रमाणोपन्यासादिपूर्वकं विशदीक्रियन्ते॥

वक्तव्यविशेषः—

कोशेऽस्मिन् समूलानुवादं सायणीयैतरेयब्राह्मणभाष्यं चतुर्थपञ्चिकामात्रस्य परिदृश्यते॥

No. 85 (B 4).

ऐतरेयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Aitareya-Brāhmaṇa-Bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Paper.
Size—$7\frac{3}{4} \times 6\frac{1}{4}$ inches.
Character—Telugu.
Folios—158.
Lines on a page—12.
Letters in a line—20.

Age of Ms.—Appears to be modern.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

हरिः ओं॥ अथाग्निहोत्रं पयसः प्रशंसा तद्दोहनायातिविनिष्क्रीतश्च।
तस्य प्रशंसाऽभ्युदिते च होमे ब्रह्मार्त्विजो . . . योऽप्यधीताः ॥

ब्रह्मणः कर्तव्याभिधानेन प्रावस्तुद्बुद्धिस्थितिः?। तस्याग्निष्टोमे कर्तव्यं विधातुमुपाख्यानमाह—" देवा ह वै सर्वचरौ सत्रं निषेदुस्ते ह पाप्मानं नापजघ्निरे तान् होवाचार्बुदः काद्रवेयस्सर्पऋषिर्मित्र(र्मन्त्र)कृदेका वै वो होत्राऽकृता तां वोऽहं करवाण्यथ पाप्मानमपहनिष्यध्वं इति ते ह तथेत्यूचुस्तेषां ह स्म स मध्यन्दिने मध्यन्दिन एवोपासर्पद्ब्राव्णोऽभिष्टौति" पुरा कदाचिद्देवाः [1](होत्राकृता तांवोऽहंकरवा एषपाप्मानमपहनिष्यध्वं इति तदेवाः) सर्वचरुनामके देशविशेषे सत्रं कञ्चिदनुष्ठितवन्तः । ते देवास्तेन सत्रेण स्वकीयं पाप्मानं दारिद्र्यहेतुं नापजघ्निरे न विनाशितवन्तः ॥

उपसंहारः—

ब्राह्मणाच्छंसिना शंसितव्यो योऽयं वृषाकपेः सोऽयमैन्द्रः, एतशप्रलापश्च सर्वच्छन्दस्स्थानीयः । तथास[ति] प्रमंहिष्ठायेत्यादिक इन्द्रदेवताके जगतीच्छन्दस्के यः कामोऽस्ति स कामः तत्र वृषाकपि(पा)वैतशप्रलापे च प्राप्तो भवति । अथ अपिचेदमवद्रप्(प्स) इत्यादिकं सूक्तमैन्द्रावार्हस्पत्यम् । तत्रत्यान्तिमा परिधानीया चैन्द्रावार्हस्पत्या । तत्रोभयत्रेन्द्रनिमित्तः काम उपाप्तो भवति । तस्मात्कारणात्प्रा . . मत्र सभूप (संभूय) न संशंसेत् ॥ अभ्यासोऽध्यायसमाप्तयर्थः ॥

॥ इति त्रिंशाध्याये दशमः खण्डः ॥

॥ षष्ठपञ्चिका समाप्ता ॥

प्रतिपाद्यविषयः—

एतद्भाष्यमूलभूते No. 76 कोशे प्रदर्शिता ऐतरेयब्राह्मणीयषष्ठपञ्चिकागता विषया एवैतत्कोशपरिदृश्यमाने भाष्ये मूलार्थविशदीकरणपूर्वकं विव्रियन्ते ॥

वक्तव्यविशेषः—

कोशोऽस्मिन् समूलानुवादं सायणीयैतरेयब्राह्मणभाष्यं षष्ठपञ्चिकामात्रस्य दृश्यते ॥

---

[1] कुण्डलितग्रन्थोऽधिक इति भाति.

No. 86 (B 5).

ऐतरेयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Aitareya-Brāhmaṇa-Bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyaṇa.	Size—$7\frac{3}{4} \times 6\frac{1}{4}$ inches.
Substance—Paper.	Character—Telugu.
Folios—74.	Condition of Ms.—Good.
Lines on a page—13.	Correct or incorrect—Incorrect.
Letters in a line—23.	
Age of Ms.—Appears to be modern.	Complete or incomplete—Incomplete.

उपक्रमः—

रेतःप्रैषप्रासजन्मप्रतिष्ठाक्लृप्तिं शिल्पैर्यज्ञसंस्काररूपम् ।
अग्निष्टोमे शिल्पशस्त्रावक्लृप्तिं नाराशंस्यान्प्राह कुम्भाय शस्त्रम् ॥

वर्णितं शस्त्रजातं तु होतृहौत्रकगोचरम् ।
पशोरुपत्रतीयस्य विभागस्त्वथ कथ्यते ॥

आश्वलायनः सत्रिणां धर्मेष्वेवमाह—"सुत्यासु हविरुच्छिष्टभाज एव स्युर्धानाः करम्भः परिवापः पुरोडा (ळा) शः पयस्या इति तेषां यद्यत्कामयेरन् तत्तदुपविगुल्फयेयुः" इति। प्राणधारणाय यथा पर्याप्यते तथा हविश्शेषस्याधिक्येन सम्पादनमुपरितनं(विगुल्फनं)। एवंविधान् हविश्शेषभक्षानुक्ता पुनरप्यन्त एवमुवाच—"अपिवाऽन्यत्र सिद्धं गार्हपत्ये पुनरधिश्रित्योपव्रतयेरन्नन्यान्वा पथ्यान्भक्षणा(क्षाना)मूलफलेभ्य एतेन वर्तयेयुः पशुना वा" इति। अन्यत्र सिद्धं गृहे पक्वमन्नं पुनरपि गार्हपत्ये सकृदवस्थाप्योपव्रतयेरन्नुपभुञ्जीरन्। अन्यान्वा लड्डुकमण्डकादीन् भक्ष्यान् पथ्यानजीर्णादिदोषरहितान् मूलफलपर्यन्तमिच्छया स्वीकुर्यात् (युः)। एतेन सुत्यादिदिनेषु सन्निहितेन सवनीयपशुना च वर्तयेयुः जीवनरूपां वृत्तिं संपादयेयुः। इत्येवं सवनीयपशुरूपस्य हविषः शेषभक्षणेन सत्रिणां जीवनमप्यभिहितम्। तस्मिन् पशौ कस्य को

विभाग इति जिज्ञासायां तद्विभागकथनं प्रतिजानीते—अथात इति। अथ होतृहौत्रकशस्त्रनिर्णयानन्तरं सतां (यतः) शस्त्राद्यनुष्ठायिनां जीवनोपायोऽपेक्षितः अतः कारणात्सवनीयस्य पशोर्विभक्तिः कथ्यते ॥

उपसंहारः—

यथाऽऽदित्यो द्युलोके प्रतिष्ठितस्तपति एवमेते श्रियां गजाश्वादिकायां सम्पदि प्रतिष्ठितास्सन्तस्तपन्ति शत्रूणां तापं कुर्वन्ति। तथा सर्वाभ्यो दिग्भ्यः सर्वदिगवस्थितेभ्यो राजभ्यः सकाशाद्बलिमावहन्तः करमाददानाः स्वामिनो भवन्ति। नराशंसभक्षं पुनरपि फलकथनेन प्रशंसति—" आदित्य इव ह वै श्रियां प्रतिष्ठितस्तपति सर्वाभ्यो दिग्भ्यो बलिमावहत्युग्रं ह्यस्य राष्ट्रमव्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानो यजमानः " इति। पूर्ववद्व्याख्येयम्। अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणे पञ्चत्रिंशेऽध्याये अष्टमः खण्डः ॥

॥ सप्तमपञ्चिका समाप्ता ॥

प्रतिपाद्यविषयः—

एतद्भाष्यमूलभूते No. 76 कोशे निर्दिष्टा ऐतरेयब्राह्मणीयसप्तमपञ्चिकागता विषया एवैतत्कोशदृश्यमाने भाष्ये मूलार्थस्फुटीकरणपूर्वकं प्रकाश्यन्ते ॥

वक्तव्यविशेषः—

कोशोऽस्मिन् समूलानुवादं सायणीयैतरेयब्राह्मणभाष्यं सप्तमपञ्चिकामात्रस्योपलभ्यते ॥

No. 87 (1916).

ऐतरेयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Aitareya-Brāhmaṇa-Bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyaṇācārya.	Size—17 × 1⅜ inches.
Substance—Palm-leaf.	Character—Nāgarī.

Folios—58.
Lines on a page—6.
Letters in a line—5.
Age of Ms.—Old.
Condition of Ms.—First seven pages are worm-eaten; letters are missing here and there on account of moth eating.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 86 कोशवत्.

उपसंहारः—

पूर्वमयज्ञसंयुक्तः कल्पो विजयिनो राज्ञोऽभिहितः। इदानीं पुत्रकामानामपि सर्वेषां विधत्ते—'पुत्रकामा ह्याप्याख्यापयेरन् लभन्ते ह पुत्रान्' इति। ये पुत्रकामास्सन्ति ..... प्रसिद्धमेतदुपाख्यानं अप्याख्यापयेरन् ब्राह्मणमुखाच्छृणुयुरित्यर्थः। ते पुत्रान् लभन्ते॥

प्रतिपाद्यविषयः—

एतद्भाष्यमूलभूते No. 76 कोशे सूचिता ऐतरेयब्राह्मणीयसप्तमपञ्चिकाभागगता विषया एवैतत्कोशदृश्यमाने भाष्ये मूलार्थनिरूपणपूर्वकं स्फुटीक्रियन्ते॥

वक्तव्यविशेषः—

कोशेऽस्मिन् समूलानुवादं सायणीयैतरेयब्राह्मणभाष्यं सप्तमपञ्चिकायामादितः प्रभृति समग्रप्रायत्रयस्त्रिंशाध्यायान्तमुपलभ्यते॥

No. 88 (B 6).

ऐतरेयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Aitareya-Brāhmaṇa-Bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Paper.
Size—$7\frac{3}{4} \times 6\frac{1}{4}$ inches.
Character—Telugu.

Folios—76.
Lines on a page—12.
Letters in a line—17.
Age of Ms.—Appears to be modern.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

फलाख्यचमसो भक्षो राज्ञो यज्ञे प्रकीर्तितः ।
उच्यते राजयज्ञेऽस्मिन् विशेषः स्तोत्रशस्त्रतः योः ॥

तदेतत्प्रतिजानीते—अथातः स्तुतशस्त्रयोरेव इति । अथ राज्ञो भक्षे विशेषकथनानन्तरं यतः स्तुतशस्त्रयोर्विशेषो जिज्ञासितः अतः कारणात्तयोरेव विशेष उच्यत इति शेषः । तं विशेषं वक्तुमादौ विशेषरहितमंशं दर्शयति—ऐकाहिकं प्रात इति ॥

उपसंहारः—

एवं व्रतमाचरतः फलं दर्शयति—अपि ह यद्य. श्ममूर्धा द्विषन्भवति क्षिप्रं हैवैनं स्तृणुते स्तृणुत इति । अस्य राज्ञोऽनुष्ठातुः द्विषन् शत्रुः यद्यश्ममूर्धा पाषाणसदृशशिरस्को भवति । अतिप्रबल इत्यर्थः । तथाऽप्ययं कर्मविशेषः क्षिप्रमेवैनं शत्रुं स्तृणुते हिनस्ति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीमद्राजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कभूपालसाम्राज्यधुरन्धरस्य सायणाचार्यस्य कृतौ माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणभाष्ये चत्वारिंशेऽध्याये पञ्चमः खण्डः समाप्तः ॥

॥ अष्टमपञ्चिका समाप्ता ॥

प्रतिपाद्यविषयः—

एतद्भाष्यमूलभूते No. 76 कोशे निर्दिष्टा ऐतरेयब्राह्मणीयाष्टमपञ्चिकागता विषया एवैतत्कोशदृश्यमाने भाष्ये मूलार्थनिरूपणपूर्वकं प्रकाश्यन्ते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् सायणीयं समूलानुवादमैतरेयब्राह्मणभाष्यमष्टमपञ्चिकामात्रस्य परिदृश्यते ॥

No. 89 (3333).

गोपथब्राह्मणम्.

Go-patha-Brāhmaṇam.

Substance—Palm-leaf.
Size—$17\frac{1}{2} \times 1\frac{5}{8}$ inches.
Lines on a page—7.
Letters in a line—62.
Age of Ms.—Old.
Condition of Ms.—Appears to be good; worm-eaten here and there.

Character—Grantha
Folios—48—135.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

ओम् ॥ ब्रह्म ह वा इदमग्र आसीत्, स्वयं त्वेकमेव तदैक्षत, महद्वै यक्षं तदेकमेवास्मि, हन्ताहं मदेव मन्मात्रं द्वितीयं देवं निर्मिम इति। तदभ्यश्राम्यदभ्यतपत्समतपत्। तस्य श्रान्तस्य संतप्तस्य ललाटे स्नेहो यदार्द्रमाजायत। तेनानन्दत्तमब्रवीत् महद्वै यक्षं सुवेदमविदामह इति। तद्यदब्रवीन्महद्वै यक्षं सुवेदमविदामह इति तस्मात्सुवेदोऽभवत्तं वा एतं सुवेदं सन्तं खेद इत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः ॥

उपसंहारः—

तद्यदेतत्तृचमैन्द्राबार्हस्पत्यं सूक्तं शंसति। ऐन्द्राबार्हस्पत्या परिधानीया विशो अदेवीरभ्याचरन्तीरिति। अपरजना ह वै विशो अदेवीः। न ह्यस्यापरजनं भयं भवति सन्तो (शान्ताः) प्रजाः कल्पास्सहन्ते यत्रैवंविदं शंसति यत्रैवंविदं शंसतीति ब्राह्मणम् ॥

प्रतिपाद्यविषयः—

अथर्वशाखीयेऽस्मिन् गोपथब्राह्मणे भागद्वयं दृश्यते। तत्र पूर्वभागे पञ्च प्रपाठका दृश्यन्ते। तत्र प्रथमे प्रपाठके—आथर्वणमन्त्राविर्भावप्रतिपादिका आख्यायिकाः प्रणवगायत्र्यादिस्वरूपविषये विचारादिकं च

दृश्यते । द्वितीये—ब्रह्मचर्यप्रशंसादिकं, तृतीये—ऋग्वेदविद एव होतृत्वमित्याद्यर्थं उपपादकोपाख्यानादि, चतुर्थे—दीक्षाप्रशंसनपूर्वकं ब्रह्मोद्वात्रादीनां दीक्षाविधानादिकं, पञ्चमे—षडहपञ्चाहचतुरहत्र्यहद्व्यहैकाहादियज्ञप्रभेदगाधप्रतिष्ठादिकं चाभिधीयते ॥

उत्तरभागे च प्रपाठकषट्कं दृश्यते । तत्र प्रथमे—ब्रह्मसदनाब्रुवनिरसनप्रशंसा 'बृहस्पतिर्ब्रह्म' इत्यादि मन्त्रजपप्रशंसनं च, द्वितीये—पश्वालम्भप्रशंसादिकं, तृतीये—वषट्कारानुवषट्कारयोः प्रशंसादिकं, चतुर्थे—स्तोत्रविशेषप्रगाधविशेषाद्याभिधानम्, पञ्चमे-प्रथममध्यमोत्तमरूपस्तुतिपर्यायोपपादकाख्यानादिकम्, षष्ठे-मैत्रावरुणकर्तृकशंसने अहःक्रमनियामकोपाख्यानादिकं चाभिधीयते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् ब्राह्मणमिदं समग्रं दृश्यते.

No. 90 (3320).

* जैमिनीयब्राह्मणम् (तलवकारब्राह्मणम्).

* Jaiminīya-Brāhmaṇam (Talavakāra-Brāhmaṇam).

Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—56 + 49.
Lines on a page—9.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

Subject in brief :—

Sāyaṇa has enumerated eight Brāhmaṇas all of which belong to Kauthuma Śākhā; but, Jaiminīya-Brāhmaṇa which is not mentioned by him seems not to belong to the above Śākhā. On account of this reason as well as by the mention of the name of Talavakārācārya in this book, it may be presumed that this work belongs to Talavakāra Śākhā.

उपक्रमः—

उज्जहारागमाम्भोधेर्यो धर्मामृतमञ्जसा ।
न्यायैर्निर्मथ्य भगवान् स प्रसीदतु जैमिनिः ॥

तदाहुः को नु जुहोति कस्मिन् हूयत इति, प्राणेनैव जुहोति प्राणे हूयते तद्यदेतदग्नीन्मन्थन्ति यजमानस्यैव तत्प्राणान् जनयन्ति तद्यावद्वै मन्थन्ति न तर्हि प्राणित्यरण्योरेवास्य तर्हि प्राणा भवन्ति तस्य वै मथ्यमानस्य भस्मावशीर्यतेऽन्नमेवास्य तज्जायतेऽन्नं म एतदजनीत्येव तद्विद्याद्धूमोऽनुनिनर्दति मन एवास्य तज्जायते मनो म एतदजनीत्येव तद्विद्यादङ्गारोऽनुनिवर्तते चक्षुरेवास्य तज्जायते चक्षुर्म एतदजनीत्येव तद्विद्यात् ॥

उपसंहारः—

ते देवाः प्रजापतिमुपेत्याब्रुवन् एकं वाव किल सामास गायत्रमेव यद्वावग्नो गायत्रं शिरोऽभूत्तत्समभूत्तथा न तृतीयसवनं तमब्रुवन् यत इदमादिथाः किमह भविष्यतीति सोऽब्रवीत् छन्दांस्यत्र प्रतिवप्स्यामि छन्दोभिरेता आख्या इष्यन्त इति तस्मादेता गायत्रीस्सतीश्छन्दोभिराख्यायन्तेऽथोपगीतेनैव तेऽजयन्त ते सर्व एव साङ्गास्सतनवोऽमृतास्संभवन् सर्वो हैव साङ्गस्सतनुरमृतस्संभवति य एवं वेदैतस्मिंस्तद्यद्विद्वान् श्रेयान् भवतीति ह स्माह शाट्यायनिः ॥

प्रतिपाद्यविषयः—

जैमिनीयब्राह्मणेऽस्मिन् तत्तदाख्यायिकानिरूपणपूर्वकमग्निहोत्राहोरात्रयज्ञपात्रसायंप्रातराहुत्याज्याहुतिक्षीराहुत्यादिप्रशंसनं, अधिश्रयणात्परं यजमानमरणे वत्सनाशेऽग्न्यनुगतावग्निसंसर्गे च प्रायश्चित्तानि, ज्योतिष्टोमषोडश्यतिरात्रोक्थ्यादीनां प्रशंसनं, तत्र तत्र गेयानि सामान्यप्यभिधीयन्ते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् जैमिनीयब्राह्मणं समग्रं दृश्यते । सायणार्यपरिगणितेष्वष्टसु सामशाखीयब्राह्मणेष्वेतन्नामधेयादर्शनान्नेदं ब्राह्मणं कौथुमशाखीयमिति प्रतिभाति । अत एवात्र कोशे क्वचित्क्वचित्तलवकाराचार्यनामदर्शनादिदं तलवकारशाखीयं स्यादित्यपि संभाव्यते ॥

No. 91 (A 468/1).

जैमिनीयब्राह्मणम् (तलवकारब्राह्मणम्).

Jaiminīya-Brāhmaṇam (Talavakāra-Brāhmaṇam).

Substance-Paper manuscript.
Size—12½ × 7¾ inches.
Character—Telugu.
Folios—163.
Lines on a page—20.
Letters in a line—16.

Age of Ms.—Appears to be recent.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 90 **कोशवत्**.

उपसंहारः—

No. 90 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 90 **कोशे द्रष्टव्यः**.

वक्तव्यविशेषः—.

No. 90 **कोशवत्**.

No. 92 (3321/1).

जैमिनीयोपनिषद्ब्राह्मणम्.

Jaiminīyōpaniṣad-brāhmaṇam.

Substance—Palm-leaf.
Size—15¾ × 1½ inches.
Character—Grantha.
Folios—56.
Lines on a page—9.
Letters in a line—40.

Age of Ms.—Not very old.	Correct or incorrect—Not so very correct.
Condition of Ms.—Good.	Complete or incomplete—Complete.

उपक्रमः—

प्रजापतिर्वा इदं त्रयेण वेदेनाजयद्यदस्येदं जितं तत्स ऐक्षतेत्थं वेद्वा अन्ये देवा अनेन वेदेन यक्ष्यन्त इमां वाव ते जितिं जेष्यन्ति येयं मम हन्त त्रयस्य रसमाददा इति स भूरित्येव ऋग्वेदस्य रसमादत्त सेयं पृथिव्यभवत् तस्य यो रसः प्राणेदत् सोऽग्निरभवद्रसस्य रसः ॥

उपसंहारः—

भूर्भुवस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहीति । अग्निर्वै भर्गः । आदित्यो वै भर्गः । चन्द्रमा वै भर्गः । स्वाधयो यो नः प्रचोदयादिति । यज्ञो वै प्रचोदयात् । स्त्री च वै पुरुषश्च प्रजनयतः । भूर्भुवस्सुवस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादिति । यज्ञो वै प्रचोदयति । स्त्री च वै पुरुषश्च प्रजनयतः । यो वा एतां सावित्रीमेवं वेद । अप पुनर्मृत्युं तरति सावित्र्या एव सलोकतां जयति सावित्र्या एव सलोकतां जयति ॥ हरिः ओम् ॥

उपनिषद्ब्राह्मणं समाप्तम् ॥

प्रतिपाद्यविषयः—

अत्र गायत्रीप्रणवादिसामानि तत्र तत्राख्यायिकाप्रदर्शनपूर्वकं यज्ञोपयुक्तानि सामादीनि च निरूप्यन्ते ॥

तथा तत्तत्सामविषयाणि पृथिवीप्राणादिदृष्ट्योपासनानि चाभिधीयन्ते । तुरीयाध्याये च दशमेऽनुवाके केनोपनिषदात्मके मनःप्रभृतीन्द्रियप्रवृत्तेस्तत्प्रवर्तकचेतनमन्तरेणानुपपन्नत्वात्प्रवर्तकचेतनरूपपरब्रह्मविषया ब्रह्मविद्याऽभिधीयते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् जैमिनीयोपनिषद्ब्राह्मणं समग्रं दृश्यते । ब्राह्मणेऽस्मिन् चत्वारोऽध्यायास्सन्ति । अत्रत्य एव चतुर्थाध्याये दशमानुवाकः केनोपनिषदभिख्यया प्रथते । केनोपनिषदि श्रीशंकराचार्यभाष्ये च 'केनेषितमित्याद्योपनिषत्परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारम्भः' इत्य-

वतरणदर्शनात्केनोपनिषन्नवमाध्यायरूपेति प्रतीयते । अत्र ब्राह्मणे त्विय चतुर्थाध्याये दशमानुवाकरूपतया परिदृश्यते ॥

No. 93 (A 468/2).

जैमिनीयोपनिषद्ब्राह्मणम्.

Jaiminīyōpaniṣad-Brāhmaṇam.

Substance—Palm-leaf.
Size—$12\frac{1}{2} \times 7\frac{1}{2}$ inches.
Character—Telugu.
Folios—83.
Lines on a page—20.
Letters in a line—16.

Age of Ms.—Appears to be recent.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 92 **कोशवत्.**

उपसंहारः—

No. 92 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 92 **कोशवत्.**

वक्तव्यविशेषः—

No. 92 **कोशवत्.**

No. 94 (1959/2).

ताण्ड्यब्राह्मणम्.

Tāṇḍya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$19\frac{1}{4} \times 1\frac{5}{16}$ inches.
Character—Nāgarī.
Folios—125.

Lines on a page—7.
Letters in a line—76.
Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

हरि॰ ओम् ॥ महन्मेऽवोचो भर्गो मेऽवोचो यशो मेऽवोचः स्तोमं मेऽवोचो भुक्तिं मेऽवोचः सर्वं मेऽवोचस्तन्माऽवतु तन्मावि॰शतु तेन भहु (भुक्षु) षीय देवो देवमेतु सोमः सोममेत्वृतस्य पथा विहाय दौष्कृत्यं बद्धानामाऽसि सृतिस्सोमसरणी सोमं गमेयं पितरो भूः पितरो भूः पितरो भूर्न्नमणा ऊर्ध्वभरसं वोर्ध्वभरा दृशेयं मृदा शिथिरा देवानां तीर्थं वेदिरसि मा मा हि॰सीर्विष्णोश्शिरोऽसि यशोदा (धा) यशोमयि धेहीष ऊर्ज आयुषे वर्चसे च ॥

उपसंहारः—

तदेष श्लोको विश्वसृजः प्रथमे सत्रमासत सहस्रसमं प्रस्तुतेन यन्तस्ततो (स्ते) ह जज्ञे भुवनस्य गोपा हिरण्मयः शकुनो ब्रह्मनामेति ब्रह्मणः सलोकतां सार्ष्टितां सायुज्यं गच्छन्ति य एतदुपयन्ति तदेतद्विश्वसृजां सहस्रसंवत्सरमेतेन वै विश्वसृजः सर्वामृद्धी (द्धि) माप्नुवन् सर्वामृद्धी (द्धि) मृध्नुवन्ति य एतदुपयन्ति ॥

प्रतिपाद्यविषयः—

ब्राह्मणेऽस्मिन् पञ्चविंशतिरध्यायास्सन्ति—

तत्र प्रथमे १० खण्डेषु—यज्ञे उद्गातृभिर्गेयानि स्तोत्रस्तोमभागरूपाणि यज्ञ्यभिधीयन्ते ॥

द्वितीये १७ खण्डेषु—दशरात्रस्तोमगतोद्यत्यादिविष्टुतयो विधि॰यन्ते ॥

तृतीये १३ खण्डेषु—त्रिणवादिस्तोमगतप्रतिष्ठितादिविष्टुतयोऽभिधीयन्ते ॥

चतुर्थे १० खण्डेषु—गवामयनसत्रसंबन्धीनि षष्ट्यधिकत्रिशतविषुवस्तुत्याहानि प्रोच्यन्ते ॥

पञ्चमे १० खण्डेषु—महाव्रते होतुः शिरआदिपञ्चविधपृष्ठस्तोत्रमभिधीयते ॥

षष्ठे १० खण्डेषु—सर्वयज्ञप्रकृतिभूतोऽग्निष्टोमो निरूप्यते ॥

सप्तमे १० खण्डेषु—बहिष्पवमानादीनां सामानि स्तुतिप्रकाराश्चाभिधीयन्ते ॥

अष्टमे १० खण्डेषु—अभिचारप्रयोगार्थं ब्रह्मसाम विधीयते ॥

नवमे १० खण्डेषु—तत्तन्न्यूनतानिवारकप्रायश्चित्तकथनपूर्वकमतिरात्रादयो निरूप्यन्ते ॥

दशमे १२ खण्डेषु—व्यूढद्वादशाहो निरूप्यते ॥

एकादशे ११ खण्डेषु—दाशरात्रिकस्तोत्रीयसाम विधीयते ॥

द्वादशे १३ खण्डेषु—तृतीये दाशरात्रिके स्तोमा विधीयन्ते ॥

त्रयोदशे १२ खण्डेषु—कतिचित् स्तोमविशेषा निरूप्यन्ते ॥

चतुर्दशे १२ खण्डेषु—छन्दोमस्तोमो निरूप्यते ॥

पञ्चदशे १२ खण्डेषु—अष्टाचत्वारिंशस्तोमकल्प्तिर्दृश्यते ॥

षोडशे १६ खण्डेषु—अग्निष्टोमविकृतयोऽभिधीयन्ते ॥

सप्तदशे१४ खण्डेषु—व्रात्ययज्ञादिकमभिधीयते ॥

अष्टादशे ११ खण्डेषु—उपहव्यऋतेपयशुनासीर्यवैश्यस्तोमतीव्रसुतवाजपेयराजसूया विधीयन्ते ॥

एकोनविंशे १९ खण्डेषु क्रतुद्वन्द्वविधानं दृश्यते ॥

विंशे १६ खण्डेषु अहीनादिकल्प्तिर्दृश्यते ॥

एकविंशे १५ खण्डेषु—गर्गत्रिरात्रशेषचतूरात्रपञ्चरात्राण्यभिधीयन्ते ॥

द्वाविंशे १८ खण्डेषु—षड्रात्रप्रभृत्येकादशरात्रपर्यन्ताः सत्रभेदा निरूप्यन्ते ॥

त्रयोविंशे २८ खण्डेषु द्वादशरात्रप्रभृतिद्वात्रिंशद्रात्रपर्यन्ताः सत्रभेदा अभिधीयन्ते ॥

चतुर्विंशे २० खण्डेषु—त्रयस्त्रिंशद्रात्रप्रभृतिसंवत्सरपर्यन्ताः सत्रभेदा निरूप्यन्ते॥

पञ्चविंशे १८ खण्डेषु—आदित्यपृष्ठानयनादिसहस्रसंवत्सरपर्यन्ताः सत्रभेदाः प्रपञ्च्यन्ते ॥

वक्तव्यविशेषः—

ताण्डिनाम्ना महर्षिणा प्रचारितत्वादिदं ताण्ड्यब्राह्मणमित्याभिधीयते। इदमेव च पञ्चविंशत्यध्यायघटितत्वात् पञ्चविंशतिब्राह्मणमिति अतिबृहत्त्वात् आदौ महत्पदश्रवणाच्च प्रौढब्राह्मणं महाब्राह्मणमिति च व्यपदिश्यते। कौथुमिप्रभृतिसर्वशाखीयमन्त्राणां प्रायशोऽत्र दर्शनात् सर्वसामशाखिनामुपयोगाच्च सामशाखीयेष्वष्टसु ब्राह्मणेष्विदमादिमं परिगण्यते। अत एव श्रीमत्सायणार्यैः 'अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम्, इत्यभाषि। कोशेऽस्मिन्निदं ब्राह्मणं समग्रं दृश्यते॥

No. 95 (1670/1).

ताण्ड्यब्राह्मणम्.

Tāṇḍya-Brāhmaṇam.

Substance—Palm-leaf.
Size—16½ × 1½ inches.
Character—Grantha.
Folios—119.
Lines on a page—9.
Letters in a line—57.
Age of Ms.—Ancient.

Condition of Ms.—Almost good; here and there letters are missing owing to worm-eating.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 94 कोशवत्.

उपसंहारः—

No. 94. कोशवत्.

प्रतिपाद्यविषयः—

No. 94 कोशवत्.

वक्तव्यविशेषः—

No. 94 कोशवत्.

No 96 (3007).

ताण्ड्यब्राह्मणम्.

Tāṇḍya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$17\frac{3}{4} \times 1\frac{5}{8}$ inches.
Character—Grantha.
Folios—109
Lines on a page—9.
Letters in a line—58.

Age of Ms.—Ancient.
Condition of Ms.—Almost all the leaves are worm-eaten and their ends are broken.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 94 **कोशवत्.**

उपसंहारः—

No. 94 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 94 **कोशवत्.**

वक्तव्यविशेषः—

No. 94 **कोशवत्.**

No. 97 (2497/7).

ताण्ड्यब्राह्मणम्.

Tāṇḍya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.

Folios—97–222.
Lines on a page—6.
Letters in a line—69.

Age of Ms.—Ancient.
Condition of Ms.—Not good; worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 94 **कोशवत्.**

उपसंहारः—

No. 92 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 92 **कोशवत्.**

वक्तव्याविशेषः—

No. 92 **कोशवत्.**

No. 98 (1946).

ताण्ड्यब्राह्मणम्.

Tāṇḍya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$13\frac{1}{4} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—63.
Lines on a page—8.
Letters in a line—63.
Age of Ms.—Ancient.
Condition of Ms.—Not so very good; worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

हरिः ओम् ॥ प्रजापतिरकामयत बहु स्यां प्रजायेयेति स एतमग्निष्टोममपश्यत्तमाहरत्तेनेमाः प्रजा असृजतैकादशेन च वै सता स्तोत्रेणाग्निष्टोमस्यासृजतैकादशेन च मासा संवत्सरस्य ता द्वादशेन च स्तोत्रेणाग्निष्टोमस्य पर्यगृह्णाद्द्वादशेन च मासा संवत्सरस्य ॥

उपसंहारः—

सर्वेषां वा एतच्छन्दसां रूपं यत्रिपदास्तेन गायत्र्यो यदेकादशाक्षराणि पदानि तेन त्रिष्टुभो यद्द्वादशाक्षरं पदं तेन जगत्यो यत्त्रयस्त्रिंशदक्षरास्तेन विराजस्तेनानुष्टुभो न ह्येकस्मादक्षराद्विराधयन्ति त्रयस्त्रिंश एव स्तोमो भवति प्रतिष्ठायै देवतासु वा एष प्रतिष्ठितः ॥

॥ तृतीयपञ्चिका समाप्ता ॥

प्रतिपाद्यविषयः—

No. 94 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् द्वितीयतृतीयपञ्चिके एव दृश्येते.

No. 99 (C 831).

ताण्ड्यब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Tāṇḍya-Brāhmaṇa-Bhāṣyam, styled, Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Paper.
Size—$16\frac{1}{4} \times 6$ inches.
Character—Nāgarī.
Folios—190.
Lines on a page—16.
Letters in a line—64.

Age of Ms.—Appears to be old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

तत्कटाक्षेण तद्रूपं दधद्भुक्कमहीपतिः ।
आदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्गृहात् ।
कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥
व्याख्याताबृग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणव्याख्यां करोम्यौद्गात्रवृ(वु)द्धये ॥
पञ्चविंशतिरध्याया महति ब्राह्मणे स्थिताः ।
आद्येऽध्याये श्रुता मन्त्रा उद्गातुर्यजुरात्मकाः ॥
ये तु मन्त्राः स्तोत्ररूपा उत्तरासु तृचेषु ते ।
योनिवद्गानमूहित्वा पठ्यन्ते तद्विधेर्वशात् ॥
यद्योन्यां गानमाम्नातं तदेवोत्तरयोर् ऋचोः ।
गायेदिति स्तोत्रकल्पत्वै साम्नामूहो विधीयते ॥
आवृत्तियुक्तं तत्साम स्तोम इत्यभिधीयते ।
द्वयोरध्याययोः स्तोमप्रकारा बहुधा श्रुताः ॥
चतुर्थाध्यायमारभ्य गवामयनिकादयः ।
क्रतूनां विधयः प्रोक्ता एषोऽस्मिन् ब्राह्मणे क्रमः ॥
प्रथमाध्यायगा मन्त्रा विनियोगपुरस्सरम् ।
व्याख्यायन्ते सर्वसोमयागेष्वेतेऽङ्गतां गताः ॥

ननु प्रथमाध्याये समाम्नातानां महन्मे वोच इत्यादीनां मन्त्राणां क्रत्वङ्गत्वमयुक्तम् ; क्रतुप्रकरणमध्ये पाठाभावात् ॥

उपसंहारः—

संवत्सरशब्दः स्वावयवभूतेऽहनि अवयवलक्षणया वर्तते । त्रिवृतः संवत्सरा इत्युक्ते त्रिवृत्स्तोमकयागयुक्तान्यहानीत्युक्तं भवति । तस्माद्विश्वसृजामृषीणामिदं सहस्रदिनमिति सिद्धान्तः ॥

मध्येपृष्ठं पूर्वमुक्तं पञ्चविंशे ततः परम् ।
उक्तमङ्गिरसां सत्रं द्वितीयवतोस्स्मृ(स्त)तः ॥
तृतीयमयनं प्रोक्तं चतुर्थं कुण्डपायिनाम् ।
तापश्चितं ततः प्रोक्तं ततो द्वादशवत्सरम् ॥
षट्त्रिंशद्वत्सरं प्रोक्तं शाक्यानामिह सप्तमम् ।
अष्टमं त्विह साध्यानां शतसंवत्सरं ततः ॥

अग्नेस्सहस्रसाख्यं (ख्यं) तु परं सारस्वतं त्रये (त्रयम्)।
दार्षद्वतं ततः प्रोक्तं तुरायणमतः परम् ॥
एकैको यजमानोऽत्र स्यादिष्ट्या(ष्ट्य)यनयोस्तयोः।
सर्पसत्रं ततः प्रोक्तं ततस्त्रयब्दं प्रकीर्तितम् ॥
द्वे सहस्रसमे पूर्वं तयोरुक्तं प्रजापतेः।
ततो विश्वसृजामुक्तमुक्तान्यष्टादश त्विह ॥
॥ इति पञ्चविंशाध्यायेऽष्टादशः खण्डः ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क-
भूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते
माधवीये सामवेदार्थप्रकाशे ताण्ड्यब्राह्मणे
पञ्चविंशोऽध्यायः संपूर्णः ॥

प्रतिपाद्यविषयः—

श्रीमत्सायणार्यप्रणीतेऽस्मिन् ताण्ड्यब्राह्मणभाष्ये ललितयैव शैल्या मूलार्थस्साधु प्रकाश्यते। प्रतिपाद्यविषयश्च एतन्मूलभूते No. 94 कोशे द्रष्टव्यः ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् प्रथमचतुर्थपञ्चमपञ्चिकानां भाष्यं दृश्यते.

No. 100 (C 864):

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Paper.
Size—$8\frac{1}{4}\times3\frac{7}{8}$ inches.
Character—Devanāgarī.
Folios—372.
Lines on a page—9.
Letters in a line—30.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ ब्रह्म संधत्तं तन्मे जिन्वतम् । क्षत्त्रꣳ संधत्तं तन्मे जिन्वतम् । इषꣳ संधत्तं तां मे जिन्वतम् । ऊर्जꣳ संधत्तं तां मे जिन्वतम् । रयिꣳ संधत्तं तां मे जिन्वतम् । पुष्टिꣳ संधत्तं तां मे जिन्वतम् । प्रजाꣳ संधत्तं तां मे जिन्वतम् । पशून्त्सं (थ्सं) धत्तं तान्मे जिन्वतम् । स्तुतोऽसि जनंधाः । देवास्त्वा शुक्रपाः प्रणयन्तु ॥

उपसंहारः—

विश्वंमेनाननुप्रजायते । ब्रह्मणस्सायुज्यꣳ सलोकतां यन्ति । एतासामेव देवतानाꣳ सायुज्यम् । सार्ष्टिताꣳ समानलोकतां यन्ति । य एतदुपयन्ति । ये चैनत्प्राहुः । येभ्यश्चैनत्प्राहुः । ओम् ॥

प्रतिपाद्यविषयः—

तैत्तिरीयब्राह्मणेऽस्मिन् त्रीण्यष्टकानि परिदृश्यन्ते । तत्र प्रथमेऽष्टके अष्टौ प्रश्नास्सन्ति ॥

तत्र च प्रथमे अग्न्याधेयब्राह्मणप्रश्ने—शुक्रामन्थिग्रहप्रशंसनं आधानकालनिर्णय इत्यादिकं परिदृश्यते ॥

द्वितीये गवामयनब्राह्मणप्रश्ने—आधानमन्त्राः नवाहः गवामयनमित्यादयोऽभिधीयन्ते ॥

तृतीये वाजपेयब्राह्मणप्रश्ने—पुनराधानवाजपेयपिण्डपितृयज्ञादिकं प्रतिपाद्यते ॥

चतुर्थे सोमादिब्राह्मणप्रश्ने—ग्रहा अभिधीयन्ते ॥

पञ्चमे नक्षत्रेष्टिप्रश्ने—नक्षत्रेष्टकामन्त्रादिकं दृश्यते ॥

षष्ठे राजसूयानुब्राह्मणप्रश्ने—राजसूयोपयोगिप्रक्रिया अनुमत्यादीष्टयश्च प्रतिपाद्यन्ते ॥

सप्तमे राजसूयानुब्राह्मणप्रश्ने—शुनासीरीयहोमादयोऽभिधीयन्ते ॥

अष्टमे राजसूयब्राह्मणप्रश्ने—हविर्विशेषाभिधानपूर्वकमवेष्टिपशुबन्धादयो निरूप्यन्ते ॥

द्वितीयाष्टके अष्टौ प्रश्नास्सन्ति ।

तत्र प्रथमे अग्निहोत्रब्राह्मणप्रश्ने—सोपोद्घातमग्निहोत्रमभिधीयते ।

द्वितीये होतृब्राह्मणप्रश्ने—दशहोत्रादिमन्त्राणां क्रत्वर्थपुरुषार्थप्रयोगादिकं निरूप्यते ॥

तृतीये होतृब्राह्मणशेषप्रश्ने—सर्वेषां होतृमन्त्राणां चतुर्होतृत्वव्यवहारादिकं कथ्यते ॥

चतुर्थे उपहोमप्रश्ने—उपहोमे विनियोज्या ऋच आम्नायन्ते ॥

पञ्चमे उपहोमशेषप्रश्ने—उपहोमशेषभूता मन्त्रा आम्नायन्ते ॥

षष्ठे सौत्रामणिप्रश्ने—सौत्रामण्यादियागोपयोगिग्रहादयोऽभिधीयन्ते ॥

सप्तमे सवप्रश्ने—बृहस्पत्यादिसवा अभिधीयन्ते ॥

अष्टमे काम्यपशुयाज्यानुवाक्याब्राह्मणे—काम्यानां पशूनां याज्यानुवाक्यामन्त्राः संगृह्यन्ते ॥

तृतीयाष्टके द्वादश प्रश्ना दृश्यन्ते । अत्र सप्तममच्छिद्रप्रश्नतया अष्टमनवमौ अश्वमेधप्रश्नतया दशमप्रभृति त्रीन् प्रश्नांश्च काठकप्रश्नतया व्यवहरन्ति ॥

तत्र प्रथमे नक्षत्रेष्टिब्राह्मणप्रश्ने—नक्षत्रेष्टीनां याज्यानुवाक्याः तत्तन्नक्षत्रेष्टयश्चाभिधीयन्ते ॥

द्वितीये दर्शपूर्णमासेष्टिब्राह्मणप्रश्ने—वत्सापाकरणदर्वीहोमादिकं कथ्यते ॥

तृतीये दर्शपूर्णमासेष्टिब्राह्मणप्रश्ने—स्रुक्संमार्जनं मार्जनार्थदर्भाणामग्नौ प्रेक्षपादिकं च कथ्यते ॥

चतुर्थे—पुरुषमेधोऽभिधीयते ॥
पञ्चमे—इष्टिहौत्रमन्त्रा आम्नायन्ते ॥
षष्ठे—यूपसंस्कारः पाशुकहौत्रमन्त्राश्च परिदृश्यन्ते ॥
सप्तमे—यज्ञे आन्तरालिकव्यतिक्रमपरिहारकप्रायश्चित्तादिकं कथ्यते। अत एवायं प्रश्नो यज्ञच्छिद्रपूरकत्वादच्छिद्रप्रश्न इत्यभिधीयते ॥
अष्टमे अश्वमेधप्रश्ने—स्वामिसंस्कारकथनपूर्वकमश्वमेधीयप्रथमाहकर्तव्यमुच्यते ॥
नवमे अश्वमेधप्रश्ने—अश्वमेधीयद्वितीयाहकर्तव्यान्यभिधीयन्ते ॥
दशमे प्रथमकाठकप्रश्ने—सावित्रचयनमभिधीयते ॥
एकादशे द्वितीयकाठकप्रश्ने—नाचिकेतचयनं दृश्यते ॥
द्वादशे तृतीयकाठकप्रश्ने—चातुर्होत्रवैश्वसृजचयने अभिधीयेते ॥

वक्तव्यविशेषः—
कोशेऽस्मिन् तैत्तिरीयब्राह्मणं समग्रं सकाठकप्रश्नमुपलभ्यते ॥

No. 101 (1413).

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—19 × 1½ inches.
Character—Grantha and Telugu.
Folios—152.
Lines on a page—8.
Letters in a line—76.
Age of Ms.—Old.
Condition of Ms.—Not so very good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—
No. 100 कोशवत्.

उपसंहारः—
No. 100 कोशवत्.

प्रतिपाद्यविषयः—

No. 100 **कोशवत्**.

वक्तव्यविशेषः—

No. 100 **कोशवत्**। कोशेऽस्मिन् उदात्तादिस्वरसूचका रेखा न दृश्यन्ते ॥

No. 102 (2684/1.)

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$13\frac{3}{5} \times 8\frac{1}{4}$ inches.
Character—Nāgarī.
Folios—77.
Lines on a page—13.
Letters in a line—90.

Age of Ms.—Old.
Condition of Ms.—Appears to be good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 100 **कोशवत्**.

उपसंहारः—

No. 100 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 100 **कोशवत्**.

वक्तव्यविशेषः—

No. 100 **कोशवत्**.

No. 103 (4274/1).

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$13\frac{1}{4} \times 2$ inches.
Character—Grantha.
Folios—264.
Lines on a page—9.
Letters in a line—45.

Age of Ms.—Old.
Condition of Ms.—Leaves are damaged to a little extent.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 100 **कोशवत्**.

उपसंहारः—

यत्रैतेन यज्ञेन यजन्ते। एष वै क्लृप्तो नाम यज्ञः। कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः। यत्रैतेन यज्ञेन यजन्ते॥ . . . . तार्प्येणाश्वं।

प्रतिपाद्यविषयः—

No. 100 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

कोशेऽस्मिन् तृतीयाष्टके नवमप्रश्ने (अश्वमेधप्रश्ने) एकोनविंशानुवाकान्तं तैत्तिरीयब्राह्मणं दृश्यते। अत्रापि कोशे उदात्तादिस्वरसूचका रेखा न दृश्यन्ते॥

No. 104 (1520).

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{4}$ inches.
Character—Grantha.
Folios—96.

Lines on a page—7.
Letters in a line—48.
Age of Ms.—Old.
Condition of Ms.—The letters on the leaves are missing here and there, on account of worm-eating.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 100 कोशवत्.

उपसंहारः—

यदिदं किं च। य एवं वेद। कल्पतेऽस्मै। स वा अयं मनुष्येषु यज्ञस्सप्तहोता। अमुत्र सद्भ्यो देवेभ्यो हव्यं वहति। य एवं वेद। उपैनं यज्ञो नमति। यो वै चतुर्होतॄणां निदानं वेद। निदानवान् भवति॥ अग्निहोत्रं वै दशहोतुर्निदानम्। दर्शपूर्णमासौ चतुर्होतुः। चातुर्मास्यानि पञ्चहोतुः। पशुबन्धष्षड्ढोतुः। सौम्योऽध्वरस्सप्तहोतुः। एतद्वै चतुर्होतॄणां निदानम्। य एवं वेद। निदानवान् भवति॥

प्रतिपाद्यविषयः—

No. 100 कोशवत्.

वक्तव्याविशेषः—

कोशोऽस्मिन् द्वितीयाष्टके द्वितीयप्रश्नान्तं तैत्तिरीयब्राह्मणं दृश्यते। अत्रापि कोशे उदात्तादिस्वरसूचका रेखा न दृश्यन्ते॥

No. 105 (1511/1).

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Grantha.
Folios—63.
Lines on a page—8.
Letters in a line—54.

Age of Ms.—Old.
Condition of Ms.—Too bad.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अङ्गिरसो वै सत्रमासत। तेषां पृश्निर्धर्मधुगासीत्। सर्जीषेणाजीवत्। तेऽब्रुवन्। कस्मै नु सत्रमास्महे। येऽस्या ओषधीर्न जनयाम इति। ते दिवो वृष्टिमसृजन्त। यावन्तस्तोका अवापद्यन्त। तावतीरोषधयोऽजायन्त। ता जाताः पितरो विषेणालिम्पन्॥

उपसंहारः—

तेन वयं भगवन्तस्स्याम। तं त्वा भग सर्व इज्जोहवीमि। स नो भग पुर एता भवेह। समध्वरायोषसो नमन्त। दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नः। रथमिवाश्वा वाजिन आवहन्तु। अश्वावतीर्गोमतीर्न उषासः। वीरवतीस्सदमुच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीनाः। यूयं पात स्वस्तिभिस्सदा नः॥

प्रतिपाद्यविषयः—

No. 100 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयब्राह्मणे द्वितीयाष्टकमात्रं दृश्यते। अत्रापि कोशे उदात्तादिस्वरसूचका रेखा न दृश्यन्ते॥

No. 106 (574).

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—16½ × 1½ inches.
Character—Grantha.
Folios—85.
Lines on a page—8.
Letters in a line—56.
Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 105 कोशवत्.

उपसंहारः—

No. 105 कोशवत्.

प्रतिपाद्यविषयः—

No. 100 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

No. 105 कोशवत्.

No. 107 (1703).

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$13\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—123.
Lines on a page—8.
Letters in a line—56.
Age of Ms.—Old.

Condition of Ms.—Leaves are broken and letters are missing here and there.

Correct or incorrect—Not so very correct.

Complete or incomplete—Incomplete.

उपक्रमः—

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासञ्जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः । यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिकाभिराभिसंवसानः । अग्निर्नो देवः सुविते दधातु । प्रजापते रोहिणी वेतु पत्नी । विश्वरूपा बृहती चित्रभानुः ॥

उपसंहारः—

No. 100 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 100 **कोशे द्रष्टव्यः**.

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयब्राह्मणे तृतीयाष्टकमात्रं सकाठकप्रश्नमुपलभ्यते । अत्रापि कोशे उदात्तादिस्वरसूचका रेखा न दृश्यन्ते ॥

No. 108 (1519).

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$16\frac{7}{8} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—90+1-26.
Lines on a page—8.
Letters in a line—52.
Age of Ms.—Old.

Condition of Ms.—Letters are missing here and there, due to worm-eating.

Correct or incorrect— Appears to be correct.

Complete or incomplete—Incomplete.

उपक्रमः—

No. 107 **कोशवत्**.

उपसंहारः—

No. 100 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 100 **कोशे द्रष्टव्यः**.

वक्तव्यविशेषः—

No. 107 **कोशवत्**.

No. 109 (1448/1)

तैत्तिरीयब्राह्मणम्.

Taittirīya-Brāhmaṇam.

Substance—Palm-leaf.
Size—$16\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Telugu.
Folios—61.
Lines on a page—8.
Letters in a line—64.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 107 **कोशवत्.**

उपसंहारः—

यो वा अश्वस्य मेध्यस्य विवर्तनं वेद । अश्वस्यैव मेध्यस्य विवर्तने विवर्तने जुहोति । असौ वा आदित्योऽश्वः । स आहवनीयमागच्छति । तद्विवर्तते । यदग्निहोत्रं जुहोति । अश्वस्यैव मेध्यस्य विवर्तने विवर्तने जुहोति । एतदनुकृति ह स्म वै पुरा । अश्वस्य मेध्यस्य विवर्तने विवर्तने जुह्वति ॥

प्रतिपाद्यविषयः—

No. 100 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

कोशेऽस्मिन् काठकप्रश्नवर्जं तृतीयाष्टकमात्रं दृश्यते । अत्रापि कोशे उदात्तादिस्वरसूचका रेखा न दृश्यन्ते ॥

No. 110 (A 8).

तैत्तिरीयब्राह्मणभाष्यं ज्ञानयज्ञाख्यम्.

Taittirīya-Brāhmaṇa-Bhāṣya, styled Jñānayajña.

Author—Bhaṭṭabhāskara-miśra.
Substance—Paper.
Size—13 × 8½ inches.
Character—Telugu.
Folios—136.
Lines on a page—20.
Letters in a line—22.
Age of Ms.—Not too recent.
Condition of Ms.—Good.
Correct or incorrect—Corrections made here and there.
Complete or incomplete—Incomplete.

Subject in brief :—

Since a quotation from this Bhāṣya appears in the Mādhavīya Dhātuvritti, as well as Bhaṭṭabhāskara is referred to by name in the latter work, the author of this Bhāṣya, namely Bhaṭṭabhāskara is decidedly prior in time to Sāyaṇa.

उपक्रमः—

वन्दे वेदामरतरुं नानाशाखोपशोभितम् ।
स्वर्गापवर्गफलदं विबुधैरुपसेवितम् ॥
वन्दे निश्रेयसोपायधर्मब्रह्मात्मबोधिने ।
वेदाय सर्वगुरवे शिवाय च नमो नमः ॥
ईशानः सर्वविद्यानां भूतानामीश्वरः परः ।
पुनातु सर्वदा युष्मान् शब्दब्रह्मतनुश्शिवः ॥

अथ पारक्षुद्राननुक्रमिष्यामः । अनारभ्याधीतानां प्रकृत्यर्थत्वात्तल्लिङ्गवचनाभ्यां नीयमानानि विकृत्यर्थानि । तत्राद्योऽनुवाकः शुक्रामन्थिग्रहप्रचारे विनियुक्तः । तत्र जघनेनोत्तरवेदिं ग्रहावरुन्धे वा सन्धत्तोऽध्वर्युः प्रतिप्रस्थाता च ब्रह्म सन्धत्तामिति यजूंषि । ग्रहकाण्डत्वा-

त्सोमार्षेयम्। ब्रह्म ब्राह्मणजातिं ब्रह्मवर्चसं वा मदीयं सन्धत्तं संहितमविच्छिन्नं कुरुतं मया सह। किंच तत् ब्रह्म मे जिन्वतं [मयि] प्रीणयतम्॥

उपसंहारः—

व्युष्टिर्वा इत्यादि। एवं विदित्वा यजमानश्च व्युच्छति। वस्यसी वस्यसी व्युच्छतीति सामर्थ्यात्। अथो अपि खलु तमश्च सर्वं बाह्याभ्यन्तरं चापहते। व्यत्ययेनात्मनेपदम्। अग्निष्टोममिति। अग्निष्टोममुदयनीयमन्ते आहरति। अग्नेस्सर्वदेवतात्वात्तासु (त्मकत्वेन सर्वदेवतासु) प्रतिष्ठितो भवति। सन्तिष्ठते राजसूयः॥

॥ इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये पारक्षुद्रे
प्रथमेऽष्टके अष्टमप्रपाठके दशमोऽनुवाकः॥
॥ समाप्तश्च प्रपाठकः॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने तैत्तिरीयब्राह्मणभाष्यभागे No. 100 मूलकोशे प्रदर्शितानां प्रथमाष्टकीयानां विषयाणां विवरणं नातिविस्तृतं नातिसंगृहीतं च तत्र तत्रोदात्तादिस्वरप्रवृत्तिकथनपूर्वकं प्रणीतं दृश्यते॥

वक्तव्यविशेषः—

कोशेऽस्मिन् प्रथमाष्टकमात्रस्य भाष्यं दृश्यते। वाराणसीसंस्कृतपाठशालात आनीतं कोशमादर्शीकृत्य लिखितोऽयं कोशः, 1895 तमे क्रैस्ताब्दे कोशान्तरावलम्बेन संशोधितश्च॥

एतद्ब्राह्मणभाष्यप्रणेता भट्टभास्करमिश्रः कौशिकगोत्रज इति तृतीयाष्टकान्ते परिदृश्यमानेन

एष निष्पावके शाके कुशिकान्वयजन्मना।
भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रवर्तितः॥

इत्यनेन श्लोकेनावगम्यते। केचिदेतच्छ्लोके 'निष्पावके शाके' इत्यत्र कादिनवेत्यक्षरगणितक्रममनुसृत्य 1420 तमशकाब्दकालिकत्वमस्य भट्टभास्करमिश्रस्य स्यादित्यभ्यूहन्ते। तथा—अत्रत्यनिष्पावकशाकशब्दार्थं परामृशन्तः पावकरहिततण्डुलादिशाकैः ज्ञानयज्ञः प्रकीर्तित

इत्यर्थं च वर्णयन्ति। तत्र ज्ञानयज्ञे शाकस्योपयोगाभावात् एतद्भाष्यरूपज्ञानयज्ञस्य शाकसाध्यत्वाभिधानं नोपयुज्यत इति भाति ॥

किंच—कोशान्तरेषु तथा पाठोऽपि न दृश्यते। किंतु 'एष निष्पावकज्ञेन' 'एष निष्पावकेऽशोके' इत्याद्यपादपाठौ दृश्यते। तत्र च यज्ञाचरणदशायां होमार्थं पावकस्यापेक्षितत्वेऽपीदृशभाष्यरूपज्ञानयज्ञाचरणदशायां न तदपेक्षणमिति, यज्ञे पशोर्विशसनाच्छोकसंभवेऽपि नात्र ज्ञानयज्ञे तत्संभव इति चार्थः प्रतीयते ॥

तथाऽत्र 'निष्पावके शाके' इति सप्तम्यन्तपाठो लेखकप्रमादपतितः स्यात्। 'निष्पावकोऽशोकः' इति प्रथमान्तपाठस्तु समीचीन इति प्रतिभाति ॥

ततश्चायं श्लोको ग्रन्थकर्तुः भट्टभास्करस्य कालसूचनाय न प्रभवतीति प्रतिभाति। अतश्चायं भट्टभास्करः सायणाचार्यादर्वाचीन इत्यत्र प्रमाणं गवेषणीयम् ॥

वस्तुतस्तु—माधवीयायां धातुवृत्तौ भ्वादिप्रकरणे षूदधात्वर्थनिरूपणावसरे "क्षरणस्वादुकरणनाशनार्थत्वं अहोरात्राणि मरुतो विलिष्टं सूदयन्त्वित्यत्राह भट्टभास्करः" इत्यनेन भट्टभास्करनामोत्कीर्तनपूर्वकं "अहोरात्राणि मरुतश्च तव विलिष्टं विनाशितं विश्लिष्टं वा सूदयन्तु क्षारयन्तु स्वादुकुर्वन्तु वा। यद्वा—यद्विश्लिष्टं यागायोग्यं यद्विरूपं विशसितं तद्विनाशयन्त्विति" इति तैत्तिरीयसंहितापञ्चमकाण्डीयद्वितीयप्रश्नगतद्वादशानुवाकीयो भट्टभास्करीयभाष्यग्रन्थ एवानूदितो दृश्यते। तस्मादयं भट्टभास्करः सायणाचार्यात्प्राचीन एवेति निश्चीयते ॥

इत्थं च "तथाऽपि भट्टभास्करोऽयं माधवाचार्यान्न प्राचीन इति तु निश्चितमेवेति विदो विदांकुर्वन्तु" इत्यानन्दाश्रममुद्रितभट्टभास्करीयरुद्राध्यायभाष्यभूमिकायां अक्षोभ्यमुनिं विशिष्टाद्वैतवादिनं मन्वानैर्विना प्रमाणप्रदर्शनं यत्प्रतिज्ञातं, तत्र किं वा प्रमाणं स्यादिति विपश्चिद्भिर्विमर्शनीयमित्युपरम्यते ॥

No. 111 (135).

तैत्तिरीयब्राह्मणभाष्यं ज्ञानयज्ञाख्यम्.

Taittirīya-Brāhmaṇa-Bhāṣya, styled Gñānayajña.

Author—Bhaṭṭabhāskara-miśra.
Substance—Palm-leaf.
Size—$17 \times 1\frac{7}{16}$ inches.
Character—Telugu.
Folios—116 + 12.
Lines on a page—9.
Letters in a line—110.
Age of Ms.—Old.
Condition of Ms.—Ends of the leaves are broken.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

आद्यश्लोकद्वयं विना No. 110 कोशवत्.

उपसंहारः—

तथा एतासामेव देवतानां विश्वसृजां सायुज्यं सार्ष्टितां समानलो- . . . . . प्राहुः एतन्माहात्म्यं कीर्तयन्ति, येभ्यश्च श्रोतृभ्यः श्रद्दधानेभ्य एतन्माहात्म्यं प्राहुः, ते सर्वेऽपि तुल्यफलभाजो भवन्ति। किं सत्यमेतदित्यसंभावयन्तं प्रति पुनरवगच्छति—ओं इति ॥ एतत्सर्वं सत्यमित्यर्थः। मन्त्रोऽयमृगेकेषाम्। यजुरे[के]षाम् ॥ नवमोऽनुवाकः ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेद . . . . . ॥

एष निष्पावकश्रेन कुशिकान्वयजन्मना।
भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रवर्तितः ॥

प्रतिपाद्यविषयः—

एतत्कोशपरिदृश्यमानभाष्ये एतन्मूलभूते No. 100 कोशे प्रदर्शितानां तैत्तिरीयब्राह्मणप्रथमाष्टकतृतीयाष्टकद्वितीयाष्टकभागीयविषयाणां नातिसंगृहीतं नातिविस्तृतं च विवरणं दृश्यते ॥

वक्तव्याविशेषः—

कोशेऽस्मिन् 1—116 + 12 पत्रेषु प्रथमाष्टकस्य, सकाठकप्रश्नस्य तृतीयाष्टकस्य च भाष्यं दृश्यते। ततः 12—28 पत्रेषु द्वितीयाष्टके आदितः प्रभृति चतुर्थप्रश्ने तृतीयानुवाके 121 तमवाक्यपर्यन्तं लिखितं दृश्यते। ततश्च 3 पत्रेषु तैत्तिरीयसंहितापञ्चमकाण्डे समग्रप्रायपञ्चमानुवाकान्तस्य भाष्यं दृश्यते। No. 110 कोशे आदौ दृश्यमानं—'वन्दे वेदामरतरुं' 'वन्दे निश्रेयसोपाय' इत्यादिकं पद्यद्वयमत्र कोशे न दृश्यते॥

No. 112 (710).

तैत्तिरीयब्राह्मणभाष्यं ज्ञानयज्ञाख्यम्.

Taittirīya-Brāhmaṇa-Bhāśyam, styled Jñānayajña.

Author—Bhaṭṭabhāskara-miśra.
Substance—Palm-leaf.
Size—$15\frac{1}{4} \times 1\frac{5}{16}$ inches.
Character—Telugu.
Folios—157.
Lines on a page—6.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Too bad.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 110 कोशवत्.

उपसंहारः—

आहवनीये जुहोति—इदमू नु श्रेय इति जगत्या त्रिष्टुभा। इदमु इदमेव नः अस्माकं श्रेयः प्रशस्यतरं अ[न्ये]भ्यो गृहेभ्यः अवसानं यागगृहं . . . ताः स्मः। छान्दसे लुङि 'मन्त्रे घस' इति च्लेर्लुक्। यदिदं गोजित् गवां जेतृ लाभहेतुः धनजित् प्रधानानां वस्त्राणां

जेतृ . . . . महाघाणामश्वानामपि . . . . मादवसान(ना)न्तरं प्रशस्यतरमाह। वनस्पतेरित्यदि सुबोधम् ॥

॥ इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये तृतीयाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥
॥ समाप्तः प्रपाठकः ॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने भट्टभास्करीयतैत्तिरीयब्राह्मणभाष्यभागे मूलस्थक्लिष्टशब्दानां प्रक्रियाप्रदर्शनपूर्वकं तत्रतत्रोदात्तादिस्वरप्रवृत्तिसूचनपूर्वकं च नातिविस्तृतं नातिसंगृहीतं च विवरणं दृश्यते। एतत्प्रतिपाद्यविषयश्च एतन्मूलभूते No. 100 कोशे द्रष्टव्यः ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् 19—45 पत्रेषु प्रथमाष्टके प्रथमप्रश्नस्य, ततः 10—21 पत्रेषु प्रथमाष्टकीयद्वितीयप्रश्ने 111 तमवाक्यप्रभृति प्रथमानुवाकान्तस्य, ततः 6 पत्रेषु प्रथमाष्टकीयतुरीयप्रश्ने अष्टमानुवाकस्य, ततः 56+46—107 पत्रेषु तृतीयाष्टके द्वितीयप्रश्नप्रभृति सप्तमप्रश्नान्तस्य च भाष्यं दृश्यते ॥

No. 113 (A 178).

तैत्तिरीयब्राह्मणभाष्यं ज्ञानयज्ञाख्यम्.

Taittirīya-Brāhmaṇa-Bhāṣyam, styled Jñānayajña.

Author—Bhaṭṭabhāskara-miśra.
Substance—Paper.
Size—13¼ × 8 inches.
Character—Telugu.
Folios—32.
Lines on a page—24.
Letters in a line—25.
Age of Ms.—Not too modern.
Condition of Ms.—Good.
Correct or incorrect—Corrected here and there.
Complete or incomplete—Incomplete.

उपक्रमः—

अतः परमग्निहोत्रब्राह्मणमन्नयार्षेयम्। अङ्गिरसो वा इत्यादि। आसिरस्मिन् विषये सकर्मक इत्येके। सत्रासनं नाम कर्मविशेषः, तमकुर्वन्नित्यन्ये, कंसवधमाचष्टे कंसं घातयतीतिवत्। तेषां पृश्निः शुक्लवर्णा घर्मधुक् प्रवर्ग्यार्थस्य पयसो दोग्ध्र्यासीत्॥

उपसंहारः—

ईदृशं यजमानं अतिथिं अतिथिवदर्चनीयं अग्निं स्तुम इति सामर्थ्याद्गम्यते। आ न इति। हे हर्यश्व विश्वाभिरूतिभिः रक्षाप्रकारैः सक्ष(ह्)नः असमा(स्मा)नायाहि सजोषा अस्माभिः

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने तैत्तिरीयब्राह्मणभाष्यभागे एतन्मूलभूते No. 100 कोशे प्रदर्शितानां द्वितीयाष्टकभागीयानां विषयाणां नातिविस्तृतं नातिसंगृहीतं च विवरणं दृश्यते॥

वक्तव्यविशेषः—

कोशेऽस्मिन् इदं भाष्यं द्वितीयाष्टके आदितः प्रभृति चतुर्थप्रश्ने तृतीयानुवाके ५५ तमवाक्यान्तं दृश्यते॥

No. 114 (A9, A10).

तैत्तिरीयब्राह्मणभाष्यं ज्ञानयज्ञाख्यम्.

Taittirīya-Brāhmaṇa-Bhāṣya, styled Jñānayajña.

Author—Bhaṭṭabhāskaramiśra.
Substance—Paper.
Size—$13\frac{1}{8} \times 8\frac{1}{4}$ inches.
Character—Telugu.
Folios—90.
Lines on a page—28.
Letters in a line—28.
Age of Ms.—Not too modern.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अधिवसन्ति ते सर्पास्साश्लेषा अस्माकं हवं यज्ञं आगमिष्ठाः अतिशयेनागन्तारः सन्तु। आगन्तृशब्दात् अ(तृ)न्नन्तात् 'तुश्छन्दसि' इतीष्ठन्प्रत्यये 'तुरिष्टेमेयस्सु' इति[टि]लोपः। ये रोचन इति। ये सर्पाः सूर्यस्यापि रोचने मण्डले नियुक्ता वसन्ति, ये च दिवं देवीं द्योतनवतीं अनुसंचरन्ति अनुव्याप्य संचरन्ति॥

उपसंहारः—

एतस्येति॥ एतस्य प्रजापते रूपेणोपलक्षितं प्राजापत्यमृषभं सेक्तारं तूपरं शृङ्गरहितं बहुरूपं नानावर्णं पुरस्तात् अश्वमेधारम्भ एव सांग्रहणीसंज्ञान्योरनन्तरमेव वैशाख्यां पौर्णमास्यामालभते सर्वेभ्यः कामेभ्यः। स च सर्वस्याप्तयै भवति सर्वस्य च जित्यै। तस्मात् तेन तादृशेन पशुनोपलक्षितेन अश्वमेधेन सर्वमाप्नोतीष्टम्। जयति च सर्वं जेतव्यम्। योऽनेन यजते यश्चैनमेवमीदृक्प्रभावपशुं क्रतुं वेद, स च सर्वमाप्नोति जयति च॥

॥ इति नवमे द्वाविंशोऽनुवाकः॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने तैत्तिरीयब्राह्मणभाष्यभागे मूलस्थक्लिष्टशब्दानां प्रक्रियादिप्रदर्शनपूर्वकं नातिविस्तृतं नातिसंगृहीतं च विवरणं दृश्यते। एतत्प्रतिपाद्यविषयश्च एतन्मूलभूते No. 100 कोशे द्रष्टव्यः॥

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयब्राह्मणभट्टभास्करभाष्यं तृतीयाष्टके प्रथमप्रश्ने 51 तमवाक्यप्रभृति नवमप्रश्ने द्वाविंशानुवाकान्तं दृश्यते॥

No. 115 (2652).

तैत्तिरीयब्राह्मणभाष्यं ज्ञानयज्ञाख्यम्.

Taittirīya-Brāhmaṇa-Bhāṣyam, styled Jñānayajña.

Author—Bhaṭṭabhāskara-miśra.

Substance—Palm-leaf.
Size—$11\frac{7}{8} \times 1\frac{1}{2}$ inches.

Character—Grantha.
Folios—72.
Lines on a page—8.
Letters in a line—36.
Age of Ms.—Appears to be old.

Condition of Ms.—Good.

Correct or incorrect—Seems to be incorrect.

Complete or incomplete—Incomplete.

उपक्रमः—

No. 114 **कोशवत्.**

उपसंहारः—

एवं जुषाणस्सोम इति। गतम्। अत्राग्नेराज्यादन्यद्धविरस्ति। सोमस्य नास्ति। अतः सोमस्येदमाज्यं हविरिति मत्वाऽऽह। विणे-(प्रत्ते) नात्मीयेन जन्मना हविःप्रक्षेपजन्मना शोभया जननीयेन वा हविषा स्वां तनुवं शुम्भानः शोभयमानः कविः क्रान्तदर्शनः वावृधे वर्धताम्। छान्दसो लिट्। तुजादीनां [इत्यभ्यासस्य दीर्घः] मिण्मियाभिसुरभि-(गीर्भिः) स्सूक्तिभिः वर्धयामः महायशसं कुर्मः। यस्माद्वयं वचोविदः वचसां वेदितारः वाग्योगविदः, अतस्त्वं सा(सु)मृडीकः सुष्ठु सुखयिता भूत्वा [नः] अस्मान् आविश अनुप्रविश्यानुगृहाण। याज्या गता जुषाण इति॥

इष्टिहौत्रे षष्ठोऽनुवाकः॥

अथ हविषां याज्यानुवाक्याः—

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने तैत्तिरीयब्राह्मणभाष्यभागे मूलस्थपदानां तत्रतत्रोदात्तादिस्वरप्रवृत्तिप्रदर्शनपूर्वकं नातिसंगृहीतं नातिविस्तृतं च विवरणं दृश्यते। प्रतिपाद्यविषयश्च एतन्मूलभूते No. 100 **कोशे द्रष्टव्यः॥**

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं तैत्तिरीयब्राह्मणभट्टभास्करभाष्यं तृतीयाष्टके प्रथम-प्रश्ने 51 **तमवाक्यमारभ्य पञ्चमप्रश्ने षष्ठानुवाकान्तं दृश्यते॥**

No. 116 (134/1).

तैत्तिरीयब्राह्मणभाष्यं ज्ञानयज्ञाख्यम्.

Taittiriya-Brāhmaṇa-Bhāṣyam, styled Jñānayajña.

Auhthor—Baṭṭabhākara-miśra.
Substance—Palm-leaf.
Size—$25\frac{3}{4} \times 2\frac{3}{16}$ inches.
Character—Telugu.
Folios—87-97,75-86,67·75.
Lines on a page—12.
Letters in a line—124.
Age of Ms.—Old.
Condition of Ms.—Appears to be Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

ओम् ॥ 'अग्निर्वा अकामयत' इत्यत्राम्नातानां नक्षत्रेष्टीनां क्रमेण याज्यानुवक्ये द्वेद्वे 'अग्निर्नः पातु' इत्याद्याः । प्रथमा अनुष्टुभः । अन्त्यास्त्रिष्टुभः । वैश्वदेवकाण्डं समस्तोऽयं प्रश्नः । तत्र कृत्तिकानामग्निर्देवता नः अस्मान् पातु रक्षतु । कृत्तिकाश्च नक्षत्रं पातु । देवं देवनशीलं इन्द्रियवत् इन्द्रेण वा दृष्टम् । आसां कृत्तिकानामग्नेश्च आसन् आस्ये । 'पद्दन्न' इत्यादिना आसन्भावः । इदं विचक्षणं विविधप्रकाशसाधनं हविर्जुहोतन जुहुत । तप्तनादिना तनबादेशः ॥

उपसंहारः—

No. 114 कोशवत्

प्रतिपाद्यविषयः—

कोशेऽस्मिन् तैत्तिरीयब्राह्मणभाष्यभागे मूलस्थक्लिष्टशब्दानां तत्र तत्र प्रक्रियास्वरादिप्रदर्शनपूर्वकं नातिसंगृहीतं नातिविस्तृतं च विवरणं दृश्यते । एतत्प्रतिपाद्यविषयश्च एतन्मूलभूते No. 100 कोशे द्रष्टव्यः ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयब्राह्मणस्य तृतीयाष्टके द्वितीयतृतीयतुरीय-पञ्चमसप्तमदशमप्रश्नान् विनाऽवशिष्टानां षण्णां प्रश्नानां भाष्यं दृश्यते ॥

No. 117 (A11).

तैत्तिरीयब्राह्मणकाठकभाष्यं ज्ञानयज्ञाख्यम्.

Taittirīya-Brāhmaṇa-Kāṭhaka-Bhāṣyam, styled Jñānayajña.

Author—Bhaṭṭabhāskara-miśra.
Substance—Paper.
Size—13 × 8¼ inches.
Character—Nāgarī.
Folios—30.
Lines on a page—24.
Letters in a line—28.
Age of Ms. —Not too modern.
Condition of Ms.—Good.
Correct or incorrect—Corrected here and there.
Complete or incomplete—Incomplete.

उपक्रमः—

हरिः ओं ॥ एवमश्वमेधान्तानि तित्तिरिप्रोक्तानि काण्डानि व्याख्यातानि । अथ काठकानि काण्डान्यष्टौ, सावित्रनाचिकेतचातुर्होत्रवैश्वसृजारुणकेतुकानि पञ्च चित्यानि, दिवश्येनयोऽपाघाश्चेष्टयः, स्वाध्यायब्राह्मणमष्टमामिति । तत्र चित्यानां हव्यावाट् काण्डर्षिः । आरुणकेतुकस्य त्वरुणः । इष्टिकाण्डयोर्विश्वेदेवाः । स्वाध्यायविधेर्ब्रह्मा । तत्र सावित्राग्निमन्त्राः संज्ञानमित्यादयः ॥

उपसंहारः—

ये चैनत्प्राहुः एतन्माहात्म्यं कीर्तयन्ति, येभ्यश्च श्रोतृभ्यः श्रद्दधानेभ्यः एतन्महात्म्यं प्राहुः, ते सर्वेऽपि तुल्यफलभाजो भवन्ति । किं सत्यमेतदित्यसम्भावयन्तं प्रति पुनरवगच्छति—ओमिति । एतत्सर्वं सत्यमित्यर्थः । मन्त्रोऽयमृगेकेषाम् [यजुरेकेषाम्]। सर्वथा सर्वार्थसिद्धिः ॥

इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये तृतीये काठके नवमोऽनुवाकः ॥

॥ समाप्तस्तृतीयप्रपाठकः ॥

एष निष्पावकेशोके कुशिकान्वयजन्मना ।
भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रवर्तितः ॥ हरिः ओम् ॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने तैत्तिरीयब्राह्मणभाष्यभागे सावित्रनाचिकेतचातुर्होत्रवैश्वसृजचयनादिप्रतिपादकस्य काठकसमाख्यस्य तैत्तिरीयब्राह्मणतृतीयाष्टकान्तिमप्रश्नत्रयस्य तत्रतत्रोदात्तादिस्वरप्रवृत्तिसूचनपूर्वकं नातिसंगृहीतं नातिविस्तृतं च विवरणं दृश्यते ॥

वक्तव्याविशेषः—

कोशेऽस्मिन् काठकनाम्ना प्रसिद्धस्य तैत्तिरीयब्राह्मणतृतीयाष्टकान्तिमप्रश्नत्रयस्य भाष्यं दृश्यते ॥

No. 118 (3107).

तैत्तिरीयब्राह्मणभाष्यं ज्ञानयज्ञाख्यम्.

Tittirīya-Brāhmaṇa-Bhāṣyam, styled Jñānayajña.

Author—Bhaṭṭabhāskaramiśra.
Substance—Palm-leaf.
Size—17 × 1½ inches.
Character—Grantha.
Folios—69–75.
Lines on a page—8.
Letters in a line—58.
Age of Ms.—Old.
Condition of Ms.—Leaves are worm-eaten and broken.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

ब्रह्मणे ब्राह्मणमित्यादि । चतुर्थ्यन्ता देवताः । द्वितीयान्ताः पशवः। ते च पर्यग्निकृता उत्सृज्यन्ते । आज्येन तद्देवताहुतीर्जुहुयात् । वैश्वदेवकाण्डम् । ब्रह्मणे ब्रह्मचर्यसाधारणं (ब्रह्मवर्चसाय) ब्राह्मणजातीयं ब्रह्मवर्चसवन्तम् । क्षत्राय क्षतात्रायता (का) य बलाय राजन्यं क्षत्रजातीयं महाबलम् । 'राज्ञोऽपत्ये जातिग्रहणम्, इति नापत्यमात्रं राजन्यम् ॥

उपसंहारः—

बुद्धये जामिं, दत्ता, विधवेत्यन्ये । या जामिकं ? निवृत्ताधिकारा

जामित्वं भजते, ऊढा दुहितेत्यपरे। प्रतीक्षायै प्रत्यागमनार्थिन्यै ऋद्धयै कुमारीं अनूढां कन्याम्, सा हि भर्तारं प्रतीक्षते ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदब्राह्मणभाष्ये पुरुषमेधे एकोनविंशोऽनुवाकः ॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने भाष्यभागे एतन्मूलभूते No. 100 कोशे प्रदर्शितानां तैत्तिरीयब्राह्मणतृतीयाष्टकीयतुरीयप्रश्नगतविषयाणां विवरणं नातिसंगृहीतं नातिविस्तृतं च दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं तृतीयाष्टकगततुरीयप्रश्नमात्रस्य दृश्यते.

No. 119 (1129).

तैत्तिरीयब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

Taittirīya-Brāhmaṇa-Bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—$17\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—188.
Lines on a page—6.
Letters in a line—76.
Age of Ms.—Old.
Condition of Ms.-worm-eaten.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

यमस्या गोर्भक्षणाय तृणविशेषानपि नोत्पादयामः तादृशा असमर्था वयं कस्मै खलु प्रयोजनाय सत्रमनुतिष्ठामः। ऋद्धिकामैर्हि सत्रमनुष्ठेयम्। गोग्रासमपि सम्पादयितुमशक्तानामस्माकं का नामान्या समृद्धिर्भविष्यतीति। ततः कारीर्याद्यनुष्ठानेन तैर्वृष्टौ सम्पादितायां यावन्तो जलबिन्दवस्तावत्य ओषधय उत्पन्नाः ॥

उपसंहारः—

अथ हविषो याज्यामाह—'शौशिरेणर्तुना देवाः । त्रयस्त्रिंशेऽमृ . . । . . त्येन रेवतीः क्षत्रम् । हविरिन्द्रे वयो दधुः' इति ॥ . . . . सत्येन सत्यवाक्यहेतुना रेवतीः रेवत्याख्येन साम्ना स्तुतं . . तमविनश्वरं क्षत्रं बलप्रदं हविर्वयश्चेन्द्रे दधुः ॥

इति माधवीये वेदार्थप्रकाशे यजुर्ब्राह्मणे द्वितीयकाण्डे षष्ठप्रपाठके-एकोनविंशोऽनुवाकः ॥

एकोनविंशे वपा पुरोडाशहविषा [षां] याज्यानुवाक्या उक्ताः.

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने तैत्तिरीयब्राह्मणसायणीयभाष्यभागे मूलस्थपदानां सान्वयमर्थमुपवर्ण्य विस्तरेण विवरणं प्रणीतं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं सायणीयं भाष्यं तैत्तिरीयब्राह्मणद्वितीयाष्टके आदौ षष्ठं वाक्यमारभ्य षष्ठप्रश्ने एकोनविंशानुवाकान्तं परिदृश्यते । भाष्यं चेदं भट्टभास्करीयभाष्याद्विस्तृतं दृश्यते ॥

No. 120 (53).

दैवतब्राह्मणम्.

Daivata-Brāhmaṇam.

Substance—Palm-leaf.
Size—$16\frac{7}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—42-44.
Lines on a page—6.
Letters in a line—62.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाऽऽङ्गिरसः पूषा सरस्वतीन्द्राग्नी । इडानिधनानि पदनिधनानंकारानिधनानीत्याग्ने-

यानीति । सर्वाणि निधनवन्त्यैन्द्राण्यन्यान्यादिष्टेभ्यः । सर्वाणि स्वराणि प्राजापत्यानि । यथा वामदेव्यम् ॥

उपसंहारः—

स्मितं विद्युच्छ्वसितं वायुरस्थीनि पर्वतास्समुद्राश्च वासांसि नक्षत्राण्यलङ्कारो य एवं वेद दुष्टुता दुरुपयुक्तानां न्यूनाधिकाश्च? सर्वस्मात्स्वस्ति देवऋषिभ्यश्च ब्रह्म सत्यं च पातुमामिति ब्रह्म सत्यं च पातु मामिति ॥

अथ सावित्र्यङ्गानि व्याख्यास्यामः । अथातो निर्वचनं गायत्री । अथातश्छन्दसां वर्णाः । अग्निरिन्द्रः प्रजापतिः ॥

॥ देवताध्यायस्समाप्तः ॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् परिदृश्यमाने दैवतब्राह्मणे चत्वारः खण्डाः परिदृश्यन्ते । तत्र प्रथमे खण्डे—अग्नीन्द्रप्रजापतिसोमवरुणत्वष्टाङ्गिरसपूषसरस्वतीन्द्राग्निदेवताकानि वस्वादिसंबद्देवताकान्यान्तराणि आन्तरतराण्यान्तरतमानि च सामानि निर्दिश्यन्ते । तथा साम्नां देवतासंबन्धविषये ज्ञातव्यं रहस्यं च प्रकाश्यते ॥

द्वितीये खण्डे—सामाश्रयभूतानां गायत्र्यादिच्छन्दसां शुक्लत्वादयो वर्णा अग्न्यादयो देवताश्चाभिधीयन्ते ॥

तृतीये खण्डे—गायत्र्यादिच्छन्दोवाचकाः शब्दा निरुच्यन्ते ॥

तुरीये खण्डे—गायत्र्याः शिरआदीन्यङ्गान्यभिधीयन्ते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं दैवतब्राह्मणं खण्डचतुष्टयपरिमितं समग्रं दृश्यते । मुद्रिते सभाष्ये दैवतब्राह्मणकोशे तु आद्यास्त्रय एव खण्डा दृश्यन्ते । गायत्र्यङ्गप्रदर्शनपरं तु तुरीयखण्डं तत्र न दृश्यते । तृतीयखण्डान्त एवैतद्ब्राह्मणसमाप्तिरित्यपि तत्र सूचिता दृश्यते ॥

No. 121 (1970/4).

दैवतब्राह्मणम्.

Daivata-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{3}{5} \times 1\frac{3}{5}$ inches.
Character—Nāgarī.
Folios—75-77.
Lines on a page—6.
Letters in a line—50.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 120 **कोशवत्.**

उपसंहारः—

No. 120 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 120 **कोशवत्.**

वक्तव्यविशेषः—

No. 120 **कोशवत्.**

No. 122 (2497/5).

दैवतब्राह्मणम्.

Daivata-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—89-90.
Lines on a page—9.
Letters in a line—64.

Age of Ms.—Old.
Condition of Ms.—Leaves are broken and worm-eaten.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 120 **कोशवत्.**

उपसंहारः—

No. 120 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 120 **कोशवत्.**

वक्तव्यविशेषः—

No. 120 **कोशवत्.**

No. 123 (3647/5).

दैवतब्राह्मणम्.

Daivata-Brāhmaṇam.

Substance—Palm-leaf.
Size—$17\frac{1}{4} \times 1\frac{3}{5}$ inches.
Character—Grantha.
Folios—60-65.
Lines on a page—7.
Letters in a line—56.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 120 **कोशवत्.**

उपसंहारः—

No. 120 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 120 **कोशवत्.**

वक्तव्यविशेषः—

No. 120 कोशवत्.

No. 124 (1937/2).

मन्त्रब्राह्मणम्.

Mantra-Brāhmaṇam.

Substance—Palm-leaf.
Size—$9\frac{7}{8} \times 1\frac{1}{4}$ inches.
Character—Nāgarī.
Folios—14–23.
Lines on a page—9.
Letters in a line—48.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

ओम् ॥ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥
काम वेद ते नाम मदो नामासि समानयाऽमुं सुरा तेऽभवत् ।
परमत्र जन्माग्ने तपसो निर्मितोऽसि स्वाहा ॥

उपसंहारः—

मुञ्च गां वरुणपाशांद्वि(शाद्धि)षन्तं मेऽभिधेहि तं जह्यमुष्य चोभयो-रुत्सृज गामनु तृणानि पिबतूदकम् । माता रुद्राणां दुहिता वसूनां स्वसाऽऽदित्यानाममृतस्य नाभिः । प्रणुवोचं चिकितुषे जनाय मा गाम-नागामधितं(दितिं)वधिष्ट । ओमुत्सृजत ॥

॥ मन्त्रपर्व समाप्तम् ॥

प्रतिपाद्यविषयः—

मन्त्रब्राह्मणेऽस्मिन् सामशाखीये प्रपाठकद्वयं दृश्यते। तत्र प्रथमे प्रपाठके अष्टौ खण्डाः सन्ति ॥

तत्र प्रथमे खण्डे—अग्निपर्युक्षणे ज्ञातिकर्मसु कन्याशिरःप्लावनादिषु अन्तरीयोत्तरीयधारणे कन्यायाः पतिसमीपानयने कटपादप्रवर्तने आज्यहोमे चोपयुक्ता मन्त्रा आम्नायन्ते ॥

द्वितीये खण्डे—अश्माक्रामणलाजहोमसप्तपदाक्रमणकन्याशासनाभिषेचनपाणिग्रहणादिषूपयुक्ता मन्त्राः परिदृश्यन्ते ॥

तृतीये खण्डे—कन्यादोषोपशमनहोमे कन्यानुमन्त्रणे कन्याहृदयैक्यप्रार्थने रथारोहणचतुष्पथातिक्रमणचर्मोपवेशनधृतिहोमेषु च विनियुक्ता मन्त्रा दृश्यन्ते ॥

तुरीये खण्डे—चतुर्थीहोमगर्भाधानपुंसवनोपयोगिमन्त्रा उपलभ्यन्ते॥

पञ्चमे खण्डे—सीमन्तोन्नयनसोष्यन्तीहोमजातकरणनिष्क्रामणनामकरणोपयुक्ता मन्त्राः सन्ति ॥

षष्ठे खण्डे—चूडाकर्मोपनयनयोरिन्द्रियापचारप्रायश्चित्तहोमे चोपयोगिनो मन्त्रा अभिधीयन्ते ॥

सप्तमे खण्डे—समावर्तनोपयोगिनो मन्त्रा दृश्यन्ते ॥

अष्टमे खण्डे—गोचारणादिषूपयुक्ता मन्त्राः सन्ति ॥

एवं द्वितीये च प्रपाठके अष्टौ खण्डा दृश्यन्ते.—

तत्र प्रथमे खण्डे—श्रवणाख्यसर्पबलिकर्मणि नवाग्रयणे च विनियुक्ता मन्त्रा दृश्यन्ते ॥

द्वितीयतृतीयखण्डयोः—आग्रहायण्यां पायसान्नहोमे व्याहृतिजपभूमिजपेषु अष्टकाकर्मणि च विनियुक्ता मन्त्राः परिदृश्यन्ते ॥

तुरीये खण्डे—अग्निपरिसमूहने भोगकामादिकतिचित्काम्यकर्मसु चोपयोगिनो मन्त्रा आम्नायन्ते ॥

पञ्चमे खण्डे—अलक्ष्म्यपनोदनयशस्स्वस्त्ययनादिकाम्यकर्मसु विनियुक्ता मन्त्रास्सन्ति ॥

षष्ठे खण्डे—वास्तुयागे वसादिहोमे श्रवणाग्रहायण्योः कामनाभेदेनाक्षताञ्जलिहोमेषु प्रसादकामादीनां यवहोमादिषु च विनियुक्ता मन्त्रा दृश्यन्ते ॥

सप्तमे खण्डे—कृमिपातनमन्त्रा आम्नायन्ते ॥

अष्टमे खण्डे—अर्घ्यपाद्यपादप्रक्षालनमधुपर्कादिषु विनियुक्ता मन्त्राः परिदृश्यन्ते ॥

वक्तव्याविशेषः—

मन्त्रब्राह्मणमिदं मन्त्रपर्वापराभिधानं सामशाखीयेषु कौथुमीयानां गार्ह्यकर्मोपयोगिमन्त्रसंग्रहरूपं दृश्यते । श्रीसायणार्यप्रणीतैतद्भाष्यपर्यालोचनयेदमुपनिषद्ब्राह्मणस्य पूर्वभागरूपमिति ज्ञायते । यच्चोक्तमेतद्भूमिकायां श्रीसत्यव्रतसामश्रमिभिः—'यच्चोक्तं षष्ठत्वेन मन्त्रं वोपनिषदिति तत्तु सामगप्रसिद्धिविरुद्धमेव, न हि कोऽपि सामगो मन्त्रं व्यवहरत्युपनिषदिति, नाप्युपनिषदं मन्त्रमिति' इति तत्तु तैः त्रयीपरिचये मन्त्रब्राह्मणसायणभाष्यानुपलम्भसूचनात्तथोक्तमिति वयं मन्यामहे। यतस्तत्र सायणार्यैरेव एतद्ब्राह्मणभाष्यारम्भे—

"आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशो ग्रन्था अष्टावुदीरिताः ॥
तत्रोपनिषदाख्यो यः षष्ठो ग्रन्थः स च द्विधा ।
मन्त्रपर्व च विद्येति" इति
'रहस्यत्वात्तु मन्त्राणां विद्यासंनिधिपाठ्यता ।'

इति च मन्त्राणां रहस्यत्वसाम्यादुपनिषत्संनिधिपाठ्यत्वं एतन्मन्त्रपर्वणश्च उपनिषद्ब्राह्मणपूर्वभागरूपत्वं च स्पष्टमेवाभ्यधायीति नास्माभिस्तत्र विशेषतो वक्तव्यमवशिष्यते ॥

No. 125 (1945/2).

मन्त्रब्राह्मणम्.

Mantra-Brāhmaṇam.

Substance—Palm-leaf.
Size—13⅝ × 1¼ inches.
Character—Nāgarī.
Folios—74-88.
Lines on a page—6.
Letters in a line—52.

Age of Ms.—Old.
Condition of Ms.-Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 124 **कोशवत्.**

उपसंहारः—

No. 124 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 124 **कोशवत्.**

वक्तव्यविशेषः—

No. 124 **कोशवत्.**

No. 126 (67/3).

मन्त्रब्राह्मणम्.

Mantra-Brāhmaṇam.

Substance—Palm-leaf.
Size—$13\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Nāgarī.
Folios—62–76.
Lines on a page—6.
Letters in a line—48.

Age of Ms.—Old.
Condition of Ms.—Ends of the leaves are broken.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 124 **कोशवत्.**

उपसंहारः—

इन्द्राम वदात्तमो वः परस्तादहं वो ज्योतिर्मामभ्येतु सर्वे स्वाहा ॥
अन्नं वा एकच्छन्दस्या(स्य)मन्नं ह्येकं भूतेभ्यइछदयतु स्वाहा ॥
श्रीर्वा एषा यत्सत्वानो

प्रतिपाद्यविषयः—

No. 124 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं मन्त्रब्राह्मणं द्वितीयप्रपाठके षष्ठे खण्डे चतुर्दशमन्त्रभागान्तं दृश्यते ॥

No. 127 (1976/2).

* मन्त्रब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

* Mantra-Brāhmaṇa-Bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—116.
Lines on a page—6.
Letters in a line—46.

Age of Ms.—Old.
Condition of Ms.—Leaves are worm-eaten here and there.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

Subject in brief:—

This commentary explains the meanings of the mantras that are pronounced while performing the Grihya Karmas according to Kauthumi Śākhā of Sāma Veda.

उपक्रमः—

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद्भुक्कमहीपतिः ।
आदिशत्सयणाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥
व्याख्यातावृग्यजुर्वेदौ सामवेदोऽपि संहिता ।
व्याख्याता ब्राह्मणस्याथ व्याख्यानं संप्रवर्तते ॥

अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम् ।
षड्विंशाख्यं द्वितीयं स्याच्चतस्सामविधिर्भवेत् ॥
आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशो ग्रन्था अष्टावुदीरिताः ॥
तत्रोपनिषदाख्यो यः षष्ठो ग्रन्थः स च द्विधा ।
मन्त्रपर्व च विद्येति विद्याङ्गत्वेन पर्वणः ॥
यथा वेदा(धा)दिमन्त्राणामास्ति विद्याङ्गता तथा ।
रहस्यत्वात्तु मन्त्राणां विद्यासन्निधिपाठ्यता ॥
असूत्रयत्स्पष्टमेतद्भगवान् बादरायणः ।
वेदा(धा)दीनामर्थभेदादिति . . . ह चिन्तन(न्त्य)ते ॥

विद्या(वेधा)द्यर्थभेदा [दि]ति । अस्त्याधर्वणिकानामुपनिषदारम्भे मन्त्रसमाम्नायः—'सर्वं(शुक्रं)प्रविध्य हृदयं प्रविध्य शिरोभिवृध्य त्रिराविवृङ्क्ते' इत्यादिः । ताण्डिनां—'देव सवितः प्रसुव यज्ञं' इत्यादि ॥

उपसंहारः—

इयं गौः रुद्राणामेकादशसंख्यानां माता निर्मात्री, तथा वसूनामष्टसंख्यानां दुहिता पुत्री, आदित्यानां द्वादशसंख्यानां स्वसा स्वसृस्थानीया, अमृतस्य यज्ञस्य स्वर्गस्य नाभिवद्बन्धिका आज्यक्षीरादिस्तोमसाधनद्रव्यस्योत्पादकत्वात्, चिकितुषे युक्तायुक्तपरिज्ञात्रे, जनाय जात्येकवचनम्, जनेभ्यः प्रनुवोचं प्रावोचं प्राब्रुवम् । किमिति चेदुच्यते—अनागां अनपराधां गामुक्तरूपेण महानुभावां अदितिं अदितिवद्देवादिसर्वमातृभूतां मा वधिष्ट हे देवा हिंसां मा कुरुत । ओमित्यङ्गीकारे । अहन्तव्येत्यङ्गीकृता उत्सृजतु ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्री[वी]रबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्य(र्येण) विरचिते माधवीये वेदार्थप्रकाशे छन्दोगमन्त्रब्राह्मणे मन्त्रपर्वणि द्वितीयप्रपाठके सप्तमः खण्डः ॥

॥ द्वितीयप्रपाठकस्समाप्तः ॥

प्रतिपाद्यविषयः—

एतन्मूलभूते No. 124 कोशे प्रदर्शितानां सामवेदान्तर्गतकौथुमशाखीयगृह्यकर्मोपयोगिमन्त्राणां तत्रतत्र क्लिष्टशब्दव्युत्पत्तिप्रदर्शनपूर्वकमत्र सायणीयभाष्ये पदार्थवाक्यार्थौ ललितयैव शैल्या प्रतिपाद्येते ॥

वक्तव्यविशेषः—

कोशोऽस्मिन्निदं सायणीयमन्त्रब्राह्मणभाष्यं समग्रं दृश्यते.

No. 128 (B 827).

* मन्त्रब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

* Mantra-Brāhmaṇa-Bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—$11\frac{7}{8} \times 1\frac{1}{2}$ inches.
Character—Kannda.
Folios—109.
Lines on a page—12.
Letters in a line—24.

Age of Ms.—Appears to be old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 127 कोशवत्.

उपसंहारः—

No. 127 कोशवत्.

प्रतिपाद्यविषयः—

No. 127 कोशवत्.

वक्तव्यविशेषः—

No. 127 कोशवत्.

No. 129 (668).

* मन्त्रब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

* Mantra-Brāhmaṇa-Bhāṣya, styled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Palm-leaf.

Size—$17\frac{1}{4} \times 1\frac{2}{16}$ inches.
Character—Nāgarī.

Folios—73 + 109.
Lines on a page—10.
Letters in a line—84.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Appears to be complete.

उपक्रमः—

No. 127 **कोशवत्**.

उपसंहारः—

यतो देवीरित्यय्(स्य)पाद्यावेक्षणे विनियोगः । सूत्रितं च—'आपः पश्येद्यतो देवीः' इति । 'यतो देवीः परिपश्याम्यापस्ततो मा राद्धि-(द्धि)रागच्छतु' इति ॥ यजुरिदं मन्त्रदेवताकम् । देवीः देव्यः ॥

प्रतिपाद्यविषयः—

No. 127 **कोशवत्**.

वक्तव्यविशेषः—

कोशेऽस्मिन् इदं भाष्यं द्वितीयप्रपाठकेऽन्त्यखण्डे पञ्चममन्त्रान्तं दृश्यते.

No. 130 (3157/1).

* मन्त्रब्राह्मणभाष्यं वेदार्थप्रकाशाख्यम्.

* Mantra-Brāhmaṇa-Bhāṣyam, styled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—$14\frac{1}{8} \times 1\frac{9}{16}$ inches.
Character—Grantha.
Folios—62.
Lines on a page—9.
Letters in a line—52.
Age of Ms.—Appears to be old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

Subject in brief :—

In this manuscript there appears an entirely new commentary at the first and second Khaṇḍās of the First Prapāṭhaka. This commentary is obviously quite different from that of Sāyaṇa.

उपक्रमः—

प्रणिपत्य गुरूनाद्यान् वेदवेदार्थकोविदान् ।
यत्प्रसादेन जानन्ति प्रवक्तुं मादृशा अपि ॥
अहं यद्यपि शास्त्रार्थप्रमाणवाक्योक्तिविप्लवः ।
तथाऽप्याश्रयसौन्दर्याज्जनोऽमुष्मिन् प्रपश्यतु ॥

अदितेऽनुमन्यस्वेत्यादि यजुरुत्रयम् । पर्युक्षणे विनियोगः । अदित्यादिदेवताकम् । अदितिर्देवमाता । साऽपि सर्वत्र कर्मण्यनुज्ञां दास्यति । हे अदिते त्वं मामनुमन्यस्व अनुजानीहि गौतम कर्म कुर्विंत्येवं ब्रूहि । त्वया ह्यनुज्ञातः कर्म कुर्वन्निष्टफलभाग्भगवतीति । अनुमतिर्नाम देवता सर्वकर्मणामनुमन्त्री । तया ह्यनुमतानि कर्माणि क्रियमाणानि फलवन्ति भवन्ति । या पूर्वा(र्णा)पौर्णमासी साऽनुमतिरिति ब्राह्मणे पठितत्वात् कात्यायनवचनाच्च ॥

राकानुमतिसंज्ञां[ज्ञं]तु पौर्णमासीद्वयं विदुः ।
राका सम्पूर्णचन्द्रा स्यात्का(क)लोनाऽनुमतिः स्मृता ॥

साऽपि पूर्ववदनुज्ञां दास्यति । हे अनुमते त्वं मा अनुमन्यस्व अनुजानीहीत्यर्थः । सरस्वती वाचोऽधिष्ठात्री देवता वा नदी वा । सरतेर्धातोः सरस्वती । सा पूर्ववदनुज्ञां दास्यति । हे सरस्वति त्वमपि मामनुमन्यस्व अनुजानीहीत्यर्थः । [अ] पठितमप्येतन्मन्त्रमध्ये यजुरुत्रयं गृह्यकारेणोक्तमित्युच्यते ॥

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञः[इत्]सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

यत एवमतो देवसवितरित्यादेर्मन्त्रगणस्यार्थोऽभिधीयते ॥

उपसंहारः—

No. 127 कोशवत्.

प्रतिपाद्यविषयः—

No. 127 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् मन्त्रब्राह्मणसायणभाष्यमिदं समग्रं दृश्यते। कोशालयेऽस्मिन् उपलभ्यमानकोशान्तरापेक्षयाऽत्र कोशे परिदृश्यमानभाष्ये प्रथमप्रपाठके प्रथमद्वितीयखण्डयोर्महद्वैलक्षण्यं दृश्यते। सायणभाष्योपोद्घातपरिदृश्यमानानां श्लोकानामत्रानुपलम्भात् आदिमखण्डद्वये बहुशो वैलक्षण्यसत्त्वाच्च भाष्यान्तरं तत्र योजितमिति प्रतिभाति। तृतीयखण्डोत्तरार्धभागमारभ्य कोशान्तरदृश्यमानसायणभाष्यसदृक्षमेव दृश्यते। तत्रतत्र खण्डान्ते च प्रशस्तिपङ्क्तिरपि सायणीयैवात्रापि दृश्यत इतीदं सायणभाष्यमिति निरदेशि॥

No. 131 (2497/7).

वंशब्राह्मणम्.

Vaṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—14½ × 1½ inches.
Character—Nāgarī.
Folios—93-95.
Lines on a page—8.
Letters in a line—56.
Age of Ms.—Old.

Condition of Ms.—Leaves are worm-eaten to a little extent.

Correct or incorrect—Appears to be correct.

Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम्॥ नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नम आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वायवे च नमो मृत्यवे च नमो विष्णवे च

नमो वैश्रवणाय च। उपजायत शर्वदत्ताद्गार्ग्याच्छर्वदत्तो गार्ग्यो रुद्रभूतेर्द्रौह्यायणाद्रुद्रभूतिर्द्रौह्यायणस्त्रातादैषुमतात् ॥

उपसंहारः—

सुमन्तुजैमिनिविश्वामित्रवसिष्ठपराशरजालन्तुबह्वगौतमशाकल्यबाभ्रव्यमाण्डव्यबडवाप्रातिथेयी ये चान्ये आचार्यास्तेभ्यश्च स्वधेति ॥

॥ वंशब्राह्मणं समाप्तम् ॥

प्रतिपाद्यविषयः—

वंशब्राह्मणेऽस्मिन् सामवेदाध्येतॄणां प्रवृत्तिरुच्युत्पादनाय राधनामकमहर्षिपर्यन्तं सामवेदसम्प्रदायप्रवर्तकाचार्यपरंपराद्वैविध्यं ततश्च ब्रह्मपर्यन्तं प्रदर्शितपरंपराया ऐकरूप्यं च प्रदर्श्य तत्तद्दर्षिनामानि निर्दिश्यन्ते। विद्यावंशप्रकाशनपरत्वादेव चास्य वंशब्राह्मणमिति नामधेयं समजायतेति मन्यामहे ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं ब्राह्मणं समग्रं दृश्यते। श्रीसत्यव्रतसामश्रमिभिरेतद्ब्राह्मणसायणभाष्योपोद्घाते 'मन्त्रं वोपनिषत्ततः' इत्यत्र पुष्पिकां प्रक्षिप्य तत्र 'भवेदुपनिषत्ततः इत्यपि पाठः क्वचित्, स त्वसमीचीन इव प्रतिभाति मन्त्रस्याग्रहात्' इति टिप्पणी न्यवेशि। तत्र चास्माकं त्वेवं प्रतिभाति, मन्त्रस्य पार्थक्येनाभ्युपगमे 'अष्टौ हि ब्राह्मणग्रन्थाः' इति श्रीमत्सायणार्योक्त्यसाङ्गत्यभिया षष्ठब्राह्मणस्य मन्त्रब्राह्मणमिति उपनिषद्ब्राह्मणमिति च नामधेययुगलमवश्यमूरीकरणीयम्। अत एव 'मन्त्रं वा' इति वाशब्दः प्रयुक्त उपपद्यते। ब्राह्मणान्तर इव उपनिषद्ब्राह्मणे पूर्वभागरूपत्वं मन्त्राणामित्यभ्युपगमेन न मन्त्रासंग्रहो दोषः प्रसजति। अत एव षष्ठस्योपनिषद्ब्राह्मणस्य मन्त्रविद्याभेदेन द्वैविध्यं

तत्रोपनिषदाख्यो यः षष्ठो ग्रन्थः स च द्विधा।
मन्त्रपर्व च विद्येति . . . . . ॥

इत्यादिना सायणार्यैः स्पष्टमेवाभ्यधायीति 'भवेदुपनिषत्ततः' इत्यपि पाठस्समीचीन इति। कोशेऽस्मिन् मुद्रितकोशेऽनुपलभ्यमानः ऋषिदेवपितृतर्पणक्रमप्रदर्शनपरभागोऽपि वंशब्राह्मणघटकतया निर्दिष्टो दृश्यते।

स चायं भागः सायणार्यैरपि न व्याख्यातो दृश्यत इति तस्य वंश ब्राह्मणान्तर्गतत्वमस्ति न वेति चिन्तनीयम् ॥

No. 132 (3647/7).

वंशब्राह्मणम्.

Vaṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—$17\frac{3}{8} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—65–$67\frac{1}{2}$.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 131 **कोशवत्.**

उपसंहारः—

No. 131 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 131 **कोशवत्.**

वक्तव्यविशेषः—

No. 131 **कोशवत्.**

No. 133 (1970/6).

वंशब्राह्मणम्.

Vaṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{3}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—81—86.

Lines on a page—6.
Letters in a line—48.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 131 **कोशवत्.**

उपसंहारः—

No. 131 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 131 **कोशवत्.**

वक्तव्यविशेषः—

No. 131 **कोशे द्रष्टव्यः । कोशेऽस्मिन् देवतर्पणपरभागात्पूर्वमेव वंशब्राह्मणसमाप्तिसूचनं दृश्यते ॥**

No. 134 (C 98-99).

शतपथब्राह्मणं काण्वशाखीयम्.

Śatapatha-Brāhmaṇam Kāṇva Śākhā.

Substance—Paper.
Size—$11\frac{5}{8} \times 4$ inches.
Character—Telugu.
Folios—1035.
Lines on a page—9.
Letters in a line—64.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम्॥ स वै व्रतमुपैष्यन्नन्तराहवनीयं च गार्ह-

पत्यं च तिष्ठन् प्राङ् तिष्ठन्नप उपस्पृशति स यदप उपस्पृशत्यमेध्यो वै पुरुषस्तेन ह पुरुषो-मेध्यो यदनृतं वदति तेनेदमन्तरतः शुक्तः पूति-र्वाति मेध उ वा आपो मेध्यो भूत्वा व्रतमुपाया-नीति पवित्रमापः पवित्रपूतो व्रतमुपायानीति ॥

उपसंहारः—

समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूका-यनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सा-त्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामक-क्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्याद्वात्स्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्र-जापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ पञ्चमं ब्राह्मणम् ॥ हरिः ओम् ॥

इति शुक्लयजुर्वेदीयवाजसनेयान्तर्गतकाण्वीये शतपथबृहदारण्यक-काण्डे उपनिषत्काण्डे षष्ठोध्यायः ॥

यो ह वै ज्येष्ठं च चतुर्दश ॥ १४ ॥ श्वेतकेतुर्ह वा आरुणेयः षोडश ॥ १६ ॥ स यः कामयेत त्रयोदश ॥ १३ ॥ एषां वै भूतानामष्टाविंशतिः ॥ २८ ॥ अथ वंशश्चतस्रः ॥ ४ ॥ पञ्चब्राह्मणेषु पञ्चसप्ततिः ॥ ७५ ॥

॥ इति बृहदारण्यकोपनिषत्काण्डः समाप्तः ॥

प्रतिपाद्यविषयः—

काण्वीयशतपथब्राह्मणेऽस्मिन् सप्तदश काण्डा दृश्यन्ते—तत्र प्रथमे काण्डे—तत्तद्यज्ञौपयिकसामग्रीसंभरणक्रमोऽभिधीयते ॥

द्वितीये—दर्शपूर्णमासावभिधीयेते ॥
तृतीये—आधानपुनराधानाग्निहोत्रचातुर्मास्यान्यभिधीयन्ते ॥
तुर्यपञ्चमयोः — एकाहाहीनसत्रलक्षणसोमयागप्रकृतिभूतोऽग्निष्टोमो निरूप्यते ॥
षष्ठसप्तमयोः—वाजपेयराजसूयौ प्रतिपाद्येते ॥
अष्टमनवमयोः—अग्निचयनबाह्याङ्गभूतोखासंभरणादि भस्मावहरणान्तं कर्मजातमभिधीयते ॥
दशमैकादशयोः—चितिसंचित्योरुपधानक्रमो निरूप्यते ॥
द्वादशे—तत्तत्कर्मणां भावनापुरस्सरमनुष्ठाने फलविशेषादिकमभिधीयते ॥
त्रयोदशे—आधानादिकर्मानुवादेन तत्तत्प्रशंसनपूर्वकं तत्तत्कालादिकमभिधीयते ॥
चतुर्दशे—तत्तद्यागदीक्षाप्रशंसनपूर्वकं सौत्रामणिर्निरूप्यते ॥
पञ्चदशे—अश्वमेधोऽभिधीयते ॥
षोडशे—प्रवर्ग्यनिरूपणं दृश्यते ॥
सप्तदशे—अन्तरङ्गबहिरङ्गभूतांशोपदेशपूर्वकं सविस्तरं ब्रह्मविद्योपदिश्यते ॥

वक्तव्यविशेषः—

शुक्लयजुर्वेदीयमिदं काण्वशतपथब्राह्मणं एकपात्–हविर्यज्ञ-उद्धारि–अध्वर–ग्रह–वाजपेय–राजसूय–उखासंभरण–हस्तिघट–चिति–संचिति–अग्निरहस्य–अष्टाध्यायी–मध्यम–अश्वमेध–प्रवर्ग्य–बृहदारण्यकाभिधेयैः सप्तदशभिः काण्डैर्विभक्तं दृश्यते। माध्यंदिनीयशतपथब्राह्मणापेक्षयाऽस्मिन् ब्राह्मणे उद्धारिग्रहप्रवर्ग्याख्यास्त्रयःकाण्डा अधिका दृश्यन्त इति मुद्रितैतद्ब्राह्मणभूमिकायामभ्यधायि। तत्र चास्माकमित्थं प्रतिभाति–माध्यंदिनपाठे अन्तिमे बृहदारण्यककाण्डे आदावेव प्रवर्ग्यभागदर्शनात् वाजपेयराजसूयकाण्डयोः सवकाण्डनाम्नैकीकरणादुद्धारिकाण्डभाग एक एवाधिक इति। अन्यूनशताध्यायीपरिमितत्वादेव चास्य शतपथब्राह्मणमिति नाम संभाव्यते। कोशेऽस्मिन् आदिममेकपात्काण्डं विना अवशिष्टानि पञ्चदश काण्डान्यपि दृश्यन्ते ॥

No. 135 (149).

शतपथब्राह्मणं काण्वशाखीयम्.

Śatapatha-Brāhmaṇam Kāṇva-Śākhā.

Substance—Palm-leaf.
Size—$16\frac{3}{4} \times 1\frac{1}{4}$ inches.
Character—Grantha.
Folios—318.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 134 कोशवत्.

उपसंहारः—

अथो अथा(प्या)हुतिमेव जुहुयाच्चतुर्गृहीतमाज्यं गृहीत्वा वैष्णव्यर्चोरु विष्णो विक्रमस्वोरुक्षयाय नस्कृधि घृतं घृतयोने पिब प्रप्रयज्ञपतिं तिर स्वोहीत यज्ञो वै विष्णुस्तत्पुनर्यज्ञमाल(र)भते तथास्यायातयामा(मो) यज्ञो भवति तस्मान्न पराङ् भवति तत्र यच्छक्नुयात्तद्द्यादथ यावद्रात्र एव कियद्रात्रेर्योदय (चोदव) स्येत्तर्ह्येवाग्निहोत्रं जुहुयात्स सायꣳ होमः काल उ एव प्रातर्होमः ॥

चतुर्थं ब्राह्मणम्.

॥ इति ग्रहकाण्डे पञ्चमोऽध्यायस्समाप्तः ॥

प्रतिपाद्यविषयः—

No. 134 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् हविर्यज्ञ-एकपात्-उद्धारि-अध्वरकाण्डा ग्रहकाण्डे पञ्चाध्यायाश्च दृश्यन्ते । तत्रैकपात्काण्डे द्वितीयाध्यायान्ते ३कण्डिकाः तृतीयाध्यायादौ ३९ कण्डिकाश्च न दृश्यन्ते । मुद्रिते अत्रत्ये च लिखित-

कोशान्तरे अध्यायद्वितयेन विभक्त उद्धारिकाण्डः नवाध्याय्या विभक्तोऽध्वरकाण्ड इत्याहत्य काण्डद्वय मेकादशाध्यायीपरिमितं दृश्यते। अत्र तु कोशेऽध्यायषट्केन विभक्त उद्धारिकाण्डः, पञ्चभिरध्यायैस्तु अध्वरकाण्ड इति विभाग एव वैलक्षण्यं न ग्रन्थे न्यूनाधिकभाव उपलभ्यत इति ॥

No. 136 (A 13).

शतपथब्राह्मणं काण्वशाखीयम्.

Śatapatha-Brāhmaṇam Kāṇva-Śākhā.

Substance—Paper.
Size—$12\frac{5}{8} \times 7\frac{1}{2}$ inches.
Character—Telugu.
Folios—132.
Lines on a page—13.
Letters in a line—32.

Age of Ms.—1892 A.D.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 134 कोशवत्.

उपसंहारः—

स यद्वैश्वदेवेन यजतेऽग्निरेव तद्भवत्यग्नेस्सायुज्यग् सलोकतां यजत्यथ यद्वरुणप्रघासैर्यजते वरुण एव तद्भवति वरुणस्य सायुज्यग् सलोकतां जयत्यथ यत्साकमेधैर्यजत इन्द्र एव तद्भवतीन्द्रस्य सायुज्यग् सलोकतां जयत्यथ यच्छुनासीरीयेण यजते वायुरेव तद्भवति वायोस्सायु-

ज्यग् सलोकतां जयति स यस्मिन्नृतौ चातुर्मास्ययाज्यमुं लोकमेति स एनमृतुः परस्मा ऋतवे प्रयच्छति परः परस्मै तमेवमृतवः संप्रदायं परममेव स्थानं परमं लोकं गमयन्ति तस्मादाहुश्चातुर्मास्ययाजिनं नानुविन्दन्तीति परमग् ह्येव सलोकं परमां जितिं जयतीति ॥९

चतुर्थं ब्राह्मणम् ॥

महाहविषा ह वै देवा वृत्रं जघ्नुरिति त्रिंशत् ॥ ३० ॥ महाहविषा ह वै देवा वृत्रं जघ्नुरित्यष्ट ॥ ८ ॥ अक्षयग् ह वै सुकृतमिति दश ॥ १० ॥ तद्यदाहुस्साकमेधैरिति नव ॥ ९ ॥ चतुर्षु ब्राह्मणेषु सप्तपञ्चाशत् ॥ ५७ ॥ इत्येकपात्काण्डे षष्ठोऽध्यायः ॥ ६ ॥ हरिः ओम् ॥

प्रतिपाद्यविषयः—

No. 134 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् हविर्यज्ञ—उद्धारि—एकपात्काण्डा दृश्यन्ते.

No. 137 (A 14).

शतपथब्राह्मणं काण्वशाखीयम्.

Śatapatha-Brāhmaṇam Kāṇva-Śākhā.

Substance—Paper.
Size—$12\frac{1}{2} \times 7\frac{3}{4}$ inches.
Character—Telugu.
Folios—129.
Lines on a page—12.
Letters in a line—34.

Age of Ms.—1893 A.D.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ तद्वै देवयजनमीक्षन्ते तद्यदेव वर्षिष्ठं भूमेस्तदेव देवयजनग् स्याद्यत्रान्यद्भूमेर्नाभिशीर्यतेऽतो वै देवा उत्क्रान्ता देवानेव तदुपोत्क्रामति स स देवे देवयजने यजतेऽथ यो ह तत्र यजते यत्रान्यद्भूमेरभिशेतेऽधस्तरामिव हैव तस्मिन्निष्टा भवति तस्माद्यत्रैव वर्षिष्ठं भूमेस्तदेव देवयजनग् स्यात्तद्वर्षिष्ठग् सत्समग् स्यात्तद्धि प्रतिष्ठितमविभ्रग्शि यत्समग् समग् सत् ॥

उपसंहारः—

अथैनामाहुतिं जुहोति पुत्रो वा भ्राता वा यो वाऽन्यो वा ब्राह्मणः स्यादस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनरसौ स्वर्गाय लोकाय स्वाहेत्यनपेक्षमेत्याप उपस्पृशन्ति ॥ १५ ॥

तदाहुर्दीर्घसत्री सप्तदश ॥ १७ ॥ अथ ह स्माह नाको मौद्गल्यः पञ्चदश ॥ १५ ॥ द्वयब्राह्मणेषु द्वात्रिग्शात् ॥ ३२ ॥

॥ मध्यमकाण्डे नवमोऽध्यायस्संपूर्णः ॥

कण्डिकासंख्या ३८३ । ब्राह्मणसंख्या २९ ॥

प्रतिपाद्यविषयः—

No. 134 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् हविर्यज्ञमध्यमकाण्डौ दृश्येते ॥

No. 138 (1670/3).

षड्विंशब्राह्मणम्.

Ṣaḍviṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—$16\frac{5}{8} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—120-135.
Lines on a page—10.
Letters in a line—62.
Age of Ms.—Old.

Condition of Ms. — Some letters are missing here and there owing to worm-eating.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ ब्रह्म च वा इदमग्रे सुब्रह्म चास्तां ततः सुब्रह्मोद[क्रा]मदथ ह देवा यज्ञेन ब्रह्म पर्यगृह्णताग्निर्वै ब्रह्माऽसावादित्यः सुब्रह्म तद्देवा यज्ञस्य संधावन्वैच्छन्नेष वै यज्ञस्य संधिर्यदेष उत्करस्तस्मादुत्करे तिष्ठन् सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति सुब्रह्मण्यो सुब्रह्मण्योमिति स्त्रियमिव त्रिराह त्रिरूपा हि देवा इन्द्रागच्छेति यदाहेन्द्रागच्छेत्येतद्वाऽस्य प्रत्यक्षं नाम तेनैवैनं तदाह्वयति हरिव आगच्छेति पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्यां हीदं सर्वं हरति ॥

उपसंहारः—

स सर्वो दिशमन्वावर्ततेऽथ यदाऽस्या मानुषाणामतिधृतिम्(र)तिं दुःखं वा पर्वताः स्फुटन्ति निपतन्त्याकाशाद्भूमिः कम्पति(ते) महाद्रुमा उन्मीलन्त्य(न्मूलयन्त्य)श्मानः प्लवन्ति तटाकानि प्रज्वलन्ति चतुष्पादं पञ्चपादं भवन्ती(ती)त्येवमादीनि तान्येतानि सर्वाणि सूर्यदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्त्युदुत्यं जातवेदसमिति स्थालीपाकं हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोति सूर्याय स्वाहा सर्वभूता(ग्रहा)धिपतये स्वाहा किरणपाणये स्वाहेश्वराय स्वाहा सर्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाऽथ साम गायेत् ॥

प्रतिपाद्यविषयः—

ब्राह्मणेऽस्मिन् अध्यायापराभिधेयाः षट् प्रपाठका दृश्यन्ते ।

तत्र प्रथमे प्रपाठके प्रथमखण्डे—सुब्रह्मण्याह्वानमभिधीयते । द्वितीये खण्डे—सुब्रह्मण्याशब्दस्याख्यायिकाप्रदर्शनपूर्वकं देवतामन्त्रोभयनामधेयत्वं प्रकाश्यते । तृतीयचतुर्थखण्डयोः—सवनत्रयविशेषं प्रकाश्यते । पञ्चमषष्ठखण्डयोः—ब्रह्मकर्तव्यं व्याहृतिहोमादिनैमित्तिकप्रायश्चित्तमभिधीयते । सप्तमखण्डे—सौम्यचरुविधानं दृश्यते ॥

द्वितीयप्रपाठके आदितश्चतुर्षु खण्डेषु—यहिष्पवमानधर्मादयोऽभिधीयन्ते । पञ्चमषष्ठसप्तमखण्डेषु—सवनत्रयसंबन्धिनः चमसभक्षणौपयिका होत्राद्युपहवाः कथ्यन्ते । अष्टमनवमदशमेषु खण्डेषु—ऋत्विग्विज्ञानवरणनैमित्तिकहोमाध्वर्युप्रशंसनादिकं दृश्यते ॥

तृतीयप्रपाठके प्रथमखण्डे—अवभृथधर्मा अभिधीयन्ते । द्वितीयतृतीयतुर्यपञ्चमेषु—अभिचारसंज्ञकविधुतयोऽभिधीयन्ते ॥

चतुर्थप्रपाठके प्रथमखण्डे—व्यूढद्वादशाहधर्मा अभिधीयन्ते । द्वितीयतृतीयतुरीयपञ्चमखण्डेषु—ज्येनत्रिवृदग्निष्टोमसंदंशवज्राख्या आभिचारिकयज्ञा निरूप्यन्ते ॥ षष्ठसप्तमखण्डयोः—वैश्वदेवसत्रमभिधीयते ॥

पञ्चमप्रपाठके प्रथमखण्डे—साख्यायिकाप्रदर्शनमग्निहोत्रं प्रशस्यते । द्वितीयखण्डे—औदुम्बरीप्रशंसनं दृश्यत ॥ तृतीयखण्डे—यूपप्रशंसनं दृश्यते । तुरीयखण्डे—सन्ध्याकर्मप्रशंसनं दृश्यते । पञ्चमे खण्डे—सोमस्य क्षयवृद्धिनिरूपणं दृश्यते । सप्तमखण्डे—स्वाहाकाराख्यदेवताऽभिधीयते ॥

षष्ठप्रपाठके प्रथमखण्डे—अद्भुतसामान्यशान्तिनिरूपणं दृश्यते ॥ द्वितीयखण्डे—आख्यायिकाप्रदर्शनपूर्वकं शत्रुविजयार्थहोमोऽभिधीयते । तृतीयखण्डमारभ्यासमाप्ति—इन्द्राग्निवरुणवैश्रवणवायुसोमविष्ण्वादिनिमित्तकाद्भुतविशेषेष्वनुष्ठेयः शान्तिप्रकारः प्रकाश्यते ॥

वक्तव्यविशेषः—

सामवेदान्तर्गतकौथुमशाखीयेष्वष्टसु ब्राह्मणेष्विदं ब्राह्मणं 'षड्विंशाख्यं द्वितीयं स्यात्' इति सायणार्यैः द्वितीयतया परिगणितम् । अयं

च प्रौढब्राह्मणमहाब्राह्मणापरपर्यायनामधेयस्य ताण्ड्यब्राह्मणस्य शेषरूप इति सायणार्यभाष्यादवगम्यते । अत एवास्य षड्विंशब्राह्मणमिति नामधेयमप्युपपद्यते । यत इदं ताण्ड्यमहर्षिप्रवक्तृकताण्ड्यब्राह्मणात्पञ्चविंशतिप्रश्नपरिमितादुपरितनं षड्विंशाध्यायमारभ्य प्रवृत्तं तत्प्रतिपादितकर्मसु भेदप्रदर्शनपरं दृश्यते । अत्र चान्तिमः षष्ठः प्रश्नः अद्भुतशान्तिप्रतिपादकत्वात्कैश्चित् अद्भुतब्राह्मणमिति व्यपदिश्यते । शान्तेश्च नैमित्तिकत्वेन तत्प्रतिपादकभागस्यापि पूर्वशेषत्वमेवेति भाष्यकारैः अद्भुतब्राह्मणस्य न पृथक्परिगणनं कृतम् । अध्यायषट्कपरिच्छिन्नस्यास्य षड्विंशब्राह्मणस्य तु ताण्ड्यब्राह्मणशेषत्वेऽपि तदनुक्तापूर्वकर्मभेदानामप्यत्राभिधानात्ततोऽतिरिक्तमिदमिति भाष्यकृतस्तात्पर्यं स्यादिति वयं संभावयाम इति ॥

No. 139 (3007/2).

षड्विंशब्राह्मणम्

Ṣaḍviṁśa Brāhmaṇam.

Substance—Palm-leaf.
Size—$18\frac{1}{8} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—110-124
Lines on a page—10.
Letters in a line—72.

Age of Ms.—Ancient.
Condition of Ms.—Ends of leaves are mutilated.
Correct or incorrect—Appears to be correct.
Complete or incomplete—complete.

उपक्रमः—

No. 138 कोशवत्.

उपसंहारः—

No. 138 कोशवत्.

प्रतिपाद्यविषयः—

No. 138 **कोशवत्.**

वक्तव्यविशेषः—

No. 138 **कोशवत्.**

No. 140 (3647/2).

षड्विंशब्राह्मणम्.

Ṣaḍviṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—$17\frac{1}{4} \times 1\frac{3}{5}$ inches.
Character—Grantha.
Folios—25.
Lines on a page—7.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Almost good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 138 **कोशवत्.**

उपसंहारः—

No. 138 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 138 **कोशवत्.**

वक्तव्यविशेषः—

No. 138 **कोशवत्.**

No. 141 (2497/2).

षड्विंशब्राह्मणम्.

Ṣaḍviṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—45-64.
Lines on a page—8.
Letters in a line—70.
Age of Ms.—Ancient.

Condition of Ms.—Letters are missing here and there owing to worm-eating.

Correct or incorrect—Appears to be correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 138 **कोशवत्.**

उपसंहारः—

खननाद्दहनादभिमर्शनाद्गोभिराक्रमणाच्चतुर्भिः शुध्यते भूमिः पञ्चमाच्चोपलेपनात्संभारान् प्रदक्षिणमानीय ब्राह्मणान् स्वस्ति वाच्यैतैः संभारैर्यदुपस्पृष्टं तदभ्युक्षेच्छाम्यति हातो ब्राह्मणभोजनं हिरण्यं गौर्वासोऽश्वो भूमिर्दक्षिणा इति शाम्यति हातः शान्त्यर्थः शान्त्यर्थः ॥ १३ ॥

॥ षष्ठोऽध्यायः ॥ षड्विंशब्राह्मणः समाप्तम् ॥

प्रतिपाद्यविषयः—

No. 138 **कोशवत्.**

वक्तव्यविशेषः—

कोशेऽस्मिन् षड्विंशब्राह्मणं समग्रं दृश्यते । मुद्रितेऽन्तिमप्रश्ने नवमखण्डान्ते परिदृश्यमानः 'खननाद्दहनात्' इत्यादिकः 'शान्त्यर्थः' इत्यन्तो ग्रन्थः अत्र त्रयोदशखण्डतया लिखितः ॥

No. 142 (1970/1).

षड्विंशब्राह्मणम्

Ṣaḍviṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{1}{2} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—33.
Lines on a page—6.
Letters in a line—.48

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct
Complete or incomplete—Complete.

उपक्रमः—

No. 138 **कोशवत्**.

उपसंहारः—

No. 141 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 138 **कोशवत्**.

वक्तव्यविशेषः—

No. 141 **कोशवत्**.

No. 143 (53/2).

षड्विंशब्राह्मणम्.

Ṣaḍviṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—$16\frac{1}{4} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—15-25.
Lines on a page—. 6
Letters in a line—64.

Age of Ms.—Old.
Condition of Ms.—Ends of leaves are broken to a little extent.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

मेव तत्सम्यक् संदधात्येवमिव वै वज्रः साभुर्यदारम्भणतोऽणीयान् प्रहरणतः स्थवीयांस्तेन पाप्मानं भ्रातृव्यं स्तृणुते वसीयान् आत्मना भवति य एतया स्तुते ॥ ६ ॥

उपसंहारः—

No. 141 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 138 **कोशवत्.**

वक्तव्यविशेषः—

कोशेऽस्मिन् इदं षड्विंशब्राह्मणं तृतीयाध्यायान्तिमभागमारभ्य समग्रं दृश्यते ॥

No. 144 (2485/6).

षड्विंशब्राह्मणम्.

Saḍviṁśa-Brāhmaṇam.

Substance—Palm-leaf.
Size—16 × 2 inches.
Character—Nāgarī.
Folios—200–204.
Lines on a page—12.
Letters in a line—78.
Age of Ms.—Old.
Condition of Ms.—Last folio is broken.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 138 कोशवत्.

उपसंहारः—

वार्षाहेर पवमानमुखे भवतः सफौपगवे नानदं क्रूराणि सामानि संभवन्ति स्तृत्यै तैल्वको वा बाधको वा यूपस्य स्फ्याग्रः शवनभ्येऽधिषवणे अग्नये रुद्रवते लोहितः पशुः सादयन्त्युपांश्वन्तर्यामौ शरमयं बर्हिः शीर्त्यै वैभीतक इध्मो

प्रतिपाद्यविषयः—

No. 138 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् आदितः तृतीयप्रपाठके असमग्राष्टमखण्डान्तमिदं ब्राह्मणं दृश्यते ॥

No. 145 (53/5).

संहितोपनिषद्ब्राह्मणम्.

Saṁhitōpaniṣad-Brāhmaṇam.

Substance—Palm-leaf.
Size—16$\frac{7}{8}$ × 1$\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—44-46.
Lines on a page—6.
Letters in a line—64.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ अथातः संहितोपनिषदो व्याख्यास्यामः सर्वपरोक्षा देवसंहिता भवति सर्वप्रत्यक्षाऽसुरसंहिता भवति परोक्षप्रत्यक्षा ऋषिसंहिता भवति यथाऽधीमहे स्वर्ग्या देवसंहिता भवति स्वर्गं लोकं गच्छति यस्तथाऽधीते पशव्याऽसुरसंहिता भवति पशुमान् भवति यस्तथाऽधीते ब्रह्मवर्चस्या ऋषिसंहिता भवति ब्रह्मवर्चसी भवति यस्तथाऽधीते ॥

उपसंहारः—

अथ हिरण्यमेवापः कनको भवति सहस्रं लभतेऽथैषा यजनीयेहनि सप्तच्छन्दाऽथैषाऽग्निरुपसमाहितो भवति ब्रह्मचारी भैक्षं चरति निवेद्यं लभते तिष्ठत्यहश्शेषो भवति व्रतमिति सारस्वतमन्नं प्रजाप्रतिमपृच्छत्पृच्छामि त्वामिति वामिति वा सर्वत्र दानप्रतिग्रहः सोमयाज्यापूतो भवति स खलु त एतं प्रजापतिर्वा इदमेकमन्नमाक्षितायुः पुरुषो वाचमीश्वरोऽभिजायतेऽनाकाशीकरणं च चतुरृक्चो भवति य एवं वेद य एवं वेद ॥

॥ संहितोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

ब्राह्मणेऽस्मिन् देवासुरादिसंहिताभेदकथनपूर्वकं तदध्ययनप्रशंसनं स्वरभेदकथनपूर्वकं तत्प्रशंसनं संहिताप्रदानपात्रनिरूपणपुरस्सरं तत्प्रशंसनादिकं च दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं ब्राह्मणं समग्रं दृश्यते । श्रीसायणार्यभाष्यानुरोधेनेदं संहितोपनिषद्ब्राह्मणं कौथुमशाखीयेष्वष्टसु सामब्राह्मणेषु सप्तममिति ज्ञायते । उपनिषद्ब्राह्मणाभिधेयं त्विदो भिन्नं तलवकारशाखीयं दृश्यते ॥

No. 146 (1970/5).

संहितोपनिषद्ब्राह्मणम् .

Saṁhitōpaniṣad-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{4}{5} \times 1\frac{4}{5}$ inches.
Character—Nāgarī.
Folios—77–81.
Lines on a page—6.
Letters in a line—48.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 145 **कोशवत्.**

उपसंहारः—

No. 145 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 145 **कोशवत्.**

वक्तव्यविशेषः—

No. 145 **कोशवत्.**

No. 147 (2497/6).

संहितोपनिषद्ब्राह्मणम्.

Saṁhitōpaniṣad-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—90-93.
Lines on a page—8.
Letters in a line—56.

Age of Ms.—Old.
Condition of Ms.—Appears to be good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—complete.

उपक्रमः—

No. 145 **कोशवत्.**

उपसंहारः—

No. 145 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 145 **कोशवत्.**

वक्तव्यविशेषः—

No. 145 **कोशवत्.**

No. 148 (3007/6).

संहितोपनिषद्ब्राह्मणम् .

Saṁhitōpaniṣad-Brāhmaṇam.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Grantha.
Folias—146-148.
Lines on a page—7.
Letters in a line—64.

Age of Ms.—Old.
Condition of Ms.—Ends of leaves are mutilated.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 145 **कोशवात्** .

उपसंहारः—

No. 145 **कोशवात्** .

प्रतिपाद्यविषयः—

No. 145 **कोशवत्** .

वक्तव्यविशेषः—

No. 145 **कोशवत्** .

No. 149 (3647/6).

संहितोपनिषद्ब्राह्मणम् .

Saṃhitōpaniṣad-Brāhmaṇam.

Substance—Palm-leaf.
Size—17¼ × 1¼ inches.
Character—Grantha.
Folios—61-64.

Lines on a page—6.
Letters in a line—62.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 145 कोशवत्.

उपसंहारः—

No. 145 कोशवत्.

प्रतिपाद्यविषयः—

No. 145 कोशवत्.

वक्तव्याविशेषः—

No. 145 कोशवत्.

No. 150 (53/6).

सामविधानब्राह्मणम्.

Sāmavidhāna-Brāhmaṇam.

Substance—Palm-leaf.
Size—$16\frac{1}{4} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—47-64.
Lines on a page—6.
Letters in a line—60.
Age of Ms.—Ancient.
Condition of Ms.—One end of the leaves is mutilated.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

ब्रह्म ह वा इदमग्र आसीत्तस्य तेजो रसोऽत्यरिच्यत स ब्रह्मा समभवत्स तूष्णीं मनसाध्यायत्तस्य यन्मन आसीत्स प्रजापतिरभवत्तस्मात्प्राजापत्यां मनसा जुह्वति मनो हि प्रजापतिस्तस्य द्यौः शिर आसीदुरोऽन्तरिक्षं मध्यं समुद्रः पृथिवी पादौ ॥

उपसंहारः—

सोऽयमनूचानाय ब्रह्मचारिणे समावर्तमानायाख्येयः। उपाध्यायाय ग्रामवरं सहस्रं श्वेतं चाश्वं प्रदायानुज्ञातो वा यं कामं कामयते तमाप्नोति तमाप्नोति ॥

॥ सामविधानब्राह्मणं समाप्तम् ॥

प्रतिपाद्यविषयः—

ब्राह्मणेऽस्मिन् प्रत्येकमष्टभिः खण्डैस्संहिताख्यः प्रपाठकाः परिदृश्यन्ते। तत्र प्रथमे प्रपाठके—ब्रह्मणः प्रपञ्चसृष्टिकथनम्, सृष्टोपजीवनाय सामप्रदानकथनं, ऋष्टादिस्वराणां स्वरूपध्यानच्छन्दोदेवतानिरूपणम्, यज्ञाधिकारिणां देवानामजपृश्निप्रभृतीनां च श्रेयसे सामाध्ययनादिनिरूपणम्, कृच्छ्रातिकृच्छ्रकृच्छ्रातिकृच्छ्राख्यतपोविशेषाणामभिधानम्, पवमानेष्टिदर्शपूर्णमासाग्निहोत्रप्रतिनिधिसामाध्ययनकथनम्, पाञ्चरात्रिकव्रतानुष्ठानप्रयोगकथनम्, सप्तरात्रिकाणां मासाद्यध्येयानां सप्तसंहितानां च साम्नां विधानम्, पातकोपपातकमहापातकादीनां प्रायश्चित्तादिकं चेत्येतत्सर्वमत्र परिदृश्यते ॥

द्वितीये प्रपाठके—आयुरभिवृद्धिशुद्ध्यपुनरावृत्तिपुत्रमरणाभावरोगोपशान्तिसर्पशस्त्रभयपरिहारबह्वन्नपिपासोद विषमरणाभावक्षेमज रामृत्युपरिहारवशीकरणकन्योद्वहनशत्रूच्चाटनयशोब्रह्मवर्चसाधिक्यवादिजयपुत्रकामनास्वनुष्ठेयाः प्रयोगा अभिधीयन्ते ॥

तृतीये प्रपाठके—धान्यहिरण्यपशुसमृद्धिप्रयोगः, वास्तुशमनप्रयोगः, स्वप्रजाप्रद्विषयपीडापरिहारप्रयोगः, राजाभिषेकप्रयोगः, अद्भुताभिचारशान्तिप्रयोगः, युद्धजयाद्यभीप्सुप्रयोगः, भाविजन्मस्वज्ञानाभावकामनायामग्नेः स्वाधीनीकरणे पिशाचबाधापरिहारे जन्मान्तराभावकामनायां स्वेच्छया लोकान्तरगमने च साधकाः प्रयोगा अभिधीयन्ते। तथाऽन्ते सामविधानसंप्रदायप्रवर्तकाचार्यनामधेयानि च निर्दिश्यन्ते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् परिदृश्यमानं सामविधानाख्यं ब्राह्मणं समग्रं दृश्यते। इदं च ब्राह्मणं—

षड्विंशाख्यं द्वितीयं स्यात्ततः सामविधिर्भवेत्।

इति सायणार्यभाष्यदर्शनात् कौथुमशाखीयेष्वष्टसु सामब्राह्मणेषु तृतीयमिति विज्ञायते । अत्र च सर्वेषु प्रयोगेषु साम्नां विनियोगाभिधानदर्शनादेवास्य ब्राह्मणस्य सामविधानमित्यन्वर्थं नामधेयमित्यवसीयते ॥

No. 151 (1970/2).

सामविधानब्राह्मणम्.

Sāmavidhāna-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{1}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—34-56.
Lines on a page—6.
Letters in a line—50.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Almost correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 150 **कोशवत्**.

उपसंहारः—

No. 150 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 150 **कोशवत्**.

वक्तव्यविशेषः—

No. 150 **कोशवत्**.

No. 152 (2497/3).

सामविधानब्राह्मणम्.

Sāmavidhāna-Brāhmaṇam.

Substance—Palm-leaf.
Size—$14\frac{1}{8} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—44-77.

Lines on a page—8.
Letters in a line—64.
Age of Ms.—Ancient.
Condition of Ms.—Three or four letters are missing in every page due to worm-eating.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 150 **कोशवत्.**

उपसंहारः—

No. 150 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 150 **कोशवत्.**

वक्तव्यविशेषः—

No. 150 **कोशवत्.**

No. 153 (3007/3).

सामविधानब्राह्मणम्.

Sāmavidhāna-Brāhmaṇam.

Substance—Palm-leaf.
Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—125-135.
Lines on a page—9.
Letters in a line—80.
Age of Ms.—Old.
Condition of Ms.—Ends of the leaves are broken and letters are missing.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 150 **कोशवत्.**

उपसंहारः—

No. 150 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 150 **कोशवत्**.

वक्तव्यविशेषः—

No. 150 **कोशवत्** .

No. 154 (3647/3).

सामविधानब्राह्मणम् .

Sāmavidhāna-Brāhmaṇam.

Substance—Palm-leaf.
Size—$17\frac{3}{8} \times 1\frac{4}{8}$ inches.
Character—Grantha.
Folios—44–64.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.–Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 150 **कोशवत्**.

उपसंहारः—

No. 150 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 150 **कोशवत्**.

वक्तव्यविशेषः—

No. 150 **कोशवत्**.

No. 155 (1670/3).

सामविधानब्राह्मणम्.

Sāmavidhāna-Brāhmaṇam.

Substance—Palm-leaf.
Size—14½ × 1½ inches.
Character—Grantha.
Folios—136-144.
Lines on a page—9.
Letters in a line—64.

Age of Ms.—Old.
Condition of Ms.—One or two letters are missing in every page.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 150 कोशवत्.

उपसंहारः—

प्रजापतये स्वाहेति मध्य उपहरेदिन्द्रायेति पुरस्ताद्धायव इत्यवान्तरदेशे यमायेति दक्षिणतः पितृभ्य इत्यवान्तरदेशे वरुणायेति पश्चान्महाराजायेत्यवान्तरदेशे सोमायेत्युत्तरतो महेन्द्रायेत्यवान्तरदेशे वासुकय इत्यधस्तादूर्ध्वं नमो ब्रह्मण इति दिवि बहुपशुधन

प्रतिपाद्यविषयः—

No. 150 कोशे द्रष्टव्यः.

वक्तव्याविशेषः—

कोशोऽस्मिन्निदं सामविधानब्राह्मणं तृतीयप्रपाठके समग्रप्रायतृतीयखण्डान्तं परिदृश्यते ॥

(3) आरण्यकम्.

No. 156 (C 174).

ऐतरेयारण्यकम्.

Aitareya-Āraṇyakam.

Substance—Paper.
Size—$9\frac{1}{2} \times 3\frac{3}{4}$ inches.
Character—Nāgarī.
Folios—69.
Lines on a page—7.
Letters in a line—32.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भूमिमुपस्पृशेदग्न इळा नम इळा——संदृशि। भद्रं कर्णेभिः——यदायुः॥ शं न इन्द्राग्नी——पूषणा वाजसातौ॥ स्तुषे जनं——मित्रो अग्निः॥ कया नश्चित्र आभुवत्——शतं भवास्यूतिभिः॥ स्योना पृथिवि भव——सप्रथः॥ उदितः शुक्रियं——मा मा हिंसीः॥ तच्चक्षुर्देवहितं——जीवेम शरदः शतम्। ओष्ठापिधाना नकुली——वादयेदिति वाग्रसः॥

अन्त्या शान्तिः—वाङ्मे मनसि प्रतिष्ठिता——अवतु वक्तारम्॥ भद्रं नो अपि वातया मनः। ओं शान्तिश्शान्तिश्शान्तिः॥

अथ महाव्रतमिन्द्रो वै वृत्रं हत्वा महानभवद्यन्महानभवत्तन्महाव्रतमभवत् तन्महाव्रतस्य महाव्रतत्वं द्वे एतस्याह्न आज्ये कुर्यादिति हैक आहुरेकमितित्वेव स्थितम् । प्रवो देवायाग्नय इति राद्धिकामो विशो विशो वो अतिथिमिति पुष्टिकामः पुष्टिर्वै विशः पुष्टिमान् भवतीत्यतिथिमिति पदं भवति नैतत्कुर्यादित्याहुरीश्वरोऽतिथिरेव चरितोः ॥

उपसंहारः—

अथातस्स्वाध्यायधर्मं व्याख्यामः (स्यामः) उप पुराणे नापीते कक्षोदके पूर्वाह्णे न संभिन्नासु छायास्वपराह्णे नाध्यूह्यळे मेघेऽपतौ वर्षे त्रिरात्रं वैदिकेनाध्यायेनान्तरी (रि) यान्नास्मिन् कथां वदेत् । नास्य रात्रौ च न च कीर्तयिषेत्तदिति वा एतस्य महतो भूतस्य नाम भवति योऽस्यैतदेवं नाम वेद ब्रह्म भवति ब्रह्म भवति ॥ ९४ ॥

प्रतिपाद्यविषयः—

प्रथमारण्यकेऽस्मिन्नध्यायपञ्चके गवामयनसत्रे उपान्त्याहःकर्तव्यस्य महाव्रतनाम्नः कर्मणः तत्सम्बन्धिनां शस्त्राणां च निरूपणं कृतम् ॥

द्वितीयारण्यके उपासनाकाण्डरूपे अध्यायत्रयेण कर्मकाण्डोदितयज्ञवासनावासितस्य प्रवृत्त्यर्थमङ्गाववद्धप्रतीकोपासनप्रदर्शनमुखेन प्राणविद्या मध्यमाधिकार्युपयोगिनी प्रपञ्चिता । अवशिष्टाध्यायत्रयेण संपादितचित्तैकाग्र्यस्य उत्तमाधिकारिणः सुखबोधाय उत्तमाधिकार्युपयोगिनी तत्त्वविद्या अभिहिता । सप्तमाध्याये शान्तिकरो मन्त्रः पठितः ॥

तृतीयारण्यके प्रथमेऽध्याये—प्रजापश्वादिकामनावतोऽधमाधिकारिण उपयोगिन्यो निर्भुजं प्रतृण्णं उभयमन्तरेणेति त्रिधा विभक्तानां संहितापदक्रमाणां पृथिव्यादिदृष्ट्या ध्यानरूपास्संहितोपासना अभिधीयन्ते । द्वितीयाध्याये त्वक्षरादीनामनेकधा ध्यानरूपा उपास्तिश्च प्रदर्शिता ॥

चतुर्थारण्यके साङ्गां शंसनप्रकारः कथितः ॥

पञ्चमारण्यके त्रिभिरध्यायैः एकाहमहानाम्न्यवयवसत्रावयवभेदेन त्रैविध्यमापन्नस्य महाव्रताख्यकर्मणो हौत्रप्रयोगादिकमभिधाय एतदारण्यकपाठप्रवचनादीनां नियमाश्च विस्तरेण प्रतिपाद्यन्त इत्ययं सायणार्यभाष्यानुरोधी प्रतिपाद्यविषयसंग्रहः ॥

वक्तव्यविशेषः—

अरण्य एवाध्ययननियमात् आरण्यकमित्यस्य वेदभागस्य प्रसिद्धिः । कोशेऽस्मिन् इदमैतरेयारण्यकं समग्रं दृश्यते । एतदारण्यकप्रवक्तृरैतरेयस्य महिदासस्य विषये यद्वक्तव्यं तत् No. 76 तमे ऐतरेयब्राह्मणकोशे द्रष्टव्यम् ॥

No. 157 (C 849).

ऐतरेयारण्यकम् .

Aitareya-Āraṇyakam.

Substance—Paper.
Size—8 × 3¾ inches.
Character—Nāgarī.
Folios—62.
Lines on apage—8.
Letters in a line—30.
Age of Ms.—Modern
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 156 कोशवत्.

उपसंहारः—

No. 156 कोशवत्.

प्रतिपाद्यविषयः—

No. 156 कोशवत्.

वक्तव्यविशेषः—

No. 156 कोशवत्.

No. 158 (2358).

ऐतरेयारण्यकम्.

Aitareya-Āraṇyakam.

Substance—Palm-leaf.
Size—15 × 1½ inches.
Character—Grantha.
Folios—28.
Lines on a page—7.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 156 कोशवत्.

उपसंहारः—

विदा मघवन् विदा गातुमनुशंसिषो दिशः। शिक्षा शचीनां पते पूर्वीणां पुरूवसो। आभिष्टुमाभिष्टिभिः प्रचेतन प्रचेतय। इन्द्र द्युम्नाय न इष एवा हि शक्रः॥

प्रतिपाद्यविषयः--

No. 156 कोशवत्.

वक्तव्यविशेषः—

कोशोऽस्मिन्निदमारण्यकं चतुर्थारण्यके ऋग्द्वितयान्तमुपलभ्यते ॥

No. 159 (4379).

ऐतरेयारण्यकम्.

Aitareya-Āraṇyakam.

Substance—Palm-leaf.
Size—8 × 1¼ inches.
Character—Nāgarī.
Folios—35.
Line on a page—8.
Letters in a line—36.

Age of Ms.—Old.
Condition of Ms.—The edges of some leaves are broken.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 156 कोशवत्.

उपसंहारः—

एष ब्रह्मैष इन्द्र एष प्रजापतिरेष सर्वे देवा इमानि पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषि इत्येतानीमानि च क्षुद्रमिश्राणीव चेतराणि च अण्डजानि च स्वेदजानि चोद्भिज्जानि ॥

प्रतिपाद्यविषयः—

No. 156 कोशवत्.

वक्तव्यविशेषः—

द्वितीयारण्यके समग्रप्रायषष्ठाध्यायान्तमिदमारण्यकमत्र कोशे दृश्यते ॥

No. 160 (B 7).

ऐतरेयारण्यकभाष्यम् (समूलम्).

Aitareya-Āraṇyaka-Bhāṣyam (with Text).

Author—Sāyana.
Substance—Paper.
Size—8 × 6 inches.
Character—Nāgarī.
Folios—164.
Lines on a page—12.
Letters in a line—17.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect — Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
यत्कटाक्षेण तद्रूपं दधद्भुक्तमहीपतिः ।
आदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥
द्वे(ये) पूर्वोत्तरमीमांसे ये व्या[ते व्या]ख्यातिसम्पदात् (संग्रहात्)।
कृपालुस्सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥
ऐतरेयब्राह्मणेन्नि(ऽस्मिन्)काण्डमा(आ)रण्यकाभिधे ।
अरण्य एव पाठ्यत्वादारण्यकमितीर्यते ॥
आरण्यकानि पञ्चैव प्राप्तान्यर्थविभेदतः ।
महाव्रतमहः प्रोक्तं प्रथमारण्यके स्फुटम् ॥
गवामयनमित्युक्ते सत्रे संवत्सरात्मके ।
अत्रोक्तमधदह (उपान्त्यमस्ति यदहः) तन्महाव्रतनामकम् ॥
सत्रप्रकरणेऽनुक्तिररधाद्यनायहि (ररण्याध्ययनादिति) ।
महाव्रतस्य तत्रात्र (तस्यात्र) हौत्रं कर्म विविच्यते ॥

तत्रादौ विवक्षितमर्थं प्रतिजानीते—अथ महाव्रतमिति । अथ शब्द आरम्भवाची । महाव्रताख्यं कर्मारभ्य (ब्ध) मित्यर्थः ॥

उपसंहारः—

[अथ "त्यमूषु" इत्येत्सूक्तं तृच]रूपं विधत्ते—तार्क्ष्यं शंसति स्वस्त्ययनं वै तार्क्ष्यः स्वस्तितायै स्वस्त्यय[न]मेव तत्कुरुत इति ॥

तार्क्ष्यो गरुडः, स एव देवो यस्य 'त्यमूषु' इत्यादिसूक्तस्य तत्सूक्तं तार्क्ष्यं शंसेत् । तस्मिन् सूक्ते प्रतिपाद्यो यस्तार्क्ष्यः सोऽयं स्वस्त्ययनं वै ह्वे(क्षे)मप्राप्तिमेव सम्पादयतीति शेषः । अतस्तत्सूक्तं स्वस्तितायै [क्षेम]प्राप्तये संपद्यते । तस्मादयं होता तत्रानेन शंसनेन स्वस्त्ययं (यनं) क्षेमप्राप्तिमेव कुरुते । तत ऊर्ध्वं "इन्द्रो विश्वं विराजितो (जति)" इति तस्या एका (एकपदाया) ऋचः शंसनं विधत्ते—एकपदां [शंस]त्येकधे[दं] सर्वं समानी(सर्वमसानी)त्यथो सर्वां छन्दस्तुति (स्कृति) माप्नुवन्ति(माप्नवानि) इति ॥

प्रतिपाद्यविषयः—

ऐतरेयारण्यकगतानां मन्त्राणां विनियोगप्रकाशनपूर्वकमन्त्रार्थः प्रकाश्यते ॥

वक्तव्यविशेषः—

'नन्दन संवत्सरे भाद्रपदशुद्धचतुर्थ्यां भार्गववासरे समाप्तोऽयं ग्रन्थः' इति कोशान्ते लेखकेनैतत्पुस्तकलेखनकालो निर्दिष्टो दृश्यते । समूलं चेदं भाष्यं प्रथमारण्यकगतपञ्चमाध्यायस्थद्वितीयखण्डमध्यभागान्तमेवै तत्कोशे परिदृश्यते ॥

No. 161 (2684/3).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्).

Taittirīya-Āraṇyakam (Krishṇayajur-Āraṇyakam).

Substance—Palmleaf.	Character—Nāgarī.
Size—$13\frac{1}{2} \times 2\frac{1}{4}$.	Folios—78–105.

Lines on a page—15.

Letters in a line—118.

Age of Ms.—Appears to be old.

Condition of Ms.—Good.

Correct or incorrect—Appears to be correct.

Complete or incomplete—Complete,

उपक्रम.—

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ॥
स्वस्ति नइन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
आपमापामपस्सर्वाः । अस्मादस्मादितोऽमुतः ॥

उपसंहारः—

य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यꣳ सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ॥

प्रतिपाद्यविषयः—

कोशोऽस्मिन् परिदृश्यमाने आन्ध्रपाठरीत्या दशभिः प्रश्नैर्विभक्ते तैत्तिरीयारण्यके—

प्रथमप्रश्ने—आरुणकेतुकचयनोपयोगिनः अविष्टकाद्युपधानमन्त्रा आम्नायन्ते ॥

द्वितीयप्रश्ने—स्वाध्यायनिरूपणं, उपवीतादिलक्षणं, सन्ध्याब्रह्मयज्ञकूश्माण्डहोमानामभिधानं, अयाज्ययाजकावकीर्णिनोः प्रायश्चित्तकथनं, ब्रह्मोपस्थानादिगुपस्थानयोर्मन्त्राश्च दृश्यन्ते ॥

तृतीयप्रश्ने—दशहोतृचतुर्होतृपञ्चहोतृषड्ढोतृसप्तहोत्रुपधानमन्त्राः, चातुर्मास्याङ्गक्षौरनिवर्तनमन्त्राः संभारयजुःपत्नीप्रातिग्रहहृदयेष्टकाद्युपधानमन्त्रा अश्वमेधाङ्गरात्रिहोममन्त्रा ब्रह्ममेधाङ्गमन्त्राश्च परिदृश्यन्ते ॥

चतुर्थप्रश्ने—प्रवर्ग्योपयोगिनो मन्त्रा आम्नायन्ते ॥

पञ्चमप्रश्ने—प्रवर्ग्यब्राह्मणविधिः, सप्तमप्रपाठकाम्नातमन्त्राणां विनियोग कथनं, प्रवर्ग्याङ्गसामाद्यभिधानं प्रवर्ग्यफलादिकथनं च दृश्यते ॥

षष्ठप्रश्ने—पितृमेधविनियुक्ता मन्त्राः परिदृश्यन्ते ॥

सप्तमप्रश्ने—(सांहित्याख्यायां तैत्तिरीयोपनिषदि शिक्षावल्ल्यां) अङ्गभूतोपासनोपदेशपूर्वकं परविद्या प्रस्तूयते ॥

अष्टमप्रश्ने—(आनन्दवल्ल्यां) परमतत्वहितपुरुषार्थप्रतिपादनं दृश्यते ॥

नवमप्रश्ने—(वारुण्याख्यायां भृगुवल्ल्यां) तपोनिरस्तकल्मषचेतसो ब्रह्मप्रतिपात्तिरित्याभिधीयते ॥

दशमप्रश्ने—(याज्ञिक्याख्यायां नारायणानुवाके) नारायणाख्यस्य परस्य ब्रह्मणः स्वरूपाद्यभिधानपूर्वकं तद्धयात्रुपयोगिस्नानादिकालजप्यमनून्विनिर्दिश्य दहरपरविद्यादिप्रतिपाद्यस्य तस्य परमपुरुषस्य प्राप्तावुपायभूतविद्यास्वभ्यर्हिता विद्याऽभिधीयते ॥

वक्तव्यविशेषः—

इदमिदानीं किंचित्तैत्तिरीयारण्यकविषये प्रस्तूयते

'जाते देहे भवत्यस्य कटकादि विभूषणम् ।
आश्रितं मणिमुक्तादि कटकादौ यथा तथा ॥
यजुर्जाते यज्ञदेहे स्यादग्भिस्तद्भिभूषणम् ।
सामाख्या मणिमुक्ताद्या ऋक्षु तासु समाश्रिताः' ॥

इति सायणार्यैः सामसंहिताभाष्ये प्राधान्येन दर्शपूर्णमासाद्याखिलकर्मप्रतिपादकत्वाद्यज्ञशरीरतयोपवर्णिते यजुर्वेदे कृष्णयजुश्शाखीयोऽयमारण्यकभागः। पुरा किल 'चतुर्मुखपरम्परयाऽधिगतं वेदं चतुर्धा व्यासितुर्व्यासस्य शिष्येण वैशंपायननाम्ना मुनिप्रवरेण विप्रावमाननान्मदधीतं वेदं परित्यजेत्युक्तेन याज्ञवल्क्यमहर्षिणा मूर्तिमन्ति वान्तानि यजूंष्यन्ये मुनयो गुर्वादिष्टास्तित्तिरिरूपधारिणः परिजगृहुः' इति पौराणिकाख्यायिकया तित्तिरिमुनिप्रोक्तत्वेन वाऽस्य कृष्णयजुर्वेदस्य तैत्तिरीयशाखात्वेनापि व्यपदेशो दृश्यते। अस्यां च तैत्तिरीयशाखायामाध्वर्यवादीनां

व्यवस्थितप्रकरणादर्शनाद्बुद्धिमालिन्यहेतुत्वादियं शाखा कृष्णयजुर्वेद इत्यभिधीयत इति सायणार्यैरभाणि। अरण्याध्येयतया चायं भाग आरण्यकनाम्ना प्रथितः। तैत्तिरीयब्राह्मणसंबद्धं 'संज्ञानं विज्ञानं' इत्यादिकं प्रश्नत्रितयं यथा कठमुनिदृष्टत्वात्काठकमिति व्यपदिश्यते तथाऽत्राप्यारण्यके 'भद्रं कर्णेभिः' 'सह वै देवानां' इत्यादिकं प्रश्नद्वयमपि काठकमिति ज्ञायते। अत एव काण्डानुक्रमणिकायां प्रथमाध्यायान्ते—'अथाष्टौ काठकानि, सावित्रनाचिकेतचातुर्होत्रवैश्वसृजारुणाः पञ्चचितयो दिवश्येनयोऽपाघाश्चेष्टयः स्वाध्यायब्राह्मणमष्टमम्' इत्युक्तम्। तथा तत्रैव तृतीयेऽप्यध्याये—

'आरुणाम्नायविधी चैव काठके परिकीर्तितौ' इति।
स्वाध्यायब्राह्मणं काण्डं काठके पठितो विधिः॥

इत्यप्युक्तम्। अरुणविधिः 'भद्रं' इति प्रश्नः, आम्नायविधिश्च 'सह वै' इति प्रश्न इति तद्व्याख्यातारः। किंच महाव्याहृतिष्वन्तिमायां परिदृश्यमानमानुपूर्वीवैलक्षण्यं तैत्तिरीयकाठकभेदनिबन्धनमिति संप्रदायविद्भिरुच्यते। तस्माद्ब्राह्मणसंबद्धकाठक इवात्राप्यारण्यकीयप्रश्नद्वये तृतीयायां महाव्याहृतौ समानानुपूर्वीदर्शनादपीदं प्रश्नद्वयं काठकमित्येव जानीमहे। अभ्यूहामहे च काठकत्वेऽप्यादिमस्य प्रश्नद्वयस्य अरण्याध्येयतया आरण्यके समावेशम्॥

किंच भट्टाभास्करमिश्रेण आरण्यकद्वितीयप्रश्नगततृतीयानुवाकादौ—

'वर्णान्यत्वं स्वरान्यत्वं पञ्चप्रश्नेषु दृश्यते'।

इत्युक्तया द्वितीयप्रश्नादौ 'काठकशेषमारभ्यते' इत्यवतरणोक्तया सायणीयारण्यकभाष्योपोद्घातपरामर्शेन च प्रश्नपञ्चकस्य काठकत्वं भाष्यकृतोरुभयोरप्यभिमतमिति प्रतिभाति। ततश्च ब्राह्मणान्ते प्रश्नत्रयमारण्यकादौ प्रश्नद्वयं चेत्याहृत्य प्रश्नपञ्चकं काठकसमाख्यमिति॥

आरण्यकं चेदं आन्ध्रद्राविडपाठभेदेन द्विधा पठितं दृश्यते। तत्रान्ध्रपाठे—आदौ षट्प्रश्नाः, तत उपनिषत् प्रश्नचतुष्टयात्मकेत्याहृत्य दश प्रश्ना दृश्यन्ते। द्राविडपाठे तु—शिक्षानन्दभृगुवल्लीनामेकप्रश्नतया नारायणानुवाकस्य चान्यप्रश्नतयोपनिषदः प्रश्नद्वयात्मकत्वं, इतरे च षट्प्रश्ना इत्याहृत्याष्टौ प्रश्नाः परिदृश्यन्ते। तथाऽऽन्ध्रपाठे चतुर्थपञ्चमषष्ठतया परिदृश्यमानाः प्रवर्ग्यपितृमेधप्रश्ना द्राविडपाठे पञ्चमषष्ठप्रश्नरूप-

तयोपलभ्यन्ते । तथाऽऽन्ध्रपाठे द्वितीयप्रश्नान्ते पठ्यमानः 'नमः प्राच्यै' इत्यादिको विंशोऽनुवाको द्राविडैर्न पठ्यते । तथैवोपनिषद्यन्तिमे प्रश्ने भूयान् पाठभेदः परिदृश्यते ; अन्यत्र तु क्वचित्क्वचिदेवंविधपाठभेदे तैत्तिरीयारण्यकदृश्यमाने निदानं विमर्शनीयम् ॥

किंच 'कर्णाटकेषु केषांचिच्चतुस्सप्ततिपाठः, अपरेषां नवाशीतिपाठः' इति सायणार्यभाष्यपर्यालोचनया कर्णाटकपाठ इत्यपरः तत्रापि पाठभेद इत्यपि प्रतीयते । स चानुवाकविभागमात्रनिबन्धन आहोस्विदानुपूर्वीभेदनिबन्धनोऽपीति तादृशपाठानुपलम्भान्न ज्ञायते ॥

नारायणानुवाकीयसायणार्यभाष्य एवोपोद्घाते 'द्राविडानां चतुष्षष्ट्यनुवाकपाठः आन्ध्राणामशीत्यनुवाकपाठः' इत्याद्युक्त्वनन्तरं 'चतुष्षष्टिपाठं प्राधान्येन व्याख्यास्यामः' इत्युक्त्वा रुद्रादिगायत्रीविवरणारम्भे 'इत ऊर्ध्वं तेषु तेषु देशेषु श्रुतिपाठा अत्यन्तविलक्षणाः । तत्र विज्ञानात्मप्रभृतिभिः पूर्वैर्निबन्धकारैर्द्राविडपाठस्यादृतत्वाद्वयमपि तमेवादृत्य व्याख्यास्यामः' इति च सुस्पष्टोक्तिदर्शनाद्द्राविडपाठ एव तत्र सायणार्याणामप्यभिमत इति प्रतिभाति ॥

यद्यप्यानन्दाश्रममुद्रितसभाष्यारण्यककोशे 'चतुष्षष्टिपाठं' इत्यस्य स्थाने 'अशीतिपाठं' इति पाठान्तरमधोनिर्दिष्टं दृश्यते तथापि द्राविडपाठानुरोधेनैव भाष्यदर्शनात्प्रदर्शितभाष्यकृतकण्ठोक्तिविरोधाच्च तत्पाठान्तरसांगत्यं चिन्तनीयम् । एवमेवान्ध्रलिपिमुद्रितारण्यकमूलकोशे 'माधवानुमत आन्ध्रपाठः' इति लेखने किं निदानमित्यपि परिचिन्तनीयमिति ॥

No. 162 (C 864/2).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्).

Taittirīya-Āraṇyakam (Krishṇa Yajur-Āryṇyakam).

Substance—Paper.
Size—$8\frac{1}{4} \times 4$ inches.
Character—Nāgarī.
Folios—118.
Lines on a page—9.
Letters in a line—29.
Age of Ms.—Appears to be old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 161 कोशवत्.

उपसंहारः—

No. 161 कोशवत्.

प्रतिपद्यविषयः—

No. 161 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयारण्यकं समग्रं दृश्यते । स्वरसूचकरेखाश्च दृश्यन्ते । लेखनं चात्रान्ध्रपाठानुरोधि दृश्यते । 'शके १७२८ क्षयसंवत्सरे पौषशुक्लषष्ठ्यां तिथौ तद्दिने पुस्तकलेखनं समाप्तम्' इति कोशान्ते एतत्पुस्तकलेखनकालो निर्दिश्यते ॥

No. 163 (C. 193).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्).

Taittirīya-Āraṇyakam (Krishna Yajur-Āraṇyakam).

Substance—Paper.
Size—$8\frac{1}{2} \times 4$ inches.
Character—Nāgarī.
Folioes—55.
Lines on a page—8.
Letters in a line—26.

Age of Ms.—Old
Condition of the Ms.—Good.
Correct or incorrect — In correct.
Complete or incomplete—Incomplete.

उपक्रमः—

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥

हरिः ओम् ॥ चित्तिः स्रुक्। चित्तमाज्यम्। वाग्वेदिः। आदा(अधी)तं बर्हिः। केतो अग्निः। विज्ञातमग्निः। वाक्पतोहो (तिहों)ता। मन उपवक्ता। प्राणो हविः। सामाध्वर्युः। वाचस्पते विधे नामन्। विधेम ते नाम। विधेस्त्वमस्माकं नाम। वाचस्पतिस्सोमं पिबतु। अस्मासु नृम्णं धात्स्वाहा ॥

उपसंहारः—

No. 161 कोशवत्.

प्रतिपाद्यविषयः—

No. 161 कोशवत्.

वक्तव्यविशेषः—

तैत्तिरीयारण्यके तृतीयः प्रश्नः तैत्तिरीयोपनिषदि चत्वारः प्रश्नाश्च आन्ध्रपाठानुरोधेनात्र कोशे लिखिता दृश्यन्ते ॥

No. 164 (1525).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्).

Taittirīya-Āraṇyakam (Krishṇa Yajur-Āraṇyakam).

Substance—Palm-leaf.
Size—16 × 1½ inches.
Character—Grantha.
Folios—104.
Lines—on a page—5.
Letter in a line—52.

Age of Ms.—Old.
Condition of Ms.—Leaves are worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 161 कोशवत्.

उपसंहारः—

No. 161 कोशवत्.

प्रतिपाद्यविषयः—

No. 161 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् द्राविडपाठानुरोधि तैत्तिरीयारण्यकं समग्रं दृश्यते ॥

No. 165 (1674).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्).

Taittirīya-Āraṇyakam (Krishṇa Yajur-Āraṇyakam).

Substance—Palm-leaf.
Size—9 × 1½ inches.
Character—Grantha.
Folios—118.
Lines on a page—9.
Letters in a line—38.

Age of Ms.—Old.
Condition of Ms.—Some of the letters are worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 161 कोशवत्.

उपसंहारः—

तꣳह य एवं वेदापपुनर्मृत्युं जयति जयति स्वर्गं लोकं नाध्वनि प्रमीयते नाप्सु प्रमीयते नाग्नौ प्रमीयते नानपत्यः प्रमीयते लघ्वान्नो भवति ध्रुवस्त्वमसि ध्रुवस्य क्षितमसि त्वं भूतानामधिपतिरसि त्वं भूताना ꣳ श्रेष्ठोऽसि त्वां भूतान्युपपर्यावर्तन्ते नमस्ते नमस्सर्वं ते नमः ॥

प्रतिपाद्यविषयः—

No. 161 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् द्राविडपाठानुरोधि तैत्तिरीयारण्यकं समग्रं दृश्यते । अत्रादौ तैत्तिरीयारण्यके प्रथमप्रश्नस्य ततः चतुर्थप्रश्नस्य ततश्च समग्रस्य

तैत्तिरीयोपनिषदः तदुपरि च सप्तमतृतीयाष्टमद्वितीयप्रश्नानां लेखनं दृश्यत इत्यत्रत्यलेखनक्रमानुरोधेनैवोपसंहारग्रन्थो निरदेशि ॥

No. 166 (1835/2).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्)

Taittirīya-Āraṇyakam (Krishṇa Yajur-Āraṇyakam).

Substance—Palm-leaf.
Size—17 × 1¼ inches.
Character—Grantha.
Folios—98.
Lines on a page—6.
Letters in a line—52.

Age of Ms.—Old.
Condition of Ms.—Leaves are worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 161 कोशवत्.

उपसंहारः—

ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैवैनामुपसीदति। दानवस्स्थ पेरव इत्या[ह्व]। मेध्यानेवैनान् करोति । विष्वग्वृतो लोहितेनेत्याह व्यावृत्त्यै । अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पत

प्रतिपाद्यविषयः—

No. 161 कोशे द्रष्टव्यः

वक्तव्यविशेषः—

द्राविडपाठानुरोधि चेदमारण्यकमत्र कोशे दृश्यते। अष्टमप्रश्नश्चाशमग्रसप्तमानुवाकान्तः परिदृश्यते ॥

No. 167 (1055).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्).

Taittirīya-Āraṇyakam (Krishṇa Yajur-Āraṇyakam).

Substance—Palm-leaf.
Size—$13\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Āndhra.
Folios—75.
Lines on a page—6.
Letters in a line—50.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 161 **कोशवत्**.

उपसंहारः—

यदेकादशेऽहन् प्रवृज्यते । इन्द्रो भूत्वा त्रिष्टुभमेति । यद्द्वादशेऽहन् प्रवृज्यते । सोमो भूत्वा सुत्यामेति । यत्पुरस्तादुपसदां प्रवृज्यते । तस्मादितः पराङ्मून्लोकाꣳस्तपन्नेति । यदुपरिष्टादुपसदां प्रवृज्यते । तस्मादमुतोऽर्वागिमान्लोकाꣳस्तपन्नेति । य एवं वेद । ऐव तपति ॥

प्रतिपाद्यविषयः—

No. 161 **कोशे द्रष्टव्यः**.

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयोपनिषदं विना तैत्तिरीयारण्यकं द्राविडपाठानुरोधि दृश्यते ॥

No. 168 (1700).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्)

Taittirīya-Āraṇyakam (Krishṇa Yajur-Āraṇyakam).

Substance—Palm-leaf.
Size—$17 \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—43.

Lines on a page—6.
Letters in a line—40.
Age of Ms.—
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

चित्तिः स्रुक्। चित्तमाज्यम्। वाग्वेदिः। अधीतं बर्हिः। केतो अग्निः। विज्ञातमग्निः। वाक्पतिर्होता। मन उपवक्ता। प्राणो हविः। सामाध्वर्युः। वाचस्पते विधे नामन्। विधेम ते नाम। विधेस्त्वमस्माकं नाम। वाचस्पतिः सोमं पिबतु। अस्मासु नृम्णं धात्स्वाहा॥

उपसंहारः—

आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः। यदा स्तोतृभ्यो महि गोत्रा[रु]जासि भूयिष्ठभाजो अध ते स्याम। ब्रह्म प्रावादिष्म तन्नो मा हासीत्॥ ओं शान्तिश्शान्तिश्शान्तिः॥

प्रतिपाद्यविषयः—

No. 161 कोशे द्रष्टव्यः

वक्तव्यविशेषः—

कोशेऽस्मिन् द्राविडपाठानुरोधि तैत्तिरीयारण्यकमसमग्रं दृश्यते। तच्चात्र पूर्वं तृतीयः प्रश्नः, ततः तैत्तिरीयोपनिषत्, ततश्च अष्टमप्रश्ने तृतीयानुवाके कश्चिद्भागः, तदुपरि च सप्तमः प्रश्न इत्येवंक्रमेण लिखितं दृश्यते॥

No. 169 (1448/2).

तैत्तिरीयारण्यकम् (कृष्णयजुरारण्यकम्).

Taittirīya-Āraṇyakam (Krishṇa Yajur-Āraṇyakam).

Substance—Palm-leaf.
Size—16 × 1½ inches.
Character—Āndhra.
Folios—44–64 + 27–43.

Lines on a page—7.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 168 **कोशवत्.**

उपसंहारः—

No. 168 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 161 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयारण्यके तृतीयचतुर्थसप्तमप्रश्नाः तैत्तिरीयोपनिषच्चेत्येते प्रश्ना द्राविडपाठानुरोधिनः परिदृश्यन्ते ॥

No. 170 (A 12).

तैत्तिरीयारण्यकभाष्यम् ज्ञानयज्ञाख्यम् (कृष्णयजुरारण्यकभाष्यम्).

Taittirīya-Āraṇyaka Bhāṣyam, entitled Jñānayajña.

Author—Bhaṭṭabhāskara.
Substance—Paper.
Size—13 × 8 inches.
Character—Āndhra.
Folios—151.
Lines on a page—25.
Letters in a line—28.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ईशानस्सर्वविद्यानां भूतानामीश्वरः परः ।
पुनातु सर्वदा युष्मान् शब्दब्रह्ममयश्शिवः ॥

एवं व्याख्याता इष्टिपशुसोमादीनां(ग्नीनां)तद्विकृतीनां ब्राह्मणभागाश्च । इदानीं तच्छे (तेषामेव शे)षभूतम(मा)रण्येऽनुवाक्यं तन्त्र व्याख्यास्यामः । अत्राहुः—

होतृन् प्रवर्ग्यकाण्डे च याश्चोपनिषदो विदुः ।
अरुणाम्नायविधिश्चे(धी चै)व काठके पारकीर्तितौ ॥
रुद्रो(मित्रो)नारायणश्चैव मेयोध(धो)यश्चैव पैतृकः ।
एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति ॥
कल्पे पितृविधिश्चैव प्रवर्ग्यविधिरेव च ।
अरुणाम्नायविधिश्चैव शतरुद्रविधिस्तथा ॥
कल्पेषु तु य आम्नाता मन्त्रास्तानप्यतन्द्रितः ।
यथाव्रतमुपाकृत्य त्वधीयीतेति चोच्यते ॥

अत्र सन्त्यष्टौ काठके काण्डानि कठमुनिदृष्टानि ।

उपसंहारः—

प्रथमेऽह्नि प्रवृज्यते । तेन सविता भूत्वा यजमानस्सर्वान् कामानाप्नोति । एतेनोत्तरे व्याख्याताः । तस्मात् कर्मण इतो लोकात् गच्छन् स्वर्गादिं तपन् गच्छति । अमुतो लोकादिमान् लोकान् सर्वतः आदित्यात्मा तपत्येव, आदित्यो भवतीत्यर्थः ॥

॥ इति द्वादशोऽनुवाकः । समाप्तः प्रपाठकः ॥

प्रतिपाद्यविषयः—

भाष्येऽस्मिन् तैत्तिरीयारण्यकगतानां मन्त्राणां विनियोगप्रदर्शनपूर्वकं नातिसंगृहीतं नातिविस्तृतं च विवरणं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयारण्यकभाष्यं भट्टभास्करीयं समग्रं वर्तते ॥

विद्यारण्यविरचिते शंकरदिग्विजये पञ्चदशे सर्गे—

कवये कथयास्मदीयवार्तामिह सौम्येति स भट्टभास्कराय ।
विससर्ज वशंवदाग्रगण्यं मुनिरभ्यर्णगतं सनन्दनार्यम् ।
अभिरूपकुलावतंसभूतं बहुधा व्याकृतसर्ववेदराशिम् ॥

इति ग्रन्थेन भट्टभास्करमिश्रस्य श्रीशंकराचार्यसमकालिकत्वस्य माधवा-

चार्यैरेवोक्तत्वात् भट्टभास्करमिश्रस्य सायणार्यात्प्राचीनत्वं सुव्यक्तमवसीयते। इतोऽधिकं No. 110 कोशे द्रष्टव्यम्॥

No. 171 (A 277).

तैत्तिरीयारण्यकभाष्यं ज्ञानयज्ञाख्यम् (कृष्णयजुरारण्यकभाष्यम्).

Taittirīya-Āraṇyaka-Bhāṣyam, entitled Gñānayjña.

Author—Baṭṭabhāskara.
Substance—Paper.
Size—13 × 8 inches.
Character—Grantha.
Folios—170.
Lines on a page—34.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 170 कोशवत्.

उपसंहारः—

अथ कस्मात् यज्ञे क्रियते वागेष इति। प्रवर्ग्यः इयं वाक् द्वादशाहे द्वादशधा प्रजापतिरेव कृतः अवकाशैः अवकाशमन्त्रैः। एष आदित्यः। प्रथमेऽहनि प्रवृज्यते तेन सविता भूत्वा यजमानः सर्वान् कामानाप्नोति॥

प्रतिपाद्यविषयः—

No. 170 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् भाष्यमिदं समग्रप्रायं दृश्यते। अन्ते तिस्रः पङ्क्तय एव गलिताः॥

No. 172 (1040).

तैत्तिरीयारण्यकभाष्यं वेदार्थप्रकाशाख्यम् (कृष्णयजुरारण्यकभाष्यम्).

Taittirīya-Āraṇyaka Bhāṣyam, entitled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Āndhra.
Folios—209.
Lines on a page—8.
Letters in a line—74.
Age of Ms.—Old.
Condition of Ms.—Leaves are worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

हरिः ओम् ॥ यस्य निश्वसिता(सितं)वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥
व्याख्याता सुखबोधाय तैत्तिरीयकसंहिता ।
तद्ब्राह्मणं च व्याख्यातं शिष्टमारण्यकं ततः ॥
अरण्याध्ययनादेतदारण्यकमितीरितम् ।
अरण्ये तदधीयीतेत्येवं[वाक्यं]प्रचक्षते(प्रवक्ष्यते) ॥
काण्डमारण्यकं सर्वं व्याख्यातव्यं प्रयत्नतः ।
आरण्यकविशेषास्तु पूर्वाचार्यैरुदी[रिताः] ॥
होतृन् प्रवर्ग्यकाण्डं च याश्चोपनिषदो विदुः ।
अरुणाम्नायविधिश्चैव[काठके परिकीर्ति]ताः ॥
रुद्रो नारायणश्चैव मेधो यश्चैव पित्रियः ।
एतदारण्यकं सर्वं नान्यती श्रोतुमर्हति ॥
कठेन मुनिना दृष्टं काठकं पारकीर्तितम् ।
सावित्रो नाचिकेतश्च चातुर्होत्रस्तृतीयकः ॥

तुरीयो(तुर्यो) वैश्वसृजस्तद्वद्वह्निरारुणकेतुकः ।
स्याध्यायब्राह्मणं चैव सर्वं काठकमीरितम् ॥

उपसंहारः—

यत्तु ताण्डिशाखायामुपलभ्यते त्रेधा विभक्तस्यायुषः सवनत्रयत्वमित्या[दि न तत्किंचिदपि तैत्तिरीय]के पश्यामः । अतो मरणावबृथत्वाद्यल्पसाम्यबाधाद्वैद्ययोर्भेद एवोचितः । अपि च न तैत्तिरीयाणामुपासनमिदम्, किं तर्हि, ब्रह्मविद्याप्रशंसा, तस्यैवं विदुष[इति] ब्रह्मविदोऽनुकर्षणात्, तस्मात् न विद्यैक्यशङ्काया अप्यवकाशोऽस्ति । क्रममुक्तिरेव . . . . . मिथाहिवारणत्वशेषमिति मन्तव्यम्? ॥

प्रतिपाद्यविषयः—

एतन्मूलभूते 161 कोशे प्रदर्शितानां मन्त्राणामत्र भाष्ये ललितयैव शैल्या तत्र तत्र कल्पसूत्रविनियोगादिप्रदर्शनपूर्वकं विवरणं कृतम् ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् तैत्तिरीयारण्यकभाष्ये 36–50 पत्रेषु प्रथमप्रश्ने 13 शानुवाकप्रभृति 27 शानुवाकान्त्यभागान्तः, तथा 92–98 पत्रेषु तृतीयप्रश्ने 11 शानुवाके 23 शीमृचमारभ्य 14 शानुवाके प्रथममन्त्रपर्यन्तः, तथा उपनिषदि शिक्षानन्दभृगुवल्लीनां च भाष्यग्रन्थो न दृश्यते ॥

No. 173 (1819).

तैत्तिरीयारण्यकभाष्यं वेदार्थप्रकाशाख्यम् (कृष्णयजुरारण्यकभाष्यम्).

Taittirīya Āraṇyaka Bhāṣyam, entitled Vedārthaprakāśa.

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Telugu.
Folios—39.
Lines on a page—8.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Moth-eaten.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

तृतीये[कथिता]मन्त्रा ब्राह्मणा(ब्रह्माग्नि)ब्रह्मेमधयोः ।
प्रवर्ग्यमन्त्राः प्रोच्यन्ते चतुर्थेऽस्मिन् प्रपाठके ।
तद्ब्राह्मणं पञ्चमे स्यात् तावन्योन्याति(भि)काङ्क्षिणौ ।
तेन प्रपाठकावेतौ व्याख्यास्ये सह सर्वतः ॥

तत्र चतुर्थस्य प्रथमेऽनुवाके शान्तिपाठार्थोऽभिधीयते । तस्य च प्रवर्ग्यकर्मादौ(मंता)परं महावीरनिष्पत्तेः पूर्वं पाठं बोधायन आह " अथामावास्येन वा हविषेष्ट्या(ष्ट्वा)नक्षत्रे वा पूर्वा शान्तिमुपयान्ति नमो वाचे " इति । आपस्तम्बस्तु प्रवर्ग्यप्रचारादौ महावीरनिष्पत्तेरूर्ध्वं शान्तिपाठमाह ' प्रवर्ग्येण प्रचरिष्यन्तः संवृण्वन्ति द्वाराणि पारिश्रयन्ति पत्नयाः पश्चात् होतोपविशति पुरस्तादर्ध्वर्युर्दीक्षणतो ब्रह्मा यजमानः प्रस्तोता चोत्तरतः प्रतिप्रस्थाता चाग्नीध्रश्च मदन्तीरुपस्पृश्य प्रथमेनानुवाकेन शान्तिं कृत्वा ' इति ॥

उपसंहारः—

एतैर्मन्त्रैस्साध्यान् होमान् विधत्ते—' प्राणाहुतीर्जुहोति । प्राणानेव यजमाने दधाति ' इति । तत्र सप्तसंख्यापक्षं विधत्ते—' सप्त जुहोति । सप्त वै शीर्षण्याः प्राणाः । प्राणानेवास्मिन् दधाति '—इति । शिरोगतसप्तच्छिद्रवृत्तिप्राणानां सप्तत्वात् संख्यायास्त(ख्यया त)त्प्राप्तिः । कल्पः—' देवस्त्वा सविता मध्वाऽनक्तिति स्रुवेणोपर्याहवनीये सह(महा)वीरमक्तु ' इति । हे माहावीर त्वां सविता देवो मध्वा मधुरेण घृतेनानक्तु अक्तं करोतु । मध्वेति प्रयोगात् यजमानस्य तेजोव्याप्तिं दर्शयति—' देवस्त्वा सविता मध्वाऽनक्त्वित्याह तेजसैवैनमनक्ति ' इति । कल्पः—' पृथिवीं तपसस्त्रायस्वेत्यपरस्मिन् खरे राजतं रुक्मं निधाय ' इति । हे रुक्म पृ

प्रतिपाद्यविषयः—

अत्र प्रवर्ग्यब्राह्मणमन्त्राणां कल्पसूत्रविनियोगादिप्रदर्शनपूर्वकमर्थो विशदीकृतः ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् एतद्ग्राष्यरीत्या तुरीयप्रश्ने आदितः पञ्चमानुवाकादि-भागान्तं समूलं सायणीयमारण्यकभाष्यं दृश्यते ॥

No. 174 (1261).

तैत्तिरीयारण्यकभाष्यं वेदार्थप्रकाशाख्यम् (कृष्णयजुरारण्यकभाष्यम्).

Taittirīya-Āraṇyaka Bhāṣyam, entitled Vedārthaprakāśa.

Author—Sāyaṇa.	Letters in a line—52.
Substance—Palm-leaf.	Age of Ms.—Old.
Size—16½ × 1½ inches.	Condition of Ms.—Good.
Character—Telugu.	Correct or incorrect—Correct.
Folios—42.	Complete or incomplete—Complete.
Lines on a page—5.	

उपक्रमः—

हरिः ओम् ॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्रवर्ग्यब्राह्मणं प्रोक्तं पञ्चमे हि प्रपाठके ।
पितृमेधस्य मन्त्रास्तु कथ्यन्तेऽस्मिन् प्रपाठके ॥

तेषां च पितृमेधमन्त्राणां विनियोगो भरद्वाजकल्पे बोधायनकल्पे चाभिहितः । तत्र 'आहिताग्नेर्मरणसंशये दहनदेशं जोषयते दक्षिणा प्रत्यक्प्रवणं' इत्यारभ्य भरद्वाज आह—'अन्वारब्धे मृत आहवनीये स्रुवाहुतिं जुहोति परेयुवाꣳसम्' इति। बोधायनोऽप्येवमेवाह—'अथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीत्वा प्रेतस्य दक्षिणं बाहुमन्वारभ्य जुहोति परेयुवाꣳसम्' इति ॥

उपसंहारः—

कल्पः—'माता रुद्राणामिति द्वाभ्यामुत्सृजन्ति' इति। तत्र प्रथमामाह—'माता रुद्राणां दुहिता—वधिष्ट' इति। इयं राजगवी रुद्राणां एकादश-संख्यानां माता मातृस्थानीया। वसूनां अष्टसंख्यानां दुहिता पुत्रीस्था-

नीया। आदित्यानां द्वादशसंख्यानां स्वसा भगिनीस्थानीया। अमृतस्य-नाभिः ऐहिकामुष्मिकस्य नाभिस्थानीया। अतः कारणात् चिकितुषे ज्ञानयुक्ताय जनाय ऋत्विक्समूहाय नु क्षिप्रं[प्र]वोचं प्रकर्षेण कथयामि। किं कथयत इति तदुच्यते। अनागां अपराधरहितां अदितिं अखण्डनीयां गां रजगवीं अनुस्म(स्त)रणीरूपेण उपाकृतां मा वधिष्ट हे जना अस्या वधं मा कुरुत। अथ द्वितीयामाह—'पिवतूदकं तृणान्यत्तु। ओमुत्सृजत' इति। इयं राजगवी यत्र क्वापि स्वेच्छया उदकं पिबतु। तृणान्यत्तु तृणानि भक्षयतु। उत्सृजत वद्धामेनां परित्यजत॥

इति श्रीमाधवीये वेदार्थप्रकाशे यजुरारण्यके षष्ठप्रपाठके द्वादशोऽनुवाकः॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥
यस्य निश्श्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

प्रतिपाद्यविषयः—

अत्र तैत्तिरीयारण्यकीयषष्ठप्रपाठकगतानां पितृमेधोपयोगिनां मन्त्राणां तत्रतत्र कल्पसूत्रप्रदर्शनपूर्वकं विनियोगं प्रदर्श्य विवरणं सम्यक्कृतं दृश्यते॥

वक्तव्यविशेषः—

कोशोऽस्मिन् पितृमेधप्रश्नमात्रस्य भाष्यं दृश्यते। एतद्भाष्यप्रणेता सायणार्यो ज्ञानयज्ञभाष्यकर्तुर्भट्टभास्करमिश्रादर्वाचीन इत्ययमंशः No. 110 कोशे द्रष्टव्यः॥

(4) उपनिषत्

No. 175 (4136/11).

अक्षमालिकोपनिषत्.

Akṣamālikopaniṣat.

Substance—Palm-leaf.	Character—Āndhra.
Size—9½ × 2 inches.	Folios—45–46.

Lines on a page—15.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

अथ प्रजापतिर्गुहं पप्रच्छ। भो ब्रह्मन्नक्षमालाभेदविधिं ब्रूहीति। सा किं लक्षणा। कतिभेदा। अस्याः कानि सूत्राणि। कथं घटनाप्रकारः। के वर्णाः। का प्रतिष्ठा। कैषाऽधिदेवता। किं फलमिति। तं गुहः प्रत्युवाच। प्रवाळमौक्तिकस्फटिकशङ्खरजताष्टापदचन्दनपुत्रजीविकाब्जरुद्राक्षा इति। आदिक्षान्तर(क्षान्त)मूर्तिः संविधानुभवा। (सावधानभावा) सौवर्णं राजतं ताम्रं चेति सूत्रत्रयम्। तद्विवरे सौवर्णम्। तद्दक्षपार्श्वे राजतम्। तद्वामे ताम्रम्। तन्मुखे मुखम्। तत्पुच्छे पुच्छम्। तदन्तरावर्तनक्रमेण योजयेत्॥

उपसंहारः—

सर्वतत्त्वात्मिके सर्वविद्यात्मिके सर्वशक्त्यात्मिके सर्वदेवात्मिके वसिष्ठेन मुनिना आराधिते विश्वामित्रेण मुनिना उपास्यमाने नमस्ते नमस्ते। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति तत्सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति। एवमक्षमालिकया जप्तो मन्त्रस्सद्यसिद्धिकरो भवतीत्याह भगवान् गुहः प्रजापतिमित्युपनिषत्॥ वाङ्मे मनसीति शान्तिः॥

॥ अक्षमालिकोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

प्रजापतिं प्रति गुहोक्तिरूपायामस्यामुपनिषदि मन्त्रजपोपयोगिन्या अक्षमालाया लक्षणं तद्भेदाः तदुपयोगिसूत्राणि, तद्घटनाक्रमः तद्वर्णाः अकारादिक्षकारान्तवर्णात्मना भावनरूपप्रतिष्ठाक्रमः, तदधिदेवतादिकं चेत्येतत्सर्वं सविस्तरमभिधीयते। अन्ते एतदुपनिषत्पाठस्य फलं च प्रतिपाद्यते॥

वक्तव्यविशेषः—

कोशेऽस्मिन् इयमुपनिषत् समग्रा दृश्यते । ऋग्वेदीयेति मुद्रिता च ॥

No. 176 (3581/15).

अक्षमालिकोपनिषत् .

Akṣamālikopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Andhra.
Folios—24.
Lines on a page—11.
Letters in a line—104.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 175 **कोशवत्** .

उपसंहारः—

No. 175 **कोशवत्** .

प्रतिपाद्यविषयः—

No. 175 **कोशवत्** .

वक्तव्यविशेषः—

No. 175 **कोशवत्** .

No. 177 (B 408).

अक्षमालिकोपनिषत् .

Akṣamālikopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—6.

Lines on a page—12.
Letters in a line—18.
Age of Ms.—Appears to be modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 175 **कोशवत्**.

उपसंहारः—

No. 175 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 175 **कोशवत्**.

वक्तव्यविशेषः—

No. 175 **कोशवत्**.

No. 178 (B 409).

अक्षिकोपनिषत्.

Akṣikopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—6.
Lines on a page—13.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—complete.

उपक्रमः—

अथ ह सांकृतिर्भगवानादित्यलोकं जगाम। तमादित्यं नत्वा चाक्षुष्मतीविद्यया तमस्तुवत्। ओं नमो भगवते सूर्याय अक्षितेजसे नमः। ओं खेचराय नमः। ओं महासेनाय नमः। ओं तमसे नमः। ओं रजसे

नमः । ओं सत्त्वाय नमः । असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्माऽमृतं गमय । विष्णो,(उष्णो) भगवान् शुचिरूपः । हंसो भगवान् शुचिरूपः प्रतिरूपः । एवं चाक्षुष्मतीविद्यया स्तुतस्सूर्यनारायणः सुप्रीतोऽब्रवीत् ॥

विश्वरूपं घृणिनं जातवेदसं हीमनामयं ज्योतिरूपं तपन्तम् ।
सहस्ररश्मिश्शतधा वर्तमानः पुरुषः प्रजानामुदयत्येष सूर्यः ॥

नमो भगवते श्रीसूर्यायादित्याय अक्षितेजसे हो वाहिनी वाहिनी वा स्वाहेति । चाक्षुष्मतीविद्यां ब्राह्मणो यो नित्यमधीते न तस्याक्षिरोगो भवति । न तस्य कुलेऽन्धो भवति । अष्टौ ब्राह्मणान् ग्राहीयत्वाऽथ विद्यासिद्धिर्भवति । य एवं वेद स महान् भवति ॥

उपसंहारः—

ओंकारमात्रमखिलं विश्वप्रज्ञादिलक्षणम् ।
वाच्यवाचकताभेदात् भेदेनानुपलब्धितः ॥
अकारमात्रं विश्वस्स्यादुकारस्तैजसः स्मृतः ।
प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु ॥
समाधिकालात्प्रागेव विचिन्त्यातिप्रयत्नतः ।
स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेत् ॥
चिदात्माऽहं नित्यशुद्धबुद्धमुक्तसदद्वयः ।
परमानन्दसन्दोहो वासुदेवोऽहमोमिति ॥
आदिमध्यावसानेषु दुःखं सर्वमिदं यतः ।
तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवानघ ॥
अविद्यातिमिरातीतं सर्वाभासाविवर्जितम् ।
आनन्दममलं शुद्धं मनोवाचामगोचरम् ॥
प्रज्ञानघनमानन्दं ब्रह्मास्मीति विभावयेत् ।
इत्युपनिषत् ॥ अक्षिकोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि आदित्यलोकं गतेन सूर्यनारायणदैवत्यया चाक्षुष्मत्याख्यया विद्यया स्तुवता केन चित्संकृतिनाम्ना समधिगतो ब्रह्मोपासनाक्रमः समारूढसप्तयोगभूमिकस्य योगिनो विस्तरेण लक्षणाभिधानपूर्वकमभिधीयते ॥

वक्तव्यविशेषः—

यजुर्वेदीयेति मुद्रितेयमुपनिषत् कोशेऽस्मिन् समग्रा च दृश्यते ॥

No. 179 (B 926-27/11).

अथर्वशिखोपनिषत्.

Atharvaśikhopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—26-27.
Lines on a page—16.
Letters in a line—24.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

अथ हैनं पैप्पलादोऽङ्गिरास्सनत्कुमारश्चाथर्वणमुवाच । भगवन् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यम् । किं तद्ध्यानं को वा ध्याता कश्च ध्येयः । स एभ्य आथर्वणः प्रत्युवाच । ओमित्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यमित्येतदक्षरं परं ब्रह्म । अस्य पादाश्चत्वारो वेदाश्चतुष्पादिदमक्षरं परं ब्रह्म । पूर्वाऽस्य मात्रा पृथिव्यकारः । स ऋग्भिः । ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः ॥

उपसंहारः—

सर्वेश्वरश्च शम्भुराकाशमध्ये ध्रुवं ल(स्त)ब्धाऽधिकं क्षणमेकं क्रतुशतसहस्रतुल्य(स्यापि चतु)स्सप्तत्या यत्फलं तदवाप्नोति कृत्स्नमोंकारगतिं च सर्वध्यानयोगज्ञानानां यत्फलमोंकारो वेद पर ईशो वा सुप्त (शिव)एको ध्येयश्शिवंकरः सर्वमन्यत्परित्यज्य । समाप्ताऽथर्वशिखा ॥

एतामधीत्य द्विजो गर्भवासाद्विमुक्तो विमुच्यत एतामधीत्य द्विजो गर्भवासाद्विमुक्तो विमुच्यत इत्यों सत्यम् । इत्युपनिषत् ॥ अथर्वशिखा समाप्ता ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि सकलवेदमूलभूतस्य प्रणवस्य स्वरूपं, तदीयमात्राणां देवतादयः, तन्नाम्नामोंकारतारादिपदानां व्युत्पत्तिः, तद्ध्यानध्यातृध्येयस्वरूपं चेत्येतत्सर्वं एतदुपनिषत्पाठकस्य फलशंसनसहितं निरूप्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् इयमुपनिषत्समग्रा दृश्यते, मुद्रिता च ॥

No. 180 (B 410).

अथर्वशिखोपनिषत्.

Atharvaśikhopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—161-163.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 179 **कोशवत्.**

उपसंहारः—

No. 179 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 179 **कोशवत्.**

वक्तव्यविशेषः—

No. 179 **कोशवत्.**

No. 181 (1514/3).

अथर्वशिखोपनिषत्.

Atharvaśikhopaniṣat.

Substance—Paper.
Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches.
Character—Āndhra.
Folios—14–15.
Lines on a page—10.
Letters in a line—29.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 179 कोशवत्.

उपसंहारः—

No. 179 कोशवत्.

प्रतिपाद्यविषयः—

No. 179 कोशवत्.

वक्तव्यविशेषः—

No. 179 कोशवत्.

No. 182 (C 1533/7).

अथर्वशिखोपनिषत्.

Artharvaśikhopaniṣat.

Substance—Paper.
Size—$12 \times 5\frac{1}{2}$ inches.
Character—Āndhra.
Folios—17.

Lines on a page—14.
Letters in a line—38.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 179 **कोशवत्**.

उपसंहारः—

No. 179 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 179 **कोशवत्**.

वक्तव्याविशेषः—

No. 179 **कोशवत्**.

No. 183 (1973/13).

अथर्वशिखोपनिषत्.

Atharvaśikhopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—157-159.
Lines on a page—4.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 179 **कोशवत्**.

उपसंहारः—

No. 179 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 179 **कोशवत्.**

वक्तव्यविशेषः—

No. 179 **कोशवत्.**

No. 184 (2347/5).

अथर्वशिखोपनिषत्.

Atharvaśikhopaniṣat.

Substance—Palm-leaf.
Size—$7 \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—23–25.
Lines on a page—9.
Letters in a line—22.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 179 **कोशवत्.**

उपसंहारः—

No. 179 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 179 **कोशवत्.**

वक्तव्यविशेषः—

No. 179 **कोशवत्.**

No. 185 (2347/4).

अथर्वशिरउपनिषत्.

Atharva-Śira-Upaniṣat.

Substance—Palm-leaf.
Size—7 × 1½ inches.
Character—Grantha.
Folios—17-23.
Lines on a page—9.
Letters in a line—22.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः—देवा ह वै स्वर्गं लोकमगमन्। ते देवा रुद्रमपृच्छन्। को भवानिति। सोऽब्रवीत्। अहमेकं(कः)प्रथममास्मि वर्तामि च भविष्यामि च। नान्यः कश्चन मतो(त्तो)व्यतिरिक्त इति॥

उपसंहारः—

यो रुद्रो अग्नौ यो अप्स्वन्तर्य ओषधीर्वीरुध आविवेश। य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमो अस्तु। अद्य मूर्धानमस्य सꣳशीर्योऽथर्वा हृदयं च यन्मस्तिष्कादूर्ध्वं प्रेरयन् पवमानो अथ शीर्ष्णस्तद्वाऽथर्वशिरो देवकोशस्समुज्झि(क्षि)तः तत्प्राणो अभिरक्षतु। श्रियमन्नमथो मनः श्रियमन्नमथो मनः। विद्यामन्नमथो मनो विद्यामन्नमथो मनः। मोक्षमन्नमथो मनो मोक्षमन्नमथो मनः(त्रिः)॥

॥ अथर्वशिरउपनिषत् समाप्ता॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि देवानां को भवानिति रुद्रं प्रति प्रश्नः, तदुत्तरेण तस्य सर्वात्मकत्वज्ञानेन तन्नतिपूर्वकं बहुधा तस्य स्तुतिः, तत्प्रतिपादकत्वेन परिज्ञातानामोंकारप्रणवसर्वव्यप्यनन्तादिपदानां निर्वचनम्,

पाशुपतव्रतनिरूपणम्, एतदुपनिषदध्ययनफलकथनं चेत्यतत्सर्वं परिदृश्यते ॥

वक्तव्यविशेषः—

अथर्ववेदीयेति मुद्रितेयमुपनिषत्, अस्मिन् कोशे समग्रा चोपलभ्यते ॥

No. 186 (1973/12).

अथर्वशिरउपनिषत्.

Atharva Śira-Upaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inch.
Character—Nāgarī.
Folios—150-156.
Lines on a page—4.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 185 **कोशवत्**.

उपसंहारः—

No. 185 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 185 **कोशवत्**.

वक्तव्यविशेषः—

No. 185 **कोशवत्**.

No. 187 (B 411).

अथर्वशिरउपनिषत्.

Atharva-Śira Upaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—125–130.
Lines on a page—11.
Letters in a line—22.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 185 **कोशवत्**.

उपसंहारः—

No. 185 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 185 **कोशवत्**.

वक्तव्यविशेषः—

No. 185 **कोशवत्**.

No. 188 (C 1514/2).

अथर्वशिरउपनिषत्.

Athasva-Śira Upaniṣat.

Substance—Paper.
Size—9½ × 4¼ inches.
Character—Āndhra.
Folios—9–14.
Lines on a page—9.
Letters in a line—28.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 185 **कोशवत्**.

उपसंहारः—

No. 185 **कोशवत्** 'इत्योꣳ सत्यम्' इत्यन्तेऽधिकम् ॥

प्रतिपाद्यविषयः—

No. 185 **कोशवत्**.

वक्तव्यविशेषः—

No. 185 **कोशवत्**.

No. 189 (C 1533/6).

अथर्वशिरउपनिषत्.

Atharva-Śira Upaniṣat.

Substance—Paper.
Size—12 × 5½ inches.
Character—Āndhra.
Folios—13-16.
Lines on a page—14.
Letters in a line—38.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 185 **कोशवत्**.

उपसंहारः—

No. 185 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 185 **कोशवत्**.

वक्तव्यविशेषः—

No. 185 कोशवत्.

No. 190 (B 412/1).

अद्वयतारकोपनिषत्.

Adwayatārakopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—33-37.
Lines on a page—11.
Letters in a line—20.
Age of Ms.—Recent.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

पूर्णमद इति शान्तिः—अथात अद्वयतारकोपनिषदं व्याख्यास्यामः। यतिने(तये)जितेन्द्रियाय शमादिषड्गुणपूर्णाय चित्स्वरूपोऽहमिति सदा भावयन् सम्यङ्निमीलिताक्षः किञ्चिदुन्मीलिताक्षो वा अन्तर्दृष्ट्या भ्रूदहरादुपरि सच्चिदानन्दतेजःकूटरूपं परब्रह्मावलोकयन् तद्रूपो भवति। गर्भजन्मजरामरणसंसारमहद्भयात् संतारयति। तस्मात्तारकमिति। जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्म। तत्सिद्ध्यै लक्ष्यत्रयानुसन्धानं कर्तव्यम्। देहमध्ये ब्रह्मनाडी सुषुम्ना सूर्यरूपिणी पूर्णचन्द्राभा वर्तते॥

उपसंहारः—

परमगुरूपदेशेन सहस्रारज्वलज्ज्योतिर्वा बुद्धिगुहानिहितचिज्ज्योतिर्वा षोडशान्तस्स्थतुरीयचैतन्यं वा अन्तर्लक्ष्यं भवति। तद्दर्शनं सदाचार्यमूलम्॥

आचार्यो वेदसम्पन्नो विष्णुभक्तो विमत्सरः।
योगज्ञो योगनिष्ठश्च सदा योगात्मकश्शुचिः॥

गुरुभक्तिसमायुक्तपुरुषज्ञो विशेषतः ।
एवं लक्षणसम्पन्नो गुरुरित्यभिधीयते ॥
गुशब्दस्त्वन्धकारस्स्याद्रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ॥
गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥
गुरुरेव परा काष्ठा गुरुरेव परं धनम् ।
यस्मात्तदुपदेष्टाऽसौ तस्माद्गुरुतरो गुरुः ॥

इति । यस्सकृदुच्चारयति तस्य संसारमोचनं भवति । सर्वजन्मकृतं पापं तत्क्षणादेव नश्यति । सर्वान् कामानवाप्नोति । सर्वपुरुषार्थसिद्धिर्भवति । य एवं वेदेत्युपनिषत् ॥

॥ अद्वयतारकोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि अन्तर्बाह्यमध्यभेदेन त्रैविध्यमापन्नस्य लक्ष्यस्य विवरणपूर्वकं स्वदेहान्तर्गतिज्योतिर्दर्शनोपायः कथितः । पूर्वार्धोत्तरार्धतया द्विधा विभक्तयोः तारकामनस्कयोगयोर्विवरणपूर्वकं मूर्त्यमूर्तिभेदेन तारकद्वैविध्यं चोपवर्ण्य तुरीयचैतन्यदर्शनस्य सद्गुरूपदेशलभ्यत्वमभिधाय गुरुशब्दार्थं प्रकाश्य एतदुपनिषत्पाठकस्य फलं चान्तेऽभिहितम् ॥

वक्तव्यविशेषः—

मण्डलब्राह्मणोपनिषदि प्रतिपाद्यमानो यस्तारकविषयः स एवात्रोपनिषदि संगृह्य प्रतिपाद्यते । एते उभे अप्युपनिषदौ शुक्लयजुर्वेदगते मुद्रिते । तारकयोगविषय उभाभ्यामुपनिषद्भ्यां प्रतिपाद्यमानः सम्पूर्णतां प्राप्त इत्यूहितुं शक्यते । कोशेऽस्मिन् इयमुपनिषत्समग्रा दृश्यते ॥

No. 191 (3581/30).

अद्वैताख्योपनिषत् .

Adwaitākhyopaniṣat.

Substance—Palm-leaf.	Character—Andhra.
Size—20 × 2¼ inches.	Folios—34.

Lines on a page—13.
Letters in a line—96.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

उपासनाश्रितो धर्मो ज्ञाते ब्रह्मणि वर्तते ।
प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणस्स्मृतः ॥
अतो वक्ष्याम्यकार्पण्यमजातिमस(जातिस्सम)तां गतिम् ।
यथा न जायते किञ्चित् जायमानस्समन्ततः ॥
आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।
घटादिवच्च संघातैर्जातावेतन्निदर्शनम् ॥

उपसंहारः—

नास्वादयेत्सुखं तत्र निस्सङ्गः प्रज्ञया भवेत् ।
निश्चलं निश्चितं मेकी(निश्चरच्चित्त)मेकीकुर्यात्प्रयत्नतः ॥
यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।
अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा ॥
स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् ।
अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते ॥
न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥
॥ इति अद्वैताख्योपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

"ऐकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" इति माण्डूक्योपनिषद्वाक्यार्थसाधकयुक्तयो बहवः प्रतिपादिता अस्मिन् अद्वैतप्रकरणे । अन्ते च शान्तिर्मनोनिग्रहायत्तेति मनोनिग्रहोपाया अभिहिताः ॥

वक्तव्यविशेषः—

आगमवैतथ्याद्वैतालातशान्त्याख्यैश्चतुर्भिः प्रकरणैर्विभक्ते गौडपादाचार्यीयमाण्डूक्योपनिषत्कारिकाग्रन्थे तृतीयप्रकरणतया परिदृश्य-

मानमद्वैतप्रकरणमेवास्मिन् कोशे अद्वैताख्योपनिषदभिख्यया लिखितं दृश्यते ॥

No. 192 (3581/3).

अध्यात्मोपनिषत्.

Adhyātmopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—7.
Lines on a page—13.
Letters in a line—80.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अन्तश्शरीरे निहितो गुहायामा(म)ज एको नित्यं अ(य)स्य पृथिवी शरीरं, यः पृथिवीमन्तरेण संचरन् यं पृथिवी न वेद। यस्यापश्शरीरं योऽपोऽन्तरे सञ्चरन् यमापो न विदुः। यस्य तेजश्शरीरं यस्तेजोन्तरे संचरन् [यं तेजो न वेद। यस्य वायुश्शरीरं यो वायुमन्तरे संचरन् यं वायुर्न वेद। यस्याकाशश्शरीरं य आकाशमन्तरे संचरन् यमाकाशो न वेद। यस्य मनश्शरीरं यो मनोऽन्तरे संचरन् यं मनो न वेद। यस्य बुद्धिश्शरीरं यो बुद्धिमन्तरे संचरन्] यं बुद्धिर्न वेद ॥

उपसंहारः—

स एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः। एतां विद्यामपान्तरतमाय ददौ। अपान्तरतमो ब्रह्मणे[ब्रह्मा]ऽघोराङ्गिरसाय ददौ। अघोराङ्गिरा रैक्काय ददौ। रैक्को रा(वा)माय ददौ। रा(वा)मस्सर्वेभ्यो भूतेभ्यो ददौ ॥ इत्येतन्निर्वाणानुशासनं वेदानुशासनमित्युपनिषत् ॥

॥ इत्यध्यात्मोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र पृथिव्यप्तेजआदीनामक्षरान्तानां नारायणशरीरत्वमुपवर्ण्य तस्य सर्वान्तर्यामित्वमभिधायैतदुपनिषत्प्राप्तौ गुरुशिष्यपरम्परा चान्तेऽभिधीयते ॥

वक्तव्यविशेषः—

शुक्लयजुर्वेदीयेयमुपनिषत् । एतन्नामिकायां मुद्रितायामुपनिषदि जगन्मिथ्यात्वात्मैक्यादिस्थापका अंशाः श्लोकसप्तत्या संगृहीता दृश्यन्ते । कोशालयेऽस्मिन् दृश्यमाने कोशद्वये तु तेंऽशा न दृश्यन्ते । अपि तु पृथिव्यादितत्वस्य ब्रह्मशरीरत्वं ब्रह्मणस्सर्वान्तर्यामित्वमित्येतावदेव वाक्यशैल्योपपादितं दृश्यते । अतोऽधिकभागस्य मुद्रिते परिदृश्यमानस्य एतदुपनिषदन्तर्गतत्वं न वेति विमर्शनीयम् ॥

No. 193 (1682/8).

अध्यात्मोपनिषत्.

Adhyātmopaniṣat.

Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—38.
Lines on a page—6.
Letters in a line—32.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 192 कोशवत्.

उपसंहारः—

No. 192 कोशवत्.

प्रतिपाद्यविषयः—

No. 192 **कोशवत्**.

वक्तव्यविशेषः—

No. 192 **कोशवत्**.

No. 194 (4136/14).

अन्नपूर्णोपनिषत्.

Annapūrnopaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 2$ inches.
Character—Āndhra.
Folios—49–56.
Lines on a page—15.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥
निदाघो नाम योगीन्द्रो ऋभुं ब्रह्मविदां वरम् ।
प्रणम्य दण्डवद्भूमावुत्थाय स पुनर्मुनिः ॥
अत्मतत्त्वमनुब्रूहीत्येवं पप्रच्छ सादरम् ।
कयोपासनया ब्रह्मन्नीदृशं प्राप्तवानसि ॥
तां मे ब्रूहि महाविद्यां मोक्षसाम्राज्यदायिनीम् ।
निदाघ त्वं कृतार्थोऽसि शृणु विद्यां सनातनाम् ॥
यस्य विज्ञानमात्रेण जीवन्मुक्तो भविष्यसि ॥

उपसंहारः—

चित्तसत्ता परं दुःखं चित्तत्यागः परं सुखम् ।
अतश्चित्तं चिदेकात्मा नय क्षयमवेदनात् ॥

दृष्ट्वा रम्यमरम्यं वा स्थेयं पाषाणवत्समम् ।
एतावताऽऽत्मयत्नेन जि तो(ता)भवति संसृतिः ॥
वेदान्ते परमं गुह्यं पुराकल्पप्रचोदितम् ॥
नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वै पुनः ।
अन्नपूर्णोपनिषदं योऽधीते गुर्वनुग्रहात् ॥
स जीवन्मुक्ततां प्राप्य ब्रह्मैव भवति स्वयम् ॥
इत्युपनिषत् ॥ चतुर्थोऽध्यायः ॥ भद्रं कर्णेभिरिति शान्तिः ॥
॥ अन्नपूर्णोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र ऋभुनिदाघसंवादेन ब्रह्मविद्या विचारिता । ब्रह्मविद्याप्रतिबन्धकनिवृत्त्यर्थं अन्नपूर्णामन्त्र उपदिष्टः । पञ्चविधभेदभ्रमः तन्निवृत्त्युपायश्च निर्णीतः । बन्धमोक्षप्रकारः कथितः । मुक्त्युपायभूतमात्मज्ञानं श्रुतियुक्त्यनुभवैः विस्तरेण प्रतिपादितम् । विदेहमुक्तिस्वरूपं विशदीकृतम् । सप्तभूमिकाप्रदर्शनं चान्ते कृतं दृश्यते ॥

वक्तव्यविशेषः—

ग्रन्थलिप्यां अध्यायपञ्चकेन मुद्रितैवेयमुपनिषदत्र कोशे अध्यायचतुष्टयात्मिका उपलभ्यते ॥

No. 195 (B 414)

अन्नपूर्णोपनिषत्.

Annapūrnopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—28.
Lines on a page—13
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 194 **कोशवत्.**

उपसंहारः—

No. 194 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 194 **कोशवत्.**

वक्तव्यविशेषः—

No. 194 **कोशवत्.**

No. 196 (3581/8).

अन्नपूर्णोपनिषत्.

Annapūrnōpaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folio—Only a page on the 22nd.
Lines on a page—2.
Letters in a line—94.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

मूलशृङ्गाटमध्यस्था विन्दुनादकलाश्रया ।
नित्यानन्दी(न्दा) निराहारी(रा)विख्याता विलसत्कचा ॥

उपसंहारः—

ऐं ह्रीं सौः श्रीं क्लीं ओं नमो भगवत्यन्नपूर्णे ममाभिलषितमन्नं देहि स्वाहा ॥

इत्यन्नपूर्णेश्वर्युपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

मन्त्रस्वरूपवर्णादिकथनपूर्वकं अन्नपूर्णामन्त्रमात्रमत्र दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् मन्त्रवर्णादिकं प्रदर्श्य मन्त्रस्वरूपं निर्दिश्य तावतैवेयमुपनिषत्समापिता दृश्यते। मुद्रिते लिखिते च कोशान्तरे तु भूयान् ग्रन्थ उपलभ्यते। अतः कोशेऽस्मिन् उपनिषदियमसमग्रेति कोशान्तरावलम्बेन ज्ञायते ॥

No. 197 (1643/3).

अमृतनादोपनिषत्.

Amritanādōpaniṣat.

Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—4-6.
Lines on a page—6.
Letters in a line—51.

Age of Ms.—Old.
Condition of Ms.—Moth-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं सह नाववतु। . . . . . .
शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥
ओंकाररथमारुह्य विष्णुं कृत्वाऽथ सारथिम्।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥
तावद्रथेन गन्तव्यं यावद्रथपथि स्थितः।
स्थाता रथपतिस्थानं रथमुत्सृज्य गच्छति ॥

उपसंहारः—

अथ वर्णास्तु पञ्चानां प्राणादीनामनुक्रमात् ।
रक्तवर्णो मणिप्रख्यः प्राणवायुः प्रकीर्तितः ॥
अपानस्तस्य मध्ये तु इन्द्रगोपस्य संनिभः ।
समानस्तस्य मध्ये च(समानो नाभिदेशे तु)गोक्षीरस्फटिकप्रभः ॥
आपाण्डर उदानश्च व्यानो ह्यार्चिस्समप्रभः ।
. . . . . लं भित्त्वा मारुतो याति मूर्धतः ॥

प्रतिपाद्यविषयः—

अत्र शास्त्राभ्यासस्य परब्रह्मज्ञानफलकत्वमुपवर्ण्य प्रत्याहारध्यान-प्राणायामधारणातर्कसमाध्यभिधेयाङ्गषट्कसहितस्य योगस्य तत्तदङ्ग-लक्षणकथनपूर्वकमभ्यसनप्रकारं फलं च निरूप्य प्राणादिवायूनां स्थान-वर्णादिकमभिधीयते ॥

वक्तव्यविशेषः—

यजुश्शाखीयतया मुद्रिता चेयमुपनिषदस्मिन् कोशे अन्तिमश्लो-कार्धं विना समग्रा दृश्यते ॥

No. 198 (3581/19).

अमृतनादोपनिषत्.

Amritanādōpaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folio—Only a page on the26th.
Lines on a page—14.
Letters in a line—104.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 197 कोशवत्.

उपसंहारः—

No. 197 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 197 **कोशवत्**.

वक्तव्यविशेषः—

No. 197 **कोशवत्**.

No. 199 (C 1533/5).

अमृतनादोपनिषत्.

Amritanādōpaniṣat.

Substance—Paper.
Size—12 × 5½ inches.
Character—Āndhra.
Folios—12–13.
Lines on a page—14.
Letters in a line—38.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 197 **कोशवत्**.

उपसंहारः—

No. 197 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 197 **कोशवत्**.

वक्तव्यविशेषः—

No. 197 **कोशवत्**.

No. 200 (1973/11).

अमृतनादोपनिषत्.

Amritanādōpaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inch.
Character—Nāgarī.
Folios—147-149.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 197 **कोशवत्**.

उपसंहारः—

No. 197 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 197 **कोशवत्**.

वक्तव्यविशेषः—

No. 197 **कोशवत्**.

No. 201 (B 415).

अमृतनादोपनिषत्.

Amritanādōpaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—115-118.
Lines on a page—11.
Letters in a line—20.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 197 कोशवत्.

उपसंहारः—

No. 197 कोशवत्.

प्रतिपाद्यविषयः—

No. 197 कोशवत्.

वक्तव्यविशेषः—

No. 197 कोशवत्.

No. 202 (B 927/8).

अमृतनादोपनिषत्.

Amritanādōpaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—22-24.
Lines on a page—16.
Letters in a line—24.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 197 कोशवत्.

उपसंहारः—

No. 197 कोशवत्.

प्रतिपाद्यविषयः—

No. 197 कोशवत्.

वक्तव्यविशेषः—

No. 197 कोशवत्.

No. 203 (1643/1).

अमृतविन्दूपनिषत्.

Amritabindūpaniṣat.

Substance—Palm-leaf.
Size—15½ × 1½ inches.
Character—Nāgarī.
Folios—2.
Lines on a page—6.
Letters in a line—51.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥
यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते ।
अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ॥

उपसंहारः—

ज्ञाननेत्रं समादाय उद्धरेद्ब्रह्मिवत्प(ब्रह्म यत्प)रम् ।
निष्कलं निश्चलं शान्तं तद्ब्रह्माहमिति स्मृतम् ॥
सर्वभूताधिवासं यत् भूतेषु च वसत्यपि ।
सर्वानुग्राहकत्वेन वासुदेवस्तदस्म्यहम् (तदस्म्यहं वासुदेवः) ॥

॥ अमृतबिन्दूपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र मनश्शुद्धिप्रशंसनपूर्वकं ब्रह्मज्ञानावाप्तौ साधनमुपवर्ण्य मुक्तिस्वरूपं निरूप्य ब्रह्मज्ञानं प्रशस्यते ॥

वक्तव्यविशेषः—

यजुश्शाखीयेतीयमुपनिषन्मुद्रिताऽस्मिन् कोशे समग्रा च दृश्यते ॥

No. 204 (1973/10).

अमृतबिन्दूपनिषत्.

Amritabindūpaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inch.
Character—Nāgarī.
Folios—145–147.
Lines on a page—4.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 203 कोशवत्.

उपसंहारः—

No. 203 कोशे द्रष्टव्यः

प्रतिपाद्यविषयः—

No. 203 कोशवत्.

वक्तव्यविशेषः—

No. 203 कोशवत्.

No. 205 (3621/10).

अमृतबिन्दूपनिषत्.

Amritabindūpaniṣat.

Substance—Palm-leaf.
Size—9 ½ × 1½ inches.
Character—Grantha.
Folios—17-18.
Lines on a page—9.
Letters in a line—30.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 203 **कोशवत्**.

उपसंहारः—

No. 203 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 203 **कोशवत्**.

वक्तव्यविशेषः—

No. 203 **कोशवत्**.

No. 206 (B 927/7).

अमृतबिन्दूपनिषत्.

Amritabindūpaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—21-22.
Lines on a page—16.
Letters in a line—24.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 203 **कोशवत्**.

उपसंहारः—

No. 203 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 203 **कोशवत्**.

वक्तव्यविशेषः—

No. 203 **कोशवत्**.

No. 207 (C 1533/4).

अमृतबिन्दूपनिषत्.

Amritabindūpaniṣat.

Substance—Paper.
Size—12 × 5½ inches.
Character—Āndhra.
Folio—11 only.
Lines on a page—14.
Letters in a line—38.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 203 **कोशवत्**.

उपसंहारः—

No. 203 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 203 **कोशवत्**.

वक्तव्यविशेषः—

No. 203 कोशवत्.

No. 208 (B 417/1).

अवधूतोपनिषत्.

Avadhūtōpaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—4.
Lines on a page—13.
Letters in a line—18.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

सह नाववत्विति शान्तिः ॥ अथ ह सांकृतिर्भगवन्तमवधूतं दत्तात्रेयं परिसमेत्य पप्रच्छ । भगवन् कोऽवधूतः । तस्य का स्थितिः । किं लक्ष्म । किं संसरणमिति । तं होवाच भगवान् दत्तात्रेयः—

अक्षरत्वाद्वरेण्यत्वाद्भूतसंसारबन्धनात् ।
तत्त्वमस्यादिलक्ष्यत्वादवधूत इतीर्यते ॥
यो विलङ्घ्याश्रमान् वर्णानात्मन्येव स्थितस्सदा ।
अतिवर्णाश्रमी योगी अवधूतस्स कथ्यते ॥
तस्य प्रियं शिरः कृत्वा मोदो दक्षिणपक्षकः ।
प्रमोद उत्तरः पक्ष आनन्दो गोष्पदायते ॥
गोवालसदृशं शीर्षं नापि मध्ये न चाप्यधः ।
ब्रह्म पुच्छं प्रतिष्ठेति पुच्छाकारेण कारयेत् ॥
एवं चतुष्पथं कृत्वा ते यान्ति परमां गतिम् ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । स्वैरं स्वैरं विहरणं तत्संसरणम् । साम्बरा वा दिगम्बरा वा न तेषां धर्माधर्मौ । न मेध्यामेध्यौ ॥

उपसंहारः—

धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमत्र संपन्नम् ।
धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके ॥
धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनर्धन्यः ।
अहो पुण्यमहो पुण्यं फलितं फलितं दृढम् ॥
अस्य पुण्यस्य सम्पत्तरहो वयमहो वयम् ।
अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम् ॥
अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः ।

इति । य इदमधीते सोऽपि कृतकृत्यो भवति । सुरापानात्पूतो भवति । स्वर्णस्तेयात्पूतो भवति । ब्रह्महत्यात्पूतो भवति । कृत्याकृत्यात् पूतो भवति । एवं विदित्वा स्वेच्छाचारपरो भूयात् । ओं सत्यमित्युपनिषत् ॥

॥ इत्यवधूतोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

सांकृतिदत्तात्रेयप्रश्नोत्तरात्मिकायामस्यामुपनिषद्यादौ अवधूतस्वरूपमुपवर्ण्य अवधूतत्वसिद्ध्युपायं सम्यक् प्रदर्श्य अवधूतस्य वर्णाश्रमधर्मपरित्यागपूर्वकं ब्रह्मानुसन्धानप्रकारं प्रकाश्य तत्रापरितोषाद्वर्णाश्रमधर्माविरोधिब्रह्मज्ञानप्रकारोपपादनेन निगमितं दृश्यते ॥

वक्तव्यविशेषः—

इयमुपनिषत् कृष्णयजुश्शाखीयेति मुद्रिता कोशेऽस्मिन् समग्रा च दृश्यते । तुरीयातीतावधूतोपनिषन्नाम्नी मुद्रिताऽन्या त्वेतदानुपूर्वीविलक्षणा वर्णाश्रमधर्मपरित्यागपूर्वकब्रह्मानुसन्धानमात्रप्रदर्शनपरा शुक्लयजुश्शाखीयतया मुद्रिता परिदृश्यते ॥

No. 209 (B 913/1).

अविमुक्तजाबालोपनिषत् .

Avimuktajābālōpaniṣat.

Substance—Paper.	Character—Grantha.
Size—8 × 6 inches.	Folios—3.

Lines on a page—15.
Letters in a line—22.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—Not so very incorrect.

Complete or incomplete—Complete.

उपक्रमः—

ओं भद्रं कर्णेभिः—दधातु ॥ शान्तिः ॥ ओं बृहस्पतिरुवाच याज्ञवल्क्यं यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं तस्माद्यत्र क्वचन गच्छति तदेव मन्येतेतीदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् ॥

उपसंहारः—

तथा जातरूपधरो निर्द्वन्द्वो निष्परिग्रहस्तत्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्नुदरमात्रेण लाभालाभौ समौ भूत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रादि [नदी] पुलिनगिरिकुहरकन्दरकोटरनिर्झर-(झ्री)रस्थण्डिलेष्व(षु)निकेतवास्यप्रयत्नो निर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठश्शुभाशुभकर्मनिर्मूलनपरो यः संन्यासेन देहत्यागं करोति स परमहंसो नामेति ॥

भद्रं कर्णेभिरिति शान्तिः ॥

॥ इति जाबालोपनिषत् । इत्यविमुक्तजाबालस्समाप्तः ॥

प्रतिपाद्यविषयः—

अत्र म्रियमाणस्य रुद्रकृतरामतारकोपदेशान्मोक्षावाप्तिनिदानस्थातनयाऽविमुक्ताख्यं कुरुक्षेत्रं प्रशस्य शरीर एव भ्रूघ्राणसन्धिभागस्य अविमुक्तक्षेत्रतामुपवर्ण्य तत्र विन्यस्तदृष्टिना ब्रह्मानुसंधानं तत्प्रतिबन्धकदूरीकरणाय संन्यसनप्रकारं च प्रकाश्य संवर्तकारुणिश्वेतकेतुऋभुनिदाघजडभरतदत्तात्रेयरैवतकादीन् परमहंसान् प्रस्तुत्य तल्लक्षणं च निरूपितं दृश्यते ॥

वक्तव्यविशेषः—

इयमुपनिषज्जावालनामा शुक्लयजुर्वेदीयतया मुद्रिता दृश्यते । कोशेऽस्मिन्तु भद्रं कर्णेभिरिति शान्तिमन्त्रपाठदर्शनादाथर्वणिकीति ज्ञायते । 210 कोशपरामर्शादस्या लघुजावालोपनिषदितिच व्यपदेशो ज्ञायते ॥

No. 210 (3621/3).

अविमुक्तजावालोपनिषत्.

Avimuktajābālōpaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—2-4.
Lines on a page—8.
Letters in a line—29.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 209 कोशवत्.

उपसंहारः—

No. 209 कोशवत्.

प्रतिपाद्यविषयः—

No. 209 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् 'लघुजाबालोपनिषत्प्रारम्भः' इत्यारभ्य अन्ते 'लघुजाबालोपनिषत् समाप्ता' इति लिखितं दृश्यते । No. 209 कोशे तावत् 'बृहज्जाबालेषु अविमुक्तजाबालं समाप्तम्' इति अन्ते दृश्यते । आनुपूर्वी तु समानैव । अतस्त्रीण्यस्या उपनिषदः पर्यायनामानीति ज्ञायते ॥

No. 211 (3581/9).

अविमुक्तजाबालोपनिषत्.

Avimuktajābālōpaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—22–23.
Lines on a page—14.
Letters in a line—94.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 209 **कोशवत्**.

उपसंहारः—

No. 209 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 209 **कोशवत्**.

वक्तव्यविशेषः—

No. 209 **कोशवत्**। **कोशेऽस्मिन्नस्या जाबालोपनिषदिति नाम दृश्यते** ॥

No. 212 (1973/3).

अविमुक्तजाबालोपनिषत्.

Avimuktajābālōpaniṣat.

Substance—Palm-leaf.
Size—15 inches × 1 inch.
Character—Nāgarī.
Folios—126–128.
Lines on a page—5.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Last folio is broken.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 209 कोशवत्.

उपसंहारः—

No. 209 कोशवत्.

प्रतिपाद्यविषयः—

No. 209 कोशवत्.

वक्तव्यविशेषः—

No. 209 कोशवत् । अत्रापि कोशे जाबालोपनिषदिति नाम लिखितं दृश्यते ॥

No. 213 (4136/12).

अव्यक्तोपनिषत्.

Avyaktōpaniṣat.

Substance—Palm-leaf.	Age of Ms.—Old.
Size—9½ × 2 inches.	Condition of Ms.—One end of the leaves is worm-eaten.
Character—Āndhra.	Correct or incorrect—Correct.
Folios—46-48.	Complete or incomplete—Complete.
Lines on a page—15.	
Letters in a line—50.	

उपक्रमः—

पुरा किलेदं न किंचनासीत् न द्यौर्नान्तरिक्षं न पृथिवी केवलं ज्योतीरूपमनाद्यनन्तमनण्वस्थूलरूपमरूपं रूपवदविज्ञेयं ज्ञानरूपमानन्दमयमासीत् । तदनन्दत् तद्देधाऽभूत् । हरितमेकं रक्तमपरम् । तत्र यद्रक्तं तत्पुंसो रूपमभूत् । यद्धरितं तन्मायायाः । तौ समागच्छतः । तयोर्वीर्यमेवमनन्दत् । तदवर्धत । तदण्डमभूद्धैमम् । तत्परिणममानमभूत् । ततः परमेष्ठी व्यजायत ॥

उपसंहारः—

जीवन्मुक्तश्च भवति। देहान्ते तमसः परं धाम प्राप्नुयात्। यत्र विराट् नृसिंहोऽवभासते, तत्र खलूपासते। तत्स्वरूपध्यानपरा मुनय आकल्पान्ते तस्मिन्नेवात्मनि निलीयन्ते। न च पुनरावर्तन्ते। न चेमां विद्यामश्रद्दधानाय ब्रूयात्। नासूयावते। ना[न]नूचानाय। नाविष्णुभक्ताय। नानृतिने। नातपसे। नाशान्ताय। नादान्ताय। नादीक्षिताय। नाधर्मशीलाय। ना(न)हिंसकाय। नाब्रह्मचारिणे। इत्येषोपनिषत्॥ आप्यायन्त्विति शान्तिः॥

॥ अव्यक्तनृसिंहोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्राव्यक्ताख्यात्परमात्मनो रक्तहरितरूपतया द्वैधीभावमुपगताद्ब्रह्माण्डोत्पत्तिमभिवर्ण्य तस्मात्परमेष्ठिनो व्यक्तिं प्रकाश्य ततश्चाकाशवाण्या चीर्णतपसस्समुपलब्धनृसिंहानुष्टभगतपदपादाक्षैरव्यक्ताख्यस्य जगतस्सृष्टिक्रमञ्च तन्मन्त्रस्वरूपमहिमादिप्रशंसनसहितं प्रतिपाद्यते॥

वक्तव्याविशेषः—

एतत्कोशान्ते दृश्यमानलेखादस्या उपनिषदः अव्यक्तनृसिंहोपनिषदिति च नामान्तरं दृश्यते। सामवेदीयेति इयमुपनिषन्मुद्रिता समग्रा चास्मिन् कोशे दृश्यते॥

No. 214 (B 418/1).

अव्यक्तोपनिषत्.

Avyaktopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—7.
Lines on a page—12.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 213 **कोशवत्**.

उपसंहारः—

No. 213 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 213 **कोशवत्**.

वक्तव्यविशेषः—

No. 213 **कोशवत्**.

No. 215 (C 696/23).

* आचमनीयोपनिषत्.

* Ācamanīyopaniṣat.

Substance—Paper.
Size—$7\frac{1}{4} \times 4\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—1.
Lines on a page—10.
Letters in a line—25.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief:—

This work relates the rules regarding the performance of Ācamana or the ceremony of rinsing the month as well as the fruits thereof.

उपक्रमः—

अथाचमनं व्याख्यास्यामो जङ्घे पाणिपादौ प्रक्षाळ्य प्राङ्मुखो(ख उ) दङ्मुखो वा बद्धशिखः, यज्ञोपवीतम्, ब्राह्मणस्य दक्षिणहस्ते पञ्च तीर्थानि भवन्ति। अङ्गुल्यग्रे दैवं तीर्थम्। कनिष्ठिकामूले आर्षं तीर्थम्। प्रादेश-

निमूले पैतृकं तीर्थम् । अङ्गुष्ठमूले ब्रह्मतीर्थम् । मध्ये अग्नितीर्थम् । न हसन् न बुद्बुदैर्न च लोकैः ? ॥

गोकर्णाकृतिवत्कृत्वा माषमग्नं जलं पिबेत् ।
न न्यूनमधिकं पीत्वा सुरापानसमं भवेत् ॥
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः ॥
मुक्ता(क्ता)ङ्गुष्ठकनिष्ठे तु सिद्धस्याचमनं स्मृतम् ॥
तेन त्रिराचामेत् ॥

उपसंहारः—

प्रथमं यत्पिबेत्, ऋग्वेदः प्रीणाति । द्वितीयं यत् पिबेत्, यजुर्वेदः प्रीणाति । तृतीयं यत् पिबेत्, सामवेदः प्रीणाति। लोमाधरोष्ठ आथर्वणवेदः प्रीणाति । यश्च(च्च)क्षुषी चन्द्रादित्याः । यन्नासिकास्तेन प्राणाः । यच्छ्रोत्रं तेन दिशः । यन्नाभिं तेन पृथिवीम् । यद्दृशस्तेन विष्णुः । यद्धस्तं तेन रुद्रः । [यत्]मूर्ध्नि तेन कुबेरः । सर्वदेवतास्तेन प्रीणाति । य एवं वेद ॥ आचमनीयोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

फलशंसनपूर्वकमाचमनविधिरत्र प्रतिपाद्यते ॥

वक्तव्यविशेषः—

अमुद्रितेयमुपनिषत् । सर्वत्रोपनिषदादौ दृश्यमानः तत्तच्छान्ति-मन्त्रपाठोऽत्र न दृश्यते ॥

No. 216 (1973/22).

आत्मप्रबोधोपनिषत्.

Ātmaprabodhopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—227-228.
Lines on a page—4.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओं ॥ प्रत्यागानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् , अकार उकारो मकारश्चेति त्रयम(त्रय)क्षरं प्रणवं तदेतदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ओं नमोनारायणाय शङ्खचक्रगदाधराय तस्मादों नमो नारायणेति मन्त्रोपासको वैकुण्ठं भुवनं श्रीमद्भगवल्लोकं गमिष्यति ॥

उपसंहारः—

यत्र ज्योतिरजस्रं यस्मिन् लोके स्वहितं तस्मिन्नेव हि पवमानामृते लोके क्षिते अमृते लोके अक्षिते अमृतत्वं च गच्छत्यमृतत्वं च गच्छत्यों नमः । आत्मप्रबोधोपनिषदं मुहूर्तमुपासित्वा न च पुनरावर्तते न च पुनरावर्तते ॥

॥ इत्यात्मप्रबोधोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र प्रणवस्वरूपं प्रशस्य तत्सहिताष्टाक्षरेण महामन्त्रेण ब्रह्मानुध्यानं कुर्वत उत्तमलोकाद्यवाप्तया परमानन्दानुभवप्रकारोऽभिधीयते ॥

वक्तव्यविशेषः—

ऋक्शाखीयतया मुद्रितायामस्यामुपनिषदि परिदृश्यमान आत्माद्वैतजीवन्मुक्तादिप्रतिपादकास्त्रिंशत्कारिकारूपो ग्रन्थभागः कोशेऽस्मिन्न दृश्यते ॥

No. 217 (115/3).

आनन्दोपनिषत्.

Ānandopaniṣat.

Substance—Palm-leaf.
Size—16 × 1½ inches.
Character—Āndhra.
Folios—24–25.
Lines on a page—7.
Letters in a line—58.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ पार्वत्युवाच—देवदेव दयासिन्धो महादेव महोदय ।
अन्यन्तराणि? चक्राणि न तथैव श्रुतानि मे ॥

एतैस्सर्वैश्चक्रदेव्यैरुपास्या या महेश्वरी ।
ललिताम्बा महाराज्ञी शक्तिचक्रैकनायिका ॥
तस्याश्चक्रं चक्रदेव्यो मुद्रा चक्रेश्वरीगणाः ।
श्रीचक्रमखिलं विद्या कादिर्हादिश्च शङ्कर ॥
उपासनोपकरणमादिपञ्चकमीश्वर ।
किं वेदमूलमथवा भवदागममूलकम् ॥

उपसंहारः—

अथ अथर्वैयमन्या च विद्या च इति त्रिपुरोपनिषदि त्रिपुरोपनिषन्नीणि—

यस्य नो पश्चिमं जन्म यदि वा शङ्करस्स्वयम् ।
तेनैव लभ्यते विद्या श्रीमत्पञ्चदशाक्षरी ॥
अतिगुह्यतमा प्रोक्ता न देया यस्य कस्य चित् ।
दातव्या च सदा तस्मै भक्तिश्रद्धानुकारिणे ॥

थ एवं वेदेत्युपनिषत् ॥

॥ इत्यानन्दनाम्न्युपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि महाविद्यायाः वेदमूलकत्वप्रतिपादनपूर्वकं पञ्चदशाक्षरस्य तन्मन्त्रस्य माहात्म्यं च प्रतिपाद्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा दृश्यते। मुद्रिता त्रिपुरोपनिषदेवात्र कोशे आद्यन्तयोः कतिचिच्छलोकमात्रघटनेन आनन्दोपनिषन्नाम्ना लिखिता दृश्यते ॥

No. 218 (C 1533/2).

आरुणिकोपनिषत्.

Āruṇikopaniṣat.

Substance—Paper. | Character—Āndhra.
Size—12 × 5½ inches. | Folios—9.

Lines on a page—14.
Letters in a line—38.
Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं आप्यायन्त्विति शान्तिः ॥ आरुणेयः प्राजापत्यः प्रजापतेर्लोकं जगाम । तं स गत्वोवाच । भगवन् केन कर्माण्यशेषतो विसृजानीति । तꣳ होवाच प्रजापतिः । तव पुत्रान् भ्रातॄन् बन्धवादीन् शिखां यज्ञोपवीतं यागसूत्रं स्वाध्यायं च भूलोकभुवर्लोकसुवर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकं च अतलवितलसुतलरसातलतलातलमहातलपातालब्रह्माण्डं च विसृजेत् । कौपीनं दण्डमाच्छादनं परिग्रहेत् । शेषं विसृजेत् शेषं विसृजेत् ॥

उपसंहारः—

पालाशं बैल्वमौदुम्बरं दण्डमजिनं मेखलां यज्ञोपवीतं च त्यक्त्वा शूरो य एवं वेद । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवाꣳसस्समिन्धते । विष्णोर्यत्परमं पदम् ॥ इत्येतन्निर्वाणानुशासनं वेदानुशासनमिति ॥

॥ ओं तत्सदिति याजुषभेदे आरुणिकोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

आरुणिप्रजापतिप्रश्नोत्तररूपायामस्यामुपनिषदि सर्वसङ्गपरित्यागपूर्वकसंन्यासाश्रमग्रहणप्रकारमुपवर्ण्य संन्यासिनां धर्मांश्चाभिधायान्ते तेषां वैष्णवस्थानरूपपरमपदावाप्तिराम्नातेति प्रतिपाद्यते ॥

वक्तव्यविशेषः—

गूढारुणिकोपनिषदिति नाम्ना मुद्रितेयमुपनिषत् कोशेऽस्मिन् समग्रा च दृश्यते । अन्ते चास्या उपनिषद आरण्यकोपनिषदिति नाम लिखितं दृश्यते ॥

No. 219 (3621/6).

आरुणिकोपनिषत्.

Āruṇikopaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—8-10.
Lines on a page—8.
Letters in a line—28.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 218 **कोशवत्**.

उपसंहारः—

No. 218 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 218 **कोशवत्**.

वक्तव्यविशेषः—

No. 218 **कोशवत्**.

No. 220 (1973/6).

आरुणिकोपनिषत्.

Āruṇikopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inch.

Character—Nāgarī.
Folios—139-140.

Lines on a page—4.
Letters in a line—68.
Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 218 **कोशवत्**.

उपसंहारः—

No. 218 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 218 **कोशवत्**.

वक्तव्यविशेषः—

No. 218 **कोशवत्**.

No. 221 (B 420/1).

आरुणिकोपनिषत्.

Āruṇikopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—2.
Lines on a page—11.
Letters in a line—17.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 218 **कोशवत्**.

उपसंहारः—

No. 218 कोशवत्.

प्रतिपाद्यविषयः—

No. 218 कोशवत्.

वक्तव्यविशेषः—

No. 218 कोशवत्.

No. 222 (B 123/5).

* आश्रमोपनिषत्.

* Āśramopaniṣat.

Substance—Paper.
Size—$7\frac{3}{4} \times 6$ inches.
Character—Nāgarī.
Folios—16–17.
Lines on a page—12.
Letters in a line—13.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief:—

This work gives a brief description of the four stages of religious life, namely Brahmacarya, etc., and of the respective duties to be performed during those stages.

उपक्रमः—

हरिः ओम्। अथातश्चत्वार आश्रमाः षोडशभेदा भवन्ति। तत्र ब्रह्मचारिणश्चतुर्विधा भवन्ति गायत्रो ब्राह्मणः प्राजापत्यो बृहस्पतिरिति। य उपनयनादूर्ध्वं त्रिरात्रमक्षारलवणाशी गायत्रीमन्त्री स गायत्रः। योऽष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत ब्रह्म . . . . . ग्रहणान्तं वेदस्य स ब्राह्मणः॥

उपसंहारः—

परमहंसा न दण्डधरा मुण्डाः कन्थाकौपीनवाससोऽव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः त्रिदण्डकमण्डलुशिक्यपक्ष-जलपवित्रपात्रपादुकासनशिखायज्ञोपवीतादित्यागिनः शून्यागारे देवगृहे वासिनो नेतरेषां धर्माधर्मान् न चानृतं सर्वसहा सर्वसमा अद्वैतवर्तिसमलोष्टाश्मकाञ्चनाश्चातुर्वर्ण्ये यथोपपन्नं भैक्षचर्यं चरन्त आत्मानं मोक्षयन्त आत्मानं मोक्षयन्ते ॥

॥ इत्याथर्वणे आश्रमोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र ब्रह्मचर्याद्याश्रमिणां चतुर्णां प्रत्येकं चतुर्विधानां स्वरूपं तत्तदाश्रमिणां धर्माश्च संगृह्य प्रतिपाद्यन्ते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत् समग्रोपलभ्यते ॥ अमुद्रितेयमुपनिषत् । आद्यन्तयोः सर्वासूपनिषत्सु परिदृश्यमानः तत्तच्छान्तिमन्त्रपाठोऽत्र न दृश्यते ॥

No. 223 (1958/2).

ईशावास्योपनिषत्.

Iśāvāsyopaniṣat.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Nāgarī.
Folios—1.
Lines on a page—11.
Letters in a line—90.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मागृधः कस्य स्विद्धनम् ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वेनान्यथर्मोऽस्ति (त्वयि नान्यथेतोऽस्ति) न कर्म लिप्यते नरे॥
असुर्या नाम ते लोका अन्धेन तमसा वृताः ।
ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥

उपसंहारः—

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥
पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह । तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ॥
वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।
ओं क्रतो स्मर कृतꣳस्मर क्रतो स्मर कृतꣳ स्मर ॥
अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

॥ ईशावास्योपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र चिदचित्स्वरूपस्य जगतः परमात्माधीनस्वरूपस्थित्यादिमत्त्वं, आदेहपातं यथाशक्ति ब्रह्मविद्याङ्गभूतवर्णमयोगस्यानुष्ठेयत्वं, अविदुषो निन्दनं, परमात्मनो विचित्रानन्तशक्तिमत्त्वं, ब्रह्मात्मकजगदनुसंधानस्य फलं, ईशेशितव्यवेदिनो ज्ञानयोगाद्युपदेशः, केवलकर्मविद्यावलम्बिनां विनिन्दनं, भगवद्भक्तिनिष्ठस्यावश्यानुसंधेयोपदेश इत्यादिकमत्र परिदृश्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे प्रथमपत्रे द्वात्रिंशदुपनिषदां नाम संगृह्य लिखितमस्ति । कोशेऽस्मिन्नियमुपनिषच्छुक्लयजुश्शाखया समग्रा मुद्रिता च दृश्यते ॥

No. 224 (1682/15).

ईशावास्योपनिषत्.

Iśāvāsyopaniṣat.

Substance—Palm-leaf.
Size—15½ × 1½ inches.
Character—Grantha.
Folios—6.
Lines on a page—9.
Letters in a line—48.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 223 कोशवत्.

उपसंहारः—

विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते। हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत्त्वं पूषन्नपावृणु सत्यध . . . . .

प्रतिपाद्यविषयः—

No. 223 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत्पञ्चदशमन्त्रान्ता दृश्यते ॥

No. 225 (B 927/2).

* ऊर्ध्वपुण्ड्रोपनिषत्.

* Ūrdhvapuṇḍropaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—16.

Lines on a page—16.

Letters in a line—24.

Age of Ms.—Modern.

Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

Subject in brief:—

This work deals with the composition of and the manner of wearing the Ūrdhwapundra, that is, the caste mark of the Sri Vaiṣnavās.

उपक्रमः—

अथ प्रणिपत्य नारदो ब्रह्माणमन्वयुङ्क्त। अधीहि भगवो मे। किं पवित्राणां पवित्रम्। केन वा कर्माणि सफलानि। दुश्चरं तपो मर्त्यानाम्। केन सुकरेणामृतत्वमेति। स होवाच। साधु तेऽनुयोगः। शृणु भो पवित्रं सुलभं सुकरम्। यद्विष्णुक्षेत्रं तत्र मृत्स्नां श्वेतामुद्धृताऽसीत्युद्धरेत्। अमृतमेव श्वेतमृत्स्ना भवति॥

उपसंहारः—

Folios—4–10.

Lines on a page—12.
Letters in a line—13.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Appears to be incorrect.
Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat contains twelve khaṇḍas and seems to differ from No. 280. The Śāntimantra Pāṭha generally found at the beginning of Upaniṣats is not to be found here. This Upaniṣat forms a portion of Ātharvaṇarahasya.

उपक्रमः—

हरिः ओम्॥ अथ कात्यायनेति होवाच। परं ब्रह्मेत्येको देवः। विश्वतश्चक्षुरिति विश्वात्मा (रुत विश्वतोमुखो) विश्वतोबाहुरुत विश्वतस्पात्। संबाहुभ्यां [ध]मति सम्पदत्रैद्या(तत्रैर्या)वाभूमी जनयन् देव एकः॥ पुरुषोन्तर्यामोन्तर्यामस्स आदित्यस्तेजो भवत्यादित्यलोको भवति विष्णुलोको भवति तत्तच्चक्रं द्विभुजे धार्यमित्यग्निहोत्रमेव लोको भवति। ऊर्ध्वपुण्ड्रमालिखेत्। तस्माद्विरेखं भवति। भूस्स्वयंभूस्स्वयं ब्रह्मणः सायुज्यं सलोकतां जयति। य एवं वेद॥

उपसंहारः—

कौश्चकीपुत्रात्कौश्चकीपुत्रो वैधृमतेयीपुत्राद्वैधृमतेयीपुत्रः कार्षकेयीपुत्रात्कार्षकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात् साञ्जीवीपुत्र आसुरीवासिनः प्राञ्शीपुत्रात् प्राञ्शीपुत्र आसुरायणादासुरायण आसुरेरासुरिः॥

॥ इत्याथर्वणरहस्ये चक्रोपनिषत् समाप्ता॥

प्रतिपाद्यविषयः—

अत्र द्वादशभिः खण्डैः तत्तच्चक्रधारणप्रशंसा प्रतिपाद्यते। अन्ते शिष्याचार्यपरम्परा च लिखिता दृश्यते॥

वक्तव्यविशेषः—

अस्यामुपनिषदि द्वादश खण्डा वर्तन्ते । चक्रोपनिषदित्याख्यया No. 280 कोशे उपलभ्यमानात् ग्रन्थादयं भिन्नो दृश्यते । उपनिषत्सु तत्तदुपनिषदादौ परिदृश्यमानस्तत्तच्छाखीयशान्तिमन्त्रपाठोऽत्र न दृश्यते । अन्ते च आथर्वणरहस्यान्तर्गतेयमुपनिषदिति लेखात् ज्ञायते । अमुद्रिता चेयमुपनिषत् ॥

No. 283 (B 124/8).

* चिदम्बरोपनिषत् .

*Cidambaropaniṣat.

Substance—Paper.
Size—$7\frac{3}{4} \times 6$ inches.
Character—Kannada.
Folios—42–43.
Lines on a page—12.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief:—

This Upaniṣat extols, in the form of a dialogue between the sage Sanatkumāra and Brahma—the creator, the devotion to Śiva, the greatness of Pañcākṣarī mantra and the wearing of Rudrākṣa and Bhasma. It also states the method and the fruits of pondering over God Śiva who is otherwise known as cidākāśa.

उपक्रमः—

अथ हैनं विधातारं सनत्कुमारस्सर्वेषां जीवलोकानां परमकारुणिकबुभुत्सुरुवाच । भगवन् जीवलोका अविद्यासंवृता भवाम्भोधौ निमज्जयोन्मज्जय कुतश्चिद्विश्रामं न यान्ति । केनैतत्तरन्ति, तथ्यमेवालोच्य ब्रूहीति । तस्मै स होवाच विदिश्च? तथ्यम् ॥

सनत्कुमार प्रवदामि सारं विनिश्चितं यद्वृदि सर्वदा मे ॥

शिवो हि कर्ता जगतामनादिर्न जानते यं श्रुतयोऽपि सम्यक् ॥
यदाश्रयाद्विष्णुरहं च सर्वे सुरासुरा यद्वशवर्तिनश्च ॥
इदं रहस्यं न विदन्ति लोका मायावशादन्यसुरान् भजन्ते ॥

उपसंहारः—

शरीरमेतद्धटवद्विदित्वा चिदम्बरं नित्यमीशं विदित्वा ।
मृत्युं तीर्त्वा सर्वपापं विहृत्य शिवे प्रत्रह्मणि यां तेजः ? ॥
स ओंकारो महादेवः स विष्णुस्स च तारकः ।
नातः परं जगद्भाति यस्य भासा निरन्तरम् ॥
शिव शम्भो महादेव जगदीश सदाशिव ।
परं ज्योतिः परं ब्रह्म तमःपारे प्रतिष्ठितम् ॥
गिरीश गिरिजाजाने गरुडासनपूजित ।
पाहि संसारदुःखौघादिति ध्येयं निरन्तरम् ॥

इत्याह भगवान् विधाता । यश्चाधीते चिदम्बरस्वरूपी भवति । इत्यों सत्यमित्युपनिषत् ॥

॥ इति चिदम्बरोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

सनत्कुमारविधातृप्रश्नोत्तररूपायामस्यामुपनिषदि शिवभक्तिप्रशंसनपूर्वकं शिवदेवताकपञ्चाक्षरीमन्त्रं प्रकाश्य रुद्राक्षभस्मत्रिपुण्ड्राणि प्रशस्य 'अन्तर्लिङ्गं ज्योतिषा संविभातं वहिर्लिङ्गं हृदये सन्निविष्टम्' इत्यादिना चिदाकाशस्य शिवरूपत्वप्रतिपादनं कृत्वा तदुपासनाक्रमस्तदुपासनाफलं चेत्येतत्सर्वमत्र प्रतिपाद्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत्समग्रा दृश्यते, अमुद्रिता च। तत्तदुपनिषदादौ सर्वत्र परिदृश्यमानस्तत्तच्छाखीयशान्तिमन्त्रपाठोऽत्र न दृश्यते ॥

No. 284 (1958/10).

छान्दोग्योपनिषत्.

Chāndogyopaniṣat.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Nāgari.
Folios—26-49.
Lines on a page—10.
Letters in a line- -90.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ ओमित्येतदक्षरमुद्गीथमुपासीत ओमित्युद्गायति तस्योपव्याख्यानमेषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसः वाच ऋग्रसः ऋचस्साम रसः साम्न उद्गीथो रसः स एष रसानां रसतमः परमः पराध्योऽष्टमो य उद्गीथः । कतमा कतमर्क् कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति ॥

उपसंहारः—

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः । आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्य अहिꣳसत्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते ॥ आप्यायन्त्विति शान्तिः ॥ इति छान्दोग्येऽष्टमोऽध्यायः ॥

॥ इति छान्दोग्योपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

छान्दोग्योपनिषदि सामशाखीयायामस्यां—
प्रथमप्रपाठके त्रयोदशभिः खण्डैः—उद्गीथस्यानेकधा उपासनानि,

स्तोभाक्षरोपासनं तत्फलं, सामादिज्ञानं तत्फलं च प्रतिपाद्यते ॥

द्वितीयप्रपाठके चतुर्विंशतिखण्डैः—सान्नः पञ्चधा सप्तधा च उपासनं तत्फलं च कथ्यते ॥

तृतीयप्रपाठके एकोनविंशतिखण्डैः—आदित्योपासनं, मधुविद्या-गायत्रीविद्याशाण्डिल्यविद्याः तत्फलानि चाभिधीयन्ते ॥

चतुर्थप्रपाठके सप्तदशखण्डैः—आख्यायिकया विद्यादानग्रहण-विचारः, उपकोसलविद्याविचारः, ब्रह्मविदो गतिविचारश्च कृतः ॥

पञ्चमप्रपाठके त्रयोविंशतिखण्डैः—प्राणस्य मुख्यत्वविचारः, पञ्चाग्निविद्या, सगुणब्रह्मविद्यायाः फलं, आख्यायिकामुखेन वैराग्योदयाय संसारगतिः, वैश्वानरविद्या चाभिधीयते ॥

षष्ठप्रपाठके षोडशभिः खण्डैः—आख्यायिकामुखेन ब्रह्मविद्या विचारिता, अनेकधा आत्मतत्त्वोपदेशश्च कृतः ॥

सप्तमप्रपाठके षड्विंशतिखण्डैः—भूमविद्या प्रपञ्च्यते ॥

अष्टमप्रपाठके पञ्चदशखण्डैः—दहरविद्या तत्फलं, प्रत्यगात्मविद्या तत्फलं च प्रकाश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत्समग्रा दृश्यते, मुद्रिता च ॥

No. 285 (1468/1).

छान्दोग्योपनिषत्.

Chāndogyopaniṣat.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Āndhra.
Folios—47.
Lines on a page—5.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 284 कोशवत्.

उपसंहारः—

No. 284 कोशवत्.

प्रतिपाद्यविषयः—

No. 284 कोशवत्.

वक्तव्यविशेषः—

No. 284 कोशवत्.

No. 286 (2497/1).

छान्दोग्योपनिषत्.

Chāndogyopaniṣat.

Substance—Palm-leaf.
Size—14½ × 1½ inches.
Character—Nāgarī.
Folios—41.
Lines on a page—7.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 284 कोशवत्.

उपसंहारः—

No. 284 कोशवत्.

प्रतिपाद्यविषयः—

No. 284 कोशवत्.

वक्तव्यविशेषः—

No. 284 कोशवत्.

No. 287 (3581/5).

छान्दोग्योपनिषत्.

Chāndogyopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—10-21.
Lines on a page—14.
Letters in a line—80.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 284 **कोशवत्**.

उपसंहारः—

No. 284 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 284 **कोशवत्**.

वक्तव्यविशेषः—

No. 284 **कोशवत्**.

No. 288 (B 438).

छान्दोग्योपनिषत्.

Chāndogyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—135-143.

Lines on a page—11.
Letters in a line—20.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

आप्यायन्त्विति शान्तिः ॥ श्वेतकेतुर्हारुणेय आस । तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति । स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षस्सर्वान् वेदान धीत्य महामना अनूचानमानी स्तब्ध एयाय । तं ह पितोवाच ॥

उपसंहारः—

स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते । अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते । स यथा तत्र न दाह्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति । तद्धास्य विजज्ञाविति विजज्ञाविति ॥

॥ षष्ठोऽध्यायः ॥

प्रतिपाद्यविषयः—

No. 284 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

अस्मिन् कोशे छान्दोग्योपनिषदि षष्ठाध्यायमात्रं दृश्यते ॥

No. 289 (B 440).

जाबाल्युपनिषत्.

Jābālyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—199–200.

Lines on a page—11.
Letters in a line—20.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं आप्यायन्त्विति शान्तिः। अथ हैनं भगवन्तं जाबालिं पैप्पलादिः पप्रच्छ, भगवन् मे ब्रूहि परमतत्त्वरहस्यम्, किं तत्त्वं को जीवः कः पशुः क ईशः को मोक्षोपाय इति। स तं होवाच। साधु पृष्टं सर्वं निवेदयामि यथाज्ञातमिति। पुनस्स तमुवाच कुतस्त्वया ज्ञातमिति। पुनस्स तमुवाच षडाननादिति॥

उपसंहारः—

त्रिपुण्ड्रं भस्मना करोति यो विद्वान् ब्रह्मचारी गृही वानप्रस्थो यतिर्वा समस्तमहापातकोपपातकेभ्यः पूतो भवति स सर्वान् वेदानधीतो भवति स सर्वान् देवान् ध्यातो भवति स सर्वतीर्थेषु स्नातो भवति स सकलरुद्रमन्त्रजापी भवति न स पुनरावर्तते न स पुनरावर्तत इत्यों सत्यमित्युपनिषत्॥

॥ जाबाल्युपनिषत् समाप्ता॥

प्रतिपाद्यविषयः—

पैप्पलादिजाबालिप्रश्नोत्तररूपायामस्यामुपनिषदि पशुपदार्थनिरूपणपूर्वकं पशुपतिशब्दार्थं प्रकाश्य विभूतिधारणात् ज्ञानं मोक्षासाधनं भवतीत्युक्ता तत्प्रसङ्गात् भस्ममाहिमानमुपवर्ण्य भस्मधारणप्रकारं च प्रकाश्य भस्मधारणप्राशस्त्यं सविस्तरमुपपादितं दृश्यते॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा दृश्यते, सामशाखान्तर्गतेतीयमुपनिषन्मुद्रिता च दृश्यते॥

No. 290 (4136/21).

तारसारोपनिषत्.

Tārasāropaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 2$ inches.
Character—Āndra.
Folios—92.
Lines on a page—16.
Letters in a line—50.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

पूर्णमद इति शान्तिः ॥ बृहस्पतिरुवाच याज्ञवल्क्यम्। यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं तस्माद्यत्र क्वचन गच्छेत् तदेव मन्येतेतीदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं अत्र हि जन्तोः प्राणेषु उत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे ॥

उपसंहारः—

प्रणवानामयुतं जप्तं भवति । दशपूर्वान् दशोत्तरान् पुनाति । नारायणपदमवाप्नोति, य एवं वेद । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम्, इत्युपनिषत् ॥

सामवेदस्तृतीयः पादः । पूर्णमद इति शान्तिः ॥

॥ तारसारोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

भरद्वाजयाज्ञवल्क्यप्रश्नोत्तररूपायामस्यामुपनिषदि रुद्रकर्तृकतारकमन्त्रोपदेशस्थानमविमुक्ताख्यं प्रशस्य स्थूलाष्टाक्षरमन्त्रस्वरूपं प्रकाश्य अकारोकारमकारबिन्दुनादकलाकलातीततत्परूपं सूक्ष्माष्टाक्षरतारकमन्त्रस्वरूपमभिवर्ण्य एतदेवाष्टविधमन्त्ररूपं भवतीत्यष्टौ मन्त्रान् प्रकाश्य एतज्जापिनः फलं चान्तेऽभिहितं दृश्यते ॥

वक्तव्याविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रोपलभ्यते, शुक्लयजुर्वेदीयेति मुद्रिता च ॥

No. 291 (B 441).

तारसारोपनिषत्.

Tārasāropaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—129–132.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 290 कोशवत्.

उपसंहारः—

No. 290 कोशवत्.

प्रतिपाद्यविषयः—

No. 290 कोशवत्.

वक्तव्यविशेषः—

No. 290 कोशवत्.

No. 292 (4136/8).

तुरीयातीतावधूतोपनिषत्.

Turīyātītāvadhūtopaniṣat.

Substance—Paper.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—39.

Lines on a page—15.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

पूर्णमद इति शान्तिः ॥ अथ तुरीयातीतावधूतानां कोऽयं मार्गस्तेषां का स्थितिरिति पितामहो भगवन्तं पितरमादिनारायणं परिसमेत्योवाच । तमाह भगवान्नारायणो योऽयमवधूतमार्गस्थो लोके दुर्लभतरो न तु बाहुल्यो यद्येको भवति स एव नित्यपूतस्स एव वैराग्यमूर्तिस्स एव ज्ञानाकारस्स एव वेदपुरुष इति ज्ञानिनो मन्यन्ते । महापुरुषो यस्तच्चित्तं मय्येवावतिष्ठते । अहं च तस्मिन्नेवावस्थितः ॥

उपसंहारः—

त्यक्तवर्णाश्रमाचारस्सर्वदा दिवानक्तं समत्वेनास्वप्नः सर्वत्र सर्वदा संचारशीलो देहमात्रावशिष्टो जलस्थलकमण्डलुः सर्वदाऽनुन्मत्तो बालोन्मत्तपिशाचवेदकाकी संचरन्नसम्भाषणपरस्स्वरूपध्यानेन निरालम्बमवलम्ब्य स्वात्मनिष्ठानुकूलेन सर्वं विस्मृत्य तुरीयातीतोऽवधूतवेषेण अद्वैतनिष्ठापरः प्रणवात्मकत्वेन देहत्यागं करोति यस्सोऽवधूतः स कृतकृत्यो भवतीत्युपनिषत् ॥ पूर्णमद इति शान्तिः ॥

॥ तुरीयातीतावधूतोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

पितामहनारायणप्रश्नोत्तररूपतया परिदृश्यमानायामस्यामुपनिषदि ब्रह्मज्ञानवैराग्ययोः प्रशंसनाय संन्यास्यवान्तरभेदानां कुटीचकादीनां वृत्तं क्रमेणाश्रित्य अन्ते सर्वमपि परित्यज्य दिगम्बरो भूत्वा त्यक्तवर्णाश्रमाचारो गोवृत्त्या प्राणधारणां कुर्वन् बालोन्मत्तादिवत्संचरन् प्रणवानुसंधानेन देहं त्यजति यस्स तुरीयावधूत इत्यवधूतस्वरूपवृत्तादिकं प्रतिपाद्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा पारिदृश्यते, शुक्लयजुश्शाखीयेतीयमुपनिषन्मुद्रिता च दृश्यते ॥

No. 293 (B 442/1).

तुरीयातीतावधूतोपनिषत्.

Turīyātītāvadhūtopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—2.
Lines on a page—13.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 292 **कोशवत्**.

उपसंहारः—

No. 292 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 292 **कोशवत्**.

वक्तव्यविशेषः—

No. 292 **कोशवत्**.

No. 294 (1448/2).

तैत्तिरीयोपनिषत्.

Taittirīyopaniṣat.

Substance—Palm-leaf.
Size—16⅛ × 2½ inches.
Character—Āndhra.
Folios—27–43.

Lines on a page—7.
Letters in a line—53.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ शं नो मित्रश्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्तिश्शान्तिश्शान्तिः ॥

शीक्षां व्याख्यास्यामः । वर्णस्स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तश्शीक्षाध्यायः ॥

उपसंहारः—

एतद्वै जरामर्यमग्निहोत्रꣳ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ॥

प्रतिपाद्यविषयः—

तैत्तिरीयोपनिषद्यस्यां सांहित्याख्यायां शिक्षावल्लयामङ्गभूतोपासनोपदेशपूर्वकं परविद्या प्रस्तूयते । आनन्दवल्लयां परमतत्वहितपुरुषार्थप्रतिपादनं दृश्यते । वारुण्याख्यायां भृगुवल्यां तपोवधूतकल्मषमनसो ब्रह्मप्रतिपत्तिरित्यभिधीयते ॥

याज्ञिक्युपनिषदभिख्ये नारायणानुवाके नारायणाख्यस्य परस्य ब्रह्मणः स्वरूपाद्यभिधानपूर्वकं तद्धयानुपयोगिस्नानादिकालजप्यमनून् वि निर्दिश्य दहरादिविद्योपास्यस्य तस्य परमपुरुषस्य प्राप्तावुपायभूतविद्यास्वभ्यार्हिता विद्या तत्फलं चेत्येतत्सर्वमभिधीयते ॥

वक्तव्यविशेषः—

तैत्तिरीयशाखायां याजुष्यामुपनिषत्काण्डमिदम् । तत्रोपनिषन्नाम परप्राप्तिहेतुर्विद्या । तत्प्रतिपादकग्रन्थभागोऽप्युपनिषत्पदेन व्यवह्रियते । तत्रास्मिन् औपनिषदे काण्डे सांहिती वारुणी याज्ञिकी चेति तिस्र उपनिषदो दृश्यन्ते । आधिलौकिक्यादिपञ्चमहासंहिताभावनाप्रधाना आदितो द्वादशानुवाकाः सांहित्युपनिषदित्युच्यते । ततस्त्रयोऽनुवाका वरुणनामकऋषिणा स्वात्मजं प्रत्युपदिष्टत्वाद्वारुण्युपनिषदित्युच्यते । ततः समस्त अन्तिमः प्रश्नो यज्ञनाम्ना भगवता नारायणेनैवोपदिष्टत्वात्तत्प्राप्त्युपायप्रतिपादकत्वाच्च याज्ञिक्युपनिषदित्युच्यते । इदं चौपनिषदं काण्डं द्राविडान्ध्रपाठभेदेन तत्र तत्र विभिन्नपाठं दृश्यते । अन्तिमप्रश्ने भूयान् पाठभेदः परिदृश्यते । द्राविडपाठानुरोधिसायणार्यभाष्यपर्यालोचनायां कर्णाटपाठ इत्यप्यपरः पाठः, तत्रापि पाठभेद इति ज्ञायते । स च पाठोऽद्य नोपलभ्यते । वेदैकदेशेऽप्यस्मिन्नयं पाठभेदः किमर्थं प्रवृत्त इति परिचिन्तनीयम् । तत्र द्राविडपाठे काण्डमिदं शिक्षानन्दभृगुवल्लीनामेकप्रश्नतया नारायणानुवाकस्य चान्यप्रश्नतया प्रश्नद्वयेन विभक्तं दृश्यते । आन्ध्रपाठे तु प्रतिवल्ल्येकैकप्रश्नतया प्रश्नचतुष्टयेन विभक्तं दृश्यते । कोशेऽस्मिन्निदमौपनिषदं काण्डं द्राविडपाठानुरोधि समग्रं दृश्यते, मुद्रितं च ॥

No. 295 (4380/2).

तैत्तिरीयोपनिषत्.

Taittirīyopaniṣat.

Substance—Palm-leaf.
Size—14 × 1¼ inches.
Character—Nāgarī.
Folios—43-71.
Lines on a page—5.
Letters in a line—66.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 294 कोशवत्.

उपसंहारः—

No. 294 कोशवत्.

प्रतिपाद्यविषयः—

No. 294 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् आन्ध्रपाठानुरोधिनी तैत्तिरीयोपनिषत् नारायणानुवाकान्ता समग्रा दृश्यते ॥

No. 296 (1958/8).

तैत्तिरीयोपनिषत्.

Taittirīyopaniṣat.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Nāgarī
Folios—11–14.
Lines on a page—10.
Letters in a line—90.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 294 कोशवत्

उपसंहारः—

एतमानन्दमयमात्मानमुपसंक्रम्य । इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन् । एतत्साम गायन्नास्ते । हा ३ वु हा ३ वु हा ३ वु । अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नादः । अहꣳश्लोककृद्

हꣳश्लोककृदहꣳश्लोककृत् । अहमस्मि प्रथमजा ऋता३स्य । पूर्वं देवेभ्यो मृतस्य ना३भा३यि । यो मा ददाति स इ देवमा३वा३ः । अहमन्नमन्नमदन्तमा३द्मि । अहं विश्वं भुवनमभ्यभवाम् । सुवर्न ज्योतीः । य एवं वेद । इत्युपनिषत् ॥

प्रतिपाद्यविषयः—

No. 294 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् आन्ध्रपाठानुरोधिनी तैत्तिरीयोपनिषत् भृगुवल्ल्यन्ता परिदृश्यते ॥

No. 297 (B 444/1).

तैत्तिरीयोपनिषत्.

Taittirīyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra..
Folios—69-82.
Lines on a page—11.
Letters in a line—19.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 294 कोशवत्.

उपसंहारः—

No. 296 कोशवत्.

प्रतिपाद्यविषयः—

No. 294 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशोऽस्मिन् द्राविडपाठानुरोधिनी तैत्तिरीयोपनिषत् भृगुवल्लयन्ता परिदृश्यते ॥

No. 298 (B 664/1).

त्रिपुरातापिन्युपनिषत्.

Tripurātāpinyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Kannada.
Folios—20-40.
Lines on a page—13.
Letters in a line—24.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥
त्रिपुरातापिनीविद्यावेद्यचिच्छक्तिविग्रहम् ।
वस्तु चिन्मात्ररूपं तु परतत्त्वं भजाम्यहम् ॥

ओं, अथैतस्मिन्नन्तरे भगवान् प्रजापतिं वैष्णवं विलयकारणं रूपमाश्रित्य त्रिपुराभिधा भगवतीत्येवमादिशक्त्या भूर्भुवस्स्वर्लोकाणि स्वर्गभूपातालानि त्रिपुराणि हरमायात्मिकेन ह्रींकारेण हृल्लेखाभ्यां भगवतीत्रिकूटावसाने निलये विलये धाम्नि मसा (महसा)घोरेण व्याप्नोति । सैवेयं भगवती त्रिपुरेति व्यापठ्यते ॥

उपसंहारः—

आकाशाद्यनुक्रमेण, सर्वेषां वा एतद्भूतानामाकाशः परायणम् । सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्ते । आकाशे एव विलीयन्ते । तस्मादेव जातानि जीवन्ति । तस्मादाकाशजं बीजं विद्या । तदेव आकाशपीठं स्पर्शनं पीठं तेजःपीठं अमृतपीठं रत्नपीठं जानीयात् । यो जानीते सोऽमृतत्वं गच्छति । तस्मादेतां विद्यां तुरीयां श्रीकामराजी-

योमेकादशधा भिन्नां एकाक्षरं ब्रह्मेति यो जानीते स तु तुरीयं पदं प्राप्नोति। य एवं वेदेति महोपनिषत्॥

भद्रं कर्णेभिरिति शान्तिः। इति त्रिपुरातापिन्युपनिषत् संपूर्णा॥

प्रतिपाद्यविषयः—

पञ्चधा विभक्तायामस्यां प्रथमोपनिषदि—प्रणवेन प्रतिपाद्यं यत् तदेव ह्रींकारेण चिच्छक्तिरिति प्रतिपाद्यते। तस्या एवत्रिपुरादुर्गात्रयम्बकविद्यादीनि नामान्तराणि सविवरणं प्रतिपाद्यन्ते। अनेकधा उपासनार्थं चन्द्रविद्या मानवीविद्या इत्यादयो विद्याश्च प्रदर्शिताः।

द्वितीयोपनिषदि—पूर्वोक्तविद्याभ्यो भिन्नं विद्याष्टकं निरूप्य श्रीचक्रं तदुपासनाक्रमश्च निरूपितः॥

तृतीयोपनिषदि—मुद्राः यागद्रव्याणि यष्टुः फलं च प्रतिपादितम्॥

तुरीयोपनिषदि—त्रयम्बकमन्त्रव्याख्यानं तदुपासनाक्रमश्च कथितः॥

पञ्चम्यामुपनिषदि—ब्रह्मविद्या विचारिता, तत्फलं च कथितम्॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा दृश्यते, अथर्वशाखान्तर्गतेयमिति मुद्रिता च। इतो भिन्ना त्रिपुरानाम्नी काचनान्याऽप्युपनिषद्दृश्यते। अस्या एव सौभाग्यविद्योपनिषदिति नामान्तरमत्रत्यलिखितकोशपरामर्शात् ज्ञायते। उपनिषदियं शक्तिप्रशंसापरेत्येतत्परिशीलयितॄणां सुस्पष्टम्॥

No. 299 (B 636).

त्रिपुरातापिन्युपनिषत्.

Tripurātāpinyupaniṣat.

Substance—Paper.	Character—Nāgarī.
Size—$7\frac{1}{4} \times 6$ inches.	Folios—7.

Lines on a page—20.
Letters in a line—27.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 298 कोशवत्.

उपसंहारः—

No. 198 कोशवत्.

प्रतिपाद्यविषयः—

No. 298 कोशवत्.

वक्तव्याविशेषः—

No. 298 कोशवत्.

No. 300 (4136/16).

त्रिपुरातापिन्युपनिषत्.

Tripurātāpinyupaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Andhra.
Folios—68-72.
Lines on a page—16.
Letters in a line—50.
Age of Ms.—Modern.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

शक्तिं दर्शयति । तत्सवितुरिति पूर्वेणाध्वना सूर्याधश्चान्द्रिकां व्यालिख्य मूलादिब्रह्मरन्ध्रगं साक्षरमद्वितीयमाचक्षत इत्याह ॥

उपसंहारः—

No. 298 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 298 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

कोशेऽस्मिन् आदावेकपत्रलोपादुपनिषदादिभागो लुप्तो दृश्यते ॥

No. 301 (3581/1).

त्रिपुरातापिन्युपनिषत्.

Tripurātāpinyupaniṣat.

Substance—Palm-leaf.
Size—20 × 2½ inches
Character—Āndhra.
Folio—3.
Lines on a page—12.
Letters in a line—89.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अथातो जातवेदसे सुनवाम सोममित्यादि पठित्वा त्रैपुरीव्यक्तिर्लक्ष्यते । जातवेदस इत्येकर्चसूक्तस्य आद्यमध्यमावसानेषु तत्रस्थानेषु विलीनं बीजसागररूपं व्याचक्ष्वेत्यृषय ऊचुः ॥

उपसंहारः—

No. 298 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 298 **कोशे द्रष्टव्यः.**

वक्तव्याविशेषः—

प्रयमोपनिषदं विना अवशिष्टाः चतस्रः उपनिषदः समग्राः अस्मिन् कोशे उपलभ्यन्ते ॥

No. 302 (B 446/1).

त्रिपुरातापिन्युपनिषत्.

Tripurātāpinyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—3.
Lines on a page—13.
Letters in a line—14.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

देवा ह वै भगवन्तमब्रुवन् स्वामिन्नः कथितꣳ स्फुटं क्रियाकाण्डꣳ स विषयं त्रैपुरम् । अथ परमं निर्विशेषं कथयस्वेति। तान् होवाच भगवान् तुरीयया मायया ऽन्त्यया निर्दिष्टं परं ब्रह्मेति परमपुरुषं. चिद्रूपं परमात्मेति च ॥

उपसंहारः—

No. 298 कोशवत्.

प्रतिपाद्यविषयः—

No. 298 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

अस्मिन् कोशे त्रिपुरातापनीयोपनिषत्सु पञ्चम्युपनिषत् एकैव दृश्यते ॥

No. 303 (B 271/4).

त्रिपुरोपनिषत्.

Tripuropaniṣat.

Substance—Paper.
Size—6 × 7½ inches.
Character—Malayāḷa.
Folios—245-249.
Lines on a page—20.
Letters in a line—10.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

सहना— शान्तिः ॥
ओं तिस्रः पुरस्त्रिपथा विश्वचर्षणी। तत्रा कथा अक्षरास्सन्निविष्टाः॥
अधिष्ठायैनां अजरा पुराणी। महत्तरा महिमा देवतानाम् ॥
नवयोनिर्नवचक्राणि दीधिरे। नवैव योगा नवयोगिन्यश्च ॥
नवानां चक्रा अधिनाथा। स्योना नवमुद्रा नवभद्रा महीनाम् ॥

उपसंहारः—

समप्रधानौ समसत्त्वौ समोजौ तयोश्शक्तिरजरा विश्वयोनिः।
परिस्तृतं हविषा पाचितेन (भावितेन) प्रसङ्कोचे गळिता वैमनस्कः॥
शर्वस्सर्वस्य जगतो विधाता भर्ता हर्ता विश्वरूपत्वमेति।
इयं महोपनिषत्त्रैपुर्यायामक्षरं परमो गीर्भिरीट्टे ॥
एषर्ग्यजुः सामैवायमथर्वैयमन्या च विद्या। एवं वेदेत्युपनिषत् ॥

॥ इति त्रिपुरोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः —

अत्र कौलमार्गानुयायिभिः शाक्तैः स्वेष्टदेवताप्रसादसिद्ध्यर्थं देवतायै पललादिनिवेदनादिकमभिधाय तदुपासनाप्रकारोऽभिहितो दृश्यते॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नुपनिषदियं समग्रा दृश्यते, ऋग्वेदान्तर्गततया मुद्रिता च। पलादिभिर्देवतातर्पणबोधिका चेयं कथमुपनिषत्स्यादिति चिन्तनीयम्। एतदुपनिषदादौ शान्तिमन्त्रलेखनं च कोशभेदेन अन्यथाऽन्यथैव दृश्यते। अत्रैव कोशेऽन्ते परिदृश्यमाने उपनिषदोऽस्या एव कस्मिंश्चिद्ब्राह्मणे अश्वमेधानधिकारिणां ब्राह्मणानां अश्वमेधप्रकरणवेदभागे यथा पारायणमात्राधिकारिता तथाऽस्या अप्युपनिषदः पारायणमात्रफलत्वं न त्वाचरणोपयोगित्वमित्यभिहितं दृश्यते ॥

No. 304 (B 445/1).

त्रिपुरोपनिषत्.

Tripuropaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Grantha.
Folio—2.
Lines on a page—13.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 303 कोशवत्.

उपसंहारः—

No. 303 कोशवत्.

प्रतिपाद्यविषयः—

No. 303 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् समग्रेयमुपनिषद्दृश्यते ॥ अत्र ऋक्शाखीयशान्तिमन्त्रपाठ उपनिषदादौ दृश्यते ॥

No. 305 (3581/10).

त्रिपुरोपनिषत्.

Tripuropaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—23.
Lines on a page—6.
Letters in a line—94.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appears to be correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 303 **कोशवत्**.

उपसंहारः—

No. 303 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 303 **कोशवत्**.

वक्तव्यविशेषः—

कोशेऽस्मिन् इयमुपनिषत्समग्रा दृश्यते। अत्र कोशे अथर्वशाखीयशान्तिमन्त्रलेखनमुपनिषदादौ दृश्यते॥

No. 306 (4136/18).

त्रिपुरोपनिषत्.

Tripuropaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—73.

Lines on a page—16.

Letters in a line—50.

Age of Ms.—Old.

Condition of Ms.—Worm-eaten here and there.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 303 कोशवत्.

उपसंहारः—

No. 303 कोशवत्.

प्रतिपाद्यविषयः—

No. 303 कोशवत्.

वक्तव्यविशेषः—

कोशोऽस्मिन्प्रियमुपनिषत्समग्रा दृश्यते। कोशोऽत्रोपनिषदादौ ऋक्शाखीयशान्तिमन्त्रलेखनं दृश्यते॥

No. 307 (B 447/1).

त्रिशिखिब्राह्मणोपनिषत्.

Trisikhibrāhmaṇopaniṣat.

Substance—Paper.

Size—8 × 6 inches.

Character—Āndhra.

Folios—18.

Lines on a page—11.

Letters in a line—16.

Age of Ms.—Modern.

Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

उपक्रमः—

ओं पूर्णमद इति शान्तिः ॥ त्रिशिखी ब्राह्मण आदित्यलोकं जगाम । तं गत्वोवाच । भगवन् किं देहः किं प्राणः किं कारणं किमात्मा । तं होवाच, सर्वमिदं शिव एव विजानीहि । किन्तु नित्यशुद्धो निरञ्जनो विभुरद्वयः शिव एकः स्वेन भासेदं सर्वं दृष्ट्वा तत्तायःपिण्डवदेकं भिन्नवदवभासते । तद्भासकं किमिति चेदुच्यते । सच्छब्दवाच्यमविद्याशवलं ब्रह्म, ब्रह्मणोऽव्यक्तं, अव्यक्तान्महान्, महतोऽहंकारः ॥

उपसंहारः—

अहमेव परं ब्रह्म ब्रह्माहमिति संस्थितिः ।
समाधिस्स तु विज्ञेयस्सर्ववृत्तिविवर्जितः ॥
ब्रह्म संपद्यते योगी न भूयस्संसृतिं व्रजेत् ।
एवं विशोध्य तत्त्वानि योगी निस्स्पृहचेतसा ॥
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यते ।
ग्राह्यभावे मनः प्राणो निश्चयज्ञानसंयुतः ॥
शुद्धसत्त्वे परे लीनो जीवस्सैन्धवपिण्डवत् ।
मोहजालिकसंघातो विश्वं पश्यति स्वप्नवत् ॥
सुषुप्तिवद्यश्चरति स्वभावपरनिश्चयः ।
निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते ॥

इत्युपनिषत् ॥ त्रिशिखिब्राह्मणोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

त्रिशिखिनामकब्राह्मणसूर्यप्रश्नोत्तररूपायामस्यामुपनिषदि देहस्वरूपादिकमभिधाय पञ्चीकरणप्रक्रियां सङ्क्षेपेण प्रकाश्य तत्त्वानि निरूप्य अष्टाङ्गयोगमपि विस्तरेण बहुभिः पद्यैरुपवर्ण्य योगसिद्धिक्रमश्च प्रतिपादितो दृश्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत्समग्रा, शुक्लयजुश्शाखान्तर्गतेति मुद्रिता च दृश्यते ॥

No. 308 (3581/34).

त्रिशिखिब्राह्मणोपनिषत्.

Triśikhibrāhmaṇopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—35-36.
Lines on a page—12.
Letters in a line—110.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. B 307 कोशवत्.

उपसंहारः—

No. B 307 कोशवत्.

प्रतिपाद्यविषयः—

No. B 307 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् आसनविशेषतल्लक्षणादिप्रतिपादनपराः कोशान्तरे परिदृश्यमानाः त्रिंशत्तमश्लोकप्रभृति शताधिकैकोनषष्टितमश्लोकपर्यन्ता मध्यगताः श्लोका न परिदृश्यन्ते ॥

No. 309 (B 449/1).

दत्तात्रेयोपनिषत्.

Dattātreyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—181-185.

Lines on a page—11.
Letters in a line—20.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं भद्रं कर्णेभिरिति शान्तिः ॥ ओं सत्यक्षेत्रे ब्रह्मा नारायणं महासाम्राज्यं किं तारकं तन्मे ब्रूहि भगवन्नित्युक्तः सत्यानन्दचिदात्मकं सात्विकं मामकं धामोपास्स्वेत्याह। सदा दत्तोऽहमस्मीति प्रत्येतत्संवदन्ति येन ते असंसारिणो वदन्ति । नारायणेनैवं विवक्षितो ब्रह्मा बिश्वरूपधरं विष्णुं नारायणं दत्तात्रेयं ध्यात्वा सद्वदति । दमिति हंसः । दामिति दीर्घं, तत् बीजं नामबीजस्थं दामित्येकाक्षरं भवति । तदेव तत्तारकं भवति । तदेवोपासितव्यं विज्ञेयम् ॥

उपसंहारः—

ब्रह्महत्यादिपातकैर्मुक्तो भवति । गोहत्यादिपातकैर्मुक्तो भवति । तुलापुरुषादिदानैः प्रपापानतः पूतो भवति । अशेषपापात् मुक्तो भवति। भक्ष्याभक्ष्यपापैर्मुक्तो भवति। सर्वयोगमन्त्रपारीणो भवति । स एव ब्राह्मणो भवति। तस्माच्छिष्यं भक्तं प्रतिगृह्णीयात्। सोऽनन्तफलमश्नुते। स जीवन्मुक्तो भवतीत्याह भगवान्नारायणो ब्रह्माणमित्युपनिषत् ॥

॥ दत्तात्रेयोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

ब्रह्मनारायणप्रश्नोत्तररूपायामस्यामुपनिषद्यादौ नारायणांशस्य दत्तात्रेयस्य वाचकं यत्पदं तस्यार्थमुपवर्ण्य ऋषिच्छन्दोदेवतादिकथनपूर्वकं दत्तात्रेयदेवताका एकाक्षरषडक्षरद्वादशाक्षरषोडशाक्षरद्वात्रिंशदक्षरमालामन्त्रानभिधाय एतदुपनिषत्पाठस्य फलं चाभिहितं दृश्यते ॥

वक्तव्यविशेषः—

खण्डद्वयात्मिकेयमुपनिषत् समग्राऽस्मिन् कोशे दृश्यते, अथर्वशाखीयेति मुद्रिता च ॥

No. 310 (B 450/1).

दर्शनोपनिषत्.

Darśanopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—65-83.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

आप्यायन्त्विति शान्तिः ॥
दत्तात्रेयो महायोगी भगवान् भूतभावनः ।
चतुर्भुजो महाविष्णुः योगसाम्राज्यदीक्षितः ॥
अस्य शिष्यो मुनिवरः साङ्कृतिर्नाम भक्तिमान् ।
पप्रच्छ गुरुमेकान्ते प्राञ्जलिर्विनयान्वितः ॥
भगवन् ब्रूहि मे योगं साष्टाङ्गं सप्रपञ्चकम् ।
येन विज्ञातमात्रेण जीवन्मुक्तो भवाम्यहम् ॥
साङ्कृते शृणु वक्ष्यामि योगं साष्टाङ्गदर्शनम् ।
यमश्च नियमश्चैव तथैवासनमेव च ॥
प्राणायामस्तथा ब्रह्मन् प्रत्याहारस्तथा परम् ।
धारणा च तथा ध्यानं समाधिश्चाष्टमो मुने ॥

उपसंहारः—

यदा मनसि चैतन्यं भाति सर्वत्रगं सदा ।
योगिनोऽव्यवधानेन तदा सम्पद्यते स्वयम् ॥
यदा सर्वाणि भूतानि स्वात्मन्येवाभिपश्यति ।
सर्वभूतेषु चात्मानं ब्रह्म सम्पद्यते तदा ॥

यदा सर्वाणि भूतानि समाधिस्थोऽनुपश्यति ।
एकभूतः परेणासौ तदा भवति केवलः ॥
यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रं जगत् कृत्स्नं तदा भवति निर्वृतिः ॥
एवमुक्त्वा स भगवान् दत्तात्रेयो महामुनिः ।
साङ्कृतिः स्वस्वरूपेण सुखमास्तेतिनिर्भयः ॥

॥ दर्शनोपनिषदुत्तराङ्कचतुष्टयम् ॥

॥ इति दर्शनोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

सांकृतिदत्तात्रेयप्रश्नोत्तररूपायां खण्डदशकपरिमितायामस्यामुपनिषदि—

प्रथमखण्डे—योगाङ्गानां दशविधयमानां विस्तरेण प्रतिपादनं कृतम् ॥
द्वितीयखण्डे—योगाङ्गानां नियमानां विवरणं कृतम् ॥
तृतीयखण्डे—योगोपयुक्तानां नवविधासनानां स्वरूपं निर्णीतम् ॥
चतुर्थखण्डे—देहान्तर्गतानां नाडीनां स्थानानि विविच्य कथयित्वा प्राणापानादिवायूनां—स्थानानि कार्याणि च निरूप्य संक्षेपत आत्मोपदेशः कृतः ॥
पञ्चमखण्डे—नाडीनां शुद्धिक्रमः समासतः कथितः ॥
षष्ठखण्डे—प्राणायामक्रमः, प्रणायामभेदाः सविस्तरं निरूपिताः । तत्फलानि च निरूपितानि ॥
सप्तमखण्डे—प्रत्याहारशब्दार्थोपवर्णनपूर्वकं प्रत्याहारक्रमो निरूपितः । तत्फलं च कथितम् ॥
अष्टमखण्डे—पञ्चविधधारणानिरूपणं कृतम् ॥
नवमखण्डे—ध्याननिरूपणं तपत्फलनिरूपणं च कृतम् ॥
दशमखण्डे—समाधिशब्दार्थं निरूप्य समाधिस्थित्यभ्यासक्रमो निरूपितः तत्फलं च निरूपितम् ॥

वक्तव्यविशेषः—

इयमुपनिषत् समग्राऽस्मिन् कोशे परिदृश्यते, सामशाखीयेति मुद्रिता च ॥

No. 311 (1682/3).

दीपशिखोपनिषत्.

Dīpaśikhopaniṣat.

Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—3.
Lines on a page—6.
Letters in a line—32.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

अथ दीपशिखोपनिषत् ॥
अथ दीपशिखायां यामात्रा सा मात्रा परमे नि ना ॥
(दीपशिखा तु या मात्रा सा मात्रा परमेश्वरे) ॥
स भिद्यते (भिन्दन्ति) योगिनस्सूर्ये योगाभ्यासेन वै पुनः ॥
द्वितीयं पट्सु सुषुम्नाया द्वारं परिशुध्यति समर्धति ॥
(द्वितीय ँ सुषुम्नाद्वारं पारिशुभ्रं समर्पितम्) ॥
कपालसंपुटं भित्त्वा ततः पश्यति तत्परम् ॥
न ध्यायते जन्तुरालस्याच्च प्रमादतः ॥
यदि कालमापतेत् स गच्छेत्परमं पदम् ॥
(अथ तद्ध्यायते जन्तुरालस्याच्च प्रमादतः ॥
यदि त्रिकालमागच्छेत् स गच्छेत्पुण्यसंपदम्) ॥

उपसंहारः—

पुण्यमेतत्समासाद्यं संक्षेपात् कथितं मया ॥
लब्धं योगोपलब्धेषु प्रसन्नः परमेष्ठिनि ॥
(लब्धयोगोऽथ बुध्येत प्रसन्नं परमेश्वरम्) ॥

जन्मान्तरसहस्रेषु यदा क्षीयेत (क्षीणं तु) किल्विषम् ॥
तदा पश्यति योगेन संसारोच्छेदने परम् । संसारोच्छेदनं परमिति ॥
॥ परिसमाप्तेयमुपनिषद्दीपशिखा ॥

प्रतिपाद्यविषयः—

योगशिखोपनिषदन्तर्गतेऽस्मिन् दीपशिखाख्ये श्लोकपञ्चके शरीरान्तर्योगाभ्यासमहिम्ना आदित्यमण्डलाकारं वह्निमुपलक्ष्य तत्र शिखायां परमात्मानुसन्धातुर्दिव्यपदावाप्तिरित्यभिधीयते ॥

वक्तव्यविशेषः—

योगशिखोपनिषदः प्रथमाध्यायमध्यगतश्लोकपञ्चकमेवात्र दीपशिखोपनिषन्नाम्ना लिखितं दृश्यते ॥ कोशेऽस्मिन् दृश्यमानो ग्रन्थोऽशुद्ध इति मुद्रितकोशस्थपाठमनुरुध्य शोधितः ॥

No. 312 (B 664/3).

देव्युपनिषत् .

Devyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Kannada.
Folios—46-48.
Lines on a page—13.
Letters in a line—24.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥ ओं, सर्वे वै देवा देवीमुपतस्थुः । काऽसि त्वं महादेवि । साऽब्रवीत् । अहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् शून्यं चाशून्यं च । अहमानन्दानन्दः । अहं विज्ञानाविज्ञाने । अहं [ब्रह्मा]ब्रह्मणी वेदितव्ये इत्याहाथर्वणी श्रुतिः । अहं पञ्चभूतान्यहमपञ्चभूतानि । अहमखिलं जगत् । वेदोऽहमवेदोऽहम् । विद्याऽहमविद्याऽहम् ॥

उपसंहारः—

प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । तत्सायंप्रातः प्रयुञ्जानः सपापोऽपापो भवति । निशीथे तुरीयसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवति । नूतनप्रतिमायां जप्त्वा देवतासांनिध्यं तु भवति । प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति । भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति । य एवं वेदेत्युपनिषत् ॥ भद्रं कर्णेभिरिति शान्तिः ॥

॥ इति देव्युपनिषत् संपूर्णा ॥

प्रतिपाद्यविषयः—

देवदेवीप्रश्नोत्तररूपायामस्यामुपनिषदि भगवतश्शक्त्यात्मिका देवी प्रकृतिपूरुषात्मकसमस्तजगन्निदानभूतेत्युपवर्ण्य तत्स्वरूपमाहात्म्यादिप्रदर्शनपरं सूक्तं प्रकाश्य तद्देवताकमन्त्रज्ञानपूर्वकं तस्या बहूनि नामधेयानि निरुच्य एतदुपनिषत्पाठकस्य फलं च प्रतिपादितं दृश्यते ॥

वक्तव्यविशेषः—

इयमुपनिषत् अस्मिन् कोशे समग्रोपलभ्यते, अथर्वशाखीयेति मुद्रिता च ॥

No. 313 (B 281).

देव्युपनिषत्.

Devyupaniṣat.

Substance—Paper.
Size—$4 \times 6\frac{1}{2}$ inches.
Character—Granthа.
Folios—$5\frac{1}{2}$.
Lines on a page—18.
Letters in a line—10.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 312 कोशवत्.

उपसंहारः—

No. 312 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 312 **कोशवत्**.

वक्तव्यविशेषः—

No. 312 **कोशवत्**.

No. 314 (B 451).

देव्युपनिषत्.

Devyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—4.
Lines on a page—13.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 312 **कोशवत्**.

उपसंहारः—

No. 312 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 312 **कोशवत्**.

वक्तव्यविशेषः—

No. 312 **कोशवत्**.

No. 315 (4136/17).

देव्युपनिषत्.

Devyupaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—72–73.
Lines on a page—16.
Letters in a line—50.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 312 **कोशवत्.**

उपसंहारः—

No. 312 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 312 **कोशवत्.**

वक्तव्यविशेषः—

No. 312 **कोशवत्.**

No. 316 (3581/20).

* देशिकोपनिषत्.

* Deśikopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—26.
Lines on a page—2
Letters in a line—90.

Age of Ms.—Old.

Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat, after explaining the meaning of the word "Guru," states the characteristics and the greatness of Guru or preceptor.

उपक्रमः—

सह नाववत्विति शान्तिः ॥
आचार्यो वेदसंपन्नो विष्णुभक्तिर्विमत्सरः ।
मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयश्शुचिः ॥
गुरुभक्तिसमायुक्तः पुरुषज्ञो विशेषतः ।
एवं लक्षणसंपन्नो गुरुरित्यभिधीयते ॥
गुशब्दस्त्वन्धकारस्स्याद्रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ॥

उपसंहारः—

गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥
गुरुरेव परा काष्ठा गुरुरेव परं धनम् ।
यस्मात्तदुपदेष्टाऽसौ तस्माद्गुरुतरो गुरुः ॥ इति ॥
॥ इति देशिकोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

गुरुशब्दार्थनिर्वचनपूर्वकं गुरुलक्षणं प्रदर्श्य गुरोरेव सर्वापेक्षया आधिक्यं प्रतिपाद्यते ॥

वक्तव्यविशेषः—

इयमुपनिषत् अस्मिन् कोशे समग्रा दृश्यते ॥ अमुद्रिता चेयमुपनिषत् ॥

No. 317 (B 545/1).

* द्रमिडब्रह्मोपनिषत्.

* Dramidabrahmopaniṣat

Substance—Paper.
Size—6 × 8 inches.
Character—Kannada.
Folios—4.
Lines on a page—12.
Letters in a line—14.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

The Upaniṣat describes, in the form of a dialogue between the sage Yājñavalkya and Brahma—the creator, how the Drāmida Vedas came into being, their divisions, the time and the manner of chanting them, the names of the Riṣis who broadcasted them, etc.

उपक्रमः—

अथ प्रणिपत्य भगवान् याज्ञवल्क्यो ब्रह्माणं विधिवदुपसन्नः पप्रच्छ । अधीहि भगवो मे, किं पवित्राणां पवित्रम् । केन वा कर्माणि सफलानि । केनामृतत्वमेति । कीदृग्भूता द्रामिडी ब्रह्मसंहिता । का भाषा । कीदृशो(शा)वर्णाः । के कर्तारः । तत्पठनात् किं फलम् । कस्या ब्रह्मज्ञानोत्पत्तिश्च भवति । स होवाच ॥

उपसंहारः—

यो वा एतामेवं वेद स सर्वेषु तीर्थेषु स्नातो भवति । स सर्वान् देवान् ध्यातो भवति । अश्रोत्रियश्श्रोत्रियो भवति । अनुपनीतश्चोपनीतो भवति । आ चक्षुषः पङ्क्तिं पुनाति । एतेन तेजस्वी ब्रह्मवर्चस्वी भवति । नारायण एव ह्यचञ्चला भक्तिस्तु वर्धते । सम्यक् ज्ञानं लब्ध्वा तद्विष्णोः परमं पदमवाप्नोति । न च पुनरावर्तते न च पुनरवर्तत इत्याह भगवान् चतुर्मुखो य एवं वेदेत्युपनिषत् ॥ हरिः ओम् ॥

प्रतिपाद्यविषयः—

याज्ञवल्क्यचतुर्मुखप्रश्नोत्तररूपायामस्यामुपनिषदि द्राविडभाषामय श्रुत्याविर्भावप्रकारः, तदङ्गानि, तदध्ययननियमाः, तदध्ययनानध्ययनकालौ तत्प्रकाशयितृनामधेयानि तदध्ययनफलं चेत्यतत्सर्वमभिधीयते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे समग्रा अमुद्रिता चेयमुपनिषद्दृश्यते । तत्तदुपनिषदादौ, पठ्यमानास्तत्तच्छाखीयाः शान्तिमन्त्रा अत्राद्यन्तयोर्न दृश्यन्ते ॥

No. 318 (B 545/2).

* द्वयोपनिषत्.

* Dwayopaniṣat.

Substance—Paper.
Size—6 × 8 inches.
Character—Kannada.
Folios—2.
Lines on a page—12.
Letters in a line—14.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat indicates the letters and the words constituting the mantram called "Dwaya" which should be learnt only from an Āchārya, possessing the required characteristics. It also relates the fruit of chanting the above mantram.

उपक्रमः—

हरिः ओम् । अथातश्श्रीमद्द्वयोत्पत्तिः । वाक्यो द्वितीयः । षट्पदान्यर्था दश । पञ्चविंशत्यक्षराणि । पञ्चदशाक्षरं पूर्वं दशाक्षरं परम् । नवाक्षरः प्रथमपदे ॥

उपसंहारः—

गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परं धनम् ।
गुरुरेव परः कामो गुरुरेव परायणम् ।
यस्मात्तदुपदेष्टाऽसौ तस्माद्गुरुतरो गुरुः ॥
यत्सकृदुच्चारितस्संसारविमोचनं भवति सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति । सर्वपूरुषार्थसिद्धिर्भवति । य एवं वेद । इत्युपनिषत् ॥

॥ हरिः ओम् ॥

प्रतिपाद्यविषयः—

अत्र द्वयाख्यमन्त्ररत्नगताक्षरपदादिकं निर्दिश्य तस्य सदाचार्योपदेशाधिगम्यत्वकथनपूर्वकं प्रसङ्गाद्गुरुलक्षणं चाभिधायैतन्मन्त्ररत्नजपफलं चाभिधीयते ॥

वक्तव्यविशेषः—

अमुद्रिता समग्रा चेयमुपनिषदस्मिन् कोशे दृश्यते । तत्तदुपनिषदादौ सर्वत्र परिदृश्यमानस्तत्तच्छाखयिशान्तिमन्त्रपाठोऽत्र न दृश्यते ॥

No. 319 (3581/21).

* द्वयोपनिषत् .

* Dwayopaniṣat.

Substance—Palm-leaf.
Size—20 × 2½ inches.
Character—Āndra.
Folios—26.
Lines on a page—4.
Letters in a line—84.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 318 **कोशवत्**.

उपसंहारः—

No. 318 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 318 **कोशवत्**.

वक्तव्याविशेषः—

No. 318 **कोशवत्**.

No. 320 (1682/2).

*द्वयोपनिषत्.

* Dwayopaniṣat.

Substance—Palm-leaf.
Size—15½ × 1½ inches.
Character—Grantha.
Folios—2.
Lines on a page—6.
Letters in a line—32.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 318 **कोशवत्**.

उपसंहारः—

No. 318 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 318 **कोशवत्**.

वक्तव्यविशेषः—

No. 318 कोशवत्.

No. 321 (B 452, I/1).

ध्यानविन्दूपनिषत्.

Dhyānabindūpaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra..
Folios—13.
Lines on a page—11.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

सह नाववत्विति शान्तिः—
यदि शैलसमं पापं विस्तीर्णं बहुयोजनम् ।
भिद्यते ध्यानयोगेन नान्यो भेदः कदाचन ॥
बीजाक्षरं परं बिन्दुं नादान्तस्योपरि स्थितम् ।
स शब्दश्चाक्षरे क्षीणे निश्शब्दं परमं पदम् ॥
अनाहतं तु यच्छब्दं तस्य शब्दस्य यत्परम् ।
तत् परं विन्दते यस्तु स योगी च्छिन्नसंशयः ॥
वालाग्रशतसाहस्रं तस्य भागस्य भागिनः ।
तस्य भागस्य भागार्धं तत्क्षये तु निरञ्जनम् ॥

उपसंहारः—

अमूर्तो वर्तते नादो वीणादण्डे समुत्थितः ।
शङ्खनादादिभिश्चैव मध्ये मेघध्वनिर्यथा ॥
व्योमरन्ध्रगतो नादो मायूरं नादमेव च ।
कपालकुहरे मध्ये चतुर्द्वारस्य मध्यमे ॥

तदात्मा राजते तत्र यथा व्योम्नि दिवाकरः ।
कोदण्डद्वयमध्ये तु ब्रह्मरन्ध्रेषु शक्ति च ॥
स्वात्मानं पुरुषं पश्येन्मनस्तत्र लयं गतम् ।
रत्नानि ज्योत्स्नादं तु विन्दुं माहेश्वरं पदम् ॥
य एवं वेद पुरुषः स कैवल्यं समश्नुते ॥ इत्युपनिषत् ॥

॥ ध्यानविन्दूपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र प्रणवोपासनाप्रकारानिरूपणपूर्वकं प्राणायामप्रकारान् निरूप्य ध्येयविवरणं कृतम् । ध्यानार्थं हृदयादिस्थानानि निरूपितानि । नाडीनां स्थानकथनपूर्वकं योगासनानि कथितानि । योगाभ्यासक्रमकथनपूर्वकं स्वात्मपुरुषदर्शनं तत्फलं च प्रत्यपादि ॥

वक्तव्यविशेषः—

सामशाखीयेयमुपनिषन्मुद्रिता कोशेऽस्मिन् समग्रा च दृश्यते । मुद्रितकोशे एतदुपनिषदादौ कृष्णयजुश्शाखीयशान्तिमन्त्रो दृश्यते । सामशाखीयेयमुपनिषदित्यपि तत्रैव दृश्यते । तस्मादन्यतरस्य प्रामादिकत्वमवसेयम् । अत्रत्ये No. 323 लिखितकोशे त्वियमाथर्वणिकीति लिखिता दृश्यते । अतः किंशाखीयेयमुपनिषदिति विमर्शनीयम् ॥

No. 322 (B 452, II/1).

ध्यानविन्दूपनिषत्.

Dhyānabindūpaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—18.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 321 **कोशवत्**.

उपसंहारः—

No. 321 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 321 **कोशवत्**.

वक्तव्यविशेषः—

No. 321 **कोशवत्**.

No. 323 (B 927/8).

ध्यानबिन्दूपनिषत्.

Dhyānabindūpaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—24-25.
Lines on a page—16.
Letters in a line—24.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

ओम्। यदि शैलसमं पापं विस्तीर्णं योजनान् बहून्।
भिद्यते ध्यानयोगेन नान्यद्भेदः कदाचन॥
बीजाक्षरपरं बिन्दुनादं तस्योपरि स्थितम्।
सशब्दश्चाक्षरे क्षीणे निःशब्दं परमं पदम्॥
अनाहतं तु यच्छब्दं तस्य शब्दस्य यत्स्वरम्।
तत्परं विद्यते यस्तु स योगी भिन्नसंशयः॥

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवस्स विज्ञेयः स चानन्त्याय कल्पते ॥

उपसंहारः—

स्वदेहमरणिं कृत्वा प्राणपञ्चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासादेवं पश्येन्निगूढवत् ॥
यथैवोत्पलनाळेन तोयमाकर्षयेन्नरः ।
तथैवाकर्षयेद्वायुं योगी योगपदे स्थितः ॥
अर्धमात्राद्दजुं कृत्वा कोशभूतं तु पङ्कजम् ।
कर्षयेन्नाळमार्गेण भ्रुवोर्मध्ये लयं नयेत् ॥
भ्रुवोर्मध्ये ललाटस्तु नासिकायां तु मूलतः ।
जानीयादमृतस्नानं (स्थानं) तद्ब्रह्मायतनं महत् ॥ इति ॥

॥ इत्याथर्वणिके ध्यानबिन्दूपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र प्रणवोपासनाप्रकारं निरूप्य प्राणायामक्रमं प्रदर्श्य रेचक-पूरककुम्भकानां देवतानिरूपणपूर्वकं ध्येयविवरणं कृत्वा ध्यानस्थानं च निरूप्य तत्फलं च कथितं दृश्यते ॥

वक्तव्यविशेषः—

प्रणवगताकारादीनां वर्णादिप्रतिपादन परा ग्रन्थाः, तथा योगासनादीनां प्रतिपादपराश्च ग्रन्था बहवो मुद्रितकोशे परिदृश्यमाना अत्र कोशे न दृश्यन्ते ॥

No. 324 (3581/29).

ध्यानबिन्दूपनिषत्.

Dhyānabindūpaniṣat.

Substance—Palm-leaf. | Character—Āndhra.
Size—20 × 2¼ inches. | Folios—34.

Lines on a page—8.
Letters in a line—90.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

योगतत्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥
विष्णुनामा महायोगी महाभूतो महातपाः ।
तत्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥
शेषं No. 323 **कोशवत्.**

उपसंहारः—

No. 323 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 323 **कोशवत्.**

वक्तव्यविशेषः—

आदौ योगतत्त्वोपनिषदः श्लोकद्वयमधिकं दृश्यते । शेषं No. 323 **कोशवत्.**

No. 325 (B 453/1).

नादबिन्दूपनिषत्.

Nādabindūpaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—4.
Lines on a page—11.
Letters in a line—19.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

वाङ्मे मनसीति शान्तिः ॥

अकारो दक्षिणः पक्ष उकारस्तूत्तरः स्मृतः ।
मकारः पुच्छमित्याहुरर्धमात्रा तु मस्तकम् ॥
पादादिकं गुणास्तस्य शरीरं तत्त्वमुच्यते ।
धर्मोऽस्य दक्षिणश्चक्षुरधर्मो योऽपरस्स्मृतः ॥
भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनि ।
सुवर्लोकः कटीदेशे नाभिदेशे महज्जगत् ॥

उपसंहारः—

शङ्खदुन्दुभिनादं च न शृणोति कदाचन ।
काष्ठवज्जायते देह उन्मन्यावस्थया ध्रुवम् ॥
न जानाति न शीतोष्णं न दुःखं न सुखं तथा ।
न मानं नावमानं च संत्यक्त्वा तु समाधिना ॥
अवस्थात्रयमन्वेति न चित्तं योगिनस्सदा ।
जाग्रन्निद्राविनिर्मुक्तः स्वरूपावस्थतामियात् ॥
दृष्टिस्स्थिरा यस्य विना स दृश्यं
वायुस्स्थिरो यस्य विना प्रयत्नम् ।
चित्तं स्थिरं यस्य विनाऽवलम्बं
स ब्रह्मतारान्तरनादरूपः ॥

॥ इत्युपनिषत् ॥ नादविन्दूपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र प्रणवोपासनाप्रकारः प्रणवमात्रादिकं प्रणवमात्रासु प्राणोत्क्रमणफलादिकं प्रणवोपासनया सिद्धस्य योगिनः फलं चेत्येतत्सर्वं प्रतिपाद्यते ॥

वक्तव्यविशेषः—

इयमुपनिषत् अस्मिन् कोशे समग्रा ऋक्शाखीयान्तर्गतेति मुद्रिता च दृश्यते ॥

No. 326 (3621/11).

नादबिन्दूपनिषत्.

Nādabindūpaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—19-20.
Lines on a page—$6\frac{1}{2}$.
Letters in a line- -30.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

ओं। अकारो दक्षिणः पक्षः उकारस्तूत्तरः पक्षः (स्मृतः)।
मकारस्तस्य पुच्छं वा अर्धमात्राध(त्रा शि)रस्तथा ॥
पादौ रजस्तमस्तस्य शरीरं तत्त्वमुच्यते।
धर्मोऽस्य दक्षिणं चक्षुरधर्मोऽधो परस्स्मृतः ॥
भूलोकः पादयोस्तस्य भुवर्लोकस्तु जानुनि।
स्वर्लोकः कटिदेशे तु नाभिदेशे महर्जगत् ॥

उपसंहारः—

ततः परतरं शुद्धं व्यापकं निर्मलं परम्। (शिवम्)
सदोदितं परं ब्रह्म ज्योतिषामुदयो यतः ॥
अतीन्द्रियगुणातीतं मनो लीनं यथा भवेत्।
असौम्यमतिभावं तु (अनूपमं शिवं शान्तं) योगयुक्तं तदादिशेत् ॥
तद्युक्तस्तन्मयो जन्तुः शनैर्मुञ्चेत् कळेबरम्। (कुले जनम्)
सुस्थितो योगचारेण (धर्मेण) सर्वसङ्गविवर्जितः ॥
ततो विलीनपाशोऽसौ विमलः केवलः प्रभुः। (कमलाप्रभुः)
तेनैव ब्रह्मभावेन परमानन्दमश्नुते। इति ॥

॥ नादबिन्दूपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

No. 325 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

एतल्लिखितकोशापेक्षया मुद्रितकोशे जगतो मिथ्यात्वप्रदर्शनपरग्रन्थाः, योगेन द्वैतस्य आत्मनि विलापनोपायपरग्रन्थाः, प्रणवनादोपासनातत्फलप्रतिपादकग्रन्थाश्चेति सम्भूय महान् ग्रन्थराशिरधिको दृश्यते। लिखिते त्वस्मिन् कोशे तादृशग्रन्थानामदर्शने किं निदानमिति परिचिन्तनीयम् ॥

No. 327 (B 454/1).

नारदपरिव्राजकोपनिषत्.

Nāradaparivrājakopaniṣat.

Substance—Paper.	Age of Ms.—Modern.
Size—8 × 6 inches.	Condition of Ms.—Good.
Character—Āndhra.	Correct or incorrect—Correct.
Folios—45.	Complete or incomplete—Complete.
Lines on a page—11.	
Letters in a line—18.	

उपक्रमः—

अथ कदाचित् परिव्राजकाभरणो नारदस्सर्वलोकसञ्चारं कुर्वन् अपूर्वपुण्यस्थलानि पुण्यतीर्थानि तीर्थीकुर्वन्नवलोक्य चित्तशुद्धिं प्राप्य निर्वैरश्शान्तो दान्तस्सर्वतो निर्वेदमासाद्य स्वरूपानुसन्धानमनुसन्धाय नियमानन्दविशेषगण्यं मुनिजनैरुपसङ्कीर्णं नैमिशारण्यपुण्यस्थलमवलोक्य सारिगमपधनिसंज्ञैः वैराग्यबोधकरैः स्वरविशेषैः प्राप[1]ञ्चकपराङ्मुखैः हरिकथालापैः स्थावरजङ्गमनामकैः भगवद्भक्तिविशेषैः नरमृगकिंपुरुषामरकिन्नराप्सरोरगगणान्तसंमोहयन्नागतः ॥

उपसंहारः—

सर्वस्य धातारमचिन्त्यशक्तिं सर्वागमान्तार्थविशेषवेद्यम् ।
परात्परं परमं वेदितव्यं सर्वावसाने सकृद्वेदितव्यम् ॥
कविं पुराणं पुरुषोत्तमोत्तमं सर्वेश्वरं सर्वदेवैरुपास्यम् ।
अनादिमध्यान्तमनन्तमव्ययं शिवाच्युताम्भोरुहगर्भभूधरम् ॥
स्वेनावृतं सर्वमिदं प्रपञ्चं पञ्चात्मकं पञ्चसु वर्तमानम् ।
पञ्चीकृतानन्तभवप्रपञ्चं पञ्चीकृतस्वावयवैरसंवृतम् ॥
परात्परं यन्महतो महान्तं स्वरूपतेजोमयशाश्वतं शिवम् ॥

प्रतिपाद्यविषयः—

नारदपितामहप्रश्नोत्तरात्मिकायां उपदेशाख्यप्रकरणनवकयुतायामस्यामुपनिषदि प्रथमोपदेशे—मोक्षौपयिकोपनयनाद्यखिलसंस्काराभिधानपूर्वकं संन्यासोचितस्वरूपं संगृह्यते ॥

द्वितीयोपदेशे—नारदस्य पितामहात्पूर्वोक्तार्थाधिगमप्रकारो निरूप्यते ॥

तृतीयोपदेशे—संन्यासाधिकारिणः संन्यासविधिराभिधीयते ॥

तुरीयोपदेशे—संन्यासाङ्गभूताः शान्तिदान्त्यादयो धर्माः प्रतिपाद्यन्ते ॥

पञ्चमोपदेशे—संन्यासतदाचारभेदा निरूप्यन्ते ॥

षष्ठोपदेशे—भ्रमरकीटन्यायेन स्वरूपाभ्यास जाग्रदाद्यवस्थाभेदानां वर्णाश्रमलक्षणानां च निरूपणं दृश्यते ॥

सप्तमोपदेशे—यतीनां नियमा निरूप्यन्ते ॥

अष्टमोपदेशे—संसारोत्तारकब्रह्मप्रणवाद्यभिधानं दृश्यते ॥

नवमोपदेशे—ब्रह्मस्वरूपपारिज्ञानवतो विष्णुपदावाप्तिप्रकारो निरूप्यते ॥

वक्तव्यविशेषः—

कोशोऽस्मिन्नियमुपनिषत्समग्रा दृश्यते । अथर्वशाखीयेतीयं मुद्रिता च । मुद्रितकोशे नवमोपदेशान्ते इतोऽप्यधिकः कश्चन ग्रन्थभागो दृश्यते । इयं चोपनिषत् परिव्राजकाभरणनाम्नाऽपि व्यवहृता ज्ञायते ॥

No. 328 (3581/36).

नारदपरिव्राजकोपनिषत्.

Nāradaprivrājakopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—39–40.
Lines on a page—12.
Letters in a line—110.

Age of Ms.—Old.
Condition of Ms.—Damaged on one side.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 327 कोशवत्.

उपसंहारः—

इत्यादिष्ट आचार्यैर्दण्डं कटिसूत्रं कौपीनं शाटीमेकं कमण्डलुं पादादिमस्तकप्रमाणमव्रणं समं सौम्यमकाकपृष्ठं सलक्षणं वैणवं दण्डमेकमाचमनपूर्वकं 'सखा मा गोपायोजस्सखायोऽसीन्द्रस्य वज्रोऽसि वार्त्रघ्नश्शर्म मे भव यत्पापं तन्निवारय' इति दण्डं परिग्रहेज्जीवनं जीवनाधारभूतं मा ते

प्रतिपाद्यविषयः—

No. 327 कोशवत्.

वक्तव्यविशेषः—

उपनिषदियमस्मिन् कोशे समग्रप्रायचतुर्थोपदेशान्ता मुद्रिता च दृश्यते ॥

No. 329 (2367/2).

नारायणोपनिषत्.

Nārāyaṇopaniṣat.

Substance—Palm-leaf.
Size—9 × 1½ inches.
Character—Grantha.
Folios—5-6.
Lines on a page—11.
Letters in a line—32.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओम्। अथ पुरुषो ह वै नारायणोऽकामयत । प्रजास्सृजेयेति । नारायणात् प्राणो जायते । मनस्सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी। नारायणाद्ब्रह्मा जायते । नारायणाद्रुद्रो जायते ॥

उपसंहारः—

माध्यंदिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपात . . च्यते । सर्ववेदपारायणपुण्यं लभते। नारायणसायुज्यमाप्नोति नारायणसायुज्यमाप्नोति य एवं वेदेत्युपनिषत् ॥

॥ श्रीमन्नारायणोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र भगवतो नारायणस्य संकल्पात्प्राणेन्द्रियभूतानामुत्पत्तिः, तस्मादेव ब्रह्मरुद्रेन्द्रादीनां स्वस्वकार्येषु प्रवृत्त्यादिकं च ऋग्वेदशिरोधीतमभिहितम्, तथा यजुर्वेदशिरोधीतं नारायणस्य ब्रह्मशिवाद्यन्तर्यामित्वजगद्व्याप्त्यादिकं, सामवेदशिरोधीतं नारायणाष्टाक्षरमन्त्रस्वरूपतदध्ययनफलादिकं, अथर्वशिरोधीतं प्रणवोपासनाष्टाक्षरमन्त्रोपासनाभ्यां दिव्यलोकगमनादिकं चाभिहितं दृश्यते । तथाऽन्ते एतदुपनिषदध्ययनफलं च प्रतिपाद्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत्समग्रा याजुषीति मुद्रिता च दृश्यते ॥

No. 330 (1973/8).

नारायणोपनिषत्.

Nārāyaṇopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—143–144.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 329 **कोशवत्**.

हरिः ओम् ॥ अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति, नाभिर्हृदयं क . . र्धा च। तत्र चतुष्पादं ब्रह्म विभाति। जागरिते ब्रह्मा, स्वप्ने विष्णुः, सुषुप्तौ रुद्रः, तृतीयमक्षरम्। स आदित्यो विष्णुश्चेश्वरश्च। स्वयममनस्कमश्रोत्रमपाणिपादं ज्योतिर्विदितम् ॥

उपसंहारः—

जाग्रत्स्वप्ने तथा जीवो गच्छत्यागच्छते पुनः।
नेत्रस्थं जागरितं विद्यात् कण्ठे स्वप्नं समाविशेत् ॥
सुषुप्तं हृदयस्थं तु तुरीयं मूर्धनि स्थितम्।
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥

आनन्दमेतज्जीवस्य यज्ज्ञात्वा मुच्यते बुधः ।
सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ॥
आत्मविद्या तपोमूलं तद्ब्रह्मोपनिषत्पदम् ॥
तद्ब्रह्मोपनिषत्पदमिति ॥

॥ इति ब्रह्मोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र आत्माभिव्यक्तिस्थानानि, ब्रह्मस्वरूपं, ब्रह्मोपासनाक्रमः, तत्फलं चाभिहितं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत्समग्रा याजुषीनि मुद्रिता च दृश्यते । कोशेऽस्मिन्नादौ शान्तिमन्त्रपाठलेखनं न दृश्यते ॥

No. 376 (1632/7).

ब्रह्मोपनिषत्.

Brahmopaniṣat.

Substance—Palm-leaf.
Size—15½ × 1½ inches.
Character—Grantha.
Folios—7–8.
Lines on a page—8.
Letters in a line—32.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 375 **कोशवत्.**

उपसंहारः—

No. 375 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 375 **कोशवत्**.

वक्तव्यविशेषः—

No. 375 **कोशवत्**.

No. 377 (1682/12).

ब्रह्मोपनिषत्.

Brahmopaniṣat.

Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—2.
Lines on a page—9.
Letters in a line—48.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 375 **कोशवत्**

उपसंहारः—

No. 375 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 375 **कोशवत्**.

वक्तव्यविशेषः—

No. 375 **कोशवत्**.

No. 378 (3621/2).

ब्रह्मोपनिषत्.

Brahmopaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—2.
Lines on a page—9.
Letters in a line—36.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 375 **कोशवत्**.

उपसंहारः—

No. 375 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 375 **कोशवत्**.

वक्तव्यविशेषः—

No. 375 **कोशवत्**.

No. 379 (1973/1).

ब्रह्मोपनिषत्.

Brahmopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inch.
Character—Nāgarī.
Folios—123–124.
Lines on a page—5.
Letters in a line—68.

Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 375 कोशवत्.

उपसंहारः—

No. 375 कोशवत्.

प्रतिपाद्यविषयः—

No. 375 कोशवत्.

वक्तव्यविशेषः—

No. 375 कोशवत्. एतत्कोशान्ते 'इत्यथर्वणरहस्योपनिषत्समाप्ता' इति लेखदर्शनादस्यास्तन्नामान्तरमिति ज्ञायते। कोशादौ तु यजुश्शाखीयशान्तिमन्त्रो लिखितो दृश्यते ॥

No. 380 (B 470/1)

ब्रह्मोपनिषत्.

Brahmopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—3.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—complete.

उपक्रमः—

No. 375 कोशवत्.

उपसंहारः—

No. 375 कोशवत्.

प्रतिपाद्यविषयः—

No. 375 **कोशवत्**.

वक्तव्यविशेषः—

No. 375 **कोशवत्। कोशेऽस्मिंस्तु यजुश्शाखीयशान्तिमन्त्रलेखनमादौ दृश्यते ॥**

No. 381 (B 124/12).

* भक्तियोगोपनिषत्.

* Bhaktiyogopaniṣat.

Substance—Paper.
Size—$7\frac{3}{4} \times 6$ inches.
Character—Kannada.
Folios—58–59.
Lines on a page—11.
Letters in a line—18.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat describes, in detail, the characteristics of an Avadhūta who has attained the unity of Liṅga and Aṅga and has thus become a Yogasiddha.

उपक्रमः—

अथ परमशिवलिङ्गाङ्गसामरस्यभक्तियोगं व्याख्यास्यामो विविदिषे स्वस्वरूपस्य। न मनोबुद्ध्यहङ्कारचित्तानि, न श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि, न वा वाक्पाणिपादपायूपस्थानि तत्कृतान्यभिमन्यते। न परो नापरो न पुण्यं नापुण्यं न निरवयवं न सावयवं विमुक्तो विशुद्धाद्वैतभावमाश्रित्य न द्रष्टा नादृष्टा न श्रोता नाश्रोता न वक्ता नावक्ता न कर्ता नाकर्ता नाभिमनो नानावमानः [नानभिमान] सोऽवधूतः ॥

उपसंहारः—

सोऽहंभावो धृतलिङ्गस्य चित्ते परोपकारं शिवकार्यं विचिन्त्यात् ॥
कृताकृतं दानमिदं प्रणीतं देयं तच्च शिवबुद्ध्या न चान्यत् ।
न योगयुक्तोऽपि न चावधूतः परं भावं नयति शिवभक्तस्य लोके तदेत-
लिङ्गाङ्गसामरस्यविविदिषुरिदमद्री(धी)यात्परं भावमुपैतीति वेदवचनं
भवति भवतीति । ओमित्युपनिषत् ॥

॥ भक्तियोगोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र परमशिवलिङ्गाङ्गसामरस्यमापन्नस्य योगसिद्धस्यावधूतस्य
धर्मा विस्तरतः प्रतिपादिता दृश्यन्ते ॥

वक्तव्याविशेषः—

अमुद्रितेयमुपनिषत्, अस्मिन् कोशे समग्रा च दृश्यते। सर्वास्वप्यु-
पनिषत्सु प्राय आदौ परिदृश्यमानः तत्तच्छाखीयशान्तिमन्त्रपाठोऽत्र न
दृश्यते ॥

No. 382 (3581/24).

भस्मजाबालोपनिषत् .

Bhasma Jābālopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Andhra.
Folios—30-32.
Lines on a page—13.
Letters in a line—106.
Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं । भद्रं कर्णेभिरिति शान्तिः । अथ जाबालो भुसुण्डः कैलास-
शिखरावासं ओङ्कारस्वरूपिणं महादेवमुमादेहार्धशेखरं सोमसूर्याग्निनयनं

अनन्तेन्दुरविप्रभं व्याघ्रचर्माम्बरधरं मृगहस्तं भस्मोद्धूलितविग्रहं तिर्यक्त्रिपुण्ड्रेरेखाविराजमानफालप्रदेशं स्मितसम्पूर्णपञ्चविधपञ्चाननं वीरासनारूढमप्रमेयमनाद्यन्तं निष्कलं निर्गुणं शान्तं निरञ्जनमनामयं

उपसंहारः—

ततश्शुद्धा मां प्रपद्यन्ते चान्तर्गृहे रेतो मूत्रं वा विसृजन्ति तदा तेन सिञ्चते पितॄन् तमेव पापकारिणं मृतं पश्यन् नीललोहितो भैरवस्तं पातयत्यस्रमण्डले ज्वलज्ज्वलनकुण्डेष्वन्येष्वपि । ततश्चाप्रमादेन निवसेत्काश्यां लिङ्गरूपिण्यामित्युपनिषत् ॥

प्रतिपाद्यविषयः—

भुसुण्डमहादेवप्रश्नोत्तररूपायामध्यायद्वितयविभक्तायामस्यामुपनिषदि—शिवस्य सर्वोत्तमत्वप्रतिपादनं, भस्मधारणविधिः, भस्मधारणेऽ, धारणे च कर्मसु योग्यत्वायोग्यत्वनिर्धारणं, भस्माधारणे च प्रत्यवायप्रदर्शनं, उपासनार्थं प्रणवपञ्चाक्षर्यादिशैवमन्त्राणामुपदेशः, शिवस्य तत्त्वनिरूपणपूर्वकमनेकधा तदभिषेकतत्पूजनफलादिकथनं चेत्येतत्सर्वं प्रपञ्चितं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् इयमुपनिषन्त्समग्रा दृश्यते । अथर्वशार्ख्येति मुद्रिता च ॥

No. 383 (B 913/4).

भस्मजाबालोपनिषत्.

Bhasmajābālopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—36-42.
Lines on a page—15.
Letters in a line—22.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 382 कोशवत्.

उपसंहारः—

कापिलेनाज्येनाभिषिच्य स्वर्णस्तेयात्पूतो भवति । मधुनाऽभिषिच्य गुरुदारगमनात्पूतो भवति । सितया शर्करयाऽभिषिच्य सर्वजीववधात्पूतो भवति । क्षीरादिभिरेतैरभिषिच्य सर्वानवाप्नोति कामान् । इत्येकैकं महान् प्रस्थशतं महान्? प्रस्थशतमानैः शतैरभिपूज्य मुक्तो भवति संसारबन्धनात् । मामेव शिवलिङ्गरूपिणमार्द्रायां पौर्णमास्यामथावास्यां वा महाव्यतीपाते ग्रहणे संक्रान्तावभिषिच्य तिलैः

प्रतिपाद्यविषयः—

No. 382 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

असमग्रद्वितीयाध्यायान्तेयमुपनिषदस्मिन् कोशे दृश्यते ॥

No. 384 (B 472).

भस्मजाबालोपनिषत्.

Bhasmajābālopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—4.
Lines on a page—13.
Letters in a line—18.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 382 कोशवत.

उपसंहारः—

त्रिकालमेतत्प्रयुञ्जानः सर्ववेदपारायणफलमवाप्नोति । सर्वतीर्थफलमश्नुते । अनपब्रुवन् सर्वमायुरेति विन्दते प्राजापत्यं रायस्पोषं गौपत्यम् । एवमावर्तयेदुपनिषदमित्याह भगवान् सदाशिवस्साम्बसदाशिवस्साम्बः ॥

प्रतिपाद्यविषयः—

No. 382 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन्नेतदुपनिषदि प्रथमाध्यायमात्रमुपलभ्यते ॥

No. 385 (115/4).

भावनोपनिषत्.

Bhāvanopaniṣat.

Substance—Palm-leaf.
Size—16 × 1½ inches.
Character—Āndhra.
Folios—25-27.
Lines on a page—6.
Letters in a line- -50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

श्रीगुरुस्सर्वकारणभूता शक्तिः । तेन नवरन्ध्ररूपो देहः । नवचक्ररूपं श्रीचक्रम् । वाराही पितृरूपा [1]कुरुकुल्लाबलिर्देवता माता । पुरुषार्थास्सागराः । देहो नवरत्नद्वीपः [2]त्वगादिसप्तधातुरोमसंयुक्तः । सङ्कल्पाः कल्पतरवः । तेजः कल्पकोद्यानम् ॥

---

[1] 'कुरुकुल्ला भैरुण्डा देवता [2] आधारनवकमुद्राशक्तयस्त्वगादिसप्तधातुभिरनेकैस्संयुक्तः' इति पाठः कोशान्तरे ॥

उपसंहार:—

त्वमस्ति नास्ति कर्तव्यमकर्तव्यमिति विकल्पानामात्मविलापनं होमः। भावनया विषयाणां भेदभावनं तत्करणम्। पञ्चदशातिथिरूपेण कालस्य परिणामावलोकनम्। पञ्चदश नित्याः। मुहूर्तत्रयं मुहूर्तद्वयं मुहूर्तमात्रं घटिकामात्रं वा भावनां करोति स जीवन्मुक्तो भवति स जीवन्मुक्तो भवति स जीवन्मुक्तो भवति। कादिहादियथोक्तेन भावनायां प्रतिपादितः। य एवं वेदेत्युपनिषत्॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि नवरन्ध्रमयदेहस्यैव नवशक्तिमयश्रीचक्रत्वरूपेण तत्र भावनयैव कर्तव्यं पीठाद्यनुकल्पनमभिधाय तदाराधनक्रमो मानसोऽभिधीयते॥

वक्तव्यविशेषः—

मुद्रितैतल्लिखितकोशयोः सूत्रेषु तत्रतत्र किंचिन्न्यूनाधिकभावो दृश्यते। अस्मिन् कोशे इयमुपनिषत् समग्रा दृश्यते, अथर्वशाखान्तर्गतेति मुद्रिता च॥

No. 386 (B 677)

भावनोपनिषत्.

Bhāvanopaniṣat.

Substance—Paper.
Size—$6\frac{1}{2} \times 4$ inches.
Character—Nāgarī.
Folios—6.
Lines on a page—7.
Letters in a line—16.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

No. 385 कोशवत्.

उपसंहारः-

एवं मुहूर्तत्रयं मुहूर्तद्वयं मुहूर्तमेकं वा भावनान्परो जीवन्मुक्तो भवति । चिन्तितकार्याण्ययत्नेन सिध्यन्ति । एतत्तु शिवयोगिना गद्यते । कादितोऽग्नेर्भावनाऽत्र प्रतिपद्यत इत्युपनिषत् ॥

प्रतिपाद्यविषयः—

No. 385 कोशवत्.

वक्तव्यविशेषः—

कोशोऽस्मिन्नस्या उपनिषदः श्रीचक्ररहस्यमिति नाम लिखितं दृश्यते । कोशोऽस्मिन् कृष्णयजुरथर्वोभयशाखीयशान्तिमन्त्रपाठलेखनमादौ दृश्यते ॥

No. 387 (B 473. 1).

भावनोपनिषत्.

Bhāvanopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—3.
Lines on a page—13.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 386 कोशवत्.

उपसंहारः—

स त्वमस्ति कर्तव्यममकर्तव्यमौदासीन्यीनत्यात्मीवलापनं होमः । स्वयं तत्पादुकानिमज्जनं परिपूर्णध्यानम् । एवं मुहूर्तत्रयं भावनया युक्तो

भवति. तस्य देवतात्मैक्यसिद्धिः । चिन्तितकार्याण्ययत्नेन सिध्यन्ति । स एव शिवयोगीति कथ्यत इत्युपनिषत् ॥

॥ इति भावनोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

No. 386 कोशवत्

वक्तव्यविशेषः—

No. 386 कोशवत्.

No. 388 (4136/20).

भावनोपनिषत्.

Bhāvanopaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 2$ inches.
Character—Āndhra.
Folios—75.
Lines on a page—16.
Letters in a line—50.

Age of Ms.—Modern.
Condition of Ms.—Broken on one side.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete

उपक्रमः—

No. 386 कोशवत्.

उपसंहारः—

प्रत्येकं सप्तविंशतिधा भिन्नत्वेन इच्छाज्ञानक्रियात्मकब्रह्मग्रन्थिमद्रसतन्तुनाडीब्रह्मसूत्रम् । स्वव्यतिरिक्तवस्तुसङ्गरहितस्मरणं विभूषणम् । सत्सङ्गपरिपू . . . .

प्रतिपाद्यविषयः—

No. 386 कोशवत्.

वक्तव्यविशेषः—

No. 386 कोशवत्

No. 389 (3621/4).

भिक्षुकोपनिषत्.

Bhikṣukopaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—6-7.
Lines on a page—8.
Letters in a line—36.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

अथ [1] भिक्षुकमोक्षाधिकारिणां कुटीचकबहूदकहंसपरमहंसाश्चेति चत्वारः । तत्र [2] कुटीचका गौतमभरद्वाजयाज्ञवल्क्यवसिष्ठप्रभृतयः अष्टौ ग्रासान् चरन्तो योगमार्गे मोक्षमेव प्रार्थयन्ते । अथ [3] बहूदकानां दण्डं कमण्डलुं सशिखं यज्ञोपवीतं काषायवस्त्रं धारिणो ब्रह्मर्षिगृहेषु मधुमांसं वर्जयित्वा अष्टौ ग्रासान् भैक्षाचरणं कृत्वा मोक्षमेव प्रार्थयन्ते ॥

उपसंहारः—

अत्मनिष्ठ(ष्ठाः)प्राणसन्धारणार्थं यथोक्तकाले विमुक्ते भैक्षमाचरन्तः शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रशालानदी-पुलिनगिरिगह्वरकन्दरानिर्झरस्थण्डिलेषु तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नाः शुद्धमानसाः परमहंसा चा(च)रणेन संन्यासेन देहत्यागं करोति (कुर्वन्ति) स्र(ते) परमहंसो(सा) नामेति ॥

॥ इति भिक्षुकोपनिषत् समाप्ता ॥

---

[1] भिक्षूणां मोक्षार्थिनां. [2] कुटीचका नाम. [3] बहुदका नाम इति पाठान्तरम्.

प्रतिपाद्यविषयः—

अत्र कुटीचकबहूदकहंसपरमहंसाख्यसंन्यासचातुर्विध्यप्रदर्शनपूर्वकं तत्तद्धर्माः संक्षेपतः प्रतिपादिताः ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा उपलभ्यते ॥ मुद्रिता चेयमुपनिषत् ॥

No. 390 (4136/4).

भिक्षुकोपनिषत्.

Bhikṣukopaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 2$ inches.
Character—Āndhra.
Folios—16–17.
Lines on a page—15.
Letters in a line—50.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten on one side.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 389 कोशवत्.

उपसंहारः—

No. 389 कोशवत्.

प्रतिपाद्यविषयः—

No. 389 कोशवत्.

वक्तव्यविशेषः—

No. 389 कोशवत्.

No. 391 (B 474/1).

भिक्षुकोपनिषत्.

Bhikṣukopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—2.
Lines on a page—12.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 389 **कोशवत्**.

उपसंहारः—

No. 389 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 389 **कोशवत्**.

वक्तव्यविशेषः—

No. 389 **कोशवत्**.

No. 392 (B 230/1).

* मठाम्नायोपनिषत्.

* Maṭhāmnāyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Kannada.
Folios—19–22.

Lines on a page—12.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

Subject in brief :-

This work cannot be called an Upaniṣat since it is written at the end that it was composed by Śankarācārya. Because it reveals the secrets of Śankara's system of Philosophy, it might have been termed an Upaniṣat.

उपक्रमः—

श्रीगुरुभ्यो नमः । ऊर्ध्वाम्नायगुरूपदेशभवनं ओङ्कारसिद्धासनं सिद्धाचार्य(र्यै)वन्दितं समस्तवेदवेदाङ्गसारं निर्माण्यं परात्परं निरञ्जनं ज्ञानार्थं पद्चक्रजाग्रदवस्थानिर्णयं परावाचा परात्परं सर्वसाक्षिधृतं चिन्मयं ज्योतिर्लिङ्गं निराकारं गलितं पूर्णप्रभाशोभितं शान्तं चन्द्रोदयं नित्यं समनस्तमै? श्रीगुरुचैतन्यं प्रणमाम्यहम् ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दृश्यते येन तस्मै श्रीगुरवे नमः ॥

ओं प्रथमे पश्चिमाम्नाये शारदामठः कीटवादीसम्प्रदायतीर्थाश्रम पदं । द्वारकाक्षेत्रं । सिद्धेश्वरो देवता भद्रकाळी देवी । ब्रह्मस्वरूपाचार्यः गङ्गागोमतीतीर्थं । स्वरूपब्रह्मचारी । सामवेदपठनम् । तत्त्वमस्यादिवाक्यविचारणम् । नित्यानित्यविवेकेन आत्मोपस्थितिः । आत्मतीर्थे आत्मोद्धारार्थं अपरोक्षसाक्षात्कारार्थं संन्यासग्रहणम् । कुलजाग्रते नमते? ओं नमो नारायणाय ॥

उपसंहारः—

ओं सप्तमे जम्बूद्वीपे साम्ये ज्ञानशिखानां सूत्रवेदवेद्यैकानां (वेद्यैक्यानां) श्रद्धानदी विमलातीर्थं आत्मलिङ्गं सत्यार्थविचारणं नित्यानित्यविवेकेन आत्मोपस्थितिः आत्मतीर्थं आत्मोद्धारार्थज्ञानापरोक्षसाक्षात्कारार्थं . . . संन्यासग्रहणं करिष्ये ओं नमो नारायण इति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशङ्कराचार्यविरचितायां ?

॥ मठाम्नायोपनिषदः समाप्ताः ॥

प्रतिपाद्यविषयः—

अत्र गुरुवन्दनपूर्वकं जम्बूद्वीपस्य पश्चिमपूर्वोत्तरदक्षिणदिक्षु मठान्निर्दिश्य तत्तन्मठेषु अनुष्ठेयसम्प्रदायप्रदर्शनपूर्वकं तत्तन्मठेषु अर्चनीयदेवता निर्णीय तत्राभ्यसनीयवेदशास्त्रनाम च प्रदर्शितम् । एवमेव ऊर्ध्वे सुमेरौ प्रदर्शितम् । तथैव परमात्मनो मठत्वरूपणपूर्वकं तस्मिन् मठे कर्तव्यं चाभिधाय जम्बूद्वीपे संन्यासग्रहणसंकल्पोऽप्यभ्यधायि ॥

वक्तव्यविशेषः—

इयं शङ्कराचार्यावरचितेति कोशेऽस्मिन्नन्ते लेखदर्शनादियं नोपनिषदिति सुस्पष्टम् । तन्मतसंप्रदायरहस्यप्रकाशकत्वात्तथा व्यपदेशेन उपनिषदियमिति लिखितेत्यवसीयते ॥

No. 393 (B 475/1).

मण्डलब्राह्मणोपनिषत्.

Maṇḍalabrāhmaṇopaniṣat.

Substance—Paper.	Age of Ms.—Modern.
Size—8 × 6 inches.	Condition of Ms.—Good.
Character—Āndhra.	Correct or incorrect—Correct.
Folios—1–10.	Complete or incomplete—Complete.
Lines on a page—13.	
Letters in a line—16.	

उपक्रमः—

पूर्णमद इति शान्तिः ॥ याज्ञवल्क्यो ह महामुनिरादित्यलोकं जगाम । तमादित्यं नत्वा भो भगवन्नादित्य आत्मतत्त्वमनुब्रूहीति । स होवाच नारायणः । ज्ञानयुक्तो यमाद्यष्टाङ्गयोग उच्यते । शीतोष्णाहारनिद्रा-

विजयः सर्वदा शान्तिः निश्चलत्वं विषयेन्द्रियनिग्रहश्च ते यमाः । गुरुभक्तिस्सत्यमार्गानुरक्तिस्सुखागतवस्त्वनुभवश्च तद्वस्त्वनुभवेन तुष्टिः निस्सङ्गता एकान्तवासः मनोनिवृत्तिः फलानभिलाषः वैराग्यभावश्च नियमाः ॥

उपसंहारः—

तल्लयाच्छुद्धाद्वैतसिद्धिः । भेदाभावादेतदेव परमतत्त्वम् । तज्ज्ञो बालोन्मत्तपिशाचवज्जडवृत्त्या लोकमाचरेत् । एवममनस्काभ्यासेनैव नित्यतृप्तिरूपमूत्रपुरीषमितभोजनदृढाङ्गमजाड्यनिद्रादृग्वायुचलनाभाव—ब्रह्मदर्शनाज्ञातसुखस्वरूपसिद्धिर्भवति । एवं चिरसमाधिजनितब्रह्मामृतपानपरायणोऽसौ संन्यासी परमहंसोऽवधूतो भवति । तद्दर्शनेन सकलजगत् पवित्रं भवति । तन्मातृपितृजायापत्यवर्गं च मुक्तं भवतीत्युपनिषत् ॥ पञ्चमं ब्राह्मणम् ॥

॥ मण्डलब्राह्मणोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

याज्ञवल्क्यरविमण्डलान्तस्थपरमपुरुषप्रश्नोत्तररूपायां ब्राह्मणपञ्चकेन विभक्तायामस्यामुपनिषदि—

प्रथमे ब्राह्मणे—राजयोगाङ्गानां यमनियमादीनां निरूपणपूर्वकं लक्ष्यत्रयं प्रकाशितम् ॥

द्वितीये ब्राह्मणे—राजयोगप्रभेदरूपतारकावलोकनोपायभूतान्तर्लक्ष्यस्वरूपमुपवर्ण्य शाम्भव्यादिमुद्राः प्रकाश्य षण्मुखीकरणं जाग्रदाद्यवस्थाश्च प्रदर्शिताः ॥

अमनस्काख्ये तृतीये ब्राह्मणे—राजयोगभेदो विवृतो दृश्यते ॥

तुरीये ब्राह्मणे—नवचक्रषडाधारलक्ष्यत्रयव्योमपञ्चकानि योगिभिरवश्यज्ञेयान्यभिहितानि ॥

पञ्चमे ब्राह्मणे—अमनस्कापराभिधानमनोलयरूपराजयोगभेदस्य फलं निरूपितं दृश्यते ॥

वक्तव्यविशेषः—

शुक्लयजुश्शाखीयेयमुपनिषत् ब्राह्मणपञ्चकात्मिका अस्मिन् कोशे

No. 394 (115/1).

* मन्त्रविवरणोपनिषत्.

* Mantravivaraṇopaniṣat.

Substance—Palm leaf.
Size—16 × 1½ inches.
Character—Āndhra.
Folios—10–12.
Lines on a page—7.
Letters in a line—58.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Subject in brief:—

This Upaniṣat describes, in detail, the letters and the words constituting the Gāyatri incantations invoking the Śakti and Goddess Lakṣmi.

उपक्रमः—

हृदयागारवासिनी हृल्लेखेत्यादिना स्पष्टं वाग्भावं कूटं पञ्चाक्षरं पञ्चभूतजननं पञ्चकलालयं व्याचक्षत इति य एवं वेद ॥ अथातः परं कामकलालयं कामराजकूटं व्याख्यास्यामः—भर्गो देवस्येति कामराजकूटं तत्सवितुर्वरेणिय इति द्वात्रिंशदक्षरं पठित्वा तदिति परमात्मा सदाशिवोऽक्षरं विमलं निरुपाधितात्मप्रतिपादकः ?

उपसंहारः—

अरुणकमलसंस्था तद्रजःपुञ्जवर्णा
करकमलधृतिष्टा भयुग्माम्बुजा च ।
मणिमकुटविचित्रालङ्कृता पुष्पजालैः
भवतु भुवनमातः सन्ततं श्रियै नमः (च श्रियै नः) ॥

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायस्सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि । य एवं वेदेत्युपनिषत् ॥

॥ इति ऋक्शाखाभिसंहितायां मन्त्रविवरणोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र शक्तिलक्ष्मीदेवताका गायत्रीमन्त्राः तत्तद्गतपदाक्षरादिनिरूपणपूर्वकं विवियन्ते ॥

वक्तव्यविशेषः—

अमुद्रितेयमुपनिषत् । कोशेऽस्मिन्नस्यामुपनिषद्यादौ मध्ये च पत्रद्वयं लुप्तम् ॥

No. 395 (1973/20).

मन्त्रोपनिषत्.

Mantropaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inch.
Character—Nāgarī.
Folios—225–226.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् । अष्टपादं शुचिं हंसं त्रिसूत्रमणि(णु)मव्ययम् ।
त्रिवर्त्मानं तेजसोऽहं सर्वतः पश्यन्न पश्यति ॥
भूतसम्मोहने काले भिन्ने तमसि वैखरे ।
अतः पश्यन्ति सत्वस्था निर्गुणं गुणगह्वरे ॥
अशक्यः सोऽन्यथा द्रष्टुं ध्यायमानः कुमारकैः ।
विकारजननी[1]माद्यां अष्टरूपामजां ध्रुवाम् ॥

उपसंहारः—

यस्मिन् भावाः प्रलीयन्ते लीनाश्चाव्यक्ततां ययुः ।
पश्यन्ति व्यक्ततां भूयो जायन्ते बुद्बुदा इव ॥
क्षेत्रज्ञाधिष्ठितं चैव कारणैर्द्वियते पुनः ।
[2]ब्रह्म ब्रह्मेत्यथायान्ति ये विदुर्ब्राह्मणास्तथा ॥

[1] 'मद्यां' इति कोशान्तरे पाठः. [2] एवं स भगवान् देवः पश्यत्यन्ते पुतःपुनः.

अत्रैव ते लयं यान्ति लीनाश्चाव्यक्तशालिनः ।
लीनाश्चाव्यक्तशालिन इति ॥

॥ इति मन्त्रोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र आत्मचैतन्यवत्या मूलप्रकृतेः जगद्विकारजनायत्रीत्वं प्रतिपाद्य तद्विशिष्टस्य अव्यक्तस्य अनेकशाखाभेदेन अनेकैरुपास्यत्वादिकं च कथितम् ॥

वक्तव्यविशेषः—

अस्मिन् कोशे समग्रयमुपनिषत् परिदृश्यते । मन्त्रिकोपनिषदिति नाम्ना शुक्लयजुश्शाखान्तर्गतेतीयमुपनिषन्मुद्रिता दृश्यते ॥

No. 396 (3621/12).

मन्त्रोपनिषत्.

Mantropaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—21-23.
Lines on a page—6.
Letters in a line—30.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 395 कोशवत्.

उपसंहारः—

No. 395 कोशवत्.

प्रतिपाद्यविषयः—

No. 395 कोशवत्.

वक्तव्यविशेषः—

No. 395 कोशवत्.

No. 397 (B 476/1).

मन्त्रिकोपनिषत्.

Mantrikopaniṣat.

Substance—Paper.
Size—8×6 inches.
Character—Andhra.
Folios—373–375.
Lines on a page—11.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct
Complete or incomplete—Complete.

उपक्रमः—

No. 395 **कोशवत्**.

उपसंहारः—

No. 395 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 395 **कोशवत्**.

वक्तव्यविशेषः—

No. 395 **कोशवत्**.

No. 398 (3581/38).

महानारायणोपनिषत्.

Mahānārāyaṇopaniṣat.

Substance—Palm-leaf.
Size—20×2¼ inches.
Character—Andhra.
Folios—43–50.

Lines on a page—14.

Letters in a line—116.

Age of Ms.—Old.

Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥ अथ परमतत्त्वरहस्यं जिज्ञासुः परमेष्ठी देवमानेन सहस्रं संवत्सरं तपश्चचार । सहस्रवर्षावतीता वर्षेऽतीते त्युग्रतीव्रतपसा प्रसन्नं भगवन्तं महाविष्णुं ब्रह्मा परिपृच्छति । भगवन् परमतत्त्वरहस्यं मे ब्रूहीति, परमतत्त्ववक्ता त्वमेव नान्यः कश्चिदस्ति । तत्कथमिति तदेवोच्यते । प्रथमः खण्डः ॥

त्वमेव सर्वज्ञः । त्वमेव सर्वशक्तिः । त्वमेव सर्वाधारः । त्वमेव सर्वस्वरूपः । त्वमेव सर्वेश्वरः । *त्वमेव सर्वरः । त्वमेव सर्वप्रवर्तकः । त्वमेव सर्वपालकः । त्वमेव सर्वनिवर्तकः । त्वमेव सदसदात्मकः । त्वमेव सदसद्विलक्षकः । त्वमेवान्तर्बहिर्व्यापकः । त्वमेवातिसूक्ष्मतरः । त्वमेवातिमहतो महीयान् ॥

उपसंहारः—

सोऽद्वैतपरमानन्दलक्षणं परब्रह्म भवति । इदं परमतत्त्वरहस्यं न वाच्यं गुरुभक्तिविहीनाय । न चाशुश्रूषवे वाच्यं, न तपोविहीनाय नास्तिकाय, न दाम्भिकाय मद्भक्तिविहीनाय मात्सर्याय कितवे न वाच्यं (मात्सर्याङ्कितननवे न वाच्यं) । न वाच्यं मदसूयापराय कृतघ्नाय । य इदं परमरहस्यं मद्भक्तेष्वभिधास्यति । मद्भक्तिनिष्ठो भूत्वा मामेव प्राप्स्यति । आवयोर्य इमं संवादमध्येष्यति स नरो ब्रह्मनिष्ठो भवति । श्रद्धावाननसूयश्च शृणुयात् पठति वा य इमं संवादमावयोः स पुरुषो मत्सायुज्यमेति । ततो महाविष्णुस्तिरोदधे । ततो ब्रह्मा स्वस्थानं जगाम । इत्युपनिषत् ॥

इत्यथर्वणमहानारायणोपनिषदि परमसायुज्यमुक्तिस्वरूपं नाम अष्टमोऽध्यायः ॥ उत्तरखण्डः समाप्तः ॥

॥ महानारायणोपनिषत्समाप्ता ॥

* इदं वाक्यं कोशान्तरे न दृश्यते.

प्रतिपाद्यविषयः—

अस्यामुपनिषद्यष्टावध्यायास्सन्ति । तत्रादिमाध्यायचतुष्टयं पूर्वकाण्ड इति चरमाध्यायचतुष्टयं उत्तरकाण्ड इति च व्यवह्रियते ॥

तत्र प्रथमाध्याये—ब्रह्मणः सर्वात्मकत्वप्रदर्शनपूर्वकं तस्य पादचतुष्टयात्मकत्वमभिधायाविद्यासुविद्यानन्दतुरीयाख्यपादानां स्वरूपं संक्षेपतो ब्रह्मरुद्राविष्णुप्रश्नोत्तरमुखेन प्रतिपादितम् ॥

द्वितीयाध्याये—शिष्याचार्यप्रश्नोपदेशमुखेन तुरीयतत्वस्य साकारत्वं निराकारत्वं चोपवर्ण्य तयोर्विरोधपरिहारोपायं प्रदर्श्य नारायणादेव कृत्स्नस्य जगत उत्पतिश्च निरूपिता ॥

तृतीयाध्याये—शिष्याचार्यप्रश्नोपदेशमुखेन विद्याविद्याप्रपञ्चौ विस्तरेणाभिधाय विद्याप्रपञ्चस्य लयक्रमः प्रतिपाद्यते ॥

चतुर्थाध्याये — शिष्याचार्यप्रश्नोपदेशमुखेन पराक्प्रत्यग्दृष्टिविवेचनपूर्वकं जीवेश्वरस्वरूपं विविच्य निर्णीतम् ॥

पञ्चमषष्ठसप्तमाध्यायेषु — शिष्याचार्यप्रश्नोपदेशमुखेन जीवानां संसृतिनिवृत्युपायं निरूप्य मोक्षमार्गस्वरूपं सविस्तरमभिधाय महानारायणयन्त्रोद्धारक्रमश्च प्रतिपादितः ॥

अष्टमाध्याये—शिष्याचार्यप्रश्नोपदेशमुखेन सायुज्यमुक्तिस्वरूपप्रदर्शनपूर्वकं ध्यानस्वरूपं निरूप्य मोक्षसाधनान्यभिधाय उपनिषत्पाठकस्य फलं एतदुपनिषत्पठनाधिकारिणश्च विशिष्य दर्शिताः ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत्समग्रा अथर्वशाखान्तर्गतेति मुद्रिता च परिदृश्यते ॥

No. 399 (B 478/1).

महानारायणोपनिषत्.

Mahānārāyaṇopaniṣat.

Substance—Paper.	Character—Āndhra.
Size—8 × 6 inches.	Folios—1–15.

Lines on a page—11.
Letters in a line—20.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 398 कोशवत्.

उपसंहारः—

बुद्धिप्रतिबिम्बितचैतन्यं जीवा इत्यपरे मन्यन्ते। एतेषामुपाधीनामत्यन्तभेदो न विद्यते। सर्वपरिपूर्णो नारायणस्त्वनया निजया क्रीडति स्वेच्छया सदा। तद्वदविद्यमानफल्गुविषयसुखाशयास्सर्वे जीवाः प्रधावन्त्यसारसंसारचक्रे॥ एवमनादिपरम्परा वर्तते अनादिसंसारविपरीतभ्रमात्। इत्युपनिषत्॥

इत्याथर्वणमहानारायणोपनिषदि महामायातीताखण्डाद्वैतपरमानन्दलक्षणपरब्रह्मणः परमतन्स्वरूपनिरूपणं नाम चतुर्थोऽध्यायः। पूर्वकाण्डस्समाप्तः॥

प्रतिपाद्यविषयः—

No. 398 कोशवत्.

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् चतुर्थाध्यायान्तोपलभ्यते॥

No. 400 (4136/22).

महावाक्योपनिषत्.

Mahāvākyopaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 2$ inches.
Character—Āndhra.
Folios—92–93.
Lines on a page—17.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः । अथ होवाच ब्रह्मा । अपरोक्षानुभवपरोपनिषदं व्याख्यास्यामः । गुह्याद्गुह्यतरमेषा न प्राकृतायोपदेष्टव्या । सात्विकाय अन्तर्मुखाय परिशुश्रूषवे । अथ संसृतिबन्धमोक्षयोः विद्याविद्ये चक्षुषी उपसंहृत्य विज्ञाय । अविद्यालोकान्धस्तमोधृक् । तमो हि शारीरप्रपञ्चमात्रब्रह्मस्थावारान्तम् ॥

उपसंहारः—

सोऽहमर्कः परं ज्योतिरर्कज्योतिरहं शिवः ।
आत्मज्योतिरहं शुक्रः सर्वज्योतिरसादहोम् ॥

एतदथर्वशिरो योऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । तत्सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति । माध्यंदिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात् प्रमुच्यते । सर्ववेदपारायणपुण्यं लभते । श्रीमहाविष्णुसायुज्यमाप्नोतीत्युपनिषत् ॥

॥ भद्रं कर्णेभिरिति शान्तिः । महावाक्योपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र जगतस्तमोमूलत्वमुपवर्ण्य विद्याविद्ययोः स्वरूपं प्रकाश्य ब्रह्मानुध्यानात्तदनुभवप्रकारं प्रतिपाद्य एतदुपनिषत्पाठफलं चान्ते निरूपितं दृश्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रोपलभ्यते । अथर्वशाखान्तर्गतत्वेयमुपनिषन्मुद्रिता च ॥

No. 401 (B 479/1).

महावाक्योपनिषत्.

Mahāvākyopaniṣat.

Substance—Paper. | Character—Āndhra.
Size—8 × 6 inches. | Folios—145–146.

Lines on a page—11.
Letters in a line—24.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 400 कोशवत्

उपसंहारः—

No. 400 कोशवत्.

प्रतिपाद्यविषयः—

No. 400 कोशवत्.

वक्तव्यविशेषः—

No. 400 कोशवत्.

No. 402 (4136/5).

महोपनिषत्.

Mahopaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—17–29.
Lines on a page—15.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

आप्यायन्त्विति शान्तिः ॥ अथातो महोपनिषदं व्याख्यास्यामः । तदाहुरेको ह वै नारायण आसीत् न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावापृथिवी न नक्षत्राणि न सूर्यो न चन्द्रमाः स एकाकी न रेमेत । तस्य

ध्यानान्तस्थस्य यज्ञः स्तोममुच्यते । तस्मिन् पुरुषाश्चतुर्दश जायन्ते । एका कन्या दशेन्द्रियाणि मन एकादशं तेजोद्वादशमहङ्कारस्त्रयोदशः प्राणश्चतुर्दशः आत्मा पञ्चदशः बुद्धिर्भूतानि पञ्चतन्मात्राणि पञ्चमहाभूतानि स एकः पञ्चविंशतिः पुरुषः ॥

उपसंहारः—

इतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि फलानि भवन्ति । प्रणवानामयुतं जप्तं भवति । आचक्षुषः पङ्क्तिं पुनाति । आसप्तमान् पुरुषयुगान् पुनाति । इत्याह भगवान् हिरण्यगर्भः । जाप्येनामृतत्वं च गच्छतीत्युपनिषत् ॥ षष्ठोऽध्यायः । आप्यायन्त्विति शान्तिः ॥

॥ महोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् अध्यायषट्कपरिच्छिन्नतया दृश्यमानायामस्यामुपनिषदि जगत्सृष्टिक्रमनिरूपणपूर्वकं नारायणस्य सर्वात्मत्वमुपवर्ण्य शुकजनकसंवादेन ब्रह्मविद्याप्रशंसनपूर्वकं शुकस्य उत्तमां गतिमभिधाय निदाघऋभुसंवादमुखेन चिदचित्स्वरूपं प्रकाश्य जीवन्मुक्तत्वस्वरूपप्रकाशनपूर्वकं वैराग्यं प्रशस्य ब्रह्मज्ञानतत्प्राप्तिप्रकारं निरूप्य एतदुपनिषत्पाठफलं चाभिहितं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत् अध्यायषट्कपरिच्छिन्ना मुद्रितसदृक्षा समग्रा दृश्यते ॥

No. 403 (1468/5).

महोपनिषत्.

Mahopaniṣat.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Āndhra.
Folios—3–4.
Lines on a page—6½.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

ओं अथातो महोपनिषदमेव (पदं व्याख्यास्यामः। तदाहुः। एको ह वै नारायण आसीत् न ब्रह्मा नेशानः नापो नाग्नीषोमौ नेमे द्यावापृथिवी न नक्षत्राणि न सूर्यो न चन्द्रमाः स एकाकी न रमेत। तस्य ध्यानान्तस्थस्य यज्ञस्स्तोममुच्यते। तस्मिन् पुरुषाः चतुर्दश जायन्ते। एका कन्या दशेन्द्रियाणि। मन एकादशम्। तेजो द्वादशम्। अहङ्कारस्त्रयोदशः। प्राणश्चतुर्दशः। आत्मा पञ्चदशः। बुद्धिर्भूतानि पञ्चतन्मात्राणि। पञ्चमहाभूतानि। स एकः पञ्चविंशकः पुरुषः॥

उपसंहारः—

तस्मादीशानो महते देवानाम्। तस्मान्महादेव इति॥
सहस्रशीर्षं पुरुषं विश्वाक्षं विश्वशंभुवम्।
विश्वं नारायणं देवमक्षरं परमं पदम्॥
विश्वतः परमं नित्यं विश्वं नारायणꣳ हरिम्।
विश्वभुग् विश्वसृक् सूक्ष्मं सर्वस्मादव्ययं कविम्॥
विश्वमेवेदं पुरुषः—सोऽक्षरः परमस्स्वराट्॥

य इमां महोपनिषदं [1] ब्राह्मणं योऽधीते सोऽग्निपूतो भवति। स वायुपूतो भवति। स सत्यपूतो भवति। स सर्वदेवैर्ज्ञातो भवति। तेन क्रतुभिरिष्टवान् भवति। षष्टिर्गायत्र्याश्शतसहस्रं जप्तं भवति। प्राणायामायुतं कृतं भवति। पङ्क्तिं पुनाति। आसप्तमात् पुरुषयुगान् पुनाति। इत्याह भगवान् हिरण्यगर्भः। अमृतत्वं च गच्छत्यमृतत्वं च गच्छतीति। ओं। य एवं वेद। इत्युपनिषत्॥

प्रतिपाद्यविषयः—

अत्र सृष्ट्यादौ ब्रह्म निर्दिश्य तस्मात् सृष्टिक्रमः, पञ्चविंशतितत्त्वोत्पत्तिः, नारायणात् रुद्रादीनामुत्पत्तिः, नारायणस्य सर्वात्मकत्वप्रतिपादनं, उपनिषत्पाठकस्य फलानि चेत्येतत्सर्वं सविस्तरं प्रतिपादितम्॥

---

1 'ब्राह्मणो योऽधीते' इति कोशान्तरे पाठः.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत्समग्रा दृश्यते । मुद्रितकोशे त्वियमुपनिषत् अध्यायषट्कपरिच्छिन्ना एतल्लिखितकोशापेक्षयाऽधिकेन ग्रन्थराशिना सहिता दृश्यते । तस्मिंश्च मुद्रितकोशे परिदृश्यमानं शुकजनकनिदाघऋभुसंवादात्मकं ग्रन्थजातमत्र लिखितकोशे न दृश्यते । तस्मादेतदुपनिषद्विषये लिखितमुद्रितकोशयोः परिदृश्यमानं महद्वैलक्षण्यं किं निबन्धनमिति परिचिन्तनीयम् ॥

No. 404 (1973/23).

महोपनिषत्.

Mahopaniṣat.

Substance—Palm-leaf.
Size—15×1 inch.
Character—Nāgarī.
Folios—228–230.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 403 कोशवत्.

उपसंहारः—

No. 403 कोशवत्.

प्रतिपाद्यविषयः—

No. 403 कोशवत्.

वक्तव्यविशेषः—

No. 403 कोशवत्

No. 405 (1958/7).

माण्डूक्योपनिषत् गौडपादोपनिषत्कारिकायुता.

Māṇḍūkyopaniṣat with Gouḍapāda Upaniṣat Kārikā.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Nāgarī.
Folios—20–21.
Lines on a page—10.
Letters in a line—90.
Age of Ms.—Old
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव । यच्चान्यत्त्रिकालातीतं तदप्योंकार एव । सर्वं ह्येतत् ब्रह्म अयमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥

कारिका—

बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥
दक्षिणाक्षिमुखं विश्वो मनस्यन्तश्च तैजसः ।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥

उपसंहारः—

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमश्शिवोऽद्वैत एवमोंकार आत्मैव संविशत्यात्मानं य एवं वेद इत्युपनिषत् ॥

कारिका—

प्रणवं ह्यीश्वरं विद्यात् सर्वस्य हृदये स्थितम् ।
सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति ॥
अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमश्शिवः ।
ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥
स मुनिर्नेतरो जन इति ॥

॥ इति माण्डूक्योपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि प्रणवे पादचतुष्टयं प्रकाश्य तत्र ब्रह्मोपासनाप्रकारोऽनुवर्णितो दृश्यते ॥

अन्ते चैतदुपनिषदर्थप्रतिपादका एकोनत्रिंशच्छ्लोका दृश्यन्ते। ते च विशिष्टाद्वैतमतानुयायिरङ्गरामानुजमुनिभिरव्याख्याताः, कूरनारायणमुनिभिस्तु उपनिषद्घटकत्वेनाभिमत्य व्याख्याता दृश्यन्ते ॥

वक्तव्यविशेषः—

अत्रान्ते परिदृश्यमाना गौडपादीयाः कारिकास्सर्वा अप्यद्वैतिभिर्व्याख्याता दृश्यन्ते। इतरैरपि कैश्चित्तत्रादावुपलभ्यमाना एकोनत्रिंशच्छ्लोकाः परमेतदुपनिषदर्थसंग्राहकत्वादेतदुपनिषदन्तर्गता इति मत्वा व्याख्याता दृश्यन्ते। एतन्मते कोशेऽस्मिन् एकोनत्रिंशच्छ्लोकलेखनात्परं 'माण्डूक्योपनिषत्समाप्ता' इति परिदृश्यमानं लेखनमप्यानुकूल्यमादधाति ॥

No. 406 (B 480/1).

माण्डूक्योपनिषत्.

Māṇḍūkyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—65–68.
Lines on a page—11.
Letters in a line—19.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—complete.

उपक्रमः—

No. 405 कोशवत्.

उपसंहारः—

No. 405 कोशवत्.

प्रतिपाद्यविषयः—

No. 405 कोशवत्.

वक्तव्यविशेषः—

No. 405 कौशवत्.

No. 407 (C 1516/1).

मुक्तिकोपनिषत्.

Muktikopaniṣat.

Substance—Paper.
Size—10 × 4½ inches.
Character—Āndhra.
Folios—11
Lines on a page—9.
Letters in a line—32.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं पूर्णमद इति शान्तिः ॥
अयोध्यानगरे रम्ये रत्नमण्डपमध्यमे ।
सीताभरतसौमित्रिशत्रुघ्नाद्यैस्समन्वितम् ॥
सनकाद्यैर्मुनिगणैः वसिष्ठाद्यैश्शुकादिभिः ।
अन्यैर्भागवतैश्चापि स्तूयमानमहर्निशम् ॥
धीविक्रियासहस्राणां साक्षिणं निर्विकारिणम् ।
स्वरूपध्याननिरतं समाधिविरमे हरिम् ॥
भक्त्या शुश्रूषया रामं स्तुवन् पप्रच्छ मारुतिः ॥

उपसंहारः—

इदमिस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति किञ्चिद्विषयस्वभावतः ।
पुरस्तिरश्चोर्ध्वमधश्च सर्वतः सुपूर्णभूमाऽहमितीह भावय ॥
अजोऽमरश्चैव तथाऽजरोऽमृतः स्वयंप्रभस्सर्वगतोऽहमव्ययः ।
न कारणं कार्यमतीत्य निर्मलः सदैव तृप्तोऽहमितीह भावय ॥
जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥

तदेतदृचाऽभ्युक्तम् । ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् ॥ ओं सत्यमित्युपनिषत् ॥ ओं पूर्णमद इति शान्तिः॥

॥ मुक्तिकोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

मारुतिरामप्रश्नोत्तररूपायामस्यामुपनिषदि प्रथमाध्याये ऋगादिवेदानां चतुर्णां क्रमेण एकविंशतिनवाधिकशतसहस्रपञ्चाशच्छाखाभेदान्निर्दिश्य प्रतिशाखमेकैकोपनिषदित्याभिधाय तत्प्रतिपादितमुक्तिस्वरूपमुपवर्ण्य उपनिषत्सु एकस्यैव माण्डूक्यस्य, तदभावे दशोपनिषदां, तदभावे द्वात्रिंशदुपनिषदां, तदभावे चाष्टोत्तरशतोपनिषदां ब्रह्मज्ञानसाधकत्वमित्युपवर्ण्य तासां नामानि शान्तिमन्त्राश्चाभिहिता दृश्यन्ते ॥

द्वितीयेऽध्याये—मुक्तिचातुर्विध्यं निरूप्य तत्साधनोपायः प्रदर्श्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रोपलभ्यते मुद्रिता च ॥

No. 408 (B 481/1).

मुक्तिकोपनिषत्.

Muktikopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—15.
Lines on a page—13.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 407 कोशवत्.

उपसंहारः—

No. 407 कोशवत.

प्रतिपाद्यविषयः—

No. 407 कोशवत.

वक्तव्यविशेषः—

No. 407 कोशवत्.

No. 409 (3581/39).

मुक्तिकोपनिषत्.

Muktikopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—50-52.
Lines on a page—14.
Letters in a line—110.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 407 कोशवत्.

उपसंहारः—

No. 407 कोशवत्.

प्रतिपाद्यविषयः—

No. 407 कोशवत्.

वक्तव्यविशेषः—

No. 407 कोशवत्.

No. 410 (1958/6)

मुण्डकोपनिषत्.

Mundakopaniṣat.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Nāgarī.
Folios—19-20.
Lines on a page—10.
Letters in a line—90.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम्। ब्रह्मा देवानां प्रथमस्संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता। स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह। अथर्वणे यां प्रवदेत ब्रह्मा अथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्। स भारद्वाजाय सत्यवाहाय प्राह। भारद्वाजोऽङ्गिरसे परावराम्। शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः प्रपच्छ। कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति॥

उपसंहारः—

स यो ह वैतत्परमं ब्रह्म वेद ब्रह्मैव भवति। नास्याब्रह्मवित्कुले भवति। तरति शोकं तरति पाप्मानम्। गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति। तदेतदृचाऽभ्युक्तम्—

क्रियावन्तः श्रोत्रियाः ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः।
तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्॥

तदेतत्सत्यं ऋषिरङ्गिराः पुरोवाच। नैतदचीर्णव्रतोऽधीते। नमः परमर्षिभ्यो नमः परमर्षिभ्यः॥

॥ इति मुण्डकोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अथर्वशाखान्तर्गतायां प्रत्येकं खण्डद्वितययुतमुण्डकाख्यप्रकरणत्रितयविभक्तायामस्यामुपनिषदि ब्रह्मविद्योपदेशपरम्पराप्रदर्शनपूर्वकं

ब्रह्मज्ञानसाधनभूतपरापरविद्यास्वरूपादिकमभिधाय परविद्यावेद्यब्रह्मणः स्वरूपं प्रकाश्य तस्मादेव जगतः संग्रहेण प्रादुर्भावमुपवर्ण्य मुमुक्ष्वमुमुक्षुकर्तव्यानि च संगृह्य ब्रह्मणो जगत्सृष्टिं विस्तरतः प्रतिपाद्य प्रणवाख्यशरेण ब्रह्मात्मकलक्ष्यवेधप्रकारमुक्त्वा प्राप्यस्वरूपतत्प्राप्तिप्रकारतत्साधनादिकं ब्रह्मविदा अङ्गिरसा शौनकायोपदिष्टं दृश्यते ॥

वक्तव्यविशेषः—

कोशोऽस्मिन्नियमुपनिषत्समग्रा दृश्यते. मुद्रिता च ॥

No. 411 (B 482/1).

मुण्डकोपनिषत्.

Muṇḍakopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—7.
Lines on a page—11.
Letters in a line—18.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 410 **कोशवत्.**

उपसंहारः—

No. 410 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 410 **कोशवत्.**

वक्तव्यविशेषः—

No. 410 **कोशवत्.**

No. 412 (4136/1).

मुद्गलोपनिषत् .

Mudgalopaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—7.
Lines on a page—15.

Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

यत्पुरुषेणेत्यनया सृष्टियज्ञस्समीरितः ।
सप्तास्यासन् परिधयस्त्रिसप्तधश्च समीरिताः ॥
तं यज्ञमिति मन्त्रेण सृष्टियज्ञस्समीरितः ।
अनेनैव च मन्त्रेण मोक्षश्च समुदीरितः ॥
तस्मादिति च मन्त्रेण जगत्सृष्टिस्समीरिता ।
वेदाहमिति मन्त्राभ्यां वैभवं कथितं हरेः ॥

उपसंहारः—

तस्मादेतत्पुरुषसूक्तार्थमतिरहस्यं राजगुह्यं देवगुह्यं गुह्यादपि गुह्यतरं नादीक्षितायोपदिशेत् । [1] नानूचानाय नायज्ञशीलाय नावैष्णवाय नायोगिने [2] नाबहुभाषिणे नाप्रियवादिने नासंवत्सरवेदिने नातुष्टाय [3] नाधीतवेदायोपदिशेत् । गुरुरप्येवं [4] विच्छुचौ देशे पुण्यनक्षत्रे प्राणानायम्य पुरुषं ध्यायन् उपसन्नाय शिष्याय दक्षिणे कर्णे पुरुषसूक्तार्थमुपदिशेत् । विद्वान् न बहुशो वदेत् , [5] यातयामो भवति । असकृत्कर्णमुपदिशेत् । [6] कुर्वाणोऽध्येताऽध्यापकश्च इह जन्मनि पुरुषो भवतीत्युपनिषत् ॥ वाङ्मे मनसीति शान्तिः ॥

॥ मुद्गलोपनिषत् समाप्ता ॥

---

[1] नाननूचानाय [2] न बहु. [3] नानधीत. [4] विच्छुद्धे देशे. [5] यातायामो.
[6] एतत्कुर्वाणो, इति लिखितकोशान्तरे पाठः.

प्रतिपाद्यविषयः—

अत्राद्यौ नवभिः श्लोकैः पुरुषसूक्तार्थं संगृह्य पादचतुष्टयात्मकेन परमपुरुषेण पादत्रयात्मकनयोर्ध्वमवस्थाय गृहीततुरीयानिरुद्धरूपेण तेन ब्रह्मोपदेशद्वारा जगत्सर्जनमभिधाय तस्यैव परमपुरुषस्य सर्वैस्तत्तद्रूपेणोपास्यत्वमुपवर्ण्य तापत्रयषट्कोशषड्गंपञ्चकोशषड्भावषड्धर्मिषड्भ्रमान्निर्दिश्य तद्विधुरस्य ब्रह्मणः स्वरूपं प्रकाश्य एतदुपनिषत्पाठफलं च विस्तरेणानुवर्णितं दृश्यते ॥

वक्तव्यविशेषः—

इयमुपनिषदादौ षष्ठं श्लोकमारभ्य समग्रा अस्मिन् कोशे परिदृश्यते । ऋक्शाखान्तर्गतेतीयमुपनिषन्मुद्रिता च ॥

No. 413 (B 483/1).

मुद्गलोपनिषत्.

Mudgalopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—5.
Lines on a page—11.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

वाङ्मे मनसीति शान्तिः ॥ पुरुषसूक्तार्थनिर्णयं व्याख्यास्यामः—पुरुषसंहितायां पुरुषसूक्तार्थस्संग्रहेण प्रोच्यते ।

सहस्रशीर्षेत्यत्र[त्य]सशब्दोऽनन्तवाचकः ।
अनन्तयोजनं प्राह दशाङ्गुलवचस्तथा ॥

उपसंहारः—

No. 412 कोशवत्.

प्रतिपाद्यविषयः—

No. 412 कौशवत्.

वक्तव्यविशेषः—

No. 412 कौशवत्.

No. 414 (1682/10).

मैत्रायणीयोपनिषत्.

Maitrāyaṇīyopaniṣat.

Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—62-75.
Lines on a page—5.
Letters in a line- -32.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

बृहद्रथो ह वै नाम राजा राज्ये इष्टं पुत्रं निधापयित्वा इदमशाश्वत मन्यमानश्शरीरं वैराग्यमुपेतोऽरण्यं निर्जगाम। स तत्र परमं तप आस्थाय आदित्यमीक्षमाण ऊर्ध्वबाहुस्तिष्ठत्यन्ते सहस्रस्य मुनेरन्तिकमाजगाम अग्निरिवाधूमकस्तेजसा निर्दहन्निवात्मविद्भगवान् शाकायन्य उत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति राजानमब्रवीत्। स तस्मै नमस्कृत्योवाच ॥

उपसंहारः—

अग्निना पिहितस्सहस्राक्षेण हिरण्मयेनानन्देनैष वाव विजिज्ञासितव्योऽन्वेष्टव्यस्सर्वभूतेभ्योऽभयं दत्त्वाऽरण्यं गत्वाऽथ बहिः कृत्वेन्द्रियार्थान् स्वाच्छरीरादुपलभतेऽथैनमिति ॥

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्।
सहस्ररश्मिश्शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥

॥ मैत्रायणीयोपनिषत् संपूर्णा ॥

प्रतिपाद्यविषयः—

बृहद्रथशाकायन्यप्रश्नोपदेशरूपायामस्यां प्रपाठकपदकात्मना परिदृश्यमानायामुपनिषदि—

प्रथमे प्रपाठके—मरुन्नामकराजपुत्रेण बृहद्रथनाम्ना जगदिदं क्षयिष्णु पश्यता निर्विण्णेन वैराग्याधिगमप्रकारः कथ्यते ॥

द्वितीये प्रपाठके—प्रजापतिसकाशाद्बालखिल्यैरधिगतं तैश्च मैत्रेयायोपदिष्टमन्तरात्मस्वरूपादिकं मैत्रेयादधिगम्य शाकायन्येन बृहद्रथाय राज्ञ उपदिश्यते ॥

तृतीये—तस्मा एव राज्ञे तेनैव मुनिना भूतात्मस्वरूपादिकमुपदिश्यते ॥

तुरीये—भूतात्मन उत्तमगत्यवाप्तिसाधनादिकमुपदिश्यते ॥

पञ्चमे—ब्रह्मणो मूर्तामूर्तस्वरूपनिरूपणपूर्वकमुद्गीथादिस्वरूपमुपदिश्य ब्रह्मणः स्वरूपं बहुधा प्रपञ्च्यते ॥

वक्तव्यविशेषः—

मुद्रितकोशवत् अस्मिन् कोशे अत्रत्यैतल्लिखितकोशान्तरापेक्षयाऽन्ते प्रपाठकद्वयमधिकं दृश्यते । अस्या उपनिषदो मैत्रायण्युपनिषदित्यपि व्यपदेशो दृश्यते । मैत्रेय्युपनिषन्नाम्ना इतस्संगृहीताऽन्याऽप्युपनिषद्दृश्यते ॥

No. 415 (B 484/1).

मैत्रायणीयोपनिषत्.

Maitrāyaṇīyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—183-192.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 414 कोशवत्.

उपसंहारः—

No. 414 कोशवत्.

प्रतिपाद्यविषयः—

No. 414 कोशवत्.

वक्तव्यविशेषः—

No. 414 कोशवत्.

No. 416 (C 1533/8).

मैत्रायणीयोपनिषत्.

Maitrāyaṇīyopaniṣat.

Substance—Paper.
Size—12 × 5½ inches.
Character—Āndhra.
Folios—17–21.
Lines on a page—14.
Letters in a line—38.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 414 कोशवत्.

उपसंहारः—

अथ यो ह खलु वावाऽस्य सात्विकोंशोऽसौ स योऽयं विष्णुः स वा एष एकस्त्रिधाभूताऽष्टधा एकादशधा द्वादशधा अपरिमितधा चोद्-

तत्वाङ्गेषु चरति प्रतिष्ठा सर्वभूतानामधिपतिर्बभूवेत्यसावात्मा अन्तर्बहिश्चान्तर्बहिश्चान्तर्बहिश्च ॥ ओं तत्सत् ॥

इति ऋग्वेदे मैत्रायण्युपनिषदि चतुर्थः प्रपाठकः ॥

प्रतिपाद्यविषयः—

अत्र अधिकारिलक्षणनिर्धारणानन्तरं उत्क्रान्तिगत्यादिकमुपवर्ण्य पञ्चकोशविभजनपूर्वकं ब्रह्म विचारितम् । प्रकृतिपुरुषरहस्यं दर्शितम् । चित्तलयपर्यन्तं योगोभ्यसनीय इत्युपदिष्टम् । सगुणोपासना विहिता । उद्गीथप्रणवोपासनाप्रकारो निरूपितः । गायत्रीविद्या चक्षुर्विद्या च संग्रहेण प्रतिपादिते ॥

वक्तव्यविशेषः —

अस्मिन् कोशे प्रपाठकचतुष्कमेव दृश्यते ॥ सुन्दरेश्वरशिष्याप्पयदीक्षितविरचितङ्काप्ये एतावदन्तंवेयमुपनिषदिति अन्तर्बहिश्चान्तर्बहिश्चेति द्विरुक्त्या सूच्यत इति भाषितं दृश्यते । लिखितकोशान्तरेष्वप्येतावतैवोपनिषत्समाप्तिर्लिखिता दृश्यते । तस्मान्मुद्रितकोशान्ते परिदृश्यमानं प्रपाठकद्वयमधिकमिति विभाव्यते ॥

No. 417 (1973 14).

मैत्रायणीयोपनिषत्.

Maitrāyaṇīyopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inch.
Character—Nāgarī.
Folios—159–167.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 414 कोशवत्.

उपसंहारः—

No. 416 कोशवत्.

प्रतिपाद्यविषयः—

No. 416 कोशवत्.

वक्तव्यविशेषः—

No. 416 कोशवत्.

No. 418 (B 485/1).

मैत्रेय्युपनिषत्.

Maitreyyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—329—334.
Lines on a page—11.
Letters in a line—22.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 414 कोशवत्.

उपसंहारः—

प्रपञ्चमुक्तचित्तोऽस्मि प्रपञ्चरहितोऽस्म्यहम् ।
सर्वप्रकाशरूपोऽस्मि चिन्मात्रज्योतिरस्म्यहम् ॥
कालत्रयविमुक्तोऽस्मि कामादिरहितोऽस्म्यहम् ।
कायकायविमुक्तोऽस्मि निर्गुणः केवलोऽस्म्यहम् ॥
मुक्तिहीनोऽस्मि मुक्तोऽस्मि मोक्षहीनोऽस्म्यहं सदा ।
सत्यासत्यादिहीनोऽस्मि सन्मात्रात्मास्म्यहं सदा ॥

गन्तव्यदेशहीनोऽस्मि गमनादिविवर्जितः ।
सर्वदा समरूपोऽस्मि शान्तोऽस्मि पुरुषोत्तमः ॥
एवं स्वानुभवो यस्य सोऽहमस्मि न संशयः ।
यश्शृणोति सकृद्वाऽपि ब्रह्मैव भवति स्वयम् ॥

॥ इत्युपनिषत् । मैत्रेय्युपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अध्यायत्रितयपरिमितायामस्यामुपनिषदि प्रथमेऽध्याये—बृहद्रथनाम्नो राज्ञो लोकमिमं नश्वरं शरीरं च जुगुप्सावहं पश्यतो वैराग्योत्पत्तिवर्णनपूर्वकं जातवैराग्याय तस्मै शाकायन्यमुनिना चित्तमलशोधनोपदेशपुरस्सरं चात्मतत्त्वं निरूपितं दृश्यते ॥

द्वितीयेऽध्याये—आन्तरस्नानशौचभैक्षादिस्वरूपं निरूप्य संन्यासस्वरूपं तत्र कर्तव्यं च संग्रहेण प्रदर्श्यते ॥

तृतीयेऽध्याये—आत्मनोऽनुसंधानक्रमः प्रपञ्च्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत्समग्रा दृश्यते । सामवेदान्तर्गतेयमिति मुद्रिता च । संगृहीतानामेषामर्थानां विस्तृतशैल्या प्रतिपादनपरा मैत्रायणीयोपनिषन्नामाऽन्याऽप्युपनिषद्दृश्यते ॥

No. 419 (115/2).

*यन्त्रविवरणोपनिषत्.

* Yantravivaraṇopaniṣat.

Substance—Paper.
Size—16 × 1½ inches.
Character—Andhra.
Folios—13–20.

Lines on a page—7.
Letters in a line—58.
Age of Ms.—Old.

Condition of Ms.—Good. Thirteenth and fifteenth leaves are broken on one side.	Correct or incorrect—Correct.
	Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat relates how to write "Sri Cakram" and its constituent Cakrams and states how to ponder over the deities connected therewith.

उपक्रमः—

ओं शान्तिः॥ कादिविद्याया गालवगोत्रं गालवच्यावनाप्नवानच्यावर्षेयम्। हादिविद्यायाः तैतलसगोत्रं एकार्षेयम्। चूडामणि तन्त्रे। हरिः ओं—देवा ह वै भगवन्तमुचुः। महाचक्रं नाम चक्रनायकं नो ब्रूहीति। सर्वकामिकं सर्वाराध्यं सर्वरूपं सर्वतोमुखं मोक्षद्वारं यद्योगिन उपविश्य परं ब्रह्म भित्त्वा निर्वाणमधिशेते। तान् होवाच भगवान् श्रीचक्रं व्याख्यास्यामः॥

उपसंहारः—

४ या—ति सर्वमन्त्रात्मिके त—मः।
४ या—ति सर्वयन्त्रात्मिके त—मः।
४ या—ति महामाहेश्वर्यादिदशावरणदेवता . . . त—मः॥
४ या—ति सर्वयोगिनीदेवता त—मः।
४ या—ति श्रीराजराजेश्वरी परा देवता त—मः॥

भगवान् ब्रह्मविदित्येतैर्मन्त्रैः भगवतीं यजेत्। ततो देवी स्वात्मानं दर्शयति। तस्माद्य एतैर्मन्त्रैर्यजति स ब्रह्मणस्पतिः सोऽमृतत्वं च गच्छति। य एवं वेदेत्युपनिषत्॥

॥ इति यन्त्रविवरणोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र श्रीचक्रलेखनक्रमनिरूपणपूर्वकं तदन्तर्गतचक्रेषु तत्तद्देवतानामुपासनाक्रमश्च प्रतिपादितः॥

वक्तव्यविशेषः —

इयमुपनिषत् अस्मिन् कोशे समग्रा परिदृश्यते, अमुद्रिता च। शान्तिमन्त्रो न कोऽप्यत्राद्यन्तयोर्लिखितो दृश्यते ॥

No. 420 (3581 25).

याज्ञवल्क्योपनिषत्.

Yājñavalkyopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—33 one side only.
Lines on a page—9.
Letters in a line—94.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः। जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच। भगवन् संन्यासमनुब्रूहीति। कथं संन्यासलक्षणम्। स होवाच याज्ञवल्क्यः। ब्रह्मचर्यं समाप्य गृही भवेत्। गृहात् वनी भूत्वा प्रव्रजेत्। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्, गृहाद्वा वनाद्वा। अथपुनरव्रती वा व्रती वा स्नातको वाऽस्नातको वा उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् ॥

उपसंहारः—

शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रभवननदीपुलिनगिरिकुहरकन्दरकोटरानिर्झरस्थण्डिलेष्वनिकेतनिवास्यप्रयत्नः शुभाशुभकर्मनिर्मूलनपरो ग्रामैकरात्रं संचरन् संन्यासेन देहत्यागं करोति यस्स परमहंसो नामेत्युपनिषत् ॥

॥ याज्ञवल्क्योपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र संन्यासपरिग्रहकालतत्प्रकारप्रदर्शनपूर्वकं संन्यासिनामावश्यका धर्मा अभिधीयन्ते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् इयमुपनिषत् समग्रा दृश्यते । कोशेऽस्मिन्नुपनिषदादौ आथर्वणशान्तिमन्त्रो लिखितो दृश्यते । कोशान्तरे तु शुक्लयजुश्शाखीयशान्तिमन्त्रो लिखितः । लिखितकोशान्तरे मुद्रिते च अन्त्यभागे श्लोकरूपेण परिदृश्यमाना ग्रन्था अत्र न दृश्यन्ते ॥

No. 421 (B 486/1)

याज्ञवल्क्योपनिषत्.

Yājñavalkyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—5.
Lines on a page—13.
Letters in a line—18.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 420 कोशवत्.

उपसंहारः—

धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिने ।
नमोऽस्तु मम कोपाय स्वाश्रयज्वालिने भृशम् ॥

कोपस्य मम वैराग्यदायिने दोषचोदिने ।
यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र संयमी ॥
प्रबुद्धा यत्र ते विद्वन् सुषुप्तं याति योगिराट् ।
चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च ॥
चित्तं चिदहमेते च लोकाश्चिदिति भावय ।
यतीनां तदुपादेयं पारहंस्यं परं पदम् ॥
नातः परतरं किञ्चित् विद्यते मुनिपुङ्गव ॥
॥ इत्युपनिषत् ॥ इति याज्ञवल्क्योपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

No. 420 कोशवत्.

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत्समग्रा दृश्यते । कोशोऽस्मिन्नुपनिषदादौ शुक्लयजुश्शाखीयशान्तिमन्त्रो लिखितः । पूर्वकोशापेक्षयाऽस्मिन् कोशोऽन्त्यभागे 29 श्लोका अधिका दृश्यन्ते । एवं मुद्रितेऽपि ॥

No. 422 (B 487/1).

योगकुण्डल्युपनिषत्.

Yogakuṇḍalyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—3.
Lines on a page—13.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

सह नाववीत्तिति शान्तिः । पद्मज उवाच—
अमावास्या च प्रतिपत्पौर्णमासी च शंकर ।
अस्याः का वर्ण्यते संज्ञा एतदाख्याहि तत्त्वतः ॥

प्रतिपद्दिनतो काले अमावास्या तथैव च ।
पौर्णमास्यां स्थिरीकुर्यात् स च पन्था हि नान्यथा ॥
कामेन विषयाकाङ्क्षी विषयात्काममोहितः ।
द्वावेव संत्यजेन्नित्यं निरञ्जनमुपाश्रयेत् ॥
अपरं संत्यजेत्सर्वं यदीच्छेदात्मनो हितम् ।
शक्तिमध्ये मनः कृत्वा मनश्शक्तेश्च मध्यगम् ॥
मनसा मन आलोक्य न त्यजेत्परमं पदम् ।
मन एव हि बिन्दुश्च उत्पत्तिस्थितिकारणम् ।
मनसोत्पद्यते बिन्दुर्यथा क्षीरं घृतात्मकम् ॥

उपसंहारः—

अज्ञानात्तु चिदाभासो बहिस्तापेन तापितः ।
दग्धं भवत्येव तदा तूलपिण्डमिवाग्निना ॥
दहरस्थः प्रत्यगात्मा नष्टे ज्ञाने ततः परम् ।
विततो व्याप्य विज्ञानं दहत्येव क्षणेन तु ॥
मनोमयं ज्ञानमयं सम्यक् दग्ध्वा क्रमेण तु ।
घटस्थदीपवच्छश्वत् अन्तरेव प्रकाशते ॥
ध्यायन्नास्ते मुनिश्चैवमा सुप्तेरा मृतेस्तु यः ।
जविन्मुक्तस्स विज्ञेयः स धन्यः कृतकृत्यवान् ॥
जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं
तदेव शिष्यत्यमलं निरामयम् ॥

इत्युपनिषत् ॥ इति योगकुण्डल्युपनिषदि तृतीयोऽध्यायः ॥

प्रतिपाद्यविषयः—

पद्मजशङ्करप्रश्नोत्तररूपायामस्यामुपनिषदि एतत्कोशदृश्यमाने तृतीयाध्याये—चित्तस्थिरीकरणोपायप्रदर्शपूर्वकं प्राणायामक्रमः संक्षेपेण

कथितः। देहगतषट्चक्राणां नामानि कथयित्वा तेषां स्थानान्यभिहितानि। शब्दविलयक्रमकथनपूर्वकं पिण्डाण्डब्रह्माण्डयोर्विलयक्रमः कथितः। ब्रह्मस्वरूपतदुपासनाक्रमकथनपूर्वकं जीवन्मुक्तत्वादेहमुक्तत्वे चाभिहिते ॥

वक्तव्यविशेष.—

तृतीयाध्यायमात्रमस्मिन् कोशे परिदृश्यते। यजुश्शाखान्तर्गततया मुद्रितायामस्यामुपनिषदि त्रयोऽध्यायाः परिदृश्यन्ते ॥

No. 423 (B 927/9).

योगतत्त्वोपनिषत्.

Yogatattvopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—25–26
Lines on a page—16.
Letters in a line—24.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥
विष्णुनामा महायोगी महाभूतो महातपाः।
तत्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥
यः स्तनः पूर्वपीतस्तं निष्पीड्य मुदमश्नते।
यस्माज्जातो भगात्पूर्वं तस्मिन्नेव भगे रमेत् ॥

उपसंहारः—

अकाररेचितं पद्ममुकारेणैव भिद्यते।
मकारे लभते नादमर्धमात्रा तु निश्चला ॥

शुद्धस्फाटिकसंकाशं निष्कळं पापनाशनम् ।
लभते योगयुक्तात्मा पुरुषस्तत्परं पदम् ॥
कूर्मस्त्वपानोवाधीत(स्स्वपाणिपादादि) शिरस्यात्मनि धारयेत् ।
एवं द्वारेषु सर्वेषु वायुपूरितरेचितः ॥
निपीदंतु(निषिद्धे तु) नवद्वारे ऊर्ध्वं प्राण(प्राङ्नि) श्वसंस्तथा ।
घटमध्ये यथा दीपो निहितं(निवातं) कुम्भकं विदुः ॥
निषिद्धैर्नवभिर्द्वारैर्निर्जने निरुपद्रवे ।
निश्चिंत चात्मभूतानां(त्वात्ममात्रेण) अरिष्टं (अवशिष्टं)योगसेवया ॥

॥ इति योगतत्त्वोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र चतुर्दशभिः श्लोकैः संसृतेर्जुगुप्सितत्वहेतून्निरूप्य हृत्पद्मे प्रणवानुध्यानरूपयोगस्वरूपं तत्फलं च प्रतिपाद्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे मुद्रितैतदुपनिषदादौ पारिदृश्यमानः 129 श्लोकपरिमितो ग्रन्थो नोपलभ्यते ॥

No. 424 (1973/27).

योगतत्त्वोपनिषत् .

Yogatattvopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inch.
Character—Nāgarī.
Folios—236-237.
Lines on a page—4.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 423 कोशवत् .

उपसंहारः—

No. 423 कोशवत्.

प्रतिपाद्यविषयः—

No. 423 कोशवत्.

वक्तव्यविशेषः—

No. 423 कोषवत्। इयमुपनिषदर्थवेदीयेत्यन्ते लिखिता दृश्यते। (No. 423) लिखितकोशान्तरे शान्तिमन्त्र एव न दृश्यते (No. 425) अपरस्मिंश्च कोशे याजुषशान्तिमन्त्रलेखनमादौ दृश्यते। अतः किंशाखीयेयमुपनिषदिति चिन्तनीयम्॥

No. 425 (B 489/1).

योगतत्वोपनिषत्.

Yogatattvopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—52–65.
Lines on a page—11.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम्। सह नाववत्विति शान्तिः॥
योगतत्वं प्रवक्ष्यामि योगिनां हितकाम्यया।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते।
विष्णुर्नाम महायोगी महाभूतो महातपाः।
तत्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः।
तमाराध्य जगन्नाथं प्रणिपत्य पितामहः।
पप्रच्छ योगतत्वं मे ब्रूहि चाष्टाङ्गसंयुतम्।

तमुवाच हृषीकेशो वक्ष्यामि शृणु तत्वतः ।
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः ॥

उपसंहारः—

No. 423 कोशवत्.

प्रतिपाद्यविषयः—

अत्र लिखितपूर्वकोशद्वयापेक्षयाऽऽधिक्येन दृश्यमानैः 128 श्लोकैः जीवात्मपरमात्मस्वरूपं, ज्ञानयोगयोरुभयोरपि मोक्षोपयोगित्वं, मन्त्रयोगलययोगहठयोगराजयोगानां तदङ्गयमनियमासनादीनां च स्वरूपं तदभ्यसनतत्सिद्धिप्रकारादिकं चानुवर्णितं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् पूर्वकोशद्वयापेक्षया मध्ये 128 श्लोका अधिका दृश्यन्ते। याजुषशान्तिमन्त्रपाठ आदौ दृश्यते ॥

No. 426 (3581/33).

योगचूडामण्युपनिषत्.

Yogacūḍāmaṇyupaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—35.
Lines on a page—10.
Letters in a line—

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥
योगचूडामणिं वक्ष्ये योगिनां हितकाम्यया ।
कैवल्यसिद्धिदं गूढं सेवितं ब्रह्मवित्तमैः ॥

ओं नित्यशुद्धं बुद्धं निर्विकल्पं निरञ्जनं निराख्यातं अनादिनिधनमेकं तुरीयं यद्भूतं भवद्भविष्यत्परिवर्तमानं सर्वदा अनवच्छिन्नं परं ब्रह्म। तस्माज्जाता परा शक्तिः स्वयंज्योतिरात्मिका। आत्मन आकाशस्सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। तेषां पञ्चभूतानां पतयः पञ्च सदाशिवश्वररुद्र*ब्रह्माणश्चेति। तेषां ब्रह्मविष्णुरुद्राश्चोत्पत्तिस्थितिलयकर्तारः॥

उपसंहारः—

तैलधारामिवाभिन्नं दीर्घघण्टानिनादवत्।
प्रणवस्य ध्वनिस्तद्वत्तदर्धं ब्रह्म चोच्यते॥
ज्योतिर्मयं तदाऽग्रं स्यादवाच्यं बुद्धिसूक्ष्मतः।
ददृशुर्ये महात्मानो यस्तं वेद स वेदवित्॥
जाग्रन्नेत्रद्वयोर्मध्ये हंस एव प्रकाशते।
सकारः खेचरी प्रोक्ता त्वंपदं चेति निश्चितम्॥
हकारः परमेशस्स्यात्तत्पदं चेति निश्चितम्।
सकारो ध्यायते जन्तुर्हकारो हि भवेद्भुवम्॥
इन्द्रियैर्वध्यते जीवो ह्यात्मा चैव न बध्यते।
ममत्वेन भवेज्जीवो निर्ममत्वेन केवलः॥

॥ इति योगचूडामण्युपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र भूतभौतिकसृष्टिकथनपूर्वकं स्थूलसूक्ष्मप्रकृतिस्वरूपं निर्वर्ण्य प्रणवं प्रशस्य तद्गतवर्णदेवतामाहात्म्यादिकं संगृह्योपपादितं दृश्यते॥

वक्तव्यविशेषः—

सामशाखान्तर्गततया मुद्रितायां योगचूडामण्याख्यायामुपनिषदि दृश्यमानं प्रथमश्लोकमात्रमस्मिन् कोशे आदौ दृश्यते। अन्यत्सर्वं ततो-विभिन्नमेव दृश्यते। नामधेयं त्वभिन्नं दृश्यते। मुद्रितायां त्वासनादिप्रतिपादनपरो महान् ग्रन्थराशिः परिदृश्यत इति मुद्रितलाञ्छितयोर्मिथो विभिन्नयोः किंनिबन्धनं नामधेयैक्यमिति परिचिन्तनीयम्। किंचेयमुपनिषत् सामशाखान्तर्गतेति मुद्रितकोशे दृश्यते। अत्र तु आदावथर्वशाखी-

* अत्र विष्णुपदं गलितमिति भाति.

यशान्तिमन्त्रो लिखितो दृश्यते। ततश्चेयमुपनिषत्कैशाखीयेत्यपि विमर्शनीयम्॥

No. 427 (B 488/1).

योगचूडामण्युपनिषत्.

Yogacūḍāmaṇyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—1–14.
Lines on a page—11.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

आप्यायन्त्विति शान्तिः॥
योगचूडामणिं वक्ष्ये योगिनां हितकाम्यया।
कैवल्यसिद्धिदं गूढं सेवितं योगवित्तमैः॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणा।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट्॥
एकं सिद्धासनं प्रोक्तं द्वितीयं कमलासनम्।
षट्चक्रं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम्॥

उपसंहारः—

यथा सिंहो गजो व्याघ्रो भवेद्वश्यश्शनैश्शनैः।
तथैव सेवितो वायुरन्यथा हन्ति साधकम्॥
युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं प्रपूरयेत्।
युक्तं युक्तं प्रबध्नीयादेवं सिद्धिमवाप्नुयात्॥
चरतां च ु रादीनां विषयेषु यथाक्रमम्।
तत्प्रत्याहरणं तेषां प्रत्याहारस्स उच्यते॥

यथा तृतीयकाले तु रविः प्रत्याहरेत् प्रभाम् ।
तृतीयाङ्गस्थितो योगी विकारं मानसं हरेत् ॥
॥ इत्युपनिषत् ॥ योगचूडामण्युपनिषत्समाप्ता ॥

वक्तव्यविशेषः—

अत्र सिद्धासनकमलासनानिर्देशपूर्वकं देहान्तर्गतषट्चक्रस्वरूपं निरूप्य नाडीचक्रं च विविच्य दर्शयित्वा अजपागायत्रीजपं प्रशस्य जालंधरादिबन्धविवेचनपूर्वकं खेचरीमुद्रादिकमप्यभिधाय सृष्टिस्थितिसंहारक्रमं निर्वर्ण्य देहमूर्त्यवस्थास्थानत्रयविवेचनपूर्वकं प्रणवस्वरूपं ध्यानक्रमं च प्रतिपाद्य समाधिस्वरूपप्रकाशनपूर्वकं षडङ्गयोगाभ्यसनक्रमश्चेत्यादिकं प्रतिपादितम् ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत् मुद्रितसदृक्षा समग्रा दृश्यते । No. 427 लिखितकोशान्तरे चैतत्समाननामधेयाऽत्यन्तविभिन्नानुपूर्वीकाऽन्याप्युपनिषद्दृश्यते ॥

No. 428 (4136/7).

योगशिखोपनिषत् .

Yogaśikhopaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—30-39.
Lines on a page—15.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

सह नाववीत्वति शान्तिः ॥
सर्वे जीवास्सुखैर्दुःखैर्मायाजालेन वेष्टिताः ।
तेषां मुक्तिः कथं देव कृपया वद शङ्कर ॥

सर्वसिद्धिकरं मार्गं मायाजालनिकृन्तनम् ।
जन्ममृत्युजराव्याधिनाशनं सुखदं वद ॥
इति हिरण्यगर्भः पप्रच्छ । स होवाच महेश्वरः—
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् ।
सिद्धिमार्गेण लभते नान्यथा पद्मसम्भव ॥
पंतिताः शास्त्रजालेषु प्रज्ञया तेन मोहिताः ।
स्वात्मप्रकाशरूपं तत् किं शास्त्रेण प्रकाश्यते ॥

उपसंहारः—

यथाऽग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं विना ।
विना चाभ्यासयोगेन ज्ञानदीपस्तथा न हि ॥
घटमध्ये यथा दीपो बाह्ये नैव प्रकाशते ।
भिन्ने तस्मिन् घटे चैव दीपज्वाला च भासते ॥
स्वकायं घटमित्युक्तं यथा जीवो हि तत्पदम् ।
गुरुवाक्यसमाभिन्ने ब्रह्मज्ञानं प्रकाशते ॥
कर्णधारं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढम् ।
अभ्यासवासनाशक्तथा तरन्ति भवसागरम् ॥
इत्युपनिषत् । षष्ठोऽध्यायः । सह नाववत्विति शान्तिः ॥
॥ योगशिखोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः —

षडध्यायीपरिमितायामस्यामुपनिषदि प्रथमेऽध्याये—योगज्ञानयोरुभयोरपि समुच्चितयोर्मोक्षसाधनत्वमुपवर्ण्य योगिनो योगस्य च महिमानं प्रकाश्य कुण्डलिनीचालनक्रमं प्रतिपाद्य सूर्यभेदाख्ययोगप्रकारमुक्त्वा मूलादिबन्धत्रयस्वरूपं प्रकाश्य बहुधाऽन्ये च योगाभ्यासक्रमा निरूपिताः ॥

द्वितीयेऽध्याये—मूलमन्त्रमहिमानमुपवर्ण्य स्थूलसूक्ष्मपररूपं ब्रह्मणस्त्रिविधं वपुर्निरूप्य तत्प्रकाशकोपाया अणिमादिसिद्धिप्रकाराश्च निरूपिताः ॥

तृतीयेऽध्याये—नादाख्यशब्दब्रह्मणो महिमाऽनुवर्णितः ॥

तुरीयेऽध्याये—प्रपञ्चस्य ब्रह्मात्मकत्वं प्रकाशितम् ॥

पञ्चमषष्ठाध्याययोः—शरीरस्थषट्चक्रनाडीचक्रादिस्वरूपं प्रकाश्य तत्र पीठबन्धेन बहवो योगाभ्यासक्रमाः प्रतिपादिताः ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् षडध्यायीपरिमितेयमुपनिषद्दृश्यते । कृष्णयजुश्शाखान्तर्गतेयमुपनिषदिति मुद्रिता च परिदृश्यते । अत्रत्यप्रथमाध्यायमध्यगतश्लोकदशकमात्रपरिमिता ऽन्या ऽप्युपनिषदत्रत्यलिखितकोशान्तरे दृश्यते ॥

No. 429 (B 490/1).

योगशिखोपनिषत् .

Yogaśikhopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—32.
Lines on a page—13.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 428 कोशवत् .

उपसंहारः—

No. 428 कोशवत् .

प्रतिपाद्यविषयः—

No. 428 कोशवत् .

वक्तव्यविशेषः—

No. 428 कोशवत्.

No. 430 (B 1973/21).

योगशिखोपनिषत्.

Yogaśikhopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—226-227.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अथ योगशिखां प्रवक्ष्यामि सर्वज्ञानेषु चोत्तमाम् ।
यदाऽनुध्यायते मन्त्रं गात्रकम्पोऽथ जायते ॥
आसनं पद्मकं बद्ध्वा यच्चान्यदपि रोचते ।
नासिकाग्रे च दृष्टिं कुर्याद्धस्तपादौ तु संयतौ ॥
मनस्सर्वत्र संगृह्य ओंकारं तत्र चिन्तयेत् ।
ध्यायते सततं प्राज्ञो हृत्कृत्वा परमेष्ठिनम् ॥

उपसंहारः—

अथ तं(तद्)ध्यायते जन्तुरालस्यादप्रमादतः ।
यदि त्रिकालमावर्तेत् स गच्छेत्पुण्यसम्पदम् ॥
पुण्यमेतत्समासाद्य संक्षिप्य कथितं मया ।
लब्धयोगोऽथ बुध्येत प्रसन्नं परमेष्ठिनम् ॥
जन्मान्तरसहस्रेषु यदा क्षीणानुकिल्बिषः ।
तदा पश्यति योगेन संसारोच्छेदनं महत् ॥
संसारोच्छेदनं महदिति ॥

॥ इति योगशिखोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

दशश्लोकीपरिमितायामस्यामुपनिषदि उररीकृतयत्किञ्चिदासनबन्धेन नासाग्रन्यस्तदृष्टिना प्रणवचिन्तनपूर्वकं ब्रह्मानुध्याने फलावाप्तिरित्यभिधीयते ॥

वक्तव्यविशेषः—

यजुश्शाखान्तर्गततया मुद्रितायामस्यामुपनिषदि प्रथमाध्यायमध्ये परिदृश्यमानं श्लोकदशकमेवात्र कोशे योगशिखोपनिषन्नाम्ना लिखितं दृश्यते । मुद्रितकोशपरिदृश्यमानायामस्यामुपनिषदि तु भूयान् ग्रन्थ उपलभ्यते ॥

No. 431 (B 124/2).

रहस्योपनिषत्.

Rahasyopaniṣat.

Substance—Paper.	Age of Ms.—Modern.
Size—$7\frac{3}{4}\times 6$ inches.	Condition of Ms.—Good.
Character—Kannada.	Correct or incorrect—Incorrect
Folios—23–29.	Complete or incomplete—Complete.
Lines on a page—12.	
Letters in a line—13.	

उपक्रमः—

[1] (परमात्मा(परात्मा)द्वैतसत्यात्मा प्रत्यगानन्दचिद्घनः ।
आश्रये दक्षिणामूर्तिमवाङ्मनसगोचरम्) ॥

अथातो रहस्योपनिषदो व्याख्यास्यामः । देवर्षयो ब्रह्माणं संपूज्य प्रणिपत्य पप्रच्छ(पप्रच्छुः) । भगवानस्माकं रहस्योपनिषदमनुब्रूहीति । ब्रह्मावाच—

पुरा व्यासो महातेजाः सर्वं देवतपोधनाः ।
प्रणिपत्य शिवं साम्बं कृताञ्जलिरुवाच ह ॥

---

[1] श्लोकोऽयं लिखितकोशान्तरे न दृश्यते.

शुकस्य मम पुत्रस्य वेदसंस्कारकर्मणा(णि)।
ब्रह्मोपदेशकालोऽयमिदानीं समुपासितः(समुपस्थितः)॥

उपसंहारः—

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः॥
उपदिष्टशिवेनेति शुकस्तन्मयतां गतः।
उत्थाय प्रणिपत्येशं त्यक्ताशेषपरिग्रहः॥
परब्रह्मपयो राशिप्लवंतिच(राशौ प्लवन्निव) ययौ तदा।
प्रव्रजन्तं तमालोक्य कृष्णद्वैपायनो मुनिः॥
अनुद्रवन् आजुहुवु(आजुहाव)पुत्रविश्लेषकातरः।
प्रतिनेदुस्तदा सर्वे जगत्स्थावरजङ्गमाः॥
तच्छ्रुत्वा सकलानादौ(कारं)व्यासस्सत्यवतीसुतः।
पुत्रेण सहितः प्रीत्या परानन्दमुपेयिवान्॥
यो रहस्योपनिषदमधीते गुर्वनुग्रहात् साक्षात्कैवल्यमश्नुत इति॥
॥ रहस्यब्रह्मोपनिषत् समाप्ता॥

प्रतिपाद्यविषयः—

अत्र व्यासपुत्राय शुकाय व्यासप्रार्थितेनेश्वरेण प्रणवगायत्र्यादि-मन्त्रोपदेशपूर्वकं तत्त्वमस्यादिवाक्यमुपदिश्य तदर्थं उपदिष्टो दृश्यते॥

वक्तव्यविशेषः—

इयमेवोपनिषत् शुकरहस्योपनिषन्नाम्ना कृष्णयजुश्शाखान्तर्गतेति मुद्रिता दृश्यते। अत्रादौ शान्तिमन्त्रो न दृश्यते। अस्या एवोपनिषदो ग्रन्थान्तपरिदृश्यमानलेखेन रहस्यब्रह्मोपनिषदित्यपि नामान्तरं ज्ञायते॥

No. 432 (B 491/1).

रहस्योपनिषत्.

Rahasyopaniṣat.

Substance—Paper. | Character—Andhra.
Size—8 × 6 inches. | Folios—33–38.

Lines on a page—11.
Letters in a line—18.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 431 कोशवत् .

उपसंहारः—

No. 431 कोशवत् .

प्रतिपाद्यविषयः—

No. 431 कोशवत् .

वक्तव्यविशेषः—

कोशोऽस्मिन्नादौ कृष्णयजुश्शार्खीयशान्तिमन्त्रलेखनं दृश्यते ॥

No. 433 (B 330/1).

* राजराजेश्वरोपनिषत् .

* Rājarājeśwaropaniṣat.

Substance—Paper.
Size – 8 × 6 inches.
Character – Malayāḷa.
Folio—1.
Lines on a page—25.
Letters in a line—14.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect — Incorrect.
Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat points out, in detail, the method of discerning the Great Soul face to face, by the sight in the interval between the eyebrows.

उपक्रमः—

ओं । सह नाववत्विति शान्तिः ॥
विन्दुमध्ये स्थितं नादं लिङ्गं प्रत्यक्कलात्मकम् ।
त्रियम्बकं सुखासीनं श्रीगुरुं गगनोपमम् ॥
अथ प्रायक्रियागुप्ता स्वानुभूतिप्रकाशयुक् ।
चक्षुर्मध्ये स्थितं गुह्यमङ्गुष्ठं परमात्मकम् ॥
तदर्धश्चापि पर्वार्धं तस्याग्रं सूक्ष्मकं ध्रुवम् ।
गुह्यात् गुह्यतरं गुह्यं चक्षुर्नामेव तिष्ठति ॥

उपसंहारः—

नीवारपीतशूका च भ्रुवो ? प्यामात्रमध्यकम् ।
स ब्रह्म हरिरीशायुः भ्रुवो वृत्तस्वरक्षराद् ॥
ब्रह्म सूक्ष्मं रविं साक्षिं साक्षिसाक्षि निरञ्जनम् ।
रु(रो)मुखेन ज्ञातव्यं अनायुत्युपलक्ष्यते ? ॥

॥ इति राजराजेश्वरोपनिषत् ॥

प्रतिपाद्यविषयः—

भ्रूमध्यगतदृष्ट्या परमात्मसाक्षात्कारप्रकारविवरणमस्यामुपनिषदि दृश्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा दृश्यते । अमुद्रितेयमुपनिषत् ॥

No. 434 (1973/16).

रामतापन्युपनिषत् .

Rāmatāpanyupaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—195–211.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

चिन्मयेऽस्मिन् महाविष्णौ ज्ञाते दाशरथे हरौ ।
रघोः कुलेऽखिलं राति राजते यो महिस्थितः ॥
स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः ।
राक्षसा येन मरणं यान्ति स्वोद्रेकतोऽथवा ॥
रामनाम भुवि ख्यातमभिरामेण वा पुनः ।
राक्षसान्मर्त्यरूपेण राहुर्मनासिजं यथा ॥
प्रभाहीनांस्तथा कृत्वा राज्यार्हाणां महीभृताम् ।
धर्ममार्गे चारित्रेण ज्ञानमार्गे च नामतः ॥
तथा ध्यानेन वैराग्यमैश्वर्यं स्वस्य पूजनात् ।
तथा राज्यस्य रामाख्या भुवि स्यादथ तत्त्वतः ॥
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥

उपसंहारः—

तन्मन्त्रस्मरणादेव निश्शेषं तत् प्रणश्यति ।
तत्तद्गुरूपदिष्टेन वर्त्मनाऽनुष्ठितं च यत् ॥
रामात्मा मनुरेवायं पापराशिविनाशकृत् ।
आब्रह्मबीजदोषश्च नियमातिक्रमोद्भवाः ॥
स्त्रीणां च पुरुषाणां स्युर्मन्त्रेणानेन नाशिताः ।
येषु येष्वपि देशेषु रामभद्रमुपासते ॥
दुर्भिक्षादिभयान्येषु न भवन्ति कदाचन ।
शान्तः प्रसन्नवरद अक्रोधो भक्तवत्सलः ॥
अनेन सदृशो मन्त्रो जगत्स्वपि न विद्यते ।
सम्यगाराधितो रामः प्रसीदत्येव सत्वरम् ॥
ददात्यायुष्यमैश्वर्यमन्ते विष्णुपदं च यत् ॥

तदेतदृचाऽभ्युक्तम्—तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत् परमं पदम् ॥ स मुक्तो भवति स मुक्तो भवति । शं नो मित्रः–आवीद्वक्तारम् । ओं शान्तिः ३ ॥

॥ हरिः ओम् । रामोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

पूर्वोत्तरतापनीभेदेन द्विधा विभक्तेयमुपनिषत् । अत्र पूर्वतापन्यां—रामशब्दार्थः परं ब्रह्मेत्युक्त्वा तदुपासनोपयोगिमन्त्रमभिधाय रामाख्यबीजाज्जगदुत्पत्तिमभिवर्ण्य रामायणाख्येतिहासश्रवणफलान्युक्त्वा रामयन्त्रोद्धारक्रमश्च प्रतिपादितः । उत्तरतापन्यां—तारकशब्दनिर्वचनपूर्वकं तारकमन्त्रस्योपदेष्टारं स्थानं चाभिधाय तद्देवतानमस्कारमन्त्रकथनपूर्वकं तारकमन्त्रस्य माहात्म्यं फलं च निरूपितम् ॥

वक्तव्यविशेषः—

अस्मिन् कोशे रामपूर्वतापिनी उत्तरतापिनी च दृश्येते । अथर्वशाखान्तर्गतेयमिति मुद्रिता च ॥

No. 435 (667/3).

रामतापन्युपनिषत् .

Rāmatāpanyupaniṣat.

Substance—Palm-leaf.
Size—$7\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—26–55.
Lines on a page—6.
Letters in a line—24.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 434 कोशवत् .

उपसंहारः—

No. 434 कोशवत् .

प्रतिपाद्यविषयः—

No. 434 कोशवत् .

वक्तव्यविशेषः—

No. 434 कोशवत्.

No. 436 (C 248/1).

रामतापन्युपनिषत्.

Rāmatāpanyupaniṣat.

Substance—Paper.
Size—$6\frac{1}{2} \times 4\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—44.
Lines on a page—9.
Letters in a line—16.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 434 कोशवत्.

उपसंहारः—

No. 434 कोशवत्.

प्रतिपाद्यविषयः—

No. 434 कोशवत्.

वक्तव्यविशेषः—

कोशोऽस्मिन् अन्ते कृष्णयजुरथर्वोभयशाखयिशान्तिमन्त्रलेखनं दृश्यते ॥

No. 437 (1541).

रामतापन्युपनिषत्.

Rāmatāpanyupaniṣat.

Substance—Palm-leaf.
Size—$14 \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—17.

Lines on a page—6.

Letters in a line—46.

Age of Ms.—Old.

Condition of Ms.—The first eight leaves are worm-eaten and letters are missing here and there.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 434 कोशवत्.

उपसंहारः—

No. 434 कोशवत्.

प्रतिपाद्यविषयः—

No. 434 कोशवत्

वक्तव्यविशेषः—

अत्राद्यन्तयोः अथर्वशाखीयशान्तिमन्त्रो लिखितः ॥

No. 438 (B 492/1).

रामपूर्वतापन्युपनिषत्.

Rāmapūrvatāpanyupaniṣat.

Substance—Paper.

Size—8×6 inches.

Character—Āndhra.

Folios—57-65.

Lines on a page—11.

Letters in a line—22.

Age of Ms.—Modern.

Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 434 कोशवत्.

उपसंहारः—

एवंभूतं जगदाधारभूतं रामं वन्दे जगदानन्दरूपम् ।
गदारिशङ्खाब्जधरं भवारिं स यो ध्यायेन्मोक्षमाप्नोति सर्वः ॥
विश्वव्यापी राघवो यस्तदानीमन्तर्दधे शङ्खचक्रे गदाब्जे ।
धृत्वा रमासहितस्सायुधश्च संपत्तनस्सानुजस्सर्वलोके ॥
तद्भक्ता ये लब्धकामाश्च भुक्त्वा तथा पदं परमं यान्ति ते च ॥
इमा ऋचस्सर्वकामार्थदाश्च ये ते पठन्त्यमला यान्ति मोक्षम् ॥
चिन्मयेऽस्मिन्त्रयोदश । स्वभूर्ज्योतिस्तिस्रः । सीतारामावेका ।
जीववाचीषदृष्टिः । भूतादेकादश । पञ्चखण्डेषु त्रिणवतिः ॥
॥ इति श्रीरामपूर्वतापनीयोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

No. 434 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

अस्मिन् कोशे रामपूर्वतापनीमात्रं दृश्यते । अथर्वशाखीयशान्ति-मन्त्र आदौ लिखितो दृश्यते ॥

No. 439 (B 493/1).

रामरहस्योपनिषत्.

Rāmarahasyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—41–51.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥
सनकाद्या योगिवर्या अन्ये च ऋषयस्तथा ।
प्रह्लादाद्या विष्णुभक्ता हनूमन्तमथाब्रुवन् ॥
वायुपुत्र महाबाहो किं तत्त्वं ब्रह्मवादिनाम् ।
पुराणेष्वष्टादशसु स्मृतिष्वष्टादशस्वपि ॥
चतुर्वेदेषु शास्त्रेषु विद्यास्वाध्यात्मिकेऽपि च ।
सर्वेषु विद्यादानेषु विघ्नसूर्येशशक्तिषु ॥
एतेषु मध्ये किं तत्त्वं कथय त्वं महाबल ॥
हनुमान् होवाच—

उपसंहारः—

भरतं श्यामलं शान्तं रामसेवापरायणम् ।
धनुर्बाणधरं वीरं कैकेयीतनयं भजे ॥
शं बीजं तु समुद्धृत्य शत्रुघ्नाय नमोऽन्तकः ।
ऋष्यादयो यथापूर्वं विनियोगो विनिग्रहे ॥
द्विभुजं स्वर्णवर्णाभं रामसेवापरायणम् ।
लवणासुरहन्तारं सुमित्रातनयं भजे ॥
हं हनूमांश्चतुर्थ्यन्तहृदन्तो मन्त्रराजकः ।
रामचन्द्रऋषिः प्रोक्तो योजयेत् पूर्ववत् क्रमात् ॥
द्विभुजं स्वर्णवर्णाभं रामसेवापरायणम् ।
मौञ्जीकौपीनसहितं मां ध्यायेद्रामसेवकम् ॥ इति ॥

॥ इतिरामरहस्योपनिषदि द्वितीयोऽध्यायः ॥

प्रतिपाद्यविषयः—

अत्र श्रीरामचन्द्रस्य परब्रह्मत्वनिरूपणपूर्वकं तदुपासनोपयोगिनां श्रीरामद्व्यक्षरादिमन्त्राणां ऋषिच्छन्दोदेवतान्यासादिप्रदर्शनसहितं मन्त्रार्थं विचार्य रामयन्त्रोद्धारक्रममभिधाय एतन्मन्त्रजपमहिम्ना फलावाप्तिश्चेत्येतत्सर्वं हनुमता सनकादियोगिवर्येभ्यः प्रह्लादादिविष्णुभक्तेभ्यश्चाभिहितं दृश्यते ॥

वक्तव्याविशेषः—

अध्यायपञ्चकरूपायामस्यामुपनिषदि अध्यायद्वयमात्रमस्मिन् कोशे उपलभ्यते ॥ अथर्वशाखान्तर्गतेति मुद्रितेयमुपनिषत् ॥

No. 440 (B 913/7).

रुद्रहृदयोपनिषत्.

Rudrahridayopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Grantha.
Folios—53-55.
Lines on a page—15.
Letters in a line—22.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct
Complete or incomplete—Complete.

उपक्रमः—

सह नाववत्विति शान्तिः ॥—

प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह ।
को देवस्सर्वदेवेषु कस्मिन् देवाश्च सर्वशः ॥
कस्य शि(शु)श्रूषणात् नित्यं प्रीता देवा भवन्ति मे ।
तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकम् ॥

श्रीवेदव्यास उवाच—

सर्वदेवात्मको रुद्रस्सर्वे देवाश्शिवात्मकाः ।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः ॥

उपसंहारः—

स्वशरीरे स्वयंज्योतिस्स्वरूपं सर्वसाक्षिणम् ।
क्षीणदोषाः प्रपश्यन्ति नेतरे मायया ऽऽवृताः ॥
एवंरूपपरिज्ञानं यस्यास्ति परयोगिनः ।
कुत्रचित् गमनं नास्ति तस्य पूर्णस्वरूपिणः ॥

आकाशमेकं संपूर्णं कुत्रचिन्नैव गच्छति ।
स यो ह वैतत्परमं ब्रह्म यो वेद वै मुनिः ॥
ब्रह्मैव भवति स्वस्थस्सच्चिदानन्दमात्रकः ।
इत्युपनिषत् । सह नाववत्विति शान्तिः ॥
॥ इति रुद्रहृदयोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

शुकव्यासप्रश्नोत्तररूपतया परिदृश्यमानायामस्यामुपनिषदि रुद्रस्य सर्वदेवतात्मकत्वाभिधानपूर्वकं तन्नमस्कारमन्त्रान् प्रकाश्य परापरविद्यानिर्देशपूर्वकं ब्रह्मज्ञानं प्रशस्य तत्फलं चाभिहितं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् इयमुपनिषत्समग्रा दृश्यते । कृष्णयजुश्शाखान्तर्गतेति मुद्रिता च ॥

No. 441 (B 494/1).

रुद्रहृदयोपनिषत्.

Rudrahridayopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—5.
Lines on a page—13.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 440 कोशवत्.

उपसंहारः—

No. 440 कोशवत्.

प्रतिपाद्यविषयः—

No. 440 कोशवत्.

वक्तव्यविशेषः—

No. 440 कोशवत्.

No. 442 (1973/29).

रुद्राक्षजाबालोपनिषत् (बृहज्जाबालोत्तरतापनीयोपनिषत्).

Rudrākṣajābālopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—265–269.
Lines on a page—5½.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

अथ हैनं भगवन्तं कालाग्निरुद्रं भुसुण्डः पप्रच्छ । कथं रुद्राक्षोत्पत्तिः । तद्धारणात् किं फलमिति । तꣳहोवाच भगवान् कालाग्निरुद्रः । त्रिपुरवधाय पुरोन्मीलिताक्षोऽहम् । तेभ्यो जलबिन्दवो भूमौ पतिताः । ते रुद्राक्षा जाताः सर्वानुग्रहार्थाय । तेषां नामोच्चारणेन दशगोप्रदानफलं । दर्शनस्पर्शनाभ्यां द्विगुणं त्रिगुणं फलं वदन्ति । अत ऊर्ध्वं वक्तुं न शक्नोमि ॥ इत्यादि No. 368 कोशवत् ॥

उपसंहारः—

अथ कालाग्निरुद्रः प्रोवाच —योगध्यानानां शिव एको ध्येयश्शिवंकरः सर्वमन्यत्परित्यज्य एतामधीत्य ब्राह्मणो वा क्षत्रियो वा गर्भवासान्मुच्यते गर्भवासान्मुच्यत इति सत्यं सत्यम् । अथ कालाग्निरुद्र उवाच । सकृज्जप्त्वैव शुचिः पूतः कर्मण्यो भवति । द्वितीयं जप्त्वा

गाणपत्यमवाप्नोति । तृतीयं जप्त्वा देवदेवमेव प्रविशतीत्यों सत्यमों सत्यमोमित्युपनिषत् ॥

॥ इति बृहज्जाबालोपनिषत् समाप्ता ॥

॥ इत्यष्टमं ब्राह्मणम् ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि रुद्राक्षाणामुत्पत्तिः, तत्स्वरूपं, तल्लक्षणानि, तन्मुखानि, तद्गृहणक्रमः, तद्धारणमन्त्राः, तद्दर्शनस्पर्शनफलानि, तद्धारणस्थानानि, धार्यसङ्ख्या, धारणकालाः इत्यादिकं सर्वमभिहितं No. 368 कोशवत् दृश्यते ॥

वक्तव्याविशेषः—

No. 368 कोशवत्.

No. 443 (B 495/1).

रुद्राक्षजाबालोपनिषत् (बृहज्जाबालोत्तरतापनीयोपनिषत्).

Rudrākṣajābālopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—6.
Lines on a page—13.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 442 कोशवत्.

उपसंहारः—

य इमामुपनिषदं ब्राह्मणस्सायमधीयानो दिवसकृतं पापं नाशयति। मध्याह्नेऽधीयानः षड्जन्मकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानोऽनेकजन्मकृतं पापं नाशयति । षट्सहस्रलक्षगायत्रीजपफलमवाप्नोति ।

ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुदारुगमनतत्संयोगपातकेभ्यः पूतो भवति। सवतीर्थफलमश्नुते। पतितसंभाषणात्पूतो भवति। पङ्क्तिशतसहस्रपावनो भवति। शिवसायुज्यमवाप्नोति। न च पुनरावर्तते न च पुनरावर्तत इत्यों सत्यम्॥

॥ रुद्राक्षजाबालोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

No. 442 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत् मुद्रितरुद्राक्षजाबालोपनिषत्सदृक्षैव दृश्यते॥

No. 444 (667/1).

* रुद्राक्षोपनिषत्.

* Rudrākṣopaniṣat.

Substance—Palm-leaf.
Size—$7\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folio—22nd.
Lines on a page—6.
Letters in a line- -24.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Subject in brief:—

This Upaniṣat briefly describes how Rudrākṣa came into being besides indicating the greatness of its being worn on one's body.

उपक्रमः—

हरिः ओम्। अथ कुमारो भगवन्तं परमेश्वरं पप्रच्छ। अधीहि भगवन्! कथं रुद्राक्षोत्पत्तिः। रुद्र उवाच—पुरा त्रिपुरदाहे निमीलिताक्षोऽहम्। तेभ्यो जलबिन्दवो भूमौ पतिताः। ते रुद्राक्षा जाताः॥

उपसंहारः—

तेषां स्मरणमात्रेण दशदानसहस्रगोदानफलं लभते। धारणेन शिवेन सह मोदते। तद्धारणेन ब्रह्मगोघ्नसुरापानस्वर्णस्तेयगुरुतल्प-

गमनात्पूतो भवति । ओम्, ईशानस्सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवोम् अस्तु सदाशिवोम् ॥

प्रतिपाद्यविषयः—

कुमारपरमेश्वरप्रश्नोत्तररूपायामस्यामुपनिषदि रुद्राक्षोत्पत्तिक्रममभिधाय तद्धारणादिमहिमा संगृह्यते ॥

वक्तव्यविशेषः—

अमुद्रितेयमुपनिषदस्मिन् कोशे दृश्यते । आदौ न कोऽपि शान्तिमन्त्रो लिखितः ॥

No. 445 (B 496/1).

वज्रसूच्युपनिषत्.

Vajrasūcyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—57–59.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

आप्यायन्त्विति शान्तिः ॥—

वज्रसूचिं प्रवक्ष्यामि शास्त्रमज्ञानभेदनम् ।
दूषणं ज्ञानहीनानां भूषणं ज्ञानचक्षुषाम् ॥

ब्राह्मणक्षत्रियवैश्यशूद्रा इति चत्वारो वर्णाः । तेषां वर्णानां ब्राह्मण एव प्रधान इति वेदवचनानुरूपस्मृतिभिरप्युक्तम् । तत्र चोद्यमस्ति । को वा ब्राह्मणो नाम । किं जीवः ? किं देहः ? किं जातिः ? किं ज्ञानम् ? किं कर्म ? किं धार्मिकः ? किं वर्णः ? किं पाण्डित्यम् ? इत्यष्टौ प्रश्नाः ॥

उपसंहारः—

अखण्डानन्दस्वभावप्रमेयमनुभवैकवेद्यमपरोक्षतया भासमानं करतलामलकवत् साक्षादपरोक्षीकृत्य कृतार्थतया कामरागादिदोषरहितः शमदमादिसम्पन्नो लोभमद[1]मात्सर्यतृष्णाशामोहादिरहितः [2]षडङ्काहङ्कारादिभिरस्पृष्टो वेत्ता वर्तते । एवमुक्तलक्षणो यस्स एव ब्राह्मण इति श्रुतिस्मृतीतिहासपुराणानामभिप्रायः । अन्यथा ब्राह्मणत्वसिद्धिर्नास्त्येव । सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेत् आत्मानं सच्चिदानन्दं ब्रह्म भावयेदित्युपनिषत् ॥

॥ वज्रसूच्युपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि किं ब्राह्मण्यं जीववृत्ति उत देहगतं आहोस्विज्जातिरूपं किं वा ज्ञानरूपमथवा कर्मरूपमपिवा धर्मरूपमिति विकल्प्य एतत्सर्वपक्षनिरासपूर्वकं तत्स्वरूपं सम्यग्विविच्य प्रदर्शितं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् इयमुपनिषत् समग्रा, सामशाखीयेति मुद्रिता च दृश्यते ॥

No. 446 (B 927/3).

* वराहोपनिषत् (ऊर्ध्वपुण्ड्रोपनिषत्).

* Varāhopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—17–18.
Lines on a page—16.
Letters in a line—24.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

[1] मदभावमात्सर्य. [2] 'डम्भाहंकारादिभिरसंस्पृष्टचेता वर्तते' इति मुद्रितकोशे पाठः.

Subject in brief :—

In this Upaniṣat, Lord Viṣṇu, in the form of the great Pig (Varāhāvatāra), relates to the sage Sanatkumāra, the method and the greatness of wearing the Ūrdhvapuṇḍra. Another Upaniṣat called Ūrdhvapuṇḍropaniṣat seems to be identical with this Upaniṣat, since both of them contain the same matter written in the same order. There is, however, one more Varāhopaniṣat entirely different from this Upaniṣat.

उपक्रमः—

'अथ श्रीवराहरूपिणं भगवन्तं प्रणम्य सनत्कुमारः पप्रच्छ। अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिं, किं द्रव्यं कियत्स्थानं का रेखाः को मन्त्रः किं फलमिति च। श्रीवराह उवाच—क्षीराब्धितः श्वेतद्वीपे क्षीरखण्डानानीय सटाभिर्विधृता(रळा श्वेतमृत्तिकाख्या मुक्तिसाधिका भवति। विष्णुपत्नीमहं देवीमिति श्वेतमृत्तिकां नमस्कृत्य ओमिति हस्तेनोद्धृत्य 'अश्वक्रान्ते रथक्रान्त' इत्येताभिः प्रार्थयेत्' इत्यादि No. 227 कोशवत्॥

उपसंहारः—

स च पुनराह केशवादिद्वादशनामाभिमरूर्ध्वपुण्ड्रान्मूर्दैव करोतीति। यो वेदवित् ब्रह्मचारी गृहस्थो यतिश्च सर्वेभ्यो देवेभ्यो मुक्तो भवति सर्वेषु तीर्थेषु स्नातो भवति। सर्वैः देवैर्ज्ञातो भवति। अश्रोत्रियश्श्रोत्रियो भवति। अनुपनीतश्चोपनीतो भवति। आचक्षुसां पङ्क्तिं पुनाति। न च पुनरावर्तते इति त्रिरित्याह भगवान् वराहरूपी। य एवं वेदेत्युपनिषत्॥ ७॥ इति No. 227 कोशवत्॥

इति वराहोपनिषत् समाप्ता॥

प्रतिपाद्यविषयः—

अत्र ऊर्ध्वपुण्ड्रधारणविधिः ऊर्ध्वपुण्ड्रधारणप्राशस्त्यं च सनत्कुमाराय वराहरूपिणा भगवतोपदिष्टं दृश्यते॥

वक्तव्यविशेषः—

अमुद्रिता चेयमुपनिषत् अस्मिन् कोशे समग्रा दृश्यते। अस्या एवोपनिषद ऊर्ध्वपुण्ड्रविषयकत्वाद्वराहरूपभगवदुपदिष्टत्वाच्च ऊर्ध्वपुण्ड्रोपनिषत् वराहोपनिषदिति नामधेयद्वयं स्यादिति संभाव्यते। अत एवानयोर्विभिन्नाभिधानयोरप्यानुपूर्व्यैक्यं परिदृश्यते। वराहोपनिषन्नाम्नी इतो विभिन्नाऽन्याप्युपनिषदुपलभ्यते॥

No. 447 (C 1512/2).

वराहोपनिषत्.

Varāhopaniṣat.

Substance—Paper.
Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches.
Character—Āndhra.
Folios—3–12.
Lines on a page—14.
Letters in a line—38.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

सह नाववत्विति शान्तिः—

अथ ऋभुर्वै महामुनिः देवमानेन द्वादशवत्सरं तपश्चचार। तदवसाने वराहरूपी भगवान् प्रादुरभूत्। स होवाच—उत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति। सोदतिष्ठत्तस्मै नमस्कृत्योवाच—भगवन् कामिभिर्यद्यत्कामितं तत्तत् त्वत्सकाशात् स्वप्नेऽपि न याचे। समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजालानि ब्रह्मादयः सुरास्सर्वे त्वद्रूपज्ञानात् मुक्तिमाहुः। अतस्त्वद्रूपप्रतिपादिकां ब्रह्मविद्यां ब्रूहीति॥

उपसंहारः—

यत्र तिष्ठति सा प्रोक्ता घटाख्या भूमिका बुधैः।
न सजीवो न निर्जीवः कायं तिष्ठति निश्चलम्॥

यत्र वायुस्स्थिरः खे स्यात् सेयं प्रचयभूमिका ।
यत्रात्मना सृष्टिलयौ जीवन्मुक्तिदशां गतः ॥
सहजः कुरुते योगं सेयं निष्पत्तिभूमिका ।

इति । एतदुपनिषदं योऽधीते सोऽग्निपूतो भवति । स वायुपूतो भवति । सुरापानात्पूतो भवति । स्वर्णस्तेयात्पूतो भवति । स जीवन्मुक्तो भवति । तदेतदृचाऽभ्युक्तम् । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदमित्युपनिषत् ॥

॥ वराहोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

प्रथमेऽध्याये—चतुर्विंशतितत्त्वानां, षट्त्रिंशत्तत्त्वानां षण्णवतितत्त्वानां च विवरणं कृतम् ॥

द्वितीयतृतीयाध्याययोः—ब्रह्मविद्या विचारिता ॥

चतुर्थेऽध्याये—योगसप्तभूमिकास्वरूपं विस्तरेण विचार्य जीवन्मुक्तलक्षणं कथितम् । तथा शुकमार्गः वामदेवमार्गश्च प्रतिपादितः ॥

पञ्चमेऽध्याये—सांगो योगः तदभ्यासविधिश्च सविस्तरं निरूपितः । अभ्यस्तयोगस्य फलं च कथितम् । एतदुपनिषत्पाठकस्य फलं चान्ते निरूपितम् ॥

वक्तव्यविशेषः—

पञ्चाध्याय्यात्मिका इयमुपनिषत् समग्राऽस्मिन् कोशे दृश्यते, कृष्णयजुश्शाखान्तर्गतेति मुद्रिता च ॥

No. 448 (3581/6).

वासुदेवोपनिषत्.

Vāsudevopaniṣat.

Substance—Palm-leaf. | Character—Āndhra.
Size—20 × 2¼ inches. | Folio—22nd.

Lines on a page—14.
Letters in a line—94.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

'भद्रं कर्णेभिरिति शान्तिः—

नमस्कृत्य भगवान्नारदः सर्वेश्वरं वासुदेवं पप्रच्छ । अधीहि भगवन्! ऊर्ध्वपुण्ड्रविधिं द्रव्यमन्त्रस्थानादिसहितं मे ब्रूहीति । तं होवाच भगवान् वासुदेवः । वैकुण्ठस्थानादुद्भूतं मम प्रीतिकरं मद्भक्तैर्ब्राह्मणादिभिर्धारितं' इत्यादि No. 228 कोशवत्.

उपसंहारः—

नारायणे मय्यचञ्चला भक्तिर्भवति । स सम्यज्ज्ञानं लब्ध्वा विष्णुसायुज्यमवाप्नुयात् । न च पुनरावर्तते न च पुनरावर्तत इत्याह भगवान् वासुदेवः । यस्त्वेतद्वाऽधीते सोऽप्येवमेव भवतीत्यों सत्यम् ॥

॥ श्रीवासुदेवोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

नारदवासुदेवप्रश्नोत्तररूपायामस्यामुपनिषदि गोपीचन्दनेनोर्ध्वपुण्ड्रधारणक्रमस्समन्त्रकोऽभिधीयते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत्समग्रा दृश्यते । इयं च सामशाखान्तर्गतेति मुद्रितकोशे दृश्यते । अत्र तु अथर्वशाखीयशान्तिमन्त्रलेखनमादौ दृश्यते । एतत्समाननामधेया इतो विलक्षणानुपूर्वीका संगृहीताऽन्याऽप्युपनिषद्दृश्यते ॥

No. 449 (B. 498/1).

वासुदेवोपनिषत्.

Vāsudevopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—5.

Lines on a page—11.

Letters in a line—16.

Age of Ms.—Modern.

Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 448 **कोशवत्**.

उपसंहारः—

No. 448 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 448 **कोशवत्**.

वक्तव्यविशेषः—

No. 448 **कोशवत्**.

No. 450 (1682/14).

वासुदेवोपनिषत्.

Vāsudevopaniṣat.

Substance—Palm-leaf.

Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.

Character—Grantha.

Folios—4–6.

Lines on a page—9.

Letters in a line—48.

Age of Ms.—Old.

Condition of Ms.—Worm-eaten.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 448 **कोशवत्**.

उपसंहारः—

No. 448 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 448 **कोशवत्**.

वक्तव्यविशेषः—

No. 448 **कोशवत्**.

No. 451 (C 461/2).

* वासुदेवोपनिषत्.

* Vāsudevopaniṣat.

Substance—Paper.
Size—6 × 4 inches.
Character—Nāgarī.
Folios—373-376.
Lines on a page—7.

Letters in a line—19.
Time of writing Old.
Condition of Ms. Good.
Correct or incorrect Correct.
Complete or incomplete Complete.

Subject in brief :—

This Upaniṣat relates, in the form of a dialogue between Vāsudeva and the sage Āśwalāyana, the greatness and the method of besmearing the body with Gopicandana accompanied by appropriate mantras. Though the subject matter is the same, there seems to be a change in the arrangement between this Upaniṣat and the preceding printed Upaniṣats of the same name.

उपक्रमः—

हरिः ओम् । भद्रं कर्णेभिः—बृहस्पतिर्धातु । शान्तिश्शान्तिश्शान्तिः । हरिः ओम् । अथाश्वलायनो भगवन्तं परमेष्ठिनं परिपप्रच्छ-

वाच । अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिम् । द्रव्यमन्त्रस्थानादिसहितं मे ब्रूहीति । तꣳ होवाच भगवान् वासुदेवः । वैकुण्ठस्थानोद्भवं मम प्रीतिकरम् ॥

उपसंहारः—

श्रीधरं बाहुके वामे हृषीकेशं तु कन्धरे ।
पृष्ठे तु पद्मनाभं (भः) स्यात् ककुद्दामोदरं न्यसेत् ।
एतानि द्वादश नामानि वासुदेवस्य मूर्धनि ॥
दण्डाकारो ललाटे तु पद्माकारं तु वक्षसि ।
वेणुपत्राकृतिर्बाह्वोः अन्ये दीपाकृतीन्न्यसेत् ॥

॥ इति वासुदेवोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

आश्वलायनवासुदेवप्रश्नोत्तररूपायामस्यामुपनिषदि गोपीचन्दनस्थानमहिमादिनिरूपणसहितं समन्त्रकतद्धारणप्रकारः प्रतिपाद्यते ॥

वक्तव्याविशेषः—

मुद्रितकोशे लिखितकोशान्तरेषु च परिदृश्यमानवासुदेवोपनिषदोऽत्र दृश्यमानोपनिषदश्च सत्यपि नामधेयैक्ये आनुपूर्वीवैलक्षण्यं बहुशो दृश्यते । उभयोरेकविषयकत्वेन अत्र दृश्यमाना संग्रहरूपेति ज्ञायते । मुद्रितकोशलिखितकोशान्तरेषु दृश्यमानास्त्वितो विभिन्नानुपूर्वीबहुला विस्तृता सामशाखीयेति दृश्यते । अत्र त्वादौ अथर्वशाखीयशान्तिमन्त्रो मध्ये च कृष्णयजुश्शाखीयशान्तिमन्त्रश्च लिखितो दृश्यते । अमुद्रितेयमुपनिषत् ॥

No. 452 (B 309/2).

*वासुदेवोपनिषत्.

* Vāsudevopaniṣat.

Substance—Paper. | Character—Āndhra.
Size—8 × 6 inches. | Folios—2.

Lines on a page—16.
Letters in a line—17.
Age of Ms.—Appears to be modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat entirely differs from the Upaniṣats mentioned above. It briefly states the wonderful deeds of Śeṣa, the mythological thousand-headed Serpent, when he incarnated himself as Saumitri, Rouhiṇeya, etc., in the four Yugas and relates how salvation can be acquired by worshipping the Great Śeṣa.

उपक्रमः—

ओम्। शेषो ह वै वासुदेवात् सङ्कर्षणो जीवो नाम आसीत्। सोऽकामयत, प्रजाः सृजेयेति। ततः प्रद्युम्नसंज्ञं मन आसीत्। तस्माद-हंकारणमनिरुद्धः, ततो हिरण्यगर्भोऽजायत। तस्माद्दश प्रजापतयो मरीच्याद्याः स्थाणुदक्षकर्दमप्रियव्रतोत्तानपादवायवो? प्रजायन्ते। तेभ्यः सर्वाणि भूतानि च। तस्माच्छेषादेव सर्वाणि समुत्पद्यन्ते॥

उपसंहारः—

वैष्णवान् स्वधर्मान् विजृम्भयन् सर्वानपि पाषण्डान्निजघान। स एव भगवदन्तर्यामी स एष सर्वात्मकः स एष मुमुक्षुभिर्ध्येयः स एष मोक्षप्रदः। तमेवं स्मृत्वा सर्वेभ्यः पाप्मभ्यो मुच्यते। तन्नाम सङ्कीर्तयन् विष्णुसायुज्यं गच्छति। तदेतद्दिवाऽधीयानो रात्रिकृतं पापं नाशयति। तदेतन्नक्तमधीयानो दिवसकृतं पापं नाशयति। तदेतद्वेदानां रहस्यम्। तदेतदुपनिषदां रहस्यम्। तदेतदधीयानस्सर्वक्रतुफलं लभते। शान्ति-मेति। मनश्शुद्धिमेति। सर्वतीर्थफलं लभते। य एवं वेदेत्युपनिषत्॥

॥ इति वासुदेवोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि सौमित्रिरिति, रौहिणेय इति, वैष्णवानां गुरुरिति च नाम्ना युगभेदेन भूमौ कृतावतरणस्य शेषस्य तत्तदवतारकालिका-

साधारणकर्माणि संग्रहेण प्रतिपाद्य तस्यैवोपास्यत्वं तदनुग्रहान्मोक्षसिद्धिं चाभिधाय एतदुपनिषत्पाठकस्य फलं च संग्रहेणाभिहितम् ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा दृश्यते । मुद्रितकोशे लिखितकोशे च परिदृश्यमानवासुदेवोपनिषद्विलक्षणेयमुपनिषत् ॥

No. 453 (B 913/5).

* वृद्धजाबालोपनिषत्.

Vriddhajābālopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Grantha.
Folios—44–49.
Lines on a page—15.
Letters in a line—22.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—In complete.

Subject in brief :—

This Upaniṣat describes the thirty-six tattwas beginning with Śiva and states the greatness as well as the method and fruits of wearing Rudrākṣa and Bhasma on one's body.

उपक्रमः—

स पुनस्तं होवाच । कानि षट्त्रिंशत्तत्त्वानीति । स तस्मा आह । शिवशक्तिसदाशिव ईश्वर शुद्धविद्येतानि ? शुद्धानि पञ्च तत्त्वानि । माया कालो नियतिकलाविद्यारागाः पुरुष इति शुद्धाशुद्धानि सप्त तत्त्वानि । ततः प्रकृतिः प्रकृतेर्गुणत्रयं, गुणत्रयान्नामरूपक्रियास्पन्दाः, परस्परभिन्ना धरण्यादीनि श ? तत्त्वानि ॥

उपसंहारः—

एनामुपनिषदं जाबालिकः पैप्पलादायोपदिदेश । पैप्पलादः पैटीनसाय पैटीनसः शाङ्गरवाय शाङ्गरव ऋषिभ्यस्सर्वेभ्यः । य एनां वृद्ध-

जाबालोपनिषदमधीते स सर्ववेदाध्ययनफलवान् भवति। स सर्वक्रतुफलवान् भवति। स सर्वस्तु(त)स्तापी भवति। य एनां वृद्धजाबालोपनिषदं धत्ते स शिवधारी भवति, भस्मरुद्राक्षधारी भवति। य एनां वृद्धजाबालोन्नि(पनि)षदमर्चयति स सर्वदेवार्चको भवति। स शिवार्चको भवति। स सर्वपापविनिर्मुक्तो भवति। शिवस्वरूपमेति शिवस्वरूपमेतीति॥

॥ वृद्धजाबालोपनिषत्समाप्ता ॥ भद्रं कर्णेभिरिति शान्तिः॥

प्रतिपाद्यविषयः—

अत्र षट्त्रिंशत्तत्त्वविचारपूर्वकं शिवतत्त्वं निर्धारितम्। भस्मरुद्राक्षयोर्महिमा, तद्धारणविधिः, तद्धारणे फलादि च प्रतिपादितम्। उपनिषत्पाठकस्य फलं चान्तेऽभिहितम्॥

वक्तव्यविशेषः—

आदावेकं पत्रं न दृश्यते। अतः कोशेऽस्मिन्नुपनिषदादिभागो लुप्तः। असुद्रिता चेयमुपनिषत्॥

No. 454 (B 124/10).

* वेदान्तसारोपनिषत्.

* Vedāntasāropaniṣat.

Substance—Paper.
Size—$7\frac{3}{4} \times 6$ inches.
Character—Kannada.
Folios—47–53.
Lines on a page—12.
Letters in a line—18.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat is in the form of a dialogue between the sage Āśwalāyana and the sage Yāgñavalkya. It states the

greatness and the method of pondering over Śiva and how Śiva is all pervading. It also relates the manner of wearing Liñga—the symbol of Śiva—on one's body and what exactly is meant by a unity between Liñga and Añga, etc.

उपक्रमः—

ओं शं नो मित्र इति शान्तिः ॥

अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच । विमुक्तं सद्यो-मुक्तिकरं ब्रूहीति । स होवाच याज्ञवल्क्यः । परमेष्ठी शिवोऽद्वैतश्चतुर्थः शान्तस्स एव ध्येयः । स एव पूज्यः । तद्ध्यानपूजनादविमुक्ता भवन्ति । अयं विशेषोऽत्याश्रमिणः । साक्षादमृती भूत्वा मोक्षी भवति ।

न कर्मणा न प्रजया धनेन शिवं पूज्यामृतत्वमाप्नुयुः ।
परेण शुद्धेन हृदब्जमध्ये लिङ्गं धृत्वा ज्योतिषे संविशन्ति ॥

उपसंहारः—

एतद्दृष्ट्वा परमेष्ठी हृदयस्थलिङ्गं विलोक्य तत्रैव पश्यन् चिदचित्प्रपञ्चं जगज्जालं पाशबन्धान्निवृत्ता? तत्रैवान्तरधीयत । ततो देवाः परमेष्ठिनं नापश्यन् । सर्वे देवास्सनकाद्याश्च ऋषयः शान्ता दान्ता वटमूलनिवासिनं ज्ञानगुरुमुपजग्मतुः? । यो देवानां प्रथमं पुरस्तात् विश्वाधिको रुद्रो महर्षिः । तान् देवान् ब्रह्मऋषींश्च सर्वान् कृतकृत्याश्चरन्ति ॥

वेदान्तसारसर्वस्वं यो जानाति स ईश्वरः । व्याचरति सर्वेशः साम्बमूर्तिस्सनातनः ॥ इत्यौं सत्यो(सत्यमो)मित्युपनिषत् ॥

॥ वेदान्तसारोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

आश्वलायनयाज्ञवल्क्ययोर्विभिन्नशाखाप्रवक्त्रोः प्रश्नोत्तररूपायामस्यामुपनिषदि—शिवोपासनामहिमा प्रतिपादितः । शिवस्य सर्वात्मकत्वं कथितम् । शरीरे लिङ्गधारणं निरूप्य लिङ्गाङ्गसामरस्यं तत्फलं च निर्णीतम् । लिङ्गधारणप्रदेशाश्च निरूपिताः । शिवस्य अनेकधा उपासनाक्रमश्च कथितः ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत्समग्रा दृश्यते, अमुद्रिता च ।

No. 455 (3581/27).

वैतथ्योपनिषत्.

Vaitathyopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—33.
Lines on a page—13.
Letters in a line—96.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः—
वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः ।
अन्तस्स्थानां तु भेदानां (भावानां) संवृतत्वेन हेतुना ॥
अदीर्घत्वात्तु कालस्य गत्वा देशान्न पश्यति ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन् देशे न विद्यते ॥
अभावश्च रथादीनां श्रूयते न्यायपूर्वकम् ।
वैतथ्यं तेन वै प्राप्तं स्वप्न आहुः प्रकाशितम् ॥

उपसंहारः—

वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।
निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥
तस्मादेनं(वं) विदित्वैनमद्वैते योजयेत् स्मृतिम् ।
अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत् ॥
न स्तुतिर्न नमस्कारो न स्वधाकार एव च ।
चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥
तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।

तत्त्वभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥
तत्त्वादप्रच्युतो भवेदिति ।
इति द्वितीयं वैतथ्याख्यं प्रकरणमुपनिषच्च ॥

प्रतिपाद्यविषयः—

स्वाप्नभावदृष्टान्तेन जाग्रत्कालिकभावानामपि कल्पितत्वनिर्णयपूर्वकं सर्वकल्पनानामपि जीवकल्पनैव मूलमिति निर्धारितम् । सर्वोऽयं लौकिको वैदिकश्च व्यवहारोऽविद्याविषय एवेति प्रमाणयुक्तिभ्यां द्वैतमिथ्यात्वं निर्णीय अद्वैतमेव पारमार्थिकमिति सिद्धान्तितम् ॥

वक्तव्यविशेषः—

श्रीगौडपादाचार्यप्रणीता माण्डूक्योपनिषदर्थाविष्करणपराः श्लोका भाष्यकारैः श्रीशङ्कराचार्यैर्व्याख्याताः । तेषु प्रकरणचतुष्टयम्—आगमप्रकरणं वैतथ्यप्रकरणं अद्वैतप्रकरणं अलातशान्तिप्रकरणमिति । तत्र द्वितीयं वैतथ्यप्रकरणमेव वैतथ्योपनिषदिति अस्मिन् कोशे लिखितं दृश्यते ॥

No. 456 (B 499/1).

शरभोपनिषत् (पिप्पलोपनिषत्).

Śarabhopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—5.
Lines on a page—12.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥

'अथ हैनं पैप्पलादो ब्रह्माणमुवाच । भो भो भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वाऽधिकतरो ध्येयश्च । तत्त्वमेव नो ब्रूहीति, इत्यादि No. 355 कोशवत् ॥

उपसंहारः—

स सर्वान् वेदानधीतो भवति । स सर्वान् देवान् ध्यातो भवति । स समस्तमहापातकात्पूतो भवति । तस्मादविमुक्तमाश्रितो भवति । सततं शिवप्रियो भवति । स शिवसायुज्यमेति । न स पुनरावर्तते न स पुनरावर्तते । ब्रह्मैव भवतीत्याह भगवान् ब्रह्मेत्युपनिषत् ॥

॥ शरभोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

No. 355 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

अस्या उपनिषदः पिप्पलोपनिषदिति नामान्तरं दृश्यते । अन्ते चैतदुपनिषत्पठनफलकथनभागे परं No. 355 कोशापेक्षया वैलक्षण्यं किंचिद्दृश्यते । मुद्रिता चेयमुपनिषत् ॥

No. 457 (4136/2).

शाण्डिल्योपनिषत्.

Śāṇḍilyopaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—8-13.
Lines on a page—15.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः । शाण्डिल्यो ह वा अथर्वाणं पप्रच्छात्मलाभोपायभूतमष्टाङ्गयोगमनुब्रूहीति । स होवाचाथर्वा । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि । तत्र दश यमाः । तथा नियमाः । आसनान्यष्टौ । त्रिः प्राणायामः । (त्रयः प्राणायामाः) । पञ्च प्रत्याहाराः (राः) । तथा धारणाः । द्विः प्रकारं ध्यानं । समाधिस्त्वेकरूपः ॥

उपसंहारः—

अथ कस्मादुच्यते महेश्वर इति । यस्मान्महत ईशशब्दध्वन्यात्मशक्त्या तस्मादुच्यते महेश्वर इति । अथ योऽस्य निरुक्तानि वेद स एवं वेद । अथ यो ह वै विध्यैनं(देनं) परमुपास्ते सोऽहमिति । स ब्रह्मविद्भवति ॥

एवं यस्सततं ध्यायेत् देवदेवं सनातनम् ।
स मुक्तस्सर्वपापेभ्यो निश्रेयसमवाप्नुयात् ॥
इत्यों सत्यमित्युपनिषत् । तृतीयोध्यायः । भद्रं कर्णेभिरिति शान्तिः ॥
॥ इति शाण्डिल्योपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

शाण्डिल्याथर्वप्रश्नोत्तररूपायामध्यायत्रितयविभक्तायामस्यामुपनिषदि प्रथमेऽध्याये—योगाङ्गभूतयमादीनां देहनाड्यादीनां च भेदस्वरूपविवेचनपूर्वकं नाडीशुद्धिक्रमं प्रकाश्य प्राणायामप्रकाराश्निरूप्य वैष्णवीखेचर्यादिमुद्राभेदानुपपाद्य रोगनिवृत्तिसकललोकज्ञानादिसिद्धयस्तत्फलभूताश्च प्रतिपाद्यन्ते ।

द्वितीयेऽध्याये—योगफलभूतं प्रधानं ब्रह्मज्ञानमिति संसूच्य ब्रह्मस्वरूपं संगृह्याभिहितम् ॥

तृतीयेऽध्याये—सकलनिष्कलसकलनिष्कलभेदेन त्रिरूपाद्ब्रह्मणः प्रपञ्चाविर्भावप्रकारस्संग्रहेणाभिवर्णितः ॥

वक्तव्यविशेषः—

अध्यायत्रितयात्मिका इयमुपनिषत् समग्रा अस्मिन् कोशे दृश्यते । मुद्रितकोशे दत्तात्रेयध्यानपराणि कानिचित् वाक्यान्यधिकानि दृश्यन्ते ॥

No. 458 (B 501/1).

शाण्डिल्योपनिषत्.

Śāṇḍilyopaniṣat.

Substance—Paper.	Character—Andhra.
Size—8 × 6 inches.	Folios—22.

Lines on a page—12.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 457 **कोशवत्**.

उपसंहारः—

No. 457 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 457 **कोशवत्**.

वक्तव्यविशेषः—

No. 457 **कोशवत्**.

No. 459 (B 500/1).

शाट्यायनीयोपनिषत्.

Śāṭyāyanīyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—6.
Lines on a page—12.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं पूर्णमद इति शान्तिः ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्तयै निर्विषयं स्मृतम् ॥

समासक्तं यदा चित्तं जन्तोर्विषयगोचरे ।
यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बन्धनात् ॥
चित्तमेव हि संसारः तत्प्रयत्नेन शोधयेत् ।
यच्चित्तस्तन्मयो भवति गुह्यमेतत्सनातनम् ॥
नावेदविन्मनुते तं बृहन्तं नाब्रह्मावित्परमं प्रैति धाम ।
विष्णुक्रान्तं वासुदेवं विजानन् विप्रो विप्रत्वं गच्छते तत्तुदर्शी ॥

उपसंहारः—

तदेतदृचाऽभ्युक्तम् ॥
विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि ।
असूयकायानृजवे शठाय मा मा ब्रूयाद्वीर्यवती तथा स्याम् ॥
यमेव विद्याश्रुतमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
अस्मा इमामुपसन्नाय सम्यक्परीक्ष्य दद्याद्वैष्णवीमात्मनिष्ठाम् ॥
अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।
यथैव तेन न गुरुर्भोजनीयस्तथैव चान्नं न भुनक्ति श्रुतं तत् ॥
गुरुरेव परो धर्मो गुरुरेव परा गतिः ।
एकाक्षरप्रदातारं यो गुरुं नाभिनन्दति ॥
तस्य श्रुतं तपो ज्ञानं स्रवत्यामघटाम्बुवत् ।
यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ॥
स ब्रह्मवित्परं प्रेयादितिवेदानुशासनम् ॥ इत्युपनिषत् ॥

॥ इति शाट्यायनीयोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र संसृतिनिवृत्तौ चित्तशोधनमेव परमोपाय इति प्रशस्य तत्प्रसङ्गात्तुर्याश्रमस्वरूपं प्रकाश्य कुटीचकादिभेदेन तच्चातुर्विध्यमभिधाय एतेषां चतुर्णामपि शिखायज्ञोपवीतत्रिदण्डादिधारणं यावत्प्राणधारणमावश्यकमिति प्रतिपाद्य तद्धर्मांश्च वर्णयित्वा गृहीततुर्याश्रमस्य पुनः प्रतिनिवृत्तौ प्रत्यवायमुक्त्वा चरमाश्रमप्रशंसनपूर्वकं गुरुमाहात्म्यं च प्रकाशितं दृश्यते ॥

वक्तव्यविशेषः—

शुक्लयजुश्शाखान्तर्गततया मुद्रिता समग्रा चेयमुपनिषदस्मिन् कोशे दृश्यते । एतत्समाननामधेया इतो विलक्षणाऽन्याऽप्युपनिषत्कोशान्तरे श्यते ॥

No. 460 (3581/37).

* शाट्यायनीयोपनिषत्.

* Śātyāyanīyopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—40-43.
Lines on a page—13.
Letters in a line—106.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

Subject in brief :—

This Upaniṣat, after mentioning the nature of mind, describes the creation of speech, vital organ, eyes and ears, etc. It, then, repeats Agnicayana mantras and points out the method of initiation into Brahma Vidyā, incidentally referring to Vaiswānara vidyā also.

उपक्रमः—

पूर्णमद इति शान्तिः । स वा इदमग्रे समासीत् नेव सदासीत् आसीदिव वा इदग्रे नेवासीत् तद्धत्ते मनस एवासः ॥ १ ॥ तस्मादेतदृषिणाऽभ्युक्तं नासदासीत् तदासीत तदानीमिति नेव हि सन्मनो न वाऽसत् ॥ २ ॥ तदिदं मनस्सृष्टो माविरबुभूष ? निरुक्ततरं मूर्ततरं तदात्मेन(त्मान)मन्वैच्छत् । तत्तपोऽतप्यत तत्प्रामूर्छत् तत् षट्त्रिंशतं सहस्राण्यपश्यत् आत्मनोऽग्नि न ? कर्मान्मनोमयान्मनश्च ॥

उपसंहारः--

अथ होवाच महाकालं जावालं चौपमन्यवकं त्वं वैश्वानरं वेत्थेति। आकाशमेव राजन्निति होवाच। ओमिति होवाच। एष वै बहुलो वैश्वानर एतं हि नैत्वं बहुलं वैश्वानरं वेत्थ। तस्मात् त्वं बहुः प्रजया पशुभिरसयो? एतं बहुलं वैश्वानरं वेद अप पुनर्मृत्युं जयति। सर्वमायुरेत्यात्मा त्वेष वैश्वानरस्यात्मात्वाहास्याद्यदि हा नागमिष्यत इति आत्मा ते विदितोऽभविष्यद्यदि नागमिष्य इति वा ॥ ६ ॥ . . . .

अथ होवाच बुद्धिअमाश्वतराश्वं? वैयाघ्रपद्य कं त्वं वैश्वानरं वेत्थेति, वायुमेव

प्रतिपाद्यविषयः—

अत्र मनस्स्वरूपं प्रतिपाद्य वाक्प्राणचक्षुःश्रोत्रादीनां सृष्टिमभिधाय अग्निचयनमन्त्रानाम्नाय वैश्वानरविद्याप्रसङ्गेन ब्रह्मविद्यां संक्षेपतः प्रदर्श्य उपदेशक्रमश्चान्ते प्रदर्शितो दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषन्मुद्रितविलक्षणा दृश्यते, असमग्रा च ॥

No. 461 (1973/24).

शारीरोपनिषत्.

Śārīropaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—230-232.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम्। अथातः पृथिव्यादिमहाभूतानां समवायं शरीरं यत्कठिनं सा पृथिवी यद्द्रवं तदापो यदुष्णं तत्तेजः यत्सञ्चरति स वायुः यत्सुषिरं तदाकाशं श्रोत्रादीनि ज्ञानेन्द्रियाणि श्रोत्रमाकाशे वायौ त्वगग्नौ चक्षुरप्सु जिह्वा पृथिव्यां घ्राणमेवमिन्द्रियाणां यथाक्रमेण शब्दस्पर्शरूपरसगन्धाश्चैते विषयाः पृथिव्यादिमहाभूतेषु क्रमेणोत्पन्नाः ॥

उपसंहारः—

मनोबुद्धिरहंकारः खानिलाग्निजलानि भूः।
एताः प्रकृतयस्त्वष्टौ विकाराष्षोडशापरे ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चैव तु पञ्चमम्।
पायूपस्थं करौ पादौ वाक्चैव दशमी मता ॥
शब्दस्स्पर्शश्च रूपं च रसो गन्धस्तथैव च।
त्रयोविंशतिरेतानि चत्वारि प्राकृतानि तु ॥
चतुर्विंशतिरव्यक्तं प्रधानं पुरुषः परः ॥

इति ॥ इति शारीरोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र शरीरस्य पञ्चभूतात्मकत्वमुपवर्ण्य तत्रस्थानां ज्ञानकर्मेन्द्रियाणां दशानां स्वरूपं विषयांश्चाभिधाय अन्तःकरणस्य मनोबुद्ध्यादिभेदेन चातुर्विध्यं प्रदर्श्य तद्विषयस्थानानि निर्दिश्य शरीरगतचर्मादिपृथिव्यंशान्निरूप्य सात्विकादिगुणानुक्त्वा जाग्रदादिचतुर्विधावस्थाः तत्स्वरूपं च प्रकाश्य सूक्ष्मशरीरस्वरूपं संगृह्य मनोबुद्ध्यादयोऽष्टौ प्रकृतयः श्रोत्रादयष्षोडश तद्विकाराः पुरुषः पर इत्याहत्य षड्विंशतितत्वान्यपि परिगणितानि दृश्यन्ते ॥

वक्तव्याविशषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा कृष्णयजुश्शाखीयेति मुद्रिता च दृश्यते। कोशेऽस्मिन्नुपनिषदादौ शान्तिमन्त्रो न दृश्यते। अस्या उपनिषदः कोशान्तरे शारीरकनाम्नाऽपि व्यवहारो दृश्यते ॥

No. 462 (1682/6).

शारीरोपनिषत्.

Śāriropaniṣat.

Substance—Palm-leaf.
Size—15½ × 1½ inches.
Character—Grantha.
Folios—4-6.
Lines on a page—7.
Letters in a line—32.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten on one side.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 461 कोशवत्.

उपसंहारः—

No. 461 कोशवत्.

प्रतिपाद्यविषयः—

No. 461 कोशवत्

वक्तव्यविशेषः—

No. 461 कोशवत्.

No. 463 (4136/6).

शारीरोपनिषत्.

Śārīropaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—29-30.
Lines on a page—15.

Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 461 कोशवत्.

उपसंहारः—

No. 461 कोशवत्.

प्रतिपाद्यविषयः—

No. 461 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन्नादौ कृष्णयजुश्शाखीयशान्तिमन्त्रो दृश्यते ॥

No. 464 (B 502/1).

शारीरोपनिषत्.

Śārīropaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—3.
Lines on a page—12.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct
Complete or incomplete—Complete.

उपक्रमः—

No. 461 कोशवत्.

उपसंहारः—

No. 461 कोशवत्.

प्रतिपाद्यविषयः—

No. 461 कोशवत्.

वक्तव्यविशेषः—

कोशोऽस्मिन्नाद्यन्तयोः कृष्णयजुश्शाखीयशान्तिमन्त्रो लिखितः ॥

No. 465 (114).

शिवतत्त्वोपनिषत् (दक्षिणामूर्त्युपनिषत्).

Śivatattwopaniṣat.

Substance—Palm-leaf.
Size—17×1½ inches.
Character—Nāgarī.
Folios—40-41.
Lines on a page—6.
Letters in a line—65.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

दक्षिणामूर्तये नमः । ब्रह्मावर्ते महभाण्डीरवटमूले महासत्त्राय समेता महर्षयश्शौनकादयस्ते समित्पाणयस्तत्त्वजिज्ञासवो मार्कण्डेयं चिरजीविनमुपेत्य पप्रच्छुः । केन त्वं चिरं जीवनि(सि) केन वा आनन्दमनुभवसीति । परमरहस्यशिवतत्त्वज्ञानेनेति होवाच । किं तत् परमरहस्य शिवतत्त्वज्ञानम् । तत्र को देवः । के मन्त्राः । का निष्ठा । किं तत्त्वज्ञानसाधनम् । कः परिकरः । को बलः(लिः) । कःकालः । किं ज्ञा(स्था)नम् । स होवाच ॥

उपसंहारः—

सर्गादिकाले भगवान् विरिञ्चिरुपास्यैनं सर्गसामर्थ्यमाप्य ॥
तुतोष चित्ते वाञ्छितार्थान् स लब्ध्वा . . . . सोऽस्योपासको भवति ॥

य इमां परमरहस्यशिवतत्त्वविद्यामधीते स सर्वपापेभ्यो मुक्तो भवति । स कैवल्यमनुभवति स कैवल्यमनुभवति ॥
॥ इत्याथर्वणवेदे कावषेयशाखायां परमरहस्यशिवतत्त्वोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

शौनकादिमार्कण्डेयप्रश्नोत्तररूपायामस्यामुपनिषदि — ऋषिदेवतान्यासध्यानादिप्रदर्शनपूर्वकं चतुर्विंशतिनवाष्टादशद्वात्रिंशदक्षरयुतदक्षिणामूर्तिमन्त्रस्वरूपं प्रकाश्य तज्जपमुद्रानिष्ठाज्ञानसाधनपरिकरबलिकालस्थानानि निरूप्य दाक्षिणामूर्त्युपासनामहिमा प्रादर्शि ॥

वक्तव्याविशेषः—

इयमुपनिषत् कृष्णयजुश्शाखान्तर्गता दाक्षिणामूर्त्युपनिषदिति मुद्रिता समग्रा चास्मिन् कोशे उपलभ्यते ॥

No. 466 (B 448/1).

दक्षिणामूर्त्युपनिषत्.

Dakṣiṇāmūrthyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—4.
Lines on a page—13.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 465 कोशवत्.

उपसंहारः—

No. 465 कोशवत्.

प्रतिपाद्यविषयः—

No. 465 कोशवत्.

वक्तव्याविशेषः—

No. 465 कोशवत्.

No. 467 (3581/18).

* श्रीकण्ठश्रुतिः.

* Śrīkaṇṭhaśrutiḥ.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folio—25th, one side only.
Lines on a page—15.
Letters in a line—102.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat states the method of assuming asceticism and the duties of an ascetic.

उपक्रमः—

ओं, योऽनुक्रमेण संन्यस्यति स संन्यस्तो भवति । कोऽयं संन्यास उच्यते । कथं संन्यस्तो भवति । य आत्मानं क्रियाभिर्गुप्तं करोति । मातरं पितरं भार्यां पुत्रं सुहृदो बन्धून् अनुमोदयित्वा ये चास्यर्त्विजस्तान् सर्वान् पूर्ववद्वृणीत्वा वैश्वानरीमिष्टिं कुर्यात् । सर्वस्वं दद्यात् । यजमानस्य गा ऋत्विजः सर्वैः पात्रैः समारोप्य यदाहवनीये गार्हपत्येऽन्वाहार्यपचने सभ्यावसथयोश्च प्राणापानव्यानोदानसमानान् सर्वान् सर्वेषु समारोपयेत । सशिखान् केशान् निष्कृत्य विसृज्य यज्ञोपवीतं निष्कृत्य पुत्रं दृष्ट्वा त्वं ब्रह्म त्वं यज्ञस्त्वं सर्वमित्यनुमन्त्रयेत् ॥

उपसंहारः—

कुण्डिकां चमसं शिक्यं त्रिविष्टपमुपानहौ ।
शीतोपघातिनीं कन्थां कोपीनाच्छादने तथा ॥

पवित्रं स्नानशाटीं च उत्तरासङ्गमेव च ।
यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः ॥
स्नानं पानं तथा शौचमद्भिः पूताभिराचरेत् ।
नदीपुलिनशायी स्यात् देवागारेषु वा स्वपेत् ॥
नात्यर्थं सुखदुःखाभ्यां शरीरमुपतापयेत् ।
स्तूयमानो न तुष्येत निन्दितो न शपेत् परान् ॥
एवं वृत्तिमुपासन्तो घातयन्तीन्द्रियाणि यत् ।
॥ इति श्रीकण्ठश्रुतिः समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र संन्यासग्रहणक्रमप्रतिपादनपूर्वकं गृहीतसंन्यासस्य धर्मा विस्तरेण प्रतिपाद्यन्ते ॥

वक्तव्यविशेषः—

संन्यासोपनिषदि प्रथमाध्यायस्थितानि वाक्यान्येव अस्मिन् कोशे आदौ दृश्यन्ते । ततस्त्वत्यन्तं विभिन्ना ग्रन्थानुपूर्वी दृश्यते ॥

No. 468 (B 124/5).

श्रीरामोपनिषत्.

Śrīrāmopaniṣat.

Substance—Paper.
Size—$7\frac{3}{4} \times 6$ inches.
Character—Kannada.
Folios—34–37.
Lines on a page—12.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

अथ हैनं भरद्वाजः[1]प्रपच्छ याज्ञवल्क्यमुपसमेत्योवाच श्रीराममन्त्रराजस्य माहात्म्यं नो ब्रूहि भगवन्निति ॥ स होवाच याज्ञवल्क्यः—

[1] 'प्रपच्छ, इति मुद्रिते न दृश्यते

स्वप्रभः परमज्योतिः स्वानुभूत्यैकचिन्मयः ।
तदेतन्मन्त्रराजस्य मनोराद्यक्षरः स्मृतः ॥
अखिलानन्दैकरसस्तारकब्रह्मवाचकः ।
रामायेति स विज्ञेयः सत्यानन्दचिदात्मनः ॥
नमः पदं सु(तु) विज्ञेयं पूर्णानन्दैकविग्रहम् ।
सदा नमन्ति हृदये सर्वे देवा मुमुक्षवः ॥

य एतं मन्त्रराजं षडक्षरं[1]यो नित्यमधीते, सोऽग्निना पूतो भवति, स वायुना पूतो भवति ॥

उपसंहारः—

सम्यगाराधितो रामः प्रसीदत्येव तत्परम् ।
ददात्यायुष्यमैश्वर्यमन्ते विष्णुपदं च यत् ॥

तदेतदृचाऽभ्युक्तम् । ऋचोऽक्षरे परमे व्योमन् । यस्मिन् देवा अधि विश्वे निषेदुः । यस्तं न वेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासत । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुरातातम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् । तत्सत् ॥

॥ इत्याथर्वणरहस्ये श्रीरामोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र श्रीरामषडक्षरमन्त्रोद्धारक्रमतज्जपफलतन्मन्त्रमहिमादिकं विस्तरेण प्रतिपाद्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् श्रीरामोपनिषन्नाम्ना परिदृश्यमानेयमुपनिषदेव मुद्रितकोशे दृश्यमानरामोत्तरतापिन्यन्त्यभागरूपतया दृश्यते ॥

No. 469 (B 124/4).

* श्रुतिरहस्योपनिषत् .

* Śrutirahasyopaniṣat.

Substance—Paper. | Character—Kannada.
Size—$7\frac{3}{4} \times 6$ inches. | Folios—30-31.

[1] 'यः' इति मुद्रिते न दृश्यते

Lines on a page—12.
Letters in a line—18.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Subject in brief :—

This Upaniṣat, in the form of a dialogue between Nārada and Brahma, summarises the mantras which relate the greatness of the venerated Highest Principle established by all the Vedas.

उपक्रमः—

अथ हैनं हिरण्यगर्भं नारदः पारिप्लवेत्योवाच। अधीहि भगवन् मह्यम्, कः पूज्यो यमुपास्यन्ते(ते) श्रुतय इति। तां(तं) होवाच भगवान् हिरण्यगर्भः—

यदा तमस्तन्न दिवा न रात्रिः न सन्न चासच्छिव एव केवलः।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी॥

न तत्र सूर्यो [1]न चेदं चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः॥

तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥

उपसंहारः—

स एव काले भुवनस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम्।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति॥
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च॥
स [2]विश्वकृद्विश्ववित्स्वयोनिः यः कालकालो गुणिसर्वविद्यः।
प्रधानक्षेत्रपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः॥
सृष्टिमानेन . . . . . ॥

---

[1] 'न चन्द्रतारकं, इति श्वेताश्वतरोपनिषदि पाठः. [2] विश्वकृद्विश्ववित्स्वयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः। प्रधानक्षेत्रज्ञपतिर्गुणेशः' इति श्वेताश्वतरोपनिषदि पाठः.

प्रतिपाद्यविषयः—

नारदहिरण्यगर्भप्रश्नोत्तररूपायामस्यामुपनिषदि सकलश्रुतिप्रतिपाद्यमुपास्यं परतत्वं तन्महिमप्रतिपादकमन्त्रसंग्रहपूर्वकं प्रतिपादितम् ॥

प्रतिपाद्यविषयः—

इयमुपनिषदस्मिन् कोशे असमग्रा दृश्यते, अमुद्रिता च ॥

No. 470 (2347/3).

श्वेताश्वतरोपनिषत्.

Śwetāśvataropaniṣat.

Substance—Palm-leaf.
Size—7 × 1½ inches.
Character—Grantha.
Folios—3–15.
Lines on a page—9.
Letters in a line—22.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect
Complete or incomplete—Complete.

उपक्रमः—

सह नाववात्विति शान्तिः । ओं, ब्रह्मवादिनो वदन्ति ॥
किं कारणं ब्रह्म कुतस्स्म जाता जीवाम केन क्व [1]सम्प्रतिष्ठिताः ।
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ।
कालस्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एषां न त्वात्मभावादात्माऽप्यनीशस्सुखदुःखहेतोः ॥

उपसंहारः—

तपःप्रभावादेवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।
अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यक् ऋषिसंघजुष्टम् ॥
वदान्तं परमं गुह्यं पुराकल्पप्रचोदितम् ।
नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वै पुनः ॥

[1] 'संप्रतिष्ठाः' इति कोशान्तरे पाठः

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
इति षष्ठोऽध्यायः ॥ श्वेताश्वतरोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र क्षराक्षरस्वरूपकथनपूर्वकं योगक्रममुपपाद्य योगगम्यस्य परमात्मनः स्वरूपादिकं तस्य पुरुषसूक्तप्रतिपाद्यत्वमोक्षप्रदत्वादिकं चोपवर्ण्य प्रकृतिस्वरूपं विविच्य परमात्मनो गायत्रीप्रतिपाद्यत्वमुक्त्वा क्षराक्षरविद्याफलभेदादिकं प्रकाश्य परमात्मस्वरूपतदुपासनतन्महिमादिकं प्रपञ्च्यते ॥

वक्तव्यविशेषः—

षडध्याय्यात्मिका इयमुपनिषत् समग्रा अस्मिन् कोशे उपलभ्यते ॥ कृष्णयजुश्शाखान्तर्गतेयमिति मुद्रिता च । श्वेताश्वतरोपदिष्टत्वादस्या उपनिषद इदं नामधेयमिति ज्ञायते ॥

No. 471 (C 1514/1).

श्वेताश्वतरोपनिषत्.

Śwetāśvataropaniṣat.

Substance—Paper.
Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches.
Character—Āndhra.
Folios—9.
Lines on a page—9.
Letters in a line—23.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

No. 470 कोशवत्.

उपसंहारः—

No. 470 कोशवत्.

प्रतिपद्यविषयाः—

No. 470 **कोशवत्**.

वक्तव्याविशेषः—

No. 470 **कोशवत्**.

No. 472 (1973/4).

श्वेताश्वतरोपनिषत्.

Śwetāśvataropaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—128-137.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—First folio is broken.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

No. 470 **कोशवत्**.

उपसंहारः—

No. 470 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 470 **कोशवत्**.

वक्तव्याविशेषः—

No. 470 **कोशवत्**.

No. 473 (C 1516/2).

श्वेताश्वतरोपनिषत्.

Śwetāśvataropaniṣat.

Substance—Paper.
Size—$8\frac{1}{4} \times 3\frac{3}{4}$ inches.
Character—Nāgarī.
Folios—$8\frac{1}{2}$.

Lines on a page—11.
Letters in a line—26.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 470 **कोशवत्**.

उपसंहारः—

No. 470 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 470 **कोशवत्**.

वक्तव्यविशेषः—

No. 470 **कोशवत्**.

No. 474 (B 503/1)

श्वेताश्वतरोपनिषत्.

Śwetāśvataropaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—15-26.
Lines on a page—11.
Letters in a line—18.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 470 **कोशवत्**.

उपसंहारः—

No. 470 कोशवत्.

प्रतिपाद्यविषयः—

No. 470 कोशवत्.

वक्तव्यविशेषः—

No. 470 कोशवत्.

No. 475 (1973/25).

सर्वसारोपनिषत्.

Sarvasāropaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—232-234.
Lines on a page—4.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम्। कथं बन्धः कथं मोक्षः का विद्या काऽविद्येति। जाग्रत्स्वप्नसुषुप्तितुरीयं च कथम्। अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः कथम्। कर्ता जीवः क्षेत्रज्ञः साक्षी कूटस्थान्तर्यामी कथम्। प्रत्यगात्मा परमात्मा आत्मा माया चेति कथम्। कथमात्मेश्वरः। अनात्मनां देहादीनां आत्मत्वेनाभिमन्यते सोऽभिमान आत्मनो बन्धः॥

उपसंहारः—

आत्मा नाम त्वंपदार्थादौपाधिकात् तत्पदार्थादौपाधिकाद्विलक्षण आकाशवत् सूक्ष्मः केवलसत्तामात्रः स आत्मेत्युच्यते। माया नाम अना-

दिरनन्तवती प्रमाणाप्रमाणसाधारणा न सती नासती न सदसती स्वयमधिका विचाररहिताऽनिरूप्यमाणा सती लक्षणशून्या सा मायेत्युच्यते ॥

॥ इति सर्वसारोपनिषत् ॥

प्रतिपाद्यविषयः—

अत्र बन्धमोक्षाविद्याजागरणस्वप्नसुषुप्तितुरीयान्नमयप्राणमयमनोमयविज्ञानमयानन्दमयकोशकर्तृजीवपञ्चवर्गक्षेत्रज्ञसाक्षिकूटस्थान्तर्यामिप्रत्यगात्मपरात्मपरमात्मब्रह्ममायासत्याविनाशिज्ञानानन्तानन्दपदार्थान्निरूप्य सदसन्मिथ्याभेदेन पदार्थत्रैविध्यं तत्स्वरूपादिकं चानुवर्ण्य ब्रह्मविज्ञानाकाराश्च प्रतिपादिताः ॥

वक्तव्यीविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा क्वचित्क्वचिन्मुद्रितविलक्षणा च दृश्यते । कृष्णयजुश्शाखान्तर्गतेयमिति मुद्रिता च ॥

No. 476 (B 506/1).

सर्वसारोपनिषत्.

Sarvasāropaniṣat.

Substance—Paper.
Size —8 × 6 inches.
Character—Āndhra.
Folio—4th only
Lines on a page—11.
Letters in a line—19.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 475 कोशवत्.

उपसंहारः—

No. 475 कोशवत्.

प्रतिपाद्यविषयः—

No. 475 कोशवत

वक्तव्यविशेषः—

No. 475 कोशवत्.

No. 477 (B 664/1).

सरस्वतीरहस्योपनिषत्.

Saraswatirahasyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Kannada.
Folios—54–58.
Lines on a page—13.
Letters in a line—24.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं, सह नाववत्विति शान्तिः । ओं, ऋषयो ह वै भगवन्तमाश्वलायनं संपूज्य पप्रच्छुः—

केनोपायेन तज्ज्ञानं तत्पदार्थावभासकम् ।
यदुपासनया तत्त्वं जानासि भगवन् वद ॥
सरस्वतीदशश्लोक्या सऋचा बीजमिश्रया ।
स्तुत्वा जप्त्वा परां सिद्धिमलभं मुनिपुङ्गवाः ॥

ऋषय ऊचुः—

कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत ।
महासरस्वती येन तुष्टा भगवती परा ॥

स होवाचाश्वलायनः—

उपसंहारः—

स्वानुभूतिरसावेशाद्दृश्यशब्द उपेक्षितुः (शब्दानपेक्षितः)।
निर्विकल्पसमाधिस्स्यात् निर्वातस्थितदीपवत्।
हृदि वा बाह्यदेशेऽपि यस्मिन् कस्मिंश्च वस्तुनि।
समाधिराद्य(दृक्)सन्मात्रान्ना(ना)मरूपपृथक्कृतिः॥
स्तब्ध(ब्धी)भावो रसास्वादो(दात्)कुलीयः(तृतीयः)पूर्ववन्मतः
एतैस्समाधिभिष्षड्भिः नयेत् कालं निरन्तरम्॥
देहाभिमाने गालिते विज्ञाते परमात्मनि।
यत्र यत्र मनो याति तत्र तत्र परामृतम्॥
भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥
मयि जीवत्वमीशत्वं कल्पितं वस्तुतो न हि।
इति यस्तु विजानाति स मुक्तो नात्र संशयः॥
॥ इत्युपनिषत्। सरस्वतीरहस्योपनिषत्समाप्ता॥

प्रतिपाद्यविषयः—

अत्र सरस्वतीदेवताकमन्त्रदशकस्य ऋषिच्छन्दोदेवतादिकथनपूर्वकं सारस्वतश्लोकदशकं निर्दिश्य मायासाक्षिसमाध्यादिस्वरूपादिविवेचनपूर्वकं ब्रह्मदर्शनमाहात्म्यफलं चाश्वलायनेन ऋषिभ्योऽनुवर्णितं दृश्यते॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रोपलभ्यते, कृष्णयजुश्शाखान्तर्गतेति मुद्रिता च॥

No. 478 (C 1512/1).

सरस्वतीरहस्योपनिषत्.

Saraswatīrahasyopaniṣat.

Substance—Paper. | Character—Andhra.
Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. | Folios—3.

Lines on a page—14.
Letters in a line—38.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 477 **कोशवत्**.

उपसंहारः—

No. 477 **कोशवत्**.

प्रतिपाद्यविषय·—

No. 477 **कोशवत्**.

वक्तव्यविशेषः—

No. 477 **कोशवत्**.

No. 479 (B 505/1).

सरस्वतीरहस्योपनिषत्.

Saraswatīrahasyopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—217-222.
Lines on a page—11.
Letters in a line—18.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः-

No. 477 **कोशवत्**.

उपसंहारः—

No. 477 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 477 कोशवत्.

वक्तव्यविशेषः—

No. 477 कोशवत्.

No. 480 (4135/9).

संन्यासोपनिषत्.

Saṃnyāsopaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folios—39–43.
Lines on a page—15.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct
Complete or incomplete—Complete.

उपक्रमः—

आप्यायन्त्विति शान्तिः । अथातः संन्यासोपनिषदं व्याख्यास्यामो योऽनुक्रमेण संन्यस्यति स संन्यस्तो भवति । कोऽयं स उच्यते । कथं संन्यस्तो भवति । य आत्मानं क्रियाभिर्मुक्तं करोति मातरं पितरं भार्यां पुत्रान् बन्धून् अनुमोदयित्वा ये चास्यर्त्विजस्तान् सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरेष्टिं निर्वपेत् ॥

उपसंहारः—

प्रपञ्चमाखिलं यस्तु ज्ञानाग्नौ जुहुयाद्यतिः ।
आत्मन्यग्नीन् समारोप्य सोऽग्निहोत्री महायतिः ॥
प्रवृत्तिर्द्विविधा प्रोक्ता मार्जाली चैव वानरी ।
ज्ञानाभ्यासवतामोतुर्वानरी भाक्तमेव च ॥
नापृष्टः कस्यचित् ब्रूयात् न चान्यायेन पृच्छतः ।

जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥
सर्वेषामेव पापानां संघाते समुपस्थिते ।
तारं द्वादशसाहस्रमभ्यसेच्छेदनं हि तत् ॥
यस्तु द्वादशसाहस्रं प्रणवं जपतेऽन्वहम् ।
तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते ॥
॥ इत्युपनिषत् । आप्यायान्त्विति शान्तिः ॥
॥ संन्यासोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अध्यायद्वयात्मिकायामस्यामुपनिषद्यादौ क्रमसंन्यासप्रकारं संगृह्य ततः संन्यासाधिकारिणः, वैराग्यसंन्यास्यादिचतुर्विधसंन्यासिनश्चाभिधाय पुनः षड्विधानां कुटीचकादीनां स्वरूपं निरूप्य अवधूतस्य स्वरूपानुसंधानप्रकारं प्रकाश्य संन्यासिनां फलं निर्दिश्य तेषां धर्माश्च संगृहीता दृश्यन्ते ॥

वक्तव्याविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा परिदृश्यते, सामशाखीयेति मुद्रिता च ॥

No. 481 (3581/2).

* सांख्यायनीयोपनिषत्.

* Saṃkhyāyanīyopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—3–7.
Lines on a page—14.
Letters in a line—89.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Complete.

Subject in brief:—

This Upaniṣat consists of five chapters. The first chapter, after referring to the process of creation, relates

how the human body along with its constituent elements comes into being and describes the two paths, Dhūmādi and Arcirādi through which the souls should pass after their release from the human body.

The second chapter enquires into the nature of Brahma, determines the characteristics of Adhyātma and Adhidaivata and describes Prāṇāgnihotra.

The latter three chapters deal with Prāṇāgnihotra and its fruits in a more detailed manner.

उपक्रमः—

अथ हैनं महानात्मा स तल्लक्षणतत्परं ब्रह्म सत्यं तत् सलिलं तदस्पर्शं तदरूपं तदरसं तदगन्धं तदनृतं तदमृतं तच्छाब्दं तत्तेजः स वै भूतात्मा सैषा भूतात्मा प्रकृतिरित्येकं तत् क्षेत्रं तज् ज्ञानात् क्षेत्रज्ञानुपाल्यो ज्योतिरात्मको य एष महानात्मा त्रिविधो भवति सत्वं रजस्तम इति सत्वं तु मध्ये विशुद्धं तिष्ठन्त्य(त्य)भितो र[ज्] स्तमसि(सी)रज इति कामद्वेषौ तम इत्यविद्या ॥

उपसंहारः—

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् तत्केन कं जिघ्रेत् तत् केन कर्माभिवदेत् तत् केन कं शृणुयात् तत् केन कर्म स्यन्यर्तते? तत्केन कं विजानीयात् येनेदं सर्वं विजानाति तं केन विजानीयादिति—

विरजः पर आकाशाद् च आत्मा महान् इ मे? ।
धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥
नाध्यायान् (नानुध्यायेत्)बहून् शब्दान् वाचो विग्लापनं तदिति ।
साङ्ख्यायनीयोपनिषदि पञ्चमोऽध्यायः ॥

॥ साङ्ख्यायनीयोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र प्रथमाध्याये—सृष्टिक्रमनिरूपणपूर्वकं शरीरोत्पत्तिक्रमं प्रकाश्य शरीरस्थानां सप्तधातूनां प्रमाणाभिधानपूर्वकं त्यक्तशरीराणामात्मनां धूमार्चिरादिमार्गद्वयनिरूपणं कृतम् ॥

द्वितीयाध्याये—ब्रह्मस्वरूपविवेचनपुरस्सरं अध्यात्माधिदैवतस्वरूपं निर्णीय प्राणाग्निहोत्रनिरूपणं कृतम् ॥

तृतीयचतुर्थपञ्चमाध्यायेषु—प्राणाग्निहोत्रविचारस्सफलप्रदर्शनं सविस्तरं चाभिहितः ॥

वक्तव्यविशेषः—

पञ्चाध्याय्यात्मिका इयमुपनिषत् समग्रा अमुद्रिता अस्मिन् कोशे उपलभ्यते ॥

No. 482 (B 664/4).

सावित्र्युपनिषत्.

Sāvitryupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Kannada.
Folios—49-50.
Lines on a page—13.
Letters in a line—24.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

आप्यायन्त्विति शान्तिः । ओं, कस्सविता का सावित्री । अग्निरेव सविता, पृथिवी सावित्री । स यत्राग्निः, तत्पृथिवी । ते द्वे योनिः । तदेकं मिथुनम् । कस्सविता, का सावित्री । वरुण एव सविता, छन्दा ँसि सावित्री । स यत्र वरुणः, तच्छन्दा ँसि यत्र ॥

उपसंहारः—

मनुः—ओं ह्रीं वले महादेवि [1]ह्रीं महावला महादेवि ह्रीं महाबले क्लीं चतुर्विधपुरुषार्थसिद्धिप्रदे तत्सवितुर्वरदात्मिके ह्रीं वरेण्यं भर्गो देवस्य वरदात्मिके अतिबले सर्वदयामूर्ते [2]क्षुधाभ्रमोपनाशिनि धीमहि धियो यो नः [3]जनान्ते प्रचर्यः प्रचोदयात्मिके प्रणवशिरसात्मिके हुं फट् स्वाहा । एवं विद्यात्कृतकृत्यो भवति । सावित्र्या एव तान् लोकान् जयति । इत्युपनिषत् ॥ ओं आप्यायन्त्विति शान्तिः ॥

॥ इति सावित्र्युपनिषत् संपूर्णा ॥

प्रतिपाद्यविषयः—

अत्र अग्निपृथिवीवरुणाव्याख्याकाशयज्ञच्छन्दस्स्तनयित्नुविद्युदादित्यद्युचन्द्रनक्षत्रमनोवाक्पुरुषस्त्रीरूपमिथुननवकरूपं सर्वमेव जगत्सवितृसावित्र्यात्मकं निरूप्य सावित्र्याः पादत्रयं प्रकाश्य सावित्रीवेदनफलमभिधाय ऋषिदेवताच्छन्दोनिरूपणपूर्वकं वलातिवलाख्यविद्यास्वरूपं प्रकाश्य तत्फलं चाभिहितं दृश्यते ॥

समग्रेयमुपनिषत् अस्मिन् कोशे उपलभ्यते । सामशाखान्तर्गतेयमिति मुद्रिता च ॥

एतदुपनिषत्परिदृश्यमानबलातिबलाख्यविद्ययोः क्षुधादिनिरसनफलकत्वदर्शनात् श्रीमद्वाल्मीकिरामायणे विश्वामित्रमहर्षिणा श्रीरामलक्ष्मणाभ्यामुपदिष्टं बलातिबलाख्यविद्याद्वयमिदमेव स्यादिति संभाव्यते ॥

No. 483 (B 507/1).

सावित्र्युपनिषत्.

Sāvitrupaniṣat.

Substance—Paper.	Character—Āndhra.
Size—8 × 6 inches.	Folios—2.

---

[1] 'ह्रीं महाबला महादेवि' इति कोशान्तरे न दृश्यते. [2] 'क्षुच्छ्रमोप' इति पाठान्तरम्. [3] 'यो नर्जाते प्रचुर्या' इति पाठान्तरम्.

Lines on a page—13.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 482 **कोशवत्**.

उपसंहारः—

No. 482 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 482 **कोशवत्**.

वक्तव्यविशेषः—

No. 482 **कोशवत्**.

No. 484 (B 124/11).

सिद्धान्तशिखोपनिषत्.

Śiddhāntaśikhopaniṣat.

Substance—Paper.
Size—$7\frac{3}{4} \times 6$ inches.
Character—Kannada.
Folios—54–57.
Lines on a page—12.
Letters in a line—18.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं शं नो मित्र इति शान्तिः ॥ अथ भरद्वाजः कुमारं पप्रच्छ। क्रिमेवं परमशैवभक्तानां सिद्धान्तं कुतस्सर्वे न विदन्तीति। तद्वो-(तस्मै हो)वाच स्कन्दः ॥

भरद्वाज शृणु नापक्वचित्ता विदन्ति साम्बं सर्वदेवप्रकृष्टम् ।
शिवं वरेण्यं पक्वचित्ताः शिवस्य प्रसादतो जातमात्राद्विदन्ति ।
विश्वाधिकं शङ्करं ये प्रमूढा ह्येनं (हीनं) विष्णोर्ब्रह्मणो वा विदन्ति ।
न संसारत् प्रच्यवन्ते (मुच्यन्ते) कदाचित् शतैः कल्पैः कोटिभि-
र्वात्र (त्त) दोषाः ॥

उपसंहारः—

सिद्धान्तोऽयं निश्चितोऽस्माभिरेष भरद्वाज[1]गुह्यमेतन्न वाच्यम् ।
सदाऽप्रशान्ताय च नास्तिकाय परीक्षकाय ब्रूहि सर्वार्थवेत्रे ।

इत्याह भगवान् स्कन्दः । तामेनां सिद्धान्तशिखां योऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । सार्वकालं प्रयुञ्जानः पापोऽपापो भवतीति [2]विज्ञायत इति वेदवचनं भवति भवति । ओं, शं नो मित्रश्शं वरुणः । शं नो भवत्वर्यमा ॥

॥ इति सिद्धान्तशिखोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र शिवदीक्षाधिकारिनिरूपणपूर्वकं शिवनाममहिमानमुपवर्ण्य सद्योजातवामदेवाघोरतत्पुरुषेशानाख्यशिवस्वरूपेभ्यः ब्रह्मक्षत्रविट्छूद्रादीनां उत्पत्तिवर्णनपूर्वकं लिङ्गधारकस्य महिमानं निरूप्य लिङ्गभस्मरुद्राक्षधारणस्थानमहिमादिकमुक्त्वा शैवपञ्चाक्षरीमन्त्रयोर्देवतादिनिरूपणपूर्वकं तन्मन्त्रोपासनाक्रमादिकमभिधाय शिवपूजामाहात्म्यमुपवर्ण्य एतत्पाठकफलं चान्तेऽभिहितं दृश्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत्समग्रा दृश्यते । कृष्णयजुश्शाखान्तर्गतेयमिति मुद्रिता च ॥

---

[1] 'गुह्य एव तन्न वाच्यः सदा पतितायाप्रशान्ताय च नास्तिकायापरीक्षिताय' इति मुद्रितकोशे पाठः. [2] 'विज्ञायत इति' इति मुद्रितकोशे न दृश्यते.

No. 485 (B 508/1).

सीतोपनिषत् .

Sītopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—6.
Lines on a page—11.
Letters in a line—18.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं भद्रं कर्णेभिरिति शान्तिः ॥ देव ह वै प्रजापतिमब्रुवन् । का सीता, किंरूपमिति । स होवाच प्रजापतिः । सा सीता इति ॥

मूलप्रकृतिरूपत्वात्सा सीता प्रकृतिस्स्मृता ।
प्रणवप्रकृतिरूपत्वात्सा सीता प्रकृतिरुच्यते ॥
सीता त्रिवर्णात्मा साक्षान्मायामया भवेत् ।
विष्णुः प्रपञ्चबीजं च माया ईकार उच्यते ॥
सकारस्सत्यममृतप्राप्तिः सोमश्च कीर्त्यते ।
तकारस्तारलक्ष्या च वैराजः प्रस्तरस्स्मृतः ॥

ईकाररूपिणी सोमा अमृतावयवा दिव्यालंकारस्रङ्मौक्तिकाद्याभरणालंकृता महामायाव्यक्तरूपिणी व्यक्ता भवतीति ॥

उपसंहारः—

अथातो वीरशक्तिश्चतुर्भुजाभयवरदपद्मधरा किरीटाभरणयुता सर्वदेवैः परिवृता कल्पतरुमूले चतुर्भिर्गजै रत्नघटैरमृतजलैरभिषिच्यमाना सर्वदैवतैः ब्रह्मादिभिर्वन्द्यमाना अणिमाद्यष्टैश्वर्ययुता सम्मुखे कामधेनुना स्तूयमाना वेदशास्त्रादिभिस्स्तूयमाना जयाद्यप्सरस्स्त्रीभिः परिचार्यमाणा आदित्यसोमाभ्यां दीपाभिः प्रकाश्यमाना तुम्बुरुनारदादिभिर्गीयमाना राकासिनीवालीभ्यां छत्रेण ह्रादिनीमायाभ्यां चामरेण स्वाहास्वधाभ्यां

व्यजनेन भृगुपुण्यादिभिरभ्यर्च्यमाना देवी दिव्यसिंहासने पद्मासनारूढा सकलकार्यकारणकरी लक्ष्मीर्देवस्य पृथक् भवनकल्पना अलंकारस्थिरा प्रसन्नलोचना सर्वदैवतैः पूज्यमाना सा वरलक्ष्मीति विज्ञायत इत्युपनिषत् ॥

॥ इति सीतोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र सीतादेव्याः सर्वशक्त्यात्मकत्वसर्वात्मकत्वकथनपूर्वकं सीतामाहात्म्यमभिवर्णितम् ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा दृश्यते, अथर्वशाखान्तर्गतेयमिति मुद्रिता च ॥

No. 486 (1468/6).

* सुदर्शनोपनिषत्.

* Sudarśanopaniṣat.

Substance—Palm-leaf.
Size—18×1½ inches.
Character—Andhra.
Folio—4th only.
Lines on a page—5.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief—

In this Upaniṣat we see a number of Ṛks collected which express the greatness of Cakra and show the necessity of wearing the symbol of Śaṅkha and Cakra on one's body.

उपक्रमः—

ओं। धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा। स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥

दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् ।
सव्ये तु शङ्खं विभृयादिति वेदविदो विदुः ॥

उपसंहारः—

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते श्रितास इद्वहन्तस्तत्समासत ॥
पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनम् ।
एतान्यपरनामानि चक्रराजस्य शार्ङ्गिणः ॥
॥ इत्युपनिषत् ॥

प्रतिपाद्यविषयः—

अत्र शङ्खचक्रधारणविधानपूर्वकं चक्रमाहात्म्यप्रदर्शनपरा ऋचोऽत्र संगृहीता दृश्यन्ते ॥

वक्तव्यविशेषः—

अत्र No. 1682 कोशे विद्यमानायाः सुदर्शनोपनिषद इयमुपनिषद्भिन्ना समग्रा अमुद्रिता च दृश्यते । आद्यन्तयोः शान्तिमन्त्रो न दृश्यते ॥

No. 487 (1682/1).

*सुदर्शनोपनिषत्.

* Sudarśanopaniṣat.

Subject in brief—

This Upaniṣat points out the necessity of wearing, on one's body, the marks of Śrīvaiṣṇava religion, namely, those of Śaṅkha, Cakra and Tripuṇḍra, after having duly served the Guru or the spiritual preceptor. The arrangement followed in this Upaniṣat is different from that followed in the preceding Upaniṣat.

उपक्रमः—

(महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया ।
प्रातुं दुःखाम्बुधेः पारं त्वर यावन्न भिद्यते ॥
कर्मब्रह्मात्मके शास्त्रे कौतस्कुतनिवर्तकान् ।
वन्दे हस्तिगिरीशस्य वीधीशोधककिङ्करान् ॥)

॥ अथ सुदर्शनोपनिषत् ॥

ओं, अथ यज्ञोपवीतं चक्री धारयेत् ब्रह्मवित् ब्रह्मविदो मनीषा हिरण्यमादाय सुदर्शनं च कृत्वा वह्निं स्वयमुपैति युक्तं स्त्रीशूद्रसंबाहुभ्यां धारयेत् । तस्मादत्र न जायते । ब्राह्मणशरीरं जायते । विष्णुं भजन्ति । नासादिकेशपर्यन्तमूर्ध्वपुण्ड्रान् धारयेत् । तस्माद्धीरो शिखा सम्भवति । तं देवकीपुत्रं समाश्रितः ॥

उपसंहारः—

अग्निना वै होत्रा चक्रं पाञ्चजन्यं प्रतप्तौ द्विभुजे धारयेत् । आत्मनो हितमाचरेत् । आचार्यस्य सम्मुखं प्रपद्येत । तस्माद्वैकुण्ठम् । पुनरागमनं न यति । तस्य सालोक्यसामीप्यसारूप्यसायुज्यं गच्छति ॥

॥ सुदर्शनोपनिषत् समाप्ता ॥

प्रातिपाद्यविषयः—

अत्र शङ्खचक्रोर्ध्वपुण्ड्रधारणावश्यकत्वं प्रतिपाद्य गुरूपसत्तिः कर्तव्येति कथितम् ॥ आचार्यमुपसंपन्नस्य धृतशङ्खचक्रस्य आत्मनो हितमाचरतः फलं चाभिहितं दृश्यते ॥

वक्तव्यविशेषः--

अमुद्रिता इयमुपनिषदस्मिन् कोशे समग्रा दृश्यते ॥ No. 486 कोशदृश्यमानोपनिषदो विभिन्नानुपूर्वीकेयमुपनिषत् ॥

No. 488 (1468/2).

सुबालोपनिषत् .

Subālopaniṣat.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Āndhra.
Folios—48–56.
Lines on a page—6½.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

पूर्णमद इति शान्तिः ॥ ओं, तदाहुः किं तदासीत् तस्मै स होवाचास (च न स)न्नासन्नसदसदिति । तस्मात्तमस्सञ्जायते तमसो भूतादिः भूतादेराकाशमाकाशाद्वायुर्वायोरग्निरग्नेराप अद्भ्यः पृथिवी तदण्डं समभवत्तत्संवत्सरमुषित्वा दिधाऽकरोदधस्ताद्भूमिमुपरिष्टादाकाशं मध्ये पुरुषो दिव्यस्सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात् सहस्रबाहुरिति ॥

उपसंहारः—

सुबालबीजब्रह्मोपनिषदं(त्) नाप्रशान्ताय दातव्या नापुत्राय नाशिष्याय नासंवत्सररात्रोषिताय नापरिज्ञातकुलशीलाय दातव्या नैव च प्रवक्तव्या ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इत्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥

॥ इत्युपनिषत् ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि विस्तरेण जगत्सृष्टिप्रलयप्रकारमुपवर्ण्य जगत्कारणस्य परब्रह्मणः स्वरूपं विशोध्य तदुपासनस्थानादिनिरूपणपूर्वकं तदुपासप्रकारानभिधाय कृत्स्नस्य जगतो नारायणशरीरत्वमुपपाद्य रैक्वघोराङ्गिरःप्रश्नोत्तरमुखेन सर्वाप्ययप्रकारं प्रदर्श्य सर्वस्याप्यस्यार्थस्य प्रतिभानं गुरुभक्तस्यैव भवतीति निगमितं दृश्यते ॥

वक्तव्यविशषः—

षोडशखण्डात्मिकेयमुपनिषत् समग्रा अस्मिन् कोशे उपलभ्यते ॥ शुक्लयजुश्शाखीयेयमिति मुद्रिता च दृश्यते ॥

No. 489 (1973/30).

सुबालोपनिषत्.

Subālopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—269–278.
Lines on a page—5.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

'हरिः ओम्। तदाहुः किल तदाऽस्ति तस्मै स होवाच' इत्यादि No. 488 कोशवत् ॥

उपसंहारः—

No- 488 कोशवत्.

प्रतिपाद्यविषयः—

No. 488 कोशवत्.

वक्तव्यविशेषः—

No. 488 कोशवत्.

No. 490 (B 509/1).

सुबालोपनिषत्.

Subālopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Āndhra.
Folios—347–358.
Lines on a page—11.
Letters in a line—24.

Age of Ms.—Modern.
Condition of Ms.—The leaves are worm-eaten.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 488 **कोशवत्.**

उपसंहारः—

No. 488 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 488 **कोशवत्.**

वक्तव्यविशेषः—

No. 488 **कोशवत्.**

No. 491 (1973/18).

सुबालोपनिषत्.

Subālopniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—212–223.
Lines on a page—4.

Age of Ms.—Old.
Condition of Ms.—Last folio is broken.
Correct or incorrect—Correct.
Complete or incomplete—

उपक्रमः—

No. 488 **कोशवत्.**

उपसंहारः—

तस्मै स होवाच योऽयं विज्ञानघन उत्क्रामन् प्राणं दहत्यपानं दहतीमं च लोकं परं च लोकं दहति लोकालोकं दहति धर्माधर्मौ दहत्यभास्करममर्यादं निरालोकमतः परं दहति महान्तं दहत्यव्यक्तं दहत्यक्षरं

प्रतिपाद्यविषयः—

No. 488 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

समग्रप्रायपञ्चदशखण्डान्तेयमुपनिषदस्मिन् कोशे दृश्यते ॥

No. 492 (3581/22).

सुबालोपनिषत्.

Subālopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—26-27.
Lines on a page—14.
Letters in a line—93.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 488 **कोशवत्.**

उपसंहारः—

No. 488 **कोशवत्.**

No. 488 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

प्रथमचतुर्दशपञ्चदशषोडशखण्डा अस्मिन् कोशे दृश्यन्ते ॥

No. 493 (3581/17).

सूर्योपनिषत्.

Sūryopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Andhra.
Folio—25th, one side only.
Lines on a page—12.
Letters in a line—104.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥ अथ सूर्याथर्वाङ्गिरसो व्याख्यास्यामः । ब्रह्म ऋषिः । गायत्री छन्दः आदित्यो देवता । हंसस्सोऽहं । अग्निनारायण युक्तं बीजं । हृल्लेखा शक्तिः । वियदादिस्वर्गसंयुक्तं कीलकं । चतुर्विध-पुरुषार्थे विनियोगः । षट्स्वरारूढेन षडङ्गं रक्ताम्बुधि (ज) संस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्र-प्रणेतारं श्रीसूर्यनारायणं य एवं वेद । स वै ब्राह्मणः ॥

उपसंहारः—

त्रिकालमेतज्जप्त्वा क्रतुशतफलमाप्नोति । हस्तादित्ये जपति स महामृत्युं तरति य एवं वेद । इत्युपनिषत् । [1]य इमां चाक्षुष्मतीं विद्यां ब्राह्मणो नित्यमधीते न तस्याक्षिरोगो भवति न तस्य कुले अन्धो भवति । अष्टौ ब्राह्मणान् ग्राहयित्वा अथ विद्यासिद्धिर्भवति विश्वरूपं घृणिनं जातवेदसं हरिरामयं हिरण्मयं ज्योतिरूपं तपन्तम् । सहस्ररश्मिः शतधा

[1] इत आरभ्य आन्तं परिदृश्यमानोग्रन्थः आक्षिकोपनिषदि आदिभागेऽपि परिदृश्यते । मुद्रितसूर्योपनिषद्यन्ते चायं ग्रन्थो नोपलभ्यते.

वर्तमानः पुरुषः प्रजानामुदयत्येष सूर्यः । ओं नमो भगवते श्रीसूर्यायादित्याय अहो वाहिनि वाहिनि वा स्वाहा । इत्युपनिषत् ॥

॥ आदित्यसूर्योपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र अन्तर्यामिदृष्ट्या सूर्यस्य सर्वात्मकत्वकथनपूर्वकं तस्मादेव जगत्सृष्टिमुपवर्ण्य तदुपासनोपयोगितद्देवताकाष्टाक्षरं मनुं तद्देवताकां चाक्षुष्मतीं विद्यां चाभिधाय तज्जपादौ फलं चोपवर्णितम् ॥

वक्तव्यविशेषः—

अथर्वशाखीयेतीयमुपनिषन्मुद्रिता, कोशेऽस्मिन् समग्रा च दृश्यते ॥

No. 494 (B 510/1).

सूर्योपनिषत्.

Sūryopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—3.
Lines on a page—12.
Letters in a line.—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correcet or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 493 कोशवत्.

उपसंहारः—

असत्सम्भाषणात्पूतो भवति । मध्याह्ने सूर्याभिमुखः पठेत् । सद्योत्पन्नपञ्चमहापातकात् ? । सैषा सावित्री विद्या । न किञ्चिदपि न कस्मैचित् प्रशंसयेत् । य एतां महाभागः प्रातः पठति स भाग्यवान् जायते । पशून् विन्दति । वेदार्थं लभते । त्रिकालं एतज्जप्त्वा क्रतुशतफलमाप्नोति ।

हस्तादित्ये जपति स महामृत्युं तरति। स महामृत्युं तरति। य एवेदं वेदेत्युपनिषत् ॥

॥ सूर्योपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

No. 493 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

इयमुपनिषत् कोशेऽस्मिन् मुद्रितसदृशी समग्रा च दृश्यते ॥

No. 495 (4136/15).

सूर्योपनिषत्.

Sūryopaniṣat.

Substance—Palm-leaf.
Size—9½ × 2 inches.
Character—Āndhra.
Folio—56th, one side only.
Lines on a page—15.
Letters in a line—50.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥ अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः। ब्रह्मा ऋषिः। गायत्रीछन्दः। आदित्यो देवता। हंसस्सोऽहम्, अग्निनारायणयुक्तं बीजम्। ह्रल्लेखा शक्तिः। वियदादिस्वर्गसंयुक्तं कलिकम्। चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोगः ॥

उपसंहारः—

षट्स्वरारूढेन बीजेन षडङ्गं रक्ताम्बुजसंस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं

प्रतिपाद्यविषयः—

No. 493 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

कोशेऽस्मिन् एतदुपनिषदादिभागमात्रं दृश्यते ॥

No. 496 (B 664/5).

सौभाग्यलक्ष्म्युपनिषत्.

Soubhāgyalakṣmyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Kannada.
Folios—50–54.
Lines on a page—13.
Letters in a line—24.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

वाङ्मे मनसीति शान्तिः। अथ भगवन्तं देवा ऊचुः। हे भगवन् नः कथय सौभाग्यलक्ष्मीविद्याम्। तथेत्यवोचत् भगवानादिनारायणः। सर्वे देवा यूयं सावधाना भूत्वा शृणुध्व (त) तुरीयातीतां सर्वोत्कटां सर्वमन्त्रासनगतां [1]पीठोपविष्टदेवतापरिवृतां चतुर्भुजां श्रियं हिरण्यवर्णामिति पञ्चदशभिः ऋग्भिः ध्यायथ ॥

उपसंहारः—

परब्रह्मचक्रं नवमं आकाशचक्रं षोडशदळपद्मं ऊर्ध्वमुखं तन्मध्यकर्णिका त्रिकूटाकारम्। तन्मध्ये [2]ऊर्ध्वशक्तितां परमशून्यं ध्यायेत्। तत्रैव पूर्णगिरिपीठं सर्वेच्छासिद्धिसाधनं भवति। य एवं वेद।

[1] 'पीठोपपीठ' इति पाठान्तरम्. [2] ऊर्ध्वशक्तिकां पश्यन्, ऊर्ध्वशक्तियुतान् परशून् ध्यायेत्.

[1]भाग्यलक्ष्म्युपनिषदं नित्यमधीते सोऽग्निपूतो भवति । स वायुपूतो भवति । सकलधनधान्यसत्पुत्रकळत्रहयभूगजपशुमहिषदासीदासयोग-ज्ञानवान् भवति । न पुनरावर्तत इत्युपनिषत् ॥

॥ ओं वाङ्मे मनसीति शान्तिः । सौभाग्योपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

देवनारायणप्रश्नोत्तररूपायामस्यामुपनिषदि लक्ष्मीप्रसादेन अलक्ष्मीनिराकरणपूर्वकं सम्पत्सौभाग्यविद्यासिद्ध्यर्थं हिरण्यवर्णामिति पञ्चदशर्चस्य तथाऽन्येषां तद्देवताकमन्त्राणां च ऋषिच्छन्दोदेवतान्यासध्यानजपादिकं कथितम् । तथा लक्ष्म्या आराधनक्रमः नवचक्रविवेचनं उपनिषदध्ययनफलं च प्रतिपादितम् ॥

वक्तव्यविशेषः—

समग्रा चेयमुपनिषत् अस्मिन् कोशे उपलभ्यते, मुद्रिता च ॥

No. 497 (B 511/1).

सौभाग्यलक्ष्म्युपनिषत्.

Soubhāgyalakṣmyupaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—203–207.
Lines on a page—11.
Letters in a line—20.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 496 कोशवत्.

[1] 'सौभाग्य' इति पाठान्तरम्.

उपसंहारः—

No. 496 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 496 **कोशवत्**.

वक्तव्यविशेषः—

No. 496 **कोशवत्**.

No. 498 (3581/26).

* सौरकायणोपनिषत्.

* Sourakāyaṇopaniṣat.

Substance—Palm-leaf	Age of Ms.—Old.
Size—20 × 2¼ inches.	Condition of Ms.—Good.
Character—Āndhra.	Correct or incorrect—Correct.
Folio—33rd, one side only.	Complete or incomplete—Complete.
Lines on a page—9-11.	
Letters in a line—90.	

Subject in brief :—

This Upaniṣat briefly relates how the God Nāṛāyaṇa performs the three functions of creation, maintenance and destruction of the world, by associating himself with Prakṛti—the primordial matter, which consists of three guṇas, namely, Sattwa, Rajas and Tamas.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥ अथ तस्य वाव प्रकृतिः सत्त्वरजस्तम इति ता नारायणः परिपश्यत्यन्योन्यं प्रविष्टस्तं वा एवमाहुः पुरुष इति पूर्णो ह्येष भवति स त्रेधा बभूवैषां गुणानामुपादाय विष्णुर्वाव सत्त्वस्य रजसो ब्रह्मेशानो नाम तमसस्स आविवेश ब्रह्माणम् ॥

उपसंहारः—

चतुर्मुखमीशानं पञ्चमुख? यो वा ईशस्तमीशानमाविवेश तपालं? कालमाचक्षते रजसो व्यापारस्तमसो नाशनं सत्त्वस्य पालकं कालमाचक्षत इति ॥

सौरकायणेापनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र प्रकृतेस्त्रिगुणात्मकत्वकथनपूर्वकं तदनुप्रविष्टेन अधिगतब्रह्मविष्णवीशानरूपेण नारायणेन तत्तद्गुणानुरूपसृष्टिस्थितिलयरूपं कार्यत्रितयं क्रियत इति संगृह्य कथ्यते ॥

वक्तव्यविशेषः—

अस्मिन् कोशे इयमुपनिषत् समग्रा दृश्यते, असुद्रिता च ॥

No. 499 (B 512/1).

स्कन्दोपनिषत् .

Skandopaniṣat.

Substance—Paper.
Size—8 × 6 inches.
Character—Andhra.
Folios—2.
Lines on a page—13.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

सह नाववत्विति शान्तिः ॥

अच्युतोऽस्मि महादेव तव कारुण्यलेशतः ।
विज्ञानघन एवास्मि शिवोऽस्मि किमतः परम् ॥
न निजं निजवद्भाति अन्तःकरणजृम्भणात् ।
अन्तःकरणनाशेन संविन्मात्रस्थितो हरिः ॥

संविन्मात्रस्थितश्चाहमजोऽस्मि किमतः परम् ।
व्यतिरिक्तं जडं सर्वं स्वप्नवच्च विनश्यति ॥
चिज्जडानां तु यो द्रष्टा सोऽच्युतो ज्ञानविग्रहः ।

उपसंहारः—

श्रीपरमधाम्ने स्वस्ति चिरायुष्यो नम इति ॥
विरिञ्चनारायणशङ्करात्मकं
नृसिंह देवेश तव प्रसादतः ।
अचिन्त्यमव्यक्तमनन्तमव्ययं
वेदात्माकं(देवात्मकं) ब्रह्म निजं विजानते ॥
तद्विष्णोः परमंपदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ।
तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् ॥
॥ स्कन्दोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र ब्रह्मस्वरूपनिरूपणपूर्वकं हरिहराभेदाभिप्रायसूचनपूर्वकं च ब्रह्मविदावश्यकस्नानशौचादीनां स्वरूपं प्रतिपादितम् ॥

वक्तव्यविशेषः—

कोशोऽस्मिन्नियमुपनिषत्समग्रा दृश्यते । कृष्णयजुश्शाखान्तर्गतेति मुद्रिता च ॥

No. 500 (3811/11).

स्कन्दोपनिषत्.

Skandopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folios—2.
Lines on a page—5.
Letters in a line—104.
Age of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 499 **कोशवत्.**

उपसंहारः—

No. 499 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 499 **कोशवत्.**

वक्तव्यविशेषः—

कोशेऽस्मिन् ब्रह्मविदावश्यकस्नानशौचभैक्षस्वरूपसंग्राहकपद्यत्रयं न दृश्यते। अन्यत्सर्वं पूर्वकोशवदेव दृश्यते ॥

No. 501 (B 124/1).

* स्वप्रकाशोपनिषत्.

* Svaprakāśopaniṣat.

Substance—Paper.
Size—$7\frac{3}{4} \times 6$ inches.
Character—Kannada.
Folio—1.
Lines on a page—12.
Letters in a line—16.

Age of Ms.—Modern.
Condition of Mss.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

Subject in brief :—

This Upaniṣat summarises the characteristics of Ātman.

उपक्रमः—

ओम्। अस्ति कश्चिद्धरिः पूर्वस्सर्वदेवोत्तमोत्तमः।
इति यस्य मतिस्तस्य नास्ति नारकदर्शनम्।

पुङ्खानुपुङ्खविषमेक्षणतत्परोऽपि
ब्रह्मावलोकननिरूढमना हि योगी ।
सङ्गीततालळयवाद्यवशंगताऽपि
मौळिस्थकुम्भपरिवृत्तन (वर्तन) धीर्नटीव ॥
यथा राहुरमृत्यो (मर्त्यो) पि दृश्यते चन्द्रमण्डले ।
तद्वत्सर्वगतो ह्यात्मा लिङ्गदेहेऽपि दृश्यते ॥
लीयमाने यथा कुम्भे घटाकाशोऽपि दृश्यते ।
तद्वत्सर्वगतो ह्यात्मा लिङ्गदेहे विलीयते ॥

उपसंहारः—

निश्चलं परिपूर्णोऽपि गच्छतीत्युपचर्यते ।
जाग्रत्काले यथा ज्ञेयं अभिव्यक्तविदोषधीः (विशेषधीः) ॥
ब्याप्नोति निष्क्रियस्सर्वान् भानुर्दश दिशो यथा ।
नाडीभिर्वर्तयो (वृत्तयो) यान्ति लिङ्गदेहसमुद्भवाः ॥
उत्पादितघटे यद्वत् घटिकादिरमृच्छति (घटाकाशत्वमृच्छति) ।
घटे नष्टे यथाऽऽकाशः स्वरूपेणावतिष्ठति (ते) ॥
जाग्रद्भूमौ यथा तद्वत् कर्मकर्तृक्रियात्मकः ।
विशेषे (विशेष) बुद्धिसाक्ष्या (बुद्धिसाक्ष्येष) स्वयमेव प्रकाशयेत् ॥
॥ इति स्वप्रकाशोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

आत्मस्वरूपसंग्रहपरेयमुपनिषत् ॥

वक्तव्यविशेषः—

अस्मिन् कोशे समग्रेयमुपनिषदुपलभ्यते, अमुद्रिता च ॥

No. 502 (1643/2).

हंसोपनिषत् .

Haṁsopaniṣat.

Sustance—Palm-leaf.	Character—Nāgarī.
Size—15½ × 1½ inches.	Folios—2–4.

Lines on a page—6.	Correct or incorrect—Correct.
Letters in a line—51.	
Age of Ms.—Old.	
Condition of Ms.—Worm-eaten.	Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् ॥ सह नाववतु—अथ हंसपरमहंसनिर्णयं व्याख्यास्यामः । ब्रह्मचारिणे दान्ताय गुरुभक्ताय हंस हंसेति सदा अयं सर्वेषु देहेषु व्यावर्तते । यथाऽग्निः काष्ठेषु तिलेषु तैलमिव तं विदित्वा न मृत्युमेति । गुदमवष्टभ्य आधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षिणीकृत्य मणिपूरकं अनाहतमतिक्रम्य विशुद्धे प्राणान्निरुध्याज्ञामनुयायन् ब्रह्मरन्ध्रं ध्यायन् त्रिमात्रोऽहमित्येवं सर्वदा ध्यायन् पश्यत्यनाकारंव(शश्च)भवति ॥

उपसंहारः—

पञ्चमस्तन्त्रीनादः षष्ठस्ताळनादः सप्तमो वेणुनादोऽष्टमो भेरीनादो नवमो मृदङ्गनादो दशमो मेघनादो नवमं पारित्यज्य दशममेवाभ्यसेत् । . . . . . मनो विलीने मनसि गतौ संकल्पविकल्पे दग्धे पुण्यपापे सदाशिवोंशक्तथात्मा सर्वत्रावस्थितः शान्तं काशयति वेदवचनं भवति ॥

॥ इति हंसोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र सर्वव्यापिनस्त्रिमात्रस्य हंसाख्यपरमात्मानो ध्यानक्रमं निरूप्य तस्य नादे विलयप्रकारमुक्त्वा ऋषिच्छन्दोदेवतान्यासादिवर्णनपुरस्सरं तन्मन्त्रस्वरूपादिकं संगृह्य तस्य दशविधनादस्वरूपतायां फलविशेषाश्च संगृह्यन्ते ॥

वक्तव्यविशेषः—

मुद्रितकोशे एतदुपनिषदाद्यन्तयोः पारिदृश्यमानं श्लोकषट्कमत्र न दृश्यते । कोशेऽस्मिन् कृष्णयजुश्शाखीयशान्तिमन्त्रो लिखितः । मुद्रिते तु शुक्लयजुश्शाखीयशान्तिमन्त्र आदौ दृश्यते ॥

No. 503 (1682/4).

हंसोपनिषत्.

Haṁsopaniṣat.

Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—3–4.
Lines on a page—7.
Letters in a line—32.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

No. 502 **कोशवत्.**

उपसंहारः—

No. 502 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 502 **कोशवत्.**

वक्तव्यविशेषः—

कोशेऽस्मिन् न कोऽपि शान्तिमन्त्रो लिखितः ॥

No. 504 (3621/9).

हंसोपनिषत्.

Haṁsopaniṣat.

Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—15–16.

Lines on a page—9.
Letters in a line—24.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 502 **कोशवत्**.

उपसंहारः—

No. 502 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 502 **कोशवत्**.

वक्तव्यविशेषः—

No. 502 **कोशवत्**.

No. 505 (1973/9).

हंसोपनिषत्.

Haṁsopaniṣat.

Substance—Palm-leaf.
Size—15 × 1 inches.
Character—Nāgarī.
Folios—143-145.
Lines on a page—4.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 502 **कोशवत्**.

उपसंहारः—

No. 502 **कोशवत्**.

प्रतिपद्यविषयाः—

No. 502 **कोशवत्.**

वक्तव्याविशेषः—

कोशेऽस्मिन् कोपि शान्तिमन्त्रो न लिखितः। अन्ते तु 'आथर्वणरहस्ये हंसोपनिषत्समाप्ता' इति लिखितं दृश्यते॥

No. 506 (B 513/1).

हंसोपनिषत्.

Haṁsopaniṣat.

Substance—Paper.
Size.—8 × 6 inches.
Character—Āndhra.
Folios—101–103.
Lines on a page—11.
Letters in a line—20.

Agge of Ms.—Modern.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं पूर्णमद इति शान्तिः॥
भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद।
ब्रह्मविद्याप्रबोधो हि येनोपायेन जायते॥
सनत्कुमार उवाच—
विचार्य सर्वधर्मेषु मतं ज्ञात्वा पिनाकिनः।
पार्वत्या कथितं तत्वं शृणु गौतम तन्मतम्॥
अनाख्येयमिदं गुह्यं योगिने कोशसंनिभम्।
हंसस्य कृतिविस्तारं भुक्तिमुक्तिफलप्रदम्॥
अथ हंसपरमहंसनिर्णयं व्याख्यास्यामः—

उपसंहारः—

सदाशिवोंशकथात्मा सर्वत्रावस्थितः स्वयंज्योतिश्शुद्धो नित्यो निर्जनः शान्ततमः प्रकाशयतीति वेदानुवचनं भवतीत्युपनिषत्॥

॥ इति हंसोपनिषत्समाप्ता॥

प्रतिपाद्यविषयः—

No. 502 **कोशवत्.**

वक्तव्यविशेषः—

कोशेऽस्मिन्नियमुपनिषत् मुद्रितसमानानुपूर्वीका दृश्यते।

No. 507 (B 514/1).

हयग्रीवोपनिषत्.

Hayagrīvopaniṣat.

Substance—Paper.	Age of Ms.—Modern.
Size—8 × 6 inches.	Condition of Ms.—Good.
Character—Āhdhra.	Correct or incorrect—Correct.
Folios—173–175.	
Lines on a page—11.	Complete or incomplete—Complete.
Letters in a line—20.	

उपक्रमः—

ओं भद्रं कर्णेभिरिति शान्तिः॥ ओं नारदो ब्रह्माणमुपसमेत्योवाच। अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां, ययाऽचिरात्सर्वपापं व्यपोह्य ब्रह्मविद्यां लब्ध्वा ऐश्वर्यवान् भवति। ब्रह्मोवाच—हयग्रीवदैवत्यान् मन्त्रान् यो वेद स श्रुतिस्मृतीतिहासपुराणानि वेद। स सर्वैश्वर्यवान् भवति। त एते मन्त्राः॥

उपसंहारः—

य इमां ब्रह्मविद्यामेकादश्यां पठेत्, हयग्रीवप्रभावेन महापुरुषो भवति। स जीवन्मुक्तो भवति। ओं नमो ब्रह्मणे कारणं मे अस्त्वनिराकरणं धारयिता भूयं (यासं) कर्णयोः [1]श्रुतमामुच्योर्ध्वं मामामुष्यमोमित्युपनिषत्॥

॥ हयग्रीवोपनिषत्समाप्ता॥

---

[1] 'श्रुतं मा च्योर्ध्वं ममामुष्य ओमित्युपनिषत्' इति मुद्रितकोशे पाठः।

प्रतिपाद्यविषयः—

नारदब्रह्मप्रश्नोत्तररूपायामस्यामुपनिषदि - हयग्रीवदेवताकानुष्टुभ-पञ्चदशचतुस्त्रिंशदेकाक्षरमन्त्राणां स्वरूपविवेचनपूर्वकं तज्जापिनः फल-मुपवर्ण्य तद्देवताकानुमन्त्रा अपि निर्दिष्टा दृश्यन्ते ॥

वक्तव्यविशेषः—

इयमुपनिषत् मुद्रितसमानानुपूर्वीका अस्मिन् कोशे उपलभ्यते ॥

No. 508 (3581/31).

हयग्रीवोपनिषत्.

Hayagrīvopaniṣat.

Substance—Palm-leaf.
Size—20 × 2¼ inches.
Character—Āndhra.
Folio—35th, one side only.
Lines on a page—3.
Letters in a line—104.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incompelet—Complete.

उपक्रमः—

भद्रं कर्णेभिरिति शान्तिः ॥ अथ हयग्रीवं एकाक्षरेण ब्रह्मविद्यां प्रवक्ष्यामि । ब्रह्मा महेश्वराय महेश्वरात्सङ्कर्षणः सङ्कर्षणान्नारदः नारदाद्व्यासः व्यासेन्न (सो) लोकानां (केभ्यः) प्रयच्छति । (प्रायच्छत्) हकारों सकारों ओं (मु) कारों त्रयं भवति । त्रयेण एकस्वरूपो भवति । ह्रौं (ह्सौं) बीजाक्षरं भवति । बीजाक्षरेण भवति । ह्रौं (ह्सौं) ये नरा जपदिति लोकानां सारस्वतं जातम् । सारस्वत्यवतारा भवन्ति दिक्पाल-कानां राज्ञां नागानां किन्नला भवन्ति मुखेन प्रवर्षन्ति सूर्येण कर्मयो भवन्ति सर्वेषां बीजानां हयग्रीवः सौं हयग्रीवस्वरूपो भवति अमृतं

कुरु कुरु स्वाहा। वाक्सिद्धिं श्रीसिद्धिं धियं मेधानां प्रवर्षं मेधानां वर्षं साम्राज्येन सिद्धिं कुरु कुरु स्वाहा ॥

उपसंहारः—

य इमां ब्रह्मविद्यामेकादश्यां पठेत् हयग्रीवेण जप्तो महानुभावो भवति ॥

इत्यथर्वणवेदे मन्त्रखण्डे पूर्वसंहितायामित्युपनिषत् ॥

॥ हयग्रीवोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र सारस्वतसंपत्प्रदो हयग्रीवदेवताको हयग्रीवमालामन्त्र उपदेष्टृपरम्परानिर्देशपूर्वकमाम्नायते ॥

वक्तव्यविशेषः—

एतत्कोशदृश्यमानायामस्यामुपनिषदि हयग्रीवमालामन्त्रमात्रं मुद्रितापेक्षया क्वचित्क्वचित्पाठभेदसहितं निर्दिष्टं दृश्यते। अन्ये चानुष्टुभादिमन्त्रा मुद्रितकोशे दृश्यमाना अत्र नोपलभ्यन्ते ॥

उपनिषत्परिशिष्टम्.

No. 509 (1958/5).

प्रश्नोपनिषत्.

Praśnopaniṣat.

Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Nāgarī.
Folios—16–19.
Lines on a page—10.
Letters in a line—90.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

हरिः ओम् । सुकेशा च भरद्वाजश्शैब्यश्च सत्यकामः सौर्यायणी-गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैवैते ब्रह्मपरा ब्रह्मनिष्ठा ब्रह्मान्वेषमाणा एष ह वैतत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलायन (द) मुपसन्नाः ॥

उपसंहारः—

स यथेमा नद्यस्स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्यते तासां नामरूपे समुद्र इत्येवं प्रोच्यत एवमेवास्य परिद्रष्टुरिमाष्षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्यते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति । तदेष श्लोकः—

अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः ।
तं वेद्यं पुरुषं वेद यथा मा वो मृयुः परिव्यथाः ॥ इति ॥

ता होवाचैतावदेवाहमेतत्परं ब्रह्म वेद नातः परमस्तीति । ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति। नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥

॥ इति प्रश्नोपनिषत् समाप्ता ॥

प्रतिपाद्यविषयः—

अस्यामुपनिषदि सृष्टिप्रकारः, प्राणस्य प्राधान्यं, प्राणविद्योपासनं, पराविद्याविचारः, प्रणवोपासनं, षोडशकलपुरुषविचारश्चेत्येतत्सर्वं विविच्य प्रतिपाद्यते ॥

वक्तव्यविशेषः—

प्रश्नषट्करूपेयमुपनिषत् कोऽशेस्मिन् समग्रा मुद्रिता च दृश्यते ॥

No. 510 (B 124/7).

* प्रसादजाबालोपनिषत् .

* Prasāda-Jābālopaniṣat.

Substance—Paper. | Character—Kannada.
Size—7$\frac{3}{4}$ × 6 inches. | Folios—40–41.

Lines on a page.—12.
Letters in a line—16.
Age of Ms.—Modern.
Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Conmplete.

Subject in brief :—

This Upaniṣat describes the greatness of Śiva Nirmālya and points and the necessity of a Śaiva resorting himself only to the remains of offerings made to Śiva.

उपक्रमः—

अथ हैनं महेश्वरं पैप्पलादो भगवन्तं सनत्कुमारं पप्रच्छ शिवनिर्माल्यविधिं ब्रूहीति। स होवाच शिवस्य पुरस्तात् षडक्षरीसंस्कृतं भक्ष्यभोज्यलेह्यचोष्यगुडफलक्षीरकटुकषायतिक्ताम्रलवणोपदंशं दधि मधु सर्वाणि योग्यवस्तूनि शुचिपात्रोर्ध्वं प्रतिष्ठाप्य पञ्चाक्षरविभूत्याऽभिमन्त्रितं भावशुद्धिसमर्पितं लैङ्गनिर्माल्यं जीरकं निवेदनं लैङ्गमशनमाशितुं योग्यम् ॥

उपसंहारः—

तस्मात् शैवश्शुद्ध आभ्यन्तरनिर्माल्यदोषमनवाप्य दोषचक्षुषैः प्रसादं न भुञ्जीत। गर्भवासो यावद्देहपतनं न प्रमाद्येत्। य इमं पठते गर्भजन्मजरामरणभयान्मुक्तो भवति। एतदनुष्ठानात् सर्वलोकपूज्यो भूत्वा शिवपुरं गत्वा शिवसायुज्यमवाप्नोति। ओं सत्यमों सत्यमों शिवसायुज्यमिति ॥

॥ इति प्रसादजाबालोपनिषत्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र संस्कृतस्य शिवनिवेदितस्य परिग्राह्यत्वं तन्महिमानुवर्णनपूर्वकं समर्थ्यते ॥

वक्तव्यविशेषः—

अमुद्रितेयमुपनिषत्। सकलोपनिषत्स्वाद्यन्तयोः परिदृश्यमानस्तच्छाखीयशान्तिमन्त्रोऽत्राद्यन्तयोः कुत्रापि न दृश्यते ॥

No. 511 (5043/2).

वज्रसूच्युपनिषत्.
Vajrasūcyupaniṣat.

Substance—Palm-leaf.
Size—$14\frac{7}{8} \times 2\frac{1}{4}$ inches.
Character—Telugu.
Folio—17-19.
Lines on a page—5.
Letters in a line—50.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

वज्रसूचीं प्रवक्ष्यामि शास्त्रमज्ञानभेदनम् ।
दूषणं ज्ञानहीनानां भूषणं ज्ञानचक्षुषाम् ॥

इति वाच्यम्, ब्रह्मक्षत्रियवैश्यशूद्राश्चेति चत्वारो वर्णाः । तेषां वर्णानां ब्राह्मणः प्रधानमिति वेदवचनानुरूपम् । श्रुतिस्मृतिभिरप्युक्तम् । तत्र चोक्तमपि । को वा ब्राह्मणो नाम को जीवः को देवः का जातिः किं ज्ञानं किंज्ञानं को धर्मः किंकर्मेति । अत्रोत्तरमाह तत्र प्रथमो जविः, जीवो ब्राह्मण इति चेत्तन्न । अतीतानागतानां अनेकदेहानां जीवस्यैकरूपत्वात्, एकस्यापि जीवस्य कर्मवशादनेकशरीरसम्भवात् ॥

पुण्यैर्देवत्वमाप्नोति पापैः स्थावरमाप्नुयात् ।
समाभ्यां पुण्यपापाभ्यां मानुषः परिकीर्तितः ॥

उपसंहारः—

शमदमादिसम्पन्नः मात्सर्यतृष्णामोहशोकादिरहितः डम्भाहङ्कारादिभिः न संस्पृशेत् । वर्तत एवमुक्तलक्षणसम्पन्नः स एव ब्राह्मण इति श्रुतिस्मृतिपुराणेतिहासानामभिप्रायोऽन्यथा ब्रह्मत्वसिद्धिर्नास्त्येव । सर्वं खल्विदं ब्रह्म तदसि । तत्त्वमसि । अखण्डाद्वयपूर्णः सच्चिदानन्दस्वप्रकाशो ब्रह्मभाव इत्युपनिषत् ॥

प्रतिपाद्यविषयः—

No. 445 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

मुद्रितेयमुपनिषत् ॥ कोशालयेऽस्मिन् दृश्यमानात् No. 445 तम कोशात्पाठवैलक्षण्यमत्र दृश्यते ॥

(5) मन्त्रसंग्रहः, भाष्यं च.

No. 512 (666/1).

* "अग्ने यशस्विन्" मन्त्रव्याख्या

* "Agne Yaśaswin" mantravyākhyā.

Substance—Palm-leaf.
Size—$10\frac{1}{4} \times 1\frac{11}{16}$ inches.
Character—Nāgarī.
Folio—1.
Lines on a page—9.
Letters in a line—58.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief—

This manuscript explains the meaning of the mantra "Agne Yaśaswin."

उपक्रमः—

हे अग्ने यशसा कीर्त्या इमं यजमानं अर्पय समर्पय। इमं यजमानं कीर्तिमन्तं कुर्वित्यर्थः। ननु अकीर्तिमान् स्वयं कथं परं कीर्तिमन्तं करोतीत्याशङ्क्य अग्नेरपि कीर्तिमत्त्वं विशेषणमुखेनाभिधत्ते— यशस्विन्निति। तथा च कीर्तिसंपन्नप्रार्थनात्तदाश्रयणाच्च तत्प्राप्तिर्भवत्येव। नन्वत्र कीर्तेरपुरुषार्थत्वात् तत्प्रार्थना न युक्ता, लोके पुरुषार्थप्रार्थनाया एव युक्तत्वात्। पुरुषार्थश्च सुखं दुःखनिवृत्तिर्वा, कीर्तेस्तदन्यतरत्वाभावात् किमपुरुषार्थेन, इति चेन्मैवम् ॥

उपसंहारः—

परमेष्ठी परमे ब्रह्मणि तिष्ठतीति परमेष्ठी ब्रह्मनिष्ठो भूयादित्यर्थः। सुवर्चाः शोभनं वर्चो यस्य स सुवर्चाः। 'सान्तमहतः संयोगस्य' इत्युपधादीर्घः। अयं सुन्दरो भूयादित्यर्थः। समानानामुत्तमश्लोको अस्तु—समानानां ज्ञानतो वयसा रूपादिना च तुल्यानां मध्ये उत्तमश्लोकः पुण्यश्लोक इति कीर्तितो भूयादित्यर्थः। एतादृशमन्त्रपठितसकलश्रेयस्संपन्नोऽयं यजमानो भूयादित्याशीरुक्तिः॥ ओम्॥

प्रतिपाद्यविषयः—

तैत्तिरीयसंहितापञ्चमकाण्डीयसप्तमानुवाकगतस्य यजमानोद्देश्यककीर्त्याद्याशंसनपरस्य मन्त्रस्यात्रार्थविवरणं दृश्यते॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं मन्त्रविवरणं समग्रममुद्रितं च परिदृश्यते॥
व्याख्यातुर्नाम चात्र नोपलभ्यते॥

No. 513 (4280/1).

अभिश्रवणमन्त्रसंग्रहः.

Abhiśravaṇamantrasaṁgrahaḥ.

Substance—Palm-leaf.
Size—$17\frac{1}{8}\times1\frac{3}{8}$ inches.
Character—Grantha.
Folios—16.
Lines on a page—7.
Letters in a line—44.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन। तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसः स्थपिष्ठैः। तव भ्रमास आशु या पतन्त्यनुस्पृश[धृष]ता शोशुचानः। तफ्रो(पू)ँष्यग्ने जुह्वा तङ्गानसन्दितो विसृज विष्वगुल्काः॥

उपसंहारः—

ब्रह्मणस्सायुज्यꣳ सलोकतां यन्ति । एतासामेव देवतानाꣳ सायुज्यं सार्ष्टिताꣳ समानलोकतां यन्ति । य एतदुपयन्ति । ये चैनत् प्राहुः । येभ्यश्चैनत्प्राहुः ॥ हरिः ओम् ॥

प्रतिपाद्यविषयः—

पैतृके कर्मणि निमन्त्रितविप्रभोजनकाले तच्छ्रावणोपयुक्ताः श्राद्धकर्त्रादिभिः पठनीयाः पितृप्रीतिकरास्तैत्तिरीयशाखागता अभिश्रवणाख्या मन्त्रा अत्रास्नाताः ॥

वक्तव्यविशेषः—

एते मन्त्राः संहिताब्राह्मणोपनिषदन्तर्गता अध्येतृपरम्परावगताश्च । कोशेऽस्मिन्नयं ग्रन्थस्समग्रो मुद्रितश्च दृश्यते ॥

No. 514 (B 9).

* आश्वलायनगृह्यमन्त्रव्याख्या.

* Āśvalāyanagṛhyamantravyākhyā.

Author—Haradattācārya.
Substance—Paper.
Size—$7\frac{5}{8} \times 5\frac{3}{4}$ inches.
Character—Telugu.
Folios—143.
Lines on a page—13.
Letters in a line—16.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

Subject in brief:—

This work explains the meaning of the hymns uttered while performing the domestic rites and ceremonies according to the Gṛhya Sūtra of Āśvalāyana.

उपक्रमः—

प्रणिपत्य महादेवं हरदत्तेन धीमता ।
आश्वलायनसूत्रस्थमन्त्रव्याख्या विधीयते ॥

तत्र पाकयज्ञप्रशंसार्थाश्चतस्रः—

मूलम्—यस्समिधा य आहुतयो वेदेन ददाश मर्त्यो अग्नये यो नमसा स्वध्वरः ॥

व्याख्या—यस्समिधा यो मर्त्यः समिधा अग्नये, विभक्तिव्यत्ययः, अग्निं ददाश दाशतिर्दानकर्माऽन्यत्र, इह तु प्रीणने द्रष्टव्यः, अग्निं प्रीणयति । य आहुती तृतीयैकवचनस्य पूर्वसवर्णः । यश्चाहुत्या अग्निं प्रीणयति । यो वेदेन यश्च वेदेन मन्त्रब्राह्मणलक्षणेन अग्निं प्रीणयति । यो नमसा यश्च नमस्कारेणाग्निं प्रीणाति । यच्छब्दश्रुतेस्तच्छब्दोऽध्याहर्तव्यः । स स्वध्वरः स सर्वोऽपि स्वध्वरः शोभनयज्ञः ॥

उपसंहारः—

मूलम्—श्वासिनीर्घोषिणीर्विचिन्वतीस्समश्नतीस्सर्पा एतद्वो अनेन प्रीणानि ॥

व्याख्या—श्वासिनीः सर्परूपा देवस्य सेना उच्यन्ते । सम्बोधने 'वा छन्दसि' इति पूर्वसवर्णः । वेगातिशयेन श्वासोऽतिशयितो यासां ताः श्वासिन्यः, घोषिणीर्घोषवत्यः, विचिन्वत्या हन्तव्यानिति विचिन्वतीः समश्नन्त्यः सह भुञ्जानाः एवंभूताः सर्परूपास्सेनाः एतच्छोणितं वः युष्माकं भागः अनेन वः प्रीणानि अथोदन्दावृत्य? तत्र प्रदेशे क्षारितमसृगादि ताभ्य एव निवेदयति ॥

मूलम्—श्वासिनीर्घोषिणीर्विचिन्वतीस्समश्नतीस्सर्पा एतद्वो यदुपभोग्यं तद्धरध्वम् ॥

व्याख्या—श्वासिनीस्सर्पा इत्यन्तं गतम् । अत्र प्रदेशे यद्व उपभोगयोग्यं तद्धरध्वम् । शन्तातीयं जपेत् ॥ व्याख्यातं शन्तातीयम् ॥

इति हरदत्तमिश्रविरचितायामाश्वलायनगृह्यमन्त्रव्याख्यायां चतुर्थोऽध्यायः ॥

प्रतिपाद्यविषयः—

आश्वलायनीयगृह्यसूत्रे गृह्यकर्मसु विनियुक्तानां मन्त्राणामर्थः सम्यगेत्र प्रकाशितः ॥

वक्तव्यविशेषः—

कोशोऽस्मिन्नियं व्याख्या चतुर्थाध्यायान्ता दृश्यते, अमुद्रिता च ॥

No. 515 (2285/1).

एकाग्निकाण्डः (मन्त्रप्रश्नः).

Ekāgnikāṇḍaḥ or Mantrapraśnaḥ.

Substance—Palm-leaf.
Size—13 × 1⅜ inches.
Character—Grantha.
Folios—1-26.
Lines on a page—8.
Letters in a line—46.

Age of Ms.—Old.
Condition of Ms. — Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

प्रसुग्मन्ता धियसानस्य सक्षणि वरेभिर्वरा꣡ꣳ अभिषुप्रसीदत ।
अस्माकमिन्द्र उभयं जुजोषति यथ्सौम्यस्यान्धसो बुबोधति ॥
अनृक्षरा ऋजवस्सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम् ।
समर्यमा सं भगो नो निनीयाथसञ्जास्पत्य꣡ꣳसुयममस्तु देवाः ॥
अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते ।
इन्द्रापुत्रघ्नीं लक्ष्म्यं तामस्यै सवितस्सुव ॥
अघोरचक्षुरपतिघ्नेधि शिवा पतिभ्यस्सुमनास्सुवर्चाः ।
जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥

उपसंहारः—

शतं जीवन्तु शरदः पुरूचीस्तिरो मृत्युं दधता पर्वतेन ॥ क्रेष्यसि पराचैरष्टौ च ॥

उष्णेन वायवुदकेन। आयुर्दा देव। आगन्त्रा समगन्महि। योगे-योगे। सुश्रवस्सुश्रवसम्। परि त्वाऽग्ने। इमꣳस्तोममर्हते। आयुष्यं वर्चस्यम्। मयि पर्वतपूरुषम्। त्रय्यै विद्यायै। धाताददातु नो रयिम्। अश्मा भव। मा ते कुमारम्। नक्तंचारिण उरस्पेशान्। यद्भूमेः क्रूरम्। इन्द्र जहि दन्दशूकम्। परमेष्ठ्यसि परमाम्। यन्मे माता। पृथिवी ते पात्रम्। उक्थ्यश्चास्यतिरात्रश्च। या त एषा रराट्या तनूः॥ हरिः ओम्॥

प्रतिपाद्यविषयः—

प्रश्नद्वयात्मकेऽस्मिन् प्रथमप्रश्ने—वरप्रेषणप्रभृतिसमावेशनान्तपूर्व-संस्कारोपयोगिनो दंपत्योर्हृदयसंसर्गफलकहोमोपयुक्ताः पतिवशीकर-णादिकर्मसु विनियुक्ताश्च मन्त्रा आम्नायन्ते॥

द्वितीयप्रश्ने—सीमन्तोन्नयनप्रभृत्यन्नप्राशनान्तकर्मोपयुक्ता गृहनिर्मा-णग्रहगृहीताभिमन्त्रणसर्पबल्याग्रयणेशानवलिमासिश्राद्धाष्टकाश्राद्धोप-योगिनः कतिचित्काम्यनैमित्तिककर्मविशेषोपयुक्ताश्च मन्त्राः श्रूयन्ते॥

वक्तव्यविशेषः—

कृष्णयजुर्वेदीयसंहिताद्यन्तर्गताः केचिन्मन्त्राः, कतिचिदन्ये खिल-मन्त्राश्चेति कृष्णयजुश्शाखापूर्वप्रयोगीयसर्वमन्त्राणामाकरभूतमिदं मन्त्र-प्रश्नद्वयमिति ज्ञायते। मध्येऽत्र ग्रन्थलोपो भूयान् परिदृश्यते। मुद्रितश्चायं ग्रन्थः॥

एकाग्निसाध्यगृह्यकर्मोपयुक्तमन्त्राणामत्राम्नानादिदमेकाग्निकाण्ड मित्यभिधीयते। एतद्भाष्यकोशेषु आदौ वैश्वदेवमन्त्रव्याख्यानदर्शनेऽपि अत्रत्यमन्त्रप्रश्नमूलकोशेषु सर्वेष्वप्यादौ वैश्वदेवमन्त्रलेखनादर्शनात् न त एकाग्निकाण्डाम्नाता इति ज्ञायते। अत एव श्रीहरदत्तभाष्यादौ 'आचार्या आदितो वैश्वदेवमन्त्रानधीयते' इति भाषितम्॥

No. 516 (4280/2).

एकाग्निकाण्डः (मन्त्रप्रश्नः).

Ekāgnikāṇḍaḥ or Mantrapraśnaḥ.

Substance—Palm-leaf. | Character—Grantha.
Size—$17\frac{1}{8} \times 1\frac{3}{8}$ inches. | Folios—1–42.

Lines on a page—5.
Letters in a line—44.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

प्रसुगमन्ता धियसानस्य सक्षणिं
वरेभिर्वराꣳ अभिषुप्रसीदत ।
अस्माकमिन्द्रं उभयं जुजोषति
यथसौम्यस्यान्धसो बुबोधति ॥
अनृक्षरा ऋजवस्सन्तु पन्था
येभिस्साखायो यन्ति नो वरेयम् ।
समर्यमा सं भगो नो निनी-
याथसञ्जास्पत्यꣳसुयममस्तु देवाः ॥
अघ्नातृघ्नीं वरुणापतिघ्नीं बृहस्पते ॥
इन्द्रापुत्रघ्नीं लक्ष्म्यं तामस्यै संवितस्सुव ॥
अघोरचक्षुरपतिघ्नेधि शिवा
पतिभ्यस्सुमनास्सुवर्चाः ।
जीवसूर्देवकामा स्योना शं नो
भव द्विपदे शं चतुष्पदे ॥

उपसंहारः—

यद्भूमेष्षड्विꣳशतिः कूर्कुरः पञ्चविꣳशतिरिन्द्र-जहि द्वाविꣳशतिः परमेष्ठ्यसि परमामष्टौ यन्मे माता पृथिवी ते पात्रमेकाविꣳशतिरेकाविꣳशतिरुकूथ्यश्च त्रयोविꣳशतिर्यात एषाऽष्टाविꣳशतिः ।

या त एषा रराट्या तनूः । उकूथ्यश्चास्यतिरात्रश्च । पृथिवी ते पात्रं । यन्मे माता । परमेष्ठ्यसि परमां । इन्द्र जहि दन्दशूकं । कूर्कुरस्सुकूकुरः । यद्भूमेः क्रूरं । नक्तञ्चारिण उरस्पेशान् । मा ते कुमारं । अश्मा भव परशुर्भव । धाता दधातु ने रयिम् । त्रय्यै विद्यायै । मयि पर्वतपूरुषं । आयुष्यं वर्चस्यं । इमꣳस्तोममर्हते । परि त्वाऽग्ने । सुश्रवस्सुश्रवसं मा कुरु । योगे योगे तवस्तरं । आगन्त्रा समगन्महि । आयुर्दा देवजरसं गृणानः । उष्णेन वायवुदकेनेहि ।

उष्णेन धातोकूथ्यश्च द्वाविꣳशतिः ॥

प्रतिपद्यविषयाः—

No. 515 कोशवत्.

वक्तव्यविशेषः—

No. 515 कोशवत्.

No. 517 (1452/3).

एकाग्निकाण्डः (मन्त्रप्रश्नः).

Ekāgnikāṇḍaḥ or Mantrapraśnaḥ.

Substance—Palm-leaf.
Size—$16\frac{3}{4} \times 1\frac{3}{8}$ inches.
Character—Telugu.
Folios—29.
Lines on a page—6.
Letters in a line—80.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 515 कोशवत्.

उपसंहारः—

No. 515 कोशवत्.

प्रतिपाद्यविषयः—

No. 515 कोशवत्.

वक्तव्यविशेषः—

No. 515 कोशवत्.

No. 518 (1511/2).

एकाग्निकाण्डः (मन्त्रप्रश्नः).

Ekāgnikāṇḍaḥ or Mantraprasnaḥ.

Substance—Palm-leaf.
Size—$17\frac{1}{8} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—63-88.
Lines on a page—8.
Letters in a line—48.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 515 कोशवत्.

उपसंहारः—

No. 515 कोशवत्.

प्रतिपाद्यविषयः—

No. 515 कोशवत्.

वक्तव्यविशेषः—

No. 515 **कोशवत्**.

No. 519 (1703/2).

एकाग्निकाण्डः (मन्त्रप्रश्नः).

Ekāgnikāṇḍaḥ or Mantrapraśnaḥ.

Substance—Palm-leaf.
Size—$13\frac{7}{8} \times 1\frac{5}{8}$ inches.
Character—Grantha.
Folios—124-141.
Lines on a page—10.
Letters in a line—54.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 515 **कोशवत्**.

उपसंहारः—

No. 515 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 515 **कोशवत्**.

वक्तव्यविशेषः—

No. 515 **कोशवत्**.

No. 520 (1474/1).

एकाग्निकाण्डः (मन्त्रप्रश्नः).

Ekāgnikāṇḍaḥ or Mantrapraśnaḥ.

Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches.

Folios—1-13.
Character—Telugu.

Lines on a page—7.
Letters in a line—58.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 515 कोशवत्.

उपसंहारः—

अमीवहा रूवास्तोष्पते विश्वा रूपाण्याविशन् सखा सुशेव एधि नः। शिव ꣳशिवम् ॥

प्रतिपाद्यविषयः—

No. 515 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

आदितो द्वितीयप्रश्ने पञ्चदशखण्डान्तोऽयमत्र दृश्यते ॥

No. 521 (919/1).

एकाग्निकाण्डः (मन्त्रप्रश्नः).

Ekāgnikāṇḍaḥ or Mantraprasnaḥ.

Substance—Palm-leaf.
Size—$16\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Telugu.
Folios—8.
Lines on a page—5.
Letters in a line—70.
Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रम.—

यद्धूमेः क्रूरं तदितो हरामि पराचीं निर्ऋतिं निर्वासयामि। स्योना पृथिवि भवानृक्षरा निवेशनी यच्छा नः शर्म सप्रथाः ॥

उपसंहारः—

पृथिवी ते पात्रं । यन्मे माता । परमेष्ठ्यसि परमां । इन्द्र जहि दन्दशूकम् । कूर्कुरस्तुकूर्कुरः । यद्भूमेः क्रूरम् ॥

प्रतिपाद्यविषयः—

No. 515 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन् अयं द्वितीयप्रश्ने पञ्चदशखण्डप्रभृति आसमाप्ति दृश्यते ॥

No. 522 (1452/1).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍaḥ (Mantrapraśnaḥ) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—$16\frac{3}{4} \times 1\frac{3}{8}$ inches.
Character—Telugu.
Folios—15.
Lines on a page—7.
Letters in a line—80.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

प्रणिपत्य महादेवं हरदत्तेन धीमता ।
एकाग्निकाण्डमन्त्राणां व्याख्या सम्यग्विधीयते ॥

तत्र तावदाचार्या आदितो वैश्वदेवमन्त्रानधीयन्ते(ते) । तत्र चोक्तमुभयतः परिषेचनं यथा पुरस्तादिति । तत्र परिषेचनमन्त्राः पूर्वं व्याख्येयाः । अदितेऽनुमन्वस्वेति । अदितिर्नाम देवानां माता । हे अदिते अनुमन्यस्व मया क्रियमाणं कर्म अनुजानीहि । अनुमतिरित्यनुमन्त्री

ऊनचन्द्रा पूर्णमासी। सरस्वती वाग्देवता। छान्दसो गुणः। हे देव सवितः सर्वस्याप्यनुज्ञातः अस्मानपि प्रसुव अनुजानीहि। अथ वैश्वदेवमन्त्राः। 'तेषां मन्त्राणामुपयोगे द्वादशाहमधश्शय्या' इत्यादि। उपयोगः नियमपूर्वकं विद्याग्रहणम्। कर्तुरेव व्रतम्। केचित्पत्न्या अपि इच्छन्ति। 'अग्नये स्वाहा' यथा ओमित्यनुज्ञाक्षरं तथा स्वाहाकारः . . . . प्रदानार्थः। सोमाय स्वाहा। केचिदिमं मन्त्रं नाधीयन्ते(ते)। विश्वेभ्यो देवेभ्यः सर्वेभ्यो देवेभ्यः। ध्रुवाय एकरूपाय वृद्धिक्षयरहिताय भूमाय भूम्ने ब्रह्मणे। "भूमा त्वेव विजिज्ञासस्व" इति छान्दोग्यम्। ध्रुवा निश्चला क्षितिर्गतिः यस्य कार्यवर्गं प्रति तस्मै ध्रुवक्षितये। तथा अच्युताक्षितये। अग्नये स्विष्टकृते। रुद्रोऽग्निस्स्विष्टकृत् स्विष्टं सुहुतं करोतीति। पूर्ववत्परिषेचनम्। अन्वमंस्थाः। अनुज्ञातवती। प्रासावीः अनुज्ञातवान्॥ अथ बलिहरणमन्त्राः—

उपसंहारः—

एतन्निबन्धना मे इन्द्रियादीनां वृद्धं माभूत्। ब्राह्मणामन्त्रणे सम्प्रतन्वानः अङ्गिरात्मानं संसृजन् सुकृता सुष्ठु कार्यं करोतीति सुकृत् तेन ब्रह्मणा कृते। मया युक्तेन। अगारस्थूणावरोहणादिषु होममन्त्रा इमं मे वरुणेति पञ्च गताः। अभिमृतेभ्यो दक्षिणतोऽश्मानं परिधिं दधाति। इममश्मानं जीवेभ्यः जीवतां शरदः पुरूचीः बहूनि दिवसान् जीवतु? मृत्युस्त्वनेन पर्वतेन अश्मना तिरोदधताम् तिरोहितं कुर्वन्तु?॥

॥ इत्येकाग्निकाण्डमन्त्रे द्वितीयप्रश्नव्याख्या समाप्ता॥

प्रतिपाद्यविषयः—

आपस्तम्बीयगृह्यसूत्रोक्तानां गृह्यकर्मणां अनुष्ठानकाले सूत्रकारेण विनियुक्तानां एकाग्निकाण्डाम्नातानां मन्त्राणामर्थः सम्यक् विशदीकृतोऽत्र दृश्यते॥

वक्तव्यविशेषः—

मुद्रितोऽयं ग्रन्थः, समग्रश्चात्र दृश्यते॥ मुद्रितात्पाठवैलक्षण्यमत्र क्वचित्क्वचिद्दृश्यते॥

No. 523 (137).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍaḥ (Mantrapraśnaḥ) Bhāṣyam.

Author—Haradattācārya.
Sustance—Palm-leaf.
Size—$16\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Telugu.
Folios—55.
Lines on a page—7.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 522 **कोशवत्**.

उपसंहारः—

No. 522 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 522 **कोशवत्**.

वक्तव्याविशेषः—

No. 522 **कोशवत्**.

No. 524 (601).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍaḥ (Mantrapraśnaḥ) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—$16\frac{3}{8} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—56.
Lines on a page—9.

Letters in a line—60.

Age of Ms.—Old.

Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Incomplete.

उपक्रमः—

No. 522 **कोशवत्**.

उपसंहारः—

No. 522 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 522 **कोशवत्**.

वक्तव्यविशेषः—

No. 522 **कोशवत्**.

No. 525 (650).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍaḥ (Mantrapraśnaḥ) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—$17\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Telugu.
Folios—73.
Lines on a page—6.
Letters in a line—70.

Age of Ms.—Old.

Condition of Ms.—Good.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 522 **कोशवत्**.

उपसंहारः—

No. 522 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 522 **कोशवत्**.

वक्तव्यविशेषः—

No. 522 **कोशवत्**.

No. 526 (1039/1).

एकाग्निकाण्डं (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍaḥ (Mantraprasnaḥ) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—18 × 1¼ inches.
Character—Telugu.
Folios—86.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 522 **कोशवत्**.

उपसंहारः—

No. 522 **कोशवत्** ॥

प्रतिपाद्यविषयः—

No. 522 **कोशवत्**.

वक्तव्यविशेषः—

No. 522 **कोशवत्**.

No. 527 (1932).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍaḥ (Mantrapraśnaḥ) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 2$ inches.
Character—Nāgarī
Folios—79–116.
Lines on a page—10.
Letters in a line—86.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 522 **कोशवत्.**

उपसंहारः—

No. 522 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 522 **कोशवत्.**

वक्तव्यविशेषः—

No. 522 **कोशवत्.**

No. 528 (2339/1).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍaḥ (Mantrapraśnaḥ) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—$16\frac{3}{8} \times 2$ inches.
Character—Grantha.

Folio—35.
Lines on a page—12.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 522 **कोशवत्**.

उपसंहारः—

No. 522 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 522 **कोशे द्रष्टव्यः**.

वक्तव्यविशेषः—

No. 522 **कोशवत्**.

No. 529 (2388/2).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍa (Mantrapraśna) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Telugu.
Folios—80.
Lines on a page—7.
Letters in a line—62.
Age of Ms.—Old.
Condition of Ms—Good
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 522 **कोशवत्**.

उपसंहारः—

No. 522 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 522 **कोशवत्**.

वक्तव्यविशेषः—

No. 522 **कोशवत्**.

No. 530 (2746).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍa (Mantraprasna) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—10 × 1¼ inches.
Character—Telugu.
Folios—94.
Lines on a page—7.
Letters in a line—40.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 522 **कोशवत्**.

उपसंहारः—

No. 522 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 522 **कोशवत्**.

वक्तव्यविशेषः—

No. 522 **कोशवत्**.

No. 531 (3107/1).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम् :

Ekāgnikāṇḍa (Mantraprasna) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—17 × 1⅝ inches.
Character—Grantha.
Folios—69.
Lines on a page—8.
Letters in a line.—64.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten.
Correcet or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 522 **कोशवत्.**

उपसंहारः—

No. 522 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 522 **कोशवत .**

वक्तव्यविशेषः—

No. 522 **कोशवत्.**

No. 532 (2283/10).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम् .

Ekāgnikāṇḍa (Mantraprasna) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—15⅞ × 1¾ inches.
Character—Grantha.
Folios—71–105.
Lines on a page—10.

Letters in a line—70.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 522 कोशवत्.

उपसंहारः—

यदि वृक्षात् यदि वाऽन्तारिक्षात्फलमभ्यपतत् ममोपरि तत् वायुरेव। उका

प्रतिपाद्यविषयः—

No 522 कोशे द्रष्टव्यः.

प्रतिपाद्यविषयः—

किञ्चिदूनं समग्रप्रायमेवेदमत्र दृश्यते ॥

No. 533 (4520/1).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍa (Mantrapraśna) Bhāṣyam.

Substance—Palm-leaf.
Size—$12\frac{1}{4} \times 1\frac{1}{5}$ inches.
Character—Nāgarī.
Folios—72.
Lines on a page—7.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अथ विवाहमन्त्राः—

प्रसुगमन्ता धियसानस्य सक्षणि वरेभिर्वरां अभिषुप्रसीदत।
अस्माकमिन्द्र उभयं जुजोषति यथ्सौम्यस्यान्धसो बुबोधति ॥

प्रसुग्मन्ता प्रकर्षेण सुष्ठु च गन्तारः धियसानस्य ध्यायमानस्य सक्षणि समाने क्षणे ध्यानानन्तरमेव वरेभिः वरैः श्रेष्ठैः पथिभिः वरान् वरयितव्यान् कन्यायाः पित्रादीन् अभि प्रति सुप्रसीदत सुष्ठु प्रकर्षेण च गच्छत। हे सुहृदः इन्द्रः अस्माकं इन्द्र उभयं मम च कन्यायाश्चेति आवयोर्युगं इन्द्रो जुजोषति सेवते तस्याप्यनुमतमित्यर्थः। तस्मात् यत्सौम्यस्यान्धसः द्वितीयार्थे षष्ठी सोऽस्माकमन्नं दास्यमानं आवाभ्यां बुबोधति॥

अनृक्षरा ऋजवस्सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम्।
समर्यमा सम्भगो नो निनीयात्सञ्जास्पत्यꣳ सुयममस्तु देवाः॥

उपसंहारः—

कुमार्या अभिमन्त्रणम्—

सर्वस्मादात्मनस्सम्भृताऽसि सा जीव शरदश्शतम्॥

सर्वस्मादात्मनः अङ्गादङ्गादित्यर्थः॥ शेषं सुगमम्। उत्तरैः कुमारं प्राशयेदन्नप्राशने—

भूरपां त्वौषधीनाꣳरसं प्राशयामि शिवास्त आप ओषधयः सन्त्वनमीवास्त आप ओषधयः सन्त्वसौ, भुवोऽपाꣳस्वरपां भूर्भुवस्स्वरपां त्वौषधीनाꣳरसं प्राशयामि शिवास्त आप ओषधयः सन्त्वनमीवास्त आप ओषधयः सन्त्वसौ॥

व्याहृतय उच्चारणमात्रेणोपकारकाः, अपामोषधीनाꣳरसं प्राशयामि, ता आप ओषधयश्च शिवास्सन्तु, अनमीवा अरोगाश्च आरोग्यहेतवश्च सन्तु। असौ यज्ञशर्मन्। उत्तरत्र व्याहृतिमात्रं भिद्यते। अन्यत्समानम्॥

उष्णेन वायवुदकेनेत्येष गतः।
गृहनिर्माणे पालाशेनोदूहति—

प्रतिपाद्यविषयः—

No. 522 कोशवत्.

वक्तव्यविशेषः—

मुद्रितादस्य वैलक्षण्यं तत्र तत्र पाठभेदाज् ज्ञायते। अस्मिन् कोशे द्वितीयप्रश्नगतचतुर्दशखण्डसमाप्तिपर्यन्तमिदं भाष्यं समुपलभ्यते॥

No. 534 (B 10/1).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍa (Mantraprasna) Bhāṣyam.

Author—Haradattācārya.
Substance—Paper.
Size—$8\frac{1}{8} \times 6\frac{1}{5}$ inches.
Character—Kannada.
Folios—29.
Lines on a page—13.
Letters in a line—20.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

यन्मूमेः क्रूरं यदस्थ्यादि भूमेः क्रूरं अस्थिकण्टकादि तत् इतः अस्मादेशात् हरामि अपनयामि। या चात्र निर्ऋतिः अलक्ष्मीः स्थिता तां निर्ऋतिमपि पराचीं पराङ्मुखीं निर्वाहयामि निर्वासयामि ॥

उपसंहारः—

No. 522 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 522 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं द्वितीयप्रश्नगतपञ्चदशखण्डप्रभृति समग्रं दृश्यते ॥

No. 535 (2388/3).

एकाग्निकाण्ड (मन्त्रप्रश्न) भाष्यम्.

Ekāgnikāṇḍa (Mantraprasna) Bhāṣyam.

Author—Haradattācārya.
Substance—Palm-leaf.
Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Telugu.

Folios—53–80.
Lines on a page—7.
Letters in a line—62.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अथोपनयनमन्त्रा व्याख्यायन्ते—तत्रोष्णा अपः शीतास्वानयति—उष्णेनेति। हे वायो उष्णेनोदकेन उष्णमुदकं गृहीत्वा एहि आगच्छ। किमर्थं? अदितिः केशान् वपतु आदित्या वपने अनुग्रहकर्तृत्वं, एवं वायोरुदकानयने। उत्तरया शिर उनत्ति—

उपसंहारः—

अपामोषधीनां च रसं त्वा त्वां प्राशयामि। ता आप ओषधयश्च शिवाः सन्तु। अनमीवाः अरोगाः आरोग्यहेतवश्च सन्तु। असौ यज्ञशर्मन्। उत्तरेषु व्याहृतिमात्रं भिद्यते। अन्य . . . । उष्णेन वायवुदकेनत्येषोऽनुवाको गतः ॥

॥ इति मन्त्रप्रश्नयोः भाष्यं सम्पूर्णम् ॥

प्रतिपाद्यविषयः—

No. 522 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

द्वितीयप्रश्ने आदितः प्रभृति चतुर्दशखण्डपर्यन्तं भाष्यमस्मिन् कोशे परिदृश्यते ॥

No. 536 (1299/24).

ओषधिसूक्तम्.

Oṣadhi Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—65–66.

Lines on a page—6.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—
Incorrect.
Complete or incomplete—
Complete.

उपक्रमः—

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥

उपसंहारः—

ओषधयस्संवदन्ते सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥

त्वमुत्तमाऽस्योषधे तव वृक्षा उपस्तयः उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभि दासति ॥

प्रतिपाद्यविषयः—

ज्वरादिनिवारणार्थमार्जनोपयोगिन्यस्मिन् त्रयोविंशत्यृचात्मके सूक्ते ओषधिप्रशंसनेन दीक्षितस्य ज्वराद्यपनयनप्रार्थनमभिधीयते ॥

वक्तव्यविशेषः—

अष्टमाष्टकस्थपञ्चमाध्यायगताष्टमवर्गमारभ्य एकादशवर्गान्तं ऋक्संहितान्तर्गतमिदं सूक्तमोषधिदेवताकत्वादोषधिस्तोत्ररूपत्वाच्च ओषधिसूक्तमित्युच्यते । कोशेऽस्मिन्निदं सूक्तं समग्रं दृश्यते । मुद्रितं च ॥

No. 537 (1299/33).

कर्णसूक्तम्.

Karṇa Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—99–103.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

आधीषमाणायाः पतिः शुचायाश्च शुचस्य च ।
वासो वायो वीनामा वासांसि मर्मृजत् ॥

उपसंहारः—

. . . एकं पर उत एकं तृतीयेन ज्योतिषा संविशस्व ।
संवेशने तन्वा३श्चारुरेधि प्रियो देवानां परमे जनित्रे ॥

प्रतिपाद्यविषयः—

अन्त्येष्ट्युपयुक्तेऽस्मिन् सूक्ते—मृतस्य संस्कारेतिकर्तव्यताप्रतिपादनपूर्वकं तस्योत्तमगत्यवाप्त्यादिकमाशंस्यते ॥

वक्तव्यविशेषः—

तत्र तत्र स्थितास्सूक्तान्तर्गता ऋचस्संगृह्यात्र निर्दिष्टाः । एता ऋचो मुद्रिताश्च ॥

No. 538 (2283/8).

*कूश्माण्डहोममन्त्रभाष्यम्.

* Kūśmāṇḍahomamantra Bhāṣyam.

Substance—Palm-leaf.
Size—$15\frac{7}{8} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—56-61.
Lines on a page—13.
Letters in a line—80.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This commentary explains the mantras that have to be uttered while performing the sacrifice, called Kūśmāṇḍahoma, which is intended to absolve the performer from his sins and points out the Adhikāri, the Saṅkalpa and the rules relating to the above sacrifice.

उपक्रमः—

उदगयने वसन्ते त्वमावास्यायां पौर्णमास्यां वा केशश्मश्रुलोमानि वापयित्वा ब्रह्मचारिकल्पो व्रतमुपैति संवत्सरं मासं चतुर्विंशतिरात्रीष्षड्रात्रीस्तिस्रो रात्रीर्वा न मांसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात् पयोभक्ष इति प्रथमः कल्पः ॥

उपसंहारः—

स नो भुवनस्य पते . . . . यच्छ। भुवनस्य सर्वलोकस्य पते पालक यस्य तव उपरितनलोकद्वये पृथिव्यां च गृहास्सन्ति स त्वं नः अस्मभ्यं उरु विपुलं शर्म सुखं यच्छ। तदेवास्मै ब्रह्मणे ब्राह्मणजातियुक्ताय क्षत्रियजातियुक्ताय च महि शर्म यच्छ अस्मत्सुखं देहि। 'प्रजापते न त्वत्' इति पिण्डपितृयज्ञे व्याख्याता, व्याहृदयो ह्याधाने। 'यदस्य कर्मणः' इति दर्शपूर्णमासप्रायश्चित्ते व्याख्याता। वामदेव्यानि यजूंषि।

अदितेऽन्वमꣳस्थाः प्रासावीः पूर्वपरिषेचनेनैव व्याख्यातानि। स्रुतत्वद्योतनार्थो ? लकारप्र(व्य)त्ययः ॥

प्रतिपाद्यविषयः—

अत्र पातकापनोदनेप्सुभिरनुष्ठेयस्य कूश्माण्डहोमस्य अधिकारिसंकल्पनियमविशेषादिनिरूपणपूर्वकं होमाविनियुक्तमन्त्राणां विवरणं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं समग्रं दृश्यते। अमुद्रितं चैतत् ॥

No. 539 (1299/25).

गजसूक्तम्.

Gaja Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folio—66th. One side only.
Lines on a page—5.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सङ्गृभाय। महाहस्ती दक्षिणेन ॥

उपसंहारः—

इन्द्र य उ नु ते आस्त वाजो विप्रेभिस्सनित्वः।

अस्माभिस्सुतं सनुहि सद्योजुवस्ते वाजा अस्मभ्यं विश्वचन्द्राः । वशैश्च मक्षू जरन्ते ॥

॥ इति गजसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

महाव्रते निष्कैवल्ये विनियुक्तेऽस्मिन् सूक्ते—ऋग्भिर्नवभिरिन्द्रः स्तूयते ॥

वक्तव्यविशेषः—

षष्ठाष्टकस्थपञ्चमाध्यायगतसप्तत्रिंशाष्टत्रिंशवर्गद्वयात्मकमिदं सूक्तम् । इदं सूक्तमैन्द्रमिति भाष्ये भाषितम् । अत्र तु गजसूक्तमिदमिति लिखितं दृश्यते । कोशेऽस्मिन्निदं सूक्तं समग्रं दृश्यते, मुद्रितं च ॥

No. 540 (2283/9).

* गणहोममन्त्रव्याख्या.

* Gaṇahomamantra Vyākhyā.

Substance—Palm-leaf.
Size—$16\frac{7}{8} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—61–68.
Lines on a page—13.
Letters in a line—80.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Subject in brief :—

This commentary elucidates the mantras and the way of performing the sacrifice with the mantras of Kūśmāṇḍa gaṇahoma, for the expiation of sins committed in one's previous births as well as in the three states of one's everyday life, namely, waking, dream and deep sleep.

उपक्रमः—

अथ गणहोमः । तत्स्वरूपकर्तव्यताफलान्याह बोधायनः—

क्षापवित्रं सहस्राक्षो मृगारोंहोमुचौ गणौ ।
पावमान्यश्च कूश्माण्ड्यो वैश्वानर्यः ऋचश्च याः ॥
घृतौदनेन जुहुयात् सप्ताहं सवनत्रयम् ।
मौनव्रती हविष्याशी निगृहीतेन्द्रियक्रियः ॥
सिंहे म इत्यपां पूर्णे पात्रेऽवेक्ष्य चतुष्पथे ।
मुच्यते सर्वपापेभ्यो महतः पातकादपि ॥

उपसंहारः—

अवे(पे)हि पाप्मन्, पुनरपशिते(नाशितो)भवा नः पाप्मन्, सुकृतस्य लोके पाप्मन्धेह्यविहृतो यो नः पाप्मन्न जहाति । तमु त्वा जहिमो वयम् । अन्यत्रास्मन्निविश[ता]त् सहस्राक्षो अमृत्युः । यो नो द्वेष्टि स रिष्यतु । यमु द्विष्मस्तमु जहि ॥ सिंहे म मन्युरित्यादीनामर्थः-मदीयो मन्युः क्रोधः पापहेतुरस्ति सिंहे सहजमन्युं (न्यौ) अतिविनिहतोऽस्त्विति शेषः । एवमुत्तरवाक्येष्वपि ॥

प्रतिपाद्यविषयः—

जाग्रदाद्यवस्थात्रयकृतपापपरिहाराय पूर्वजन्मकृतपातकविनाशार्थं च परिपठितैः गणहोममन्त्रैः अवश्यकर्तव्यहोमप्रकारस्तत्तन्मन्त्रमन्त्रार्थप्रदर्शनपूर्वकमत्र प्रकाशितः ॥

वक्तव्यविशेषः—

अमुद्रितोऽयं ग्रन्थः समग्रप्रायश्चात्र दृश्यते । कर्तृनामधेयं नात्र निर्दिष्टम् ॥

No. 541 (1299/22).

गर्भपातनसूक्तम् .

Garbhapātana Sūktam.

Substance—Palm-leaf. | Character—Nāgarī.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches. | Folios—62-63.

Lines on a page—6.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना। अव्रस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ॥

उपसंहारः—

गर्भ एवैतच्छयानो वामदेव एवमुवाच। स य एवं विद्वान् अस्माच्छरीरादूर्ध्वमुत्क्रम्य अमुष्मिन् स्वर्गे लोके सर्वान् कामानाप्नोऽमृतस्समभवत्समभवत् ॥ यथास्थानं गमिष्यः ॥

॥ इति गर्भपातनसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

इन्द्रदेवताकेऽस्मिन् सूक्ते—गर्भस्रावणाय तत्समर्थ इन्द्रः स्तूयते ॥

वक्तव्यविशेषः—

मुद्रितान्येतत्सूक्तगतानि वाक्यानि। प्रयोगसौकर्यार्थमत्रैषां संग्रहः ॥

No. 542 (1299/30).

गर्भाधानादिमन्त्राः.

Garbhādhāna Mantrā, etc.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—84-94.

Lines on a page—6.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥

उपसंहारः—

पुरुषं वा पञ्चविंशकमिति । ततश्च दशमे मासे प्रजायते जातश्च वायुना स्पृष्टो न स्मरति जन्ममरणमन्त्ये च शुभाशुभं कर्मैतच्छरीरस्य प्रामाण्यम् ॥

प्रतिपाद्यविषयः—

गर्भाधानादिसंस्कारेषूपयुक्ताः तत्तत्कर्मसमवेतार्थस्मारका मन्त्राः प्रयोक्तृणां सौकर्यार्थमत्र संगृहीताः ॥

वक्तव्यविशेषः—

मन्त्रसंहिताकोशे मुद्रिता एते मन्त्रा दृश्यन्ते ॥

No. 543 (1684/2).

* गायत्रीभाष्यम्.

Gāyatrī Bhāṣyam.

Substance—Paper.
Size—14½ × 1¼ inches.
Character—Grantha.
Folios—9-18.

Lines on a page—7.

Letters in a line—53.

Age of Ms.—Old.

Correct or incorrect—
Correct.

Complete or incomplete—
Complete.

Subject in brief—

This is a gloss on the Gāyatrī mantra according to the tenet of Viśiṣṭādwaita system of Philosophy and gives a lucid explanation of the mantra, word by word.

उपक्रमः—

अथ गायत्रीं व्याचक्ष्महे । अथ वेदमातुर्गायत्र्या माहात्म्यस्य पण्डितपामरसाधारण्येन सर्वैर्वेदितत्वादपरिमेयत्वाच्च न लिख्यते । यद्यपि सावित्रीव्याख्याः शतशस्सन्ति । तथा मुमुक्षूत्तमस्य मन्त्ररत्नानुसन्धानैकपरस्य भगवत्प्रपन्नस्य परमैकान्तिनोऽपि हितधर्मानुष्ठानमुख्याधिकारिणस्तेषां व्याख्यातार्थानामननुसन्धेयत्वादमुख्यत्वाच्चेदानीं तदनुसन्धानानुगुण्येन व्याख्यायते । मन्त्ररत्नस्य गायत्रीविवरणत्वं च—

चतुर्विंशत्यक्षरा गायत्री पञ्चविंशाक्षरो मनुः ।
तच्छब्दवाच्यकश्श्रीमान् गायत्र्यर्थ उदीरितः ॥

इत्यादि पराशरसंहितायां स्पष्टमुक्तम् । इयं गायत्री सावित्रीदेवताका- 'सावित्रीं गायत्रीं त्रिरन्वाह' इति श्रुतेः । सवितृशब्दस्तु परमात्मभूत-श्रीमन्नारायणवाची । तथा हि वेदमन्त्रेषु "देवस्य त्वा सवितुः प्रसवे" "देवो वस्सविता प्रार्पयतु" "तत्सवितुः" इत्यादिषु सवितृशब्दस्य प्रेरकत्वार्थपरतया माधवाचार्येण तत्र तत्र व्याख्यातम् । प्रेरकत्वं हि अन्तर्यामित्वं, तत्सर्वभूतान्तर्यामिणि नारायणे विनाऽन्यत्र न सम्भवति । तथा श्रूयते बृहदारण्ये अन्तर्यामिब्राह्मणे सुबालोपनिषदि च ॥

उपसंहारः—

भगवदेकोपायोपेयानामस्माकं सम्बन्धी धिय इत्यन्वयः । प्रचोदयात् प्रेरयतु । स्वमुखोल्लासहेतुभूतपरिचर्यायामाज्ञापयत्विति यावत् ॥ अत्र प्रार्थनायां लोडिति लोट्प्रत्ययेन कैङ्कर्यप्रार्थनोक्ता । स्वकैङ्कर्ये भगवता स्वेनैव प्रेरिते सति अर्थादत्र स्वभोक्तृत्वरूपम [म] कारस्य निवृत्त-

त्वान्नमश्शब्दार्थ उक्तः । अनेन मन्त्रशेषेण उत्तरखण्डार्थ उक्तो भवति । य इति शब्देन श्रीमते नारायण इतिशब्दार्थौ, नो धियः प्रचोदयादिति कैङ्कर्यं भगवदेकप्रेरिते सति स्वभोक्तृत्वरूपममकारानवकाशान्नमश्शब्दार्थोऽप्युक्तप्रायः ॥

॥ समाप्तं गायत्रीविवरणम् ॥

प्रतिपाद्यविषयः—

अत्र विशिष्टाद्वैतमतरीत्या गायत्रीमन्त्रस्यार्थः प्रतिपदार्थविशदीकरणपूर्वकं सम्यक् प्रकाशितः ॥

वक्तव्यविशेषः—

अमुद्रितोऽयं ग्रन्थः समग्रश्चात्र दृश्यते ॥

No. 544 (C 696/31.)

* गायत्रीभाष्यम्.

* Gāyatrī Bhāṣyam.

Author—Śankarācārya.
Substance—Paper.
Size—$7\frac{1}{2} \times 3\frac{1}{4}$ inches.
Character—Devanāgarī.
Folios—3.
Lines on a page—7.
Letters in a line—26.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This commentary explains the meaning of the Gāyatrī Mantra according to the Advaita system and enters into a critical discussion regarding the roots and affixes of nouns and verbs that occur in the Gāyatri mantra.

उपक्रमः—

तदिति द्वितीयैकवचनम्। अनेन जगदुत्पत्तिस्थितिलयकारणहेतुभूतमुपनिषदि कथ्यमानं निरुपमतेजः सूर्यमण्डलाभिधेयं परं ब्रह्म अभिधीयते। सवितुरिति षष्ठ्येकवचनम्। 'षूङ् प्राणिप्रसवे' इति धातो रूपम्। सर्वस्य भूतस्य प्रसवितुरित्यर्थः। वरेण्यं नियमादिभिरपगतकल्मषैः सततं ध्येयम्। भर्गः 'भञ्जो आमर्दने' भृजि भर्जने' इति धातोर्वा रूपम्। सर्वस्य भूतजातस्य भर्गः भजतां पापभञ्जनहेतुभूतमित्यर्थः। भ्राज्दीप्ताविति धातोर्वा रूपम्। देवस्य दृष्टिदानादिगुणयुक्तस्य निरतिशयप्रकाशस्य इत्यर्थः। दीप्यतेः प्रकाश (शार्थ) त्वात्। धीमहि ध्यायेमहीत्यर्थः। 'ध्यै चिन्तायाम्' रूपेण चक्षुषा योऽसावादित्यो हिरण्मयः सोऽहमिति चिन्तयामः। धिय इति द्वितीयाबहुवचनम्॥

उपसंहारः—

नोऽस्माकं बहुधाऽभ्यस्तभेदभिन्नदृशां तथा।
प्रचोदयात् प्रेरयतु प्रार्थनैवं विशिष्यते॥
यो देवः सविताऽस्माकं धियो धर्मादिगोचराः।
प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे॥

इति शांकराचार्यमिदम्॥

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे।
चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतोऽभवं परमकं ज्योतिस्तदस्मि प्रभो॥
भानुर्दीपश्च नेत्रं च बुद्धिं चेति (द्धिश्चेति) चतुष्टयम्।
ज्ञायते येन तद्ब्रह्म तदेवाहं न संशयः॥

प्रतिपाद्यविषयः—

अत्र अद्वैतमतरीत्या गायत्रीमन्त्रार्थविवरणं दृश्यते। गायत्रीमन्त्रघटितानां सुबन्ततिङन्तपदानां प्रकृतिप्रत्ययविमर्शनं च कृतम्॥

वक्तव्यविशेषः—

कोशोऽस्मिन्नयं ग्रन्थः समग्रो दृश्यते । अमुद्रितश्चायम् । अन्ते 'शांकराचार्यमिदम्' इति लेखो दृश्यते । स च शंकराचार्यः अद्वैत-भाष्यकारो वाऽन्यो वेति परिचिन्तनीयम् ॥

No. 545 (738/9).

* गायत्रीभाष्यम्.

* Gāyatrī Bhāṣyam.

Author—Vidyāraṇya.
Substance—Palm-leaf.
Size—$14\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Nāgarī.
Folios—4.
Lines on a page—6.
Letters in a line—44.

Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This commentary gives an explanation, neither very vivid nor very brief, of the Gāyatrī mantra. An expression at the beginning "Vidyāraṇyaswāmi said" shows that the work was written by Vidyāraṇya, but it is not known whether this Vidyāraṇya is the one who was the brother of Sāyaṇa.

उपक्रमः—

यो देवस्सविताऽस्माकं धियो धर्मादिगोचराः ।
प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे ॥

विद्यारण्यस्वाम्युवाच—

सर्वदेवात्मकभर्गस्य सर्वशक्तिसम्पन्नस्य सकलप्रकाशस्य स्वयं-ज्योतिर्मयस्य परमात्मनः सर्वात्मत्वनिर्णयाय सर्वात्मकत्वब्रह्मप्रतिपा-दकान् तत्तदुपासनाप्रकारसहितान् गायत्र्यादिमन्त्रान् व्याचेष्ट ॥

उपसंहारः—

अतस्तदेव तेजः अस्माकं श्रेयस्करेषु नित्यनैमित्तिककर्मसु बुद्धि परम्परामिति प्रचोदयात् प्रेरयतु इति मन्त्रार्थः ॥

एषा व्याख्या तु गायत्र्याः
सर्वपापप्रणाशिनी ।
विज्ञातव्या प्रयत्नेन
द्विजैः सर्वशुभेप्सुभिः ॥

॥ इति गायत्रीव्याख्यानं सम्पूर्णम् ॥

प्रतिपाद्यविषयः—

अत्र गायत्रीमन्त्रस्य विवरणं नातिविस्तृतं नातिसंग्रहं च दृश्यते ॥

वक्तव्यविशेषः—

आदौ 'विद्यारण्यस्वाम्युवाच' इति लेखदर्शनात् इदं विद्यारण्यप्रणीतमिति निर्दिश्यते । स च सायणाग्रज इत्यत्र प्रमाणमन्वेषणीयम् । इदमसुद्रितं समग्रं च ॥

No. 546 (1299/29).

ग्रहयज्ञमन्त्राः.

Graha Yajña Mantras.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—78–84.
Lines on a page—6.
Letters in a line—63.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

एह्यग्न इह होता निषीदादब्धः सु पुर एता भवा नः । अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् ॥

उपसंहारः—

वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा । प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥

प्रतिपाद्यविषयः—

ग्रहयज्ञहोमकाले विनियुक्ता अग्निप्रार्थनपरा मन्त्राः सङ्गृह्यात्र विनिर्दिष्टाः ॥

वक्तव्यविशेषः—

एते मन्त्राः मुदिता दृश्यन्ते ॥

No. 547 (1299/26).

घृतसूक्तम्.

Ghṛta Sūktam.

Substance—Paper.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—66.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा। द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥

उपसंहारः—

ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ॥

संरराणे रोदसी विश्वशम्भुवा सनिं वाजं रयिमस्मै समिन्वताम् ॥

॥ घृतसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

बृहस्पतिसवे विनियुक्तेऽस्मिन् सूक्ते द्यावापृथिव्योः प्रशंसनपूर्वकमिष्टाशंसनं क्रियते ॥

वक्तव्यविशेषः—

पञ्चमाष्टकस्थप्रथमाध्यायगतचतुर्दशवर्गे दृश्यत इदं सूक्तं मुद्रितं च। घृतपदादिकत्वादिदं घृतसूक्तमिति व्यपदिश्यते। भाष्यकृता चात्रत्यघृतपदस्योदकार्थत्वं भाषितम् ॥

No. 548 (2349/9).

दुर्गासूक्तम्.

Durgāsūktam.

Substance—Palm-leaf. | Character—Grantha.
Size—11½ × 1½ inches. | Folios—80.

Lines on a page—7.
Letters in a line—42.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

जातवेदसे सुनवाम सोममरातीयतो निजहाति वेदः । स नः पर्षदतिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ तामग्निवर्णां ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥

उपसंहारः—

पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमात्सधस्थात् । स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरितात्यग्निः ॥

प्रतिपाद्यविषयः—

चोरव्याघ्रादिसर्वपीडापरिहरणार्थं जपहोमादिकर्मसु विनियुक्तं तैत्तिरीयारण्यकषष्ठप्रश्नान्तर्गतप्रथमानुवाकीयं दुर्गामन्त्रपञ्चकमस्मिन् कोशे दृश्यते ॥

वक्तव्यविशेषः—

मुद्रितं समग्रं चेदमस्मिन् कोशे दृश्यते ॥

No. 549 (B 676).

*देवीसूक्तं स्तोत्रसहितम् .

* Devī Sūktam.

Substance—Paper.
Size—$6\frac{1}{2} \times 2\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—17.
Lines on a page—7.
Letters in a line—18.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This work contains panegyrics on the Goddesses Mahāsarswatī, Mahālakṣmī, and Mahākālī and states the rules regarding the reading and teaching of those praises as well as the fruits they yield.

उपक्रमः—

(सूक्तम्)—

अहं रुद्रेभिर्वसुभिश्चरा-
म्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभ
र्म्यहमिन्द्राग्नी अहमश्विनोभा ॥
अहं सोममाहनसं बिभ-
र्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते
सुप्राव्ये३ यजमानाय सुन्वते ॥
अहं राष्ट्री सङ्गमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम् ॥

स्तोत्रं—अस्य श्रीदेवीसूक्तमालामन्त्रस्य मार्कण्डेयसुमेधसो ऋषिः। श्रीत्रयीरूपिणी महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । गायत्र्युष्णिगनुष्टप्छन्दा३सि ॥

उपसंहारः—

सूक्तम्—

अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा । परो दिवा पर एना पृथिव्यैतावती महिना संबभूव ॥

स्तोत्रम्—

भगवानुवाच—

न कुलाचारतो देवि मतिर्मेऽस्तु कदाचन ।
शिथिला देवदेवेशि सूक्तं च सफलं तव ॥

श्रीदेव्युवाच—

एवमस्त्विति चोक्त्वा च तिस्रो देव्यस्सनातनाः ।
अन्तर्धिमापुः परमामेका स्वामीप्सिताऽभवत् ॥
अथ तान्सुव्रतान् देवान् प्रोवाच वचनं मुदा ।
सन्तोषयन्तीव मुहुः कलानुग्रहक(रिका) ॥

श्रीदेव्युवाच—

शृण्वन्तु प्रीतिसंयुक्ताः ब्रह्मविष्णुमहेश्वराः ।
देवीसूक्तं परं ध्येयं भविष्यति वरार्थदम् ॥
देवीसूक्तं विना देव ये च सप्तशतीं नराः ।
श्रोष्यन्ति तेषां रक्तस्य विनाशस्स्यात्पदे पदे ॥
देवीसूक्तं विना पाठो अरण्ये रोदनं यथा ।
स्तोत्रत्रयेण चानेन पूर्णं स्तोत्रमभूदिदम् ॥

देवा ऊचुः—

मातुः सप्तशतीस्तोत्रफलश्रुतिरिहोच्यते ।
तां समाकर्ण्य जीवानां विश्वासो जायते भृशम् ॥

ऋषिरुवाच—

इति वाक्यं समाकर्ण्य ब्रह्मविष्णुशिवोदितम् ।
फलस्तुतिमथोवाच स्तोत्रस्यास्य महात्मने ॥

॥ इति श्रीरुद्रयामळ देवीसूक्तं नाम तृतीयोध्यायः ॥

प्रतिपाद्यविषयः—

महासरस्वतीमहालक्ष्मीमहाकाळीदेवीनां सूक्तं प्रत्येकमस्मिन् कोशे तत्तत्स्तोत्रसहितं निर्दिष्टम् । अस्य स्तोत्रस्य पठनपाठनादिषु च नियमः प्रदर्शितः । फलं च निर्दिष्टम् । मुद्रितरुद्रयामळग्रन्थे इदं स्तोत्रं न दृश्यते ॥

वक्तव्यविशेषः—

अमुद्रितमिदं समग्रं चात्र दृश्यते॥

No. 550 (2349/1).

* देवीसूक्तं स्तोत्रसहितम् .

* Devī Sūktam.

Substance—Palm-leaf.
Size—$11\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—6.
Lines on a page—7.
Letters in a line—36.

Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This work is the same as B 676. But the hymns on Goddess Mahāsaraswatī are different from those in the preceding work. Besides, this contains verses of meditation, Añganyāsa, Karanyāsa, etc.

उपक्रम.—

अस्य श्रीदेवीसूक्तमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः गायत्र्युष्णिगनुष्टुप्छन्दांसि महासरस्वतीमहालक्ष्मीमहाकाळ्यो देवताः । ऐं बीजं । ह्रीं शक्तिः । क्रीं कीलकम् । देवीत्रयप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

उपसंहारः—

इति वाक्यं समाकर्ण्य ब्रह्मविष्णुशिवोदितम् ।
फलस्तुतिमथोवाच स्तोत्रस्यास्य महात्मने ॥
इतिश्रीरुद्रयामळे घटतन्त्रिकायां देवीसूक्तं नाम त्रयोदशोऽध्यायः ॥

प्रतिपाद्यविषयः—

एतद्ग्रन्थप्रतिपाद्यं प्रायः B 676 कोशवेदेव । परंतु अस्मिन् कोशे महासरस्वतीस्तोत्रं B 676 कोशस्थस्तोत्रापेक्षया भिन्नं दृश्यते। अस्मिन् कोशे अङ्गन्यासकरन्यासादिकं ध्यानश्लोकादिकं च तदपेक्षया अधिकं दृश्यते ॥

वक्तव्यविशेषः—

अमुद्रितमिदं, समग्रं चास्मिन् कोशे दृश्यते ॥

No. 551 (1299/3).

देवी (लक्ष्मी) सूक्तम्.

Devī (Lakṣmī) Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—12–13.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अहं रुद्रेभिर्वसुभिश्चरम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥

उपसंहारः—

आ वात वाहि भेषजं वि वात वाहि यद्रपः त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥

प्रतिपाद्यविषयः—

अत्रादौ दृश्यमाने वर्गद्वये महालक्ष्म्याः स्वरूपशक्त्याद्यभिधानपूर्वकमेतज्जापिनः संपदादिकं संप्रार्थ्यते । ततःपरिदृश्यमानवर्गचतुष्टये अग्निवायुसूर्याः स्तूयन्ते ॥

वक्तव्यविशेषः—

ऋक्संहितायामष्टमाष्टके सप्तमेऽध्याये एकादशद्वादशवर्गयोः, द्वितीयाष्टके द्वितीयेऽध्याये अष्टमवर्गे अष्टमाष्टके सप्तमाध्याये चतुर्विंशतिपञ्चविंशतिवर्गयोश्च एतत्सूक्तं परिदृश्यते । अत्रादौ दृश्यमानं वर्गद्वयं वागाम्भ्रणीलक्ष्मीसूक्तनामभ्यां व्यवहृतं दृश्यते । ततो दृश्यमानं वर्गचतुष्टयं अग्निवायुसूर्यस्तवपरं न देवीसूक्तघटकमिति भाति ॥

No. 552 (1299/6).

देवेस्वस्त्यायुस्सुमङ्गलीमन्त्राः.

Deve Mantras.

Substance—Palm-leaf. | Character—Nāgari
Size—14⅝ × 1⅛ inches. | Folios—16–26.

Lines on a page—6.
Letters in a line—86.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—
Correct.

Complete or incomplete—
Complete.

उपक्रमः—

नमो महद्भ्यो, ममत्तुनः, कथाते, यज्ञेन यज्ञं, पराशुभ्रा, त्वेराय इन्द्र, उभाशंसा, उतनईं तवस्याम, दिवश्चिदाते, शंसामहा, त्रिरुत्तमा ॥

उपसंहारः—

अत्रेर्यथाऽनसूया वसिष्ठस्याप्यरुन्धती । कौशिकस्य यथा सती । ध्रुवैधिपोष्यामयि मह्यं त्वादाद्बृहस्पतिः । मया पत्या प्रजावती संजीव शरदश्शतम् ॥

प्रतिपाद्यविषयः—

तत्तत्कत्वङ्गतया विनियुक्ता अपि विवाहादिषु आशीर्वादार्थमुपयुक्ता देवताविशेषस्तुतिपूर्वकमायुस्सौभाग्यादिशुभाशंसनफलका ऋग्वेदीया मन्त्राः सङ्गृह्यात्र निर्दिष्टाः ॥

वक्तव्यविशेषः—

मुद्रिता इमे मन्त्राः ॥ अत्रादौ देवमन्त्राणां प्रतीकं निर्दिश्य ततस्समग्रा मन्त्रा लिखिताः, ततः स्वस्तिवाचनमन्त्रः, तत आयुर्मन्त्रः ततः सौभाग्यसुमङ्गलीमन्त्राः इत्येते मन्त्राः प्रयोक्तृसौकर्यार्थमत्र संगृहीता दृश्यन्ते ॥

No. 553 (1292/27).

पर्जन्यसूक्तम् .

Parjanya Sūktam.

Substance—Palm-leaf
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.

Character—Nāgarī.
Folios—66–72.

Lines on a page—6.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे । अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि ॥

उपसंहारः—

अथ आरणम् । अथातो रेतसः सृष्टिः-प्रजापते रेतो देवाः, देवानां रेतो वर्षं, वर्षस्य रेत ओषधयः, ओषधीनां रेतोऽन्नं, अन्नस्य रेतो रेतः, रेतसो रेतः प्रजाः, प्रजानां रेतो हृदयं, हृदयस्य रेतो मनः, मनसो रेतो वाक्,वाचो रेतः कर्म कृतमयं पुरुषो ब्रह्मणो लोकः, स इरामयो, यद्धीरामय(यस्त)स्माद्धिरण्मयो ह वा असुष्मिन् लोके संभवति हिरण्मयस्सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद ॥

॥ पर्जन्यसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

ऋग्वेदगता अनावृष्टिपरिहारार्थकजपादिषूपयुक्ता मन्त्रा अत्र संगृहीता दृश्यन्ते ॥

वक्तव्यविशेषः—

मुद्रितमिदं सूक्तम् ॥

No. 554 (1299/16).

पारमेष्ठ्यं सूक्तम्.

Pārameṣṭyam Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{5}{8}$ inches.
Character—Nāgarī.
Folios—47–48.

Lines on a page—6.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—
Correct.

Complete or incomplete—
Incomplete.

उपक्रमः—

नासतः सतः प्रजापतिः परमेष्ठी भाववृत्तो वायो यज्ञो यज्ञो जगत्यादि—

नासदासीन्नो सदासीत्तदानीं
नासीद्रजो नो व्योमा परो यत् ।
किमाऽऽवरीवः कुहकस्य
शर्मन्नम्भः किमासीत् गहनं गभीरम् ॥

उपसंहारः—

सहस्तोमाः सहछन्दस आवृतः सहप्रमा ऋषयः सप्तदैव्याः । पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्योऽ३ न रश्मीन् ॥

॥ इति पारमेष्ठ्यं सूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

परमात्माधिदेवताकेऽस्मिन् सूक्ते—परमात्मशक्तिप्रलयसृष्ट्यादिक्रमनुवर्णितं दृश्यते ॥

वक्तव्यविशेषः—

अष्टमाष्टकस्थसप्तमाध्यायगतसप्तदशाष्टादशवर्गयोरिदं सूक्तं दृश्यते, मुद्रितं च ॥

No. 555 (B 831).

* पारस्करगृह्यमन्त्रभाष्यम्.

Pāraskara Gṛhya Mantra Bhāṣyam.

Author—Murārimiśra.
Substance—Paper.
Size—$17\frac{3}{4} \times 6\frac{3}{4}$ inches.
Character—Devanāgarī.
Folios—122.
Lines on a page—12.
Letters in a line—16.
Age of Ms.—Recent.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

Subject in brief :—

This commentary gives a lucid explanation of the meaning of the hymns uttered while performing the domestic rites and ceremonies according to pāraskara or Kātyāyanīya Gṛhya Sūtra.

उपक्रमः—

प्रणम्य पूर्वं पुरुषं पुराणं तथैव कात्यायनपादपद्मम् ।
तनोति पारस्करगृह्यभाष्यं मुरारिमिश्रः पितृगृह्यभाष्यात् ॥

गृह्यप्रकाशाभिधभाष्यगर्भात् श्रीवेदमिश्रैर्विधिवत्प्रणीतात् ।
आकृष्य बन्धं विदधाति मन्त्रैर्मुरारिमिश्रः श्रुतितो विविच्य ॥

तत्र तावदावसथ्याधानमन्त्रव्याख्यानार्थं मन्त्रा उच्यन्ते । तद्यथा—

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ꣳसि प्रमुमुग्ध्यस्मत् ॥

तत्त्वा त्वं न इति द्वे आग्निवारुण्यौ अग्नीवरुणयोः स्विष्टकृते याज्यानुवाक्ये त्रिष्टुभौ । हे अग्ने त्वं नः अस्मान् विद्वान् प्रतिजानानः वरुणस्य देवस्य हेडः क्रोधं अवयासिसीष्ठाः 'यसु प्रयत्ने' अस्य ण्यन्तस्य लिङि

एतद्रूपमवपूर्वस्य, अपगमय। यस्मात् त्वं यष्टुः(जिष्टुः)यष्टृतमः वह्नितमः वोढृतमः हविषां वोढा शोशुचानः देदीप्यमान इहावसितः तस्मात् प्रार्थये। अवोपसर्गेण या प्रापणे अस्माद्धातोराशीर्विभक्तेरात्मनेपदमध्यमपुरुषस्य सीष्ठा स प्रत्ययः ण्यन्तः इनन्तः एकारागमस्थाने स उपजन आगमश्छान्दसः? अवगमयेत्यर्थः ॥

उपसंहारः—

एतेन (तन) आगच्छत हे मरुतः अद्य अस्मिन्नहनि नः अस्माकं यज्ञ अस्मिन् एवं व्यवहितानि पदानि पश्चात्सवैरेव सु साध(संबन्ध)नीयानि। किंविशिष्टः स्वतवांश्च स्वकीयं [1]ततं यस्य स स्वतवान् स्वमंशं पुरोडाशस्य भक्षत(यतु)पुनः किंभूतः प्रघासी प्रकर्षेण अदनशीलः, क्रीडी क्रीडाप्रियः, एते पञ्च चातुर्मास्यदेवाः, शाकी च शक्तः उज्जेषी च उज्जयनशीलः विमुखेन मनसा उग्रश्च भीमश्चेत्यादि सप्तनामान्येषामेतानीति श्रुतेः एषां मरुतां एतानि नामानि। [2]इन्द्रदैवीरिदित्यादि इति मारुतं यजुर्जपति। इन्द्रं राजानं दैवीर्विशो मरुल्लक्षणा अनुपश्चाद्वर्तमानं यासां ता अनुवर्त्मानः पश्चाद्गामिन इत्यर्थः। अभवन्, स्वरूपाख्यानमेतत्, उपमानमेतत् यथा इन्द्रं एता दैवीर्विशो मरुतः

प्रतिपाद्यविषयः—

पारस्करीयगृह्यसूत्रोक्तानां गृह्यकर्मसु विनियुक्तानां मन्त्राणामर्थः सम्यगत्र प्रकाशितः ॥

वक्तव्यविशेषः—

असमग्रमिदमुद्रितं चास्मिन् कोशे दृश्यते। शुक्लयजुश्शाखीयोव्वटभाष्यानुरोधि चेदं भाष्यम् ॥

---

[1] 'तपो बलम्' इति भाष्यान्तरे पाठो दृश्यते. [2] 'इन्द्रं दैवीरिति' इति भाष्यान्तरे पाठो दृश्यते ॥

No. 556 (1299/15).

पितृलिङ्गसूक्तम्.

Pitṛlingasūktam.

Substance—Palm-leaf.
Size—14⅝×1⅜ inches.
Character—Nāgarī.
Folios—47-48.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

उदीरतामवर उत्परास उन्मध्यमाः पितरस्सोम्यासः। असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥

उपसंहारः—

ये अग्निदग्धा येऽनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते । तेभिस्स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ॥

प्रतिपाद्यविषयः—

पैतृकेषु विनियुक्तेऽस्मिन् सूक्ते पितृप्रशंसनप्रार्थनादिकं दृश्यते ॥

वक्तव्यविशेषः—

मुद्रितकोशे सप्तमाष्टके षष्ठाध्याये सप्तदशाष्टादशैकोनविंशवर्गेषु परिदृश्यत इदं सूक्तम् ॥

No. 557 (863/13).

पुरुषसूक्तम्.

PuruṣaSūktam.

Substance—Palm-leaf.
Size—$8\frac{1}{2} \times 1\frac{3}{8}$ inches.
Character—Kannada.
Folios—65–67.
Lines on a page—5.
Letters in a line—36.

Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

सहस्रसिरुषा(शीर्षा)पुरुषः सहस्राक्षस्सहस्रपात् ।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥

उपसंहारः—

तस्य त्वष्टा विदधद्रूपमेति तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं

प्रतिपाद्यविषयः—

कृष्णयजुश्शाखीयेऽस्मिन् सूक्ते — परमपुरुषस्यापरिच्छिन्नज्ञानशक्तयादिमत्त्वसकलजगत्स्रष्टृत्वजगद्धातृत्वजगन्नियामकत्वादिकमाम्नायते ॥

वक्तव्यविशेषः—

समग्रप्रायं मुद्रितं चेदमत्र कोशे दृश्यते ॥

No. 558 (1299/11).

पुरुषसूक्तम् (ऋक्शाखीयम्)

Puruṣa Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—32-33.
Lines on a page—5.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 556 कोशवत्

उपसंहारः—

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानस्सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः॥

प्रतिपाद्यविषयः—

No. 557 कोशवत्.

प्रतिपाद्यविषयः—

मुद्रितकोशे अष्टमाष्टकगतचतुर्थाध्याये सप्तदशाष्टादशैकोनविंशवर्गेषु इदं सूक्तं दृश्यते। शाखान्तराधीतमपीदं सूक्तमस्यामृक्शाखायां क्वचिन्मन्त्रपौर्वापर्यादितो विलक्षणं दृश्यते॥

No. 559 (B 925).

* पुरुषसूक्तभाष्यम्.

* Puruṣa Sūkta Bhāṣyam.

Author—Raṅgācārya.
Substance—Paper.
Size—$8\frac{1}{7} \times 6\frac{1}{4}$ inches.
Character—Telugu.
Folios—58.
Lines on a page—16.
Letters in a line—20.
Age of Ms.—Recent.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

The author of this commentary is Raṅgacārya—one of the pontifices of the Mysore Parakāḷa Mutt and lived about eighty years back. It contains a lucid explanation of the Puruṣa Sūkta according to the Yajus Śākhā.

उपक्रमः—

जगज्जन्मस्थेमप्रळयकृदुपादानमखिला-
गमान्तैः संवेद्यं निरवधिसुखं ज्ञानगुणकम् ।
तदभ्यस्तानन्दं विमलममलानन्तगुणभाक्
मम श्रेयो भूयो दिशतु परमं ब्रह्म सरमम् ॥
वन्दारुब्रह्मरुद्रप्रमुखसुरगणाजस्रसंस्तूयमानः
श्रीमन्नारायणाङ्घ्र्यम्बुजयुगसततध्यानतृप्तान्तरङ्गः ।
मायावादादिनानाकुमतशमनकृत्सार्वभौमो यतीनां
श्रीमान्रामानुजार्यो मम हृदि सततं संनिधत्तां दयालुः ॥
भेदाभेदादिवादाहवविपुलमदोन्मत्तदुर्वादिदन्ति-
स्तोमप्रध्वंसपञ्चानन उरुमहिमा सर्वतन्त्रस्वतन्त्रः ।
ब्रह्माद्वैतं विशिष्टाद्वयमविकलं स्थापयन् दान्तशान्तः
श्रीमानान्नायचूडागुरुरिनिवहात्पातु मां सानुकम्पः ॥

उपसंहारः—

केचित्तु परमपुरुषेति सम्बुद्धयन्तं पदमध्याहृत्य हे परमपुरुष ते तव ह्रीश्च लक्ष्मीश्च पत्न्यावित्यादिरीत्या व्याख्यातमित्यन्तं व्याख्याय ममेति पदमध्याहृत्य मम इष्टादिकं मनिषाण मन्यस्व प्रयच्छेत्यर्थ इति व्याचख्युः। तथा च सर्वज्ञत्वसर्वशक्तित्वजगत्कारणत्वादिगुणविशिष्टश्रीमन्नारायण एव मुमुक्षूपास्य इत्यनुवाकद्वयनिर्गलितार्थ इति सुधीभिर्विभावनीयमिति संक्षेपः॥

वाधूलकुलसम्भूतरङ्गाचार्यसुधीकृतौ।
व्याख्या पुरुषसूक्तस्य करोतु कृतिनां मुदम्॥

प्रतिपाद्यविषयः—

परमपुरुषस्य अपरिच्छिन्नज्ञानशक्त्यादिमत्त्वकृत्स्नजगद्व्यापकत्वतत्स्रष्टृत्वपालकत्वादिप्रदर्शनपरस्य याजुषपुरुषसूक्तस्य सम्यग्विवरणमत्र भाष्ये दृश्यते॥

वक्तव्यविशेषः—

एतद्भाष्यप्रणेतार इतो वत्सराणामशीतेः प्राक्प्रख्याताः श्रीमन्महीशूरराजधान्यां श्रीब्रह्मतन्त्रपरकालास्थान्यामभिषिक्ताः चतुस्तन्त्रीस्वतन्त्रा यतिपुङ्गवा इति ज्ञायते। अमुद्रितं चेदम्॥

No. 560 (C 1354).

* पुरुषसूक्तभाष्यम्.

* Puruṣa Sūkta Bhāṣyam.

Author—Raṅgācārya.
Substance—Paper.
Size—$13\frac{5}{8} \times 5\frac{5}{8}$ inches.
Character—Telugu.
Folios—1–39.
Lines on a page—14.
Letters in a line—42.

Age of Ms.—Recent.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 559 **कोशवत्.**

उपसंहारः—

No. 559 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 559 **कोशवत्.**

वक्तव्यविशेषः—

No. 559 **कोशवत्.**

No. 561 (1796/3).

पुरुषसूक्तभाष्यम्.

Puruṣa Sūkta Bhāṣyam.

Substance—Palm-leaf.
Size—$19\frac{1}{8} \times 1\frac{7}{8}$ inches.
Character—Nāgarī.
Folios—68–71.
Lines on a page—10.
Letters in a line—96.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

एतैरेकादशभिरनुवाकैश्चातुर्होत्रीयचयनमन्त्रा अभिहिताः । अथ नारायणनाम्ना पुरुषसूक्तनाम्ना च व्यवह्रियमाणोऽनुवाक उच्यते । तस्य विनियोगं महाग्नावापस्तम्ब आह—"पुरस्तात्प्रतीचीं पुरुषाकृतिं चिनोति पुरुषशिरोऽस्याः शिरो भवति सहस्रशीर्षा पुरुष इत्युप-

हितां पुरुषेण नारायणेन यजमान उपतिष्ठते" इति । ब्रह्ममेधेऽपि प्रेतदाहोपस्थाने विनियोगं भरद्वाज आह "नारायणाभ्यामुपस्थानम्"। इति । अयं चोत्तरश्चेत्युभावनुवाकौ नारायणसंज्ञौ, नारायणाख्येन केन चिदृषिणा दृष्टत्वात् जगत्कारणस्य नारायणाख्यस्य पुरुषस्य प्रतिपादकत्वाच्च ॥

उपसंहारः—

अश्विनौ यौ देवौ तौ तव व्यात्तं विवृतमुखस्थानीयम्। तथाविध हे विराट्पुरुष इष्टमस्मदपेक्षितमात्मबोधं मनिषाण अनुमन्यस्व देहीत्यर्थः। अमुं लोके दृश्यमानं गवाश्वादिकं मनिषाण प्रयच्छ। किं बहुना सर्वं मनिषाण ऐहिकामुष्मिकं वा सर्वमिष्टं देहि ॥

इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥

॥ समाप्तमिदं पौरुषसूक्तभाष्यम् ॥

प्रतिपाद्यविषयः—

आपस्तम्बमहर्षिणा महाग्निचयने शीर्षोपधाने प्रदर्शितविनियोगस्याप्यस्य पुरुषसूक्तस्य परब्रह्मस्वरूपशक्त्यादिप्रदर्शनपरत्वमप्यस्तीति तत्तन्मन्त्रार्थविवरणपूर्वकमभिहितम् ॥

वक्तव्यविशेषः—

ग्रन्थोऽयमस्मिन् कोशे समग्रः, मुद्रितश्च। इदं च भाष्यं यजुश्शाखाधीतं सूक्तमवलम्ब्य प्रवृत्तम् ॥

No. 562 (3631).

*पुरुषसूक्तव्याख्या.

* Puruṣa Sūkta Vyākhyā.

Substance—Palm-leaf. | Character—Telugu.
Size—16½ × 1½ inches. | Folios—15.

Lines on a page—7.
Letters in a line—48.
Age of Ms.—Old.
Condition of Ms.—
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This commentary on the Puruṣa Sūkta of Yajus Śākhā explains the meaning of the Mantras, pointing out how they can be utilised for purposes of spiritual and temporal benefits.

उपक्रमः—

यतः प्रपञ्चसम्भूतिविभूतिपरिभूतयः ।
पुरुषाय नमस्तस्मै कस्मै चिद्विस्मयात्मने ॥
तं प्रणम्यादिपुरुषं जगतामादिकारणम् ।
दुर्ज्ञानं पौरुषं सूक्तं व्याकरोमि यथामति ॥
सुखग्रहार्थं भाष्याणि केवलं संक्षिपाम्यहम् ।
उक्तज्ञानेष्वशक्तानामनुक्तौ तु का कथा ॥
न ह्यलब्धानुगमनक्रोधमारोढुमर्हति ।
अर्थानां विप्रकीर्णानां संक्षेपणावधारणम् ॥
सुखग्रहार्थमिष्टं हि पाण्डितानां बहुश्रुतम् ।
श्रुतिस्मृतिपुराणानि सेतिहासानि वीक्ष्य च ॥
विलोक्य सर्वभाष्याणि पूर्वाचार्यकृतानि च ।
श्रमिच्छास्त्रं सुदुर्ज्ञानं साक्षान्नारायणेरितम् ॥
तदप्यालोक्य च तथा गुरूणां चोपदेशतः ।
तदेतत्पौरुषं सूक्तं व्याकर्तुं धीर्विजृम्भते ॥
उदग्राचीनतां वीक्ष्य नोपेक्ष्यं तन्मनीषिभिः ॥

उपसंहारः—

इदं पुरुषसूक्तोक्तं भगवज्ज्ञानं विना मुक्तये नान्यः पन्था इत्यर्थः । 'अयनं निलये मार्गे मुक्तौ चापि प्रकथ्यते' इति निघण्टुः । उक्तमर्थमुपसंहरति—यज्ञेन यज्ञमयजन्त देवाः-यज्ञेन यजनीयसाधनभूतेन चतुर्मुखा-

ख्येन हविषा देवास्तदिन्द्रियाणि साध्या वा यज्ञमयजन्त अनिरुद्धो विष्णुमयजन्त सृष्टियज्ञं कृतवन्तः। तानि धर्माणि प्रथमान्यासन्। धर्मशब्दः प्रदाने पुल्लिङ्गः ॥

॥ इति पुरुषसूक्तभाष्यं समाप्तम् ॥

प्रतिपाद्यविषयः—

इदं च भाष्यं याजुषं पुरुषसूक्तमवलम्ब्य प्रवृत्तम्। अत्र साधकस्य विनियोगभेदेन प्रायश्चित्तजपविष्ण्वाराधनादिषूपयुक्तत्वस्य सुपुत्रमोक्षसर्वकामाप्तिफलकत्वस्य च कथनपूर्वकं मन्त्रार्थः प्रतिपाद्यते ॥

वक्तव्यविशेषः—

समग्रोऽयं ग्रन्थः अमुद्रितश्च। एतद्व्याख्यातुर्नाम चात्र न दृश्यते। प्रायः श्रीवैष्णवसंप्रदायानुरोध्ययं व्याख्याता स्यादिति व्याख्यापरिशीलनादूह्यते ॥

No. 563 (3107/3).

* पुरुषसूक्तव्याख्या.

* Puruṣa Sūkta Vyākyā.

Substance—Palm-leaf.
Size—17 × 1⅝ inches.
Character—Grantha.
Folios—76–82.
Lines on a page—7.
Letters in a line—13.

Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

यतः प्रपञ्चसंभूतिविभूतिपरिभूतयः।
पुरुषाय नमस्तस्मै परस्मै परमात्मने ॥

तं प्रण . . . . . ।
. . . . क्तं व्याकरोमि यथामति ।
भगवान् शौनकः ऋग्विधाने—
एतत्पुरुषसूक्तं हि यजुष्यष्टा . . . ।

उपसंहारः—

ब्राह्मणो वक्त्रमासीत्, मुखमासीदित्यर्थः । बाहू राजन्यः कृतः . . . . क्षत्रिया . . . . स्योरुभ्यामासीत् । वचनव्यत्ययो हि बहुप्रकारः ॥

प्रतिपाद्यविषयः—

No. 562 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

No. 562 कोशापेक्षया अस्मिन् कोशे तत्र तत्र किञ्चित् किञ्चित् वैलक्षण्यं दृश्यते । अमुद्रितोऽयं कोशः ॥

No. 564 (4/1).

* पुरुषसूक्तव्याख्या.

* Puruṣa Sūkta Vyākhyā.

Author—Srī Devarāja.
Substance—Palm-leaf.
Size—17⅞ × 1½ inches.
Character—Grantha.
Folios—1–36.
Lines on a page—8.
Letters in a line.—58.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This commentary on the Puruṣa Sūkta of Taittirīyā Śākhā explains the meaning of the Mantras according to

Sri-Vaiṣṇava tradition and in conformity with the Pañcarātra Āgama, etc.

उपक्रमः—

श्रीदेवराजरचिता रामानुजकृपौधिता।
जीयात्पुरुषसूक्तस्य व्याख्या सर्वार्थसुन्दरी ॥

सर्वेषु वेदान्तेषु गूढमेव परमगुह्यं परं ब्रह्मोपदिश्यते। तत्रातिगहनन्यायकलापावगाहनाक्षमाणां विस्पष्टं तत्त्वहितपुरुषार्थनिर्णयं करोति पुरुषसूक्तम् ॥

इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ॥
ऋतं सत्यं च प्रख्यातं ऋषिसिंहेन चिन्तितम् ॥

इति तत्त्वनिष्कर्षकतया व्यासेनोदाहृतत्वाच्च। अत्र सर्ववेदेषु पठिततया तत्तच्छाखागतानां तत्त्वपरवाक्यानामाकाङ्क्षितयोग्यविशेषसमर्पकतया अनुरोद्धव्यमिदमवगम्यते। एवं तत्त्वपरमिदं देवताविशेषपरं च पुरुषो ह वै नारायणोऽकामयतेति बृहदारण्यके पुरुषशब्दस्य नारायणपरत्वदर्शनात्। छान्दोग्ये च एषा वैष्णवी नाम संहितैतां प्रयुञ्जन् विष्णुं प्रीणातीति। आथर्वणे अष्टादशमहाशान्तिप्रकरणे वैष्णव्यां पुरुषसूक्तमिति। भगवत्समाराधनप्रकरणे "आद्ययाऽऽवाहयेद्देवं ऋचा तु पुरुषोत्तमम्" इति शौनकः—"पुरुषस्य हरेस्सूक्तं स्वर्ग्यं धर्म्यं यशस्करम्" इति च स्मर्यते। लक्ष्मीपतिप्रतिपादकोत्तरनारायणसमानप्रकरणं चेदम् ॥

उपसंहारः—

अतस्त्वक्कायात्सर्वाणि निबिडात्पार्श्वाद्याः प्रादुर्भविष्यन्ति। ततश्चराचरं जगद्भविष्यति। एतेन जीवपरमात्मनोर्योगेन मोक्षप्रकारः कथित इत्यनुसन्धेय इति ॥ श्रीशास्त्रे च पुरुषसंहितायां पुरुषसूक्तं सङ्ग्रहेण व्याख्यातम् ॥

सहस्रशीर्षेत्यत्र [त्य] सहस्रोऽनन्तवाचकः।
अनन्तयोजनं प्राह दशाङ्गुलवचस्त्विदम्।
तत्र प्रथमया विष्णोः देशतो व्याप्तिरीरिता ॥

द्वितीययाऽस्य देवस्य कालतो व्याप्तिरीरिता ।
विष्णोर्मोक्षप्रदत्वं च कथितं तु तृतीयया ॥
एतावानिति मन्त्रेण कथितं वैभवं हरेः ।
एतेनैव तु मन्त्रेण चतुर्व्यूहोऽपि भाषितः ॥
त्रिपादित्यनया प्रोक्तमनिरुद्धस्य वैभवम् ।
तस्माद्विराडित्यनया पादनारायणाद्धरेः ॥
प्रकृतेः पुरुषस्यापि समुत्पत्तिः प्रदर्शिता ।
यत्पुरुषेणेत्यनया सृष्टियज्ञस्समीरितः ॥
सप्तेति परिधोत्रापि समिधश्च समीरिताः ।
तं यज्ञमिति मन्त्रेण सृष्टियज्ञस्समीरितः ॥
तस्मादिति च सप्तर्चा जगत्सृष्टिस्समीरिता ।
वेदाहमिति मन्त्राभ्यां वैभवं कथितं हरेः ॥
यज्ञेनेत्यनयैवर्चा सृष्टिर्मोक्षस्य चेरिता ।
य एवमेतज्जानाति स हि मुक्तो भवेदिति ॥

प्रतिपाद्यविषयः—

अत्र तैत्तिरीयशाखागतं पुरुषसूक्तं श्रीवैष्णवसम्प्रदायानुसारेण मन्त्रार्थविवरणपुरस्सरं श्रीपाञ्चरात्रादिसंमतिप्रकाशनपूर्वकं च सविमर्शं व्याख्यातम् । श्रीहरेः सर्वोत्तमत्वसमर्थनं सप्रमाणमत्रोपन्यस्तम् ॥

वक्तव्यविशेषः—

अमुद्रितोऽयं ग्रन्थः, समग्रश्च ॥

No. 565 (1299/10).

भूसूक्तं ध्यानश्लोकादिसहितम्.

Bhū Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{1}{8}$ inches.
Character—Nāgarī.
Folios—31-32.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

"स्योना पृथिवी भव"। बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवी। प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥

उपसंहारः—

धनुर्धरायु(रायै)विद्महे सर्वसिद्धं(द्ध्यैच)धीमहि। तन्नो धरा प्रचो-दयात् ॥

इक्षुशालिफलसस्यसमृद्धे पारिजाततरुशोभितमूले।
स्वर्णरत्नमणिमण्टपमध्ये चिन्तयेत्सकललोकधरित्रीम् ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तुते ॥

॥ इति भूसूक्तं ससाम्नम् ॥

प्रतिपाद्यविषयः—

सूक्तेऽस्मिन् भूम्याः शक्तिप्रशंसनादिपुरस्सरमेतज्जपादिकर्तुर्मनीषि-तमाशंस्यते ॥

वक्तव्यविशेषः—

मुद्रितकोशे ऋक्संहिताचतुर्थाष्टकगततुर्याध्याये एकोनत्रिंशे वर्गे दृश्यत इदमृक्त्रितयात्मकं सूक्तम्। ततो महान्यासादिग्रन्थे मुद्रितसूक्त-दृश्यमानमन्त्रान्तराणि ध्यानश्लोकादिकं च लिखितं दृश्यते ॥

No. 566 (2349/10).

भूसूक्तम्.

Bhū Sūktam.

Substance—Palm-leaf.
Size—$11\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—71.
Lines on a page—7.
Letters in a line—42.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा ।
उपस्थे ते व्युदधे(देव्यदिते)ऽग्निमन्नादमन्नाद्यायादधे ॥
आऽयं गौः पृश्निरक्रमीदसद॒(न)न्मातरं पुनः ।
पितरं च प्रयन् सुवः ॥

उपसंहारः—

यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे ।
अदित्या विशे तदेवा वसवश्च समाभरन् ॥
अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाꣳ भूतानां माता मेदिनी महता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमा कयासा सत्येत्यमृतेति वसिष्ठः ॥ ?

॥ भूसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

अत्र भूदेव्याः स्वरूपशक्त्यादिकमभिधीयते ॥

वक्तव्यविशेषः—

मुद्रितमिदं समग्रं चात्र दृश्यते । अन्ते किंचित् मुद्रिताद्वैलक्षण्यं च दृश्यते । एतत्समाननामधेयस्यान्यस्य विलक्षणानुपूर्वीकस्य ऋक्शाखायां दर्शनादिदं शाखान्तरीयमिति भाति ॥

No. 567 (C 535).

मन्त्ररामायणं सव्याख्यम् .

Mantrarāmāyaṇam (with Commentary).

Author—Nīlakaṇṭha.
Substance—Paper.
Size—$8\frac{1}{8} \times 5\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—53.
Lines on a page—12.
Letters in a line—40.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not. so very correct.
Complete or incomplete—Complete.

उपक्रमः—

मूलम्—

कं नश्चित्रमिषण्यसि चिकित्वान् पृथुग्मानं वाश्रं वावृद्ध्यै ।
कत्तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत् ॥

व्याख्या—

रामायणद्रुमं नौमि रामरक्षानवाङ्कुरम् ।
गायत्रीबीजमाज्ञायमूलं मोक्षमहाफलम् ॥

अत्र रामरक्षाया रामायणद्रुमाङ्कुरत्वं स्पष्टमवगम्यते । तत्स्थान राघवादिपदानां क्रमेण रामायणार्थसूचकत्वात् । तस्या गायत्रीमूलत्वं वेदमूलत्वं चोपपादनीयम् । तेन रामायणस्यापि तदुभयं सिध्यति । अत एव रामायणे चतुर्विंशतिगायत्र्यक्षराणि वाल्मीकिना संगृहीतानीत्यभां युक्तप्रसिद्धिः ॥

उपसंहारः—

मूलम्—नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा । स्वां प्रजां बृहदुक्थो महित्वाऽवरेष्वदधादा परेषु ।

व्याख्या—नावा न नौकया यथा क्षोदः महादुदः ? आक्रम्यते, एवं स्वस्तिभिः काल्याणैः पुष्पकादिभिः पृथिव्याः प्रदिशः प्रदेशानाक्रम्य स्वां प्रजां विश्वा सर्वाणि संकटानि अति पारयित्वा बृहदुक्थो महाकर्मा रामः महित्वा स्वमाहात्म्येन संततिरूपां प्रजां अवरेषु भूलोकेषु जनरूपां माहित्वा परेषु ब्रह्मलोकेषु च आदधात् । एतेन पौरजानपदानात्मलोकं प्रापयन् महाकारुणिको रामभद्र एव शरणीकरणीय इति दर्शितम् ॥

लक्ष्मणार्यपरतां नि(गि)रामिमां लक्ष्मणार्यपुरुषेण दर्शिताम् ।
साङ्गवेदपदवाक्यमानवित्कोऽपि वीक्ष्य सुमतिः प्रमोदताम् ॥
श्रीरामरक्षाव्याख्यानं मन्त्ररामायणाभिधम् ।
व्याख्यातं राघवस्तेन प्रीयतां करुणानिधिः ॥
दर्शितो(तः)सीतया ध्यायं ? वेदारण्ये निरध्वनि ।
सन्तो विपुलयन्त्वेनं यास्कभाष्यानुयायिनः ॥

इति श्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतंसगोविन्दसूरसूनोः श्रीनीलकण्ठस्य कृतौ स्वोद्धृतमन्त्ररामायणव्याख्या मन्त्ररहस्यप्रकाशिकाख्या समाप्तिमगमत् ॥

प्रतिपाद्यविषयः—

अत्र श्रीरामरक्षास्तोत्रगतराघवादिविंशतिनामनिर्वचनपूर्वकं श्रीरामभद्रचरित्रस्य वेदप्रतिपादितत्वस्थापनाय श्रीरामभद्रचरित्रवर्णनपरतया प्रतीयमाना बह्वीः ऋचो निर्दिश्य तत्तत्पदार्थवर्णनपूर्वकं व्याख्याताः ॥

वक्तव्यविशेषः—

समग्रोऽयं ग्रन्थः मुद्रितश्चास्मिन् कोशे दृश्यते । एतद्ग्रन्थान्ते—'शके 1776 आनन्दनामसंवत्सरस्योदगयने शिशिरऋतौ फाल्गुनशुक्लतृतीयायां सोमवासरे तद्दिने महिषासुराख्ये नगरे श्रीचामुण्डाम्बासंनिधौ साधुभिस्समाप्तिमगमत्, इति ग्रन्थलेखनकालादिकं निर्दिष्टं दृश्यते ॥

No. 568 (C 814).

मन्त्ररामायणम् (सव्याख्यम्).

Mantra Rāmāyaṇam (with commentary).

Substance—Paper.
Size—$5\frac{1}{2} \times 5\frac{5}{8}$ inches.
Character—Nāgarī.
Folios—66.
Lines on a page—10.
Letters in a line—44.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 567 **कोशवत्.**

उपसंहारः—

No. 567 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 567 **कोशवत्.**

वक्तव्यविशेषः—

No. 567 कोशवत्.

'शुभकृत्समवर्षर्तुनभश्शुक्लच्छदे सिते ।
राकोपान्त्यजये वेदऋत्वब्धीन्दुगते शके ॥
श्रीवेङ्कटार्यपादाब्जमरन्दानन्दितात्मना ।
शिवपत्तनसन्तानजनुषा रामवृत्तिना ॥
सीतारामेण लिखितं वेदरामायणं मुदा' ।

इति कोशान्तपरिदृश्यमानश्लोकद्वयेनैयेतद्ग्रन्थलेखनकालादिकं निर्दिष्टं दृश्यते ॥

No. 569 (4549/1).

मन्त्रसङ्ग्रहः.

Mantra Sangraha.

Substance—Palm-leaf.
Size—14⅝ × 1 inches.
Character—Nāgarī.
Folios—27.
Lines on a page—6.
Letters in a line—76.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

. . . . . च्यस्व । परीतो षिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः । दधन्वान . . . . . सोमो अतिद्रुतः । इन्द्रस्य युज्यस्सखा । पुनाति ते पारिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तना । ब्रह्म क्षत्रं पवते तेज इन्द्रियꣳ सुरया सोमस्सुत आसुतो मदाय। शुक्रेण देव देवताः पिपृग्धि । रसेनान्नं यजमानाय धेहि ॥

उपसंहारः—

अग्निः ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् । अनुवीरैरनुपुष्यास्म गोभिरन्वश्वैरनुसर्वेण पुष्टैः । अनुद्विपदा चतुष्पदा

वयं देवा सो यज्ञमृजुधा नयन्तु। आ नो गोत्रा दर्दहि गोपते गाः समस्मभ्यꣳ सनयो यन्तु वाजाः। दिवक्षा असि ऋषभसत्यशुष्मोऽस्मभ्यꣳ सुमघवन् भोधि गोदाः ॥

॥ इत्यष्टाविंशोऽध्यायः ॥

प्रतिपाद्यविषयः—

अत्र सौत्रामण्याद्युपयुक्तमन्त्राः संगृहीता दृश्यन्ते ॥

वक्तव्यविशेषः—

असमग्रोऽयम्, मुद्रितश्च। 'अनुवीरैः' इति मन्त्रे तैत्तिरीयब्राह्मणाम्नाते 'अनुराध्याम' इत्यस्य स्थाने 'अनुपुष्यास्म' इति, 'अनुप्रजयाऽन्विन्द्रियेण' इत्यस्य स्थाने 'अनुद्विपदा चतुष्पदा वयम्' इति च पाठोऽत्र लिखितो दृश्यते। स चायं पाठो वाराहश्रौतसूत्रे परिदृश्यते। अतोऽयं लेखनक्रमो वाराहश्रौतसूत्रानुरोधीति ज्ञायते ॥

No. 570 (1299/21).

मन्युसूक्तम्.

Manyu Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—60-62.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः। स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आविवेश ॥

उपसंहारः—

संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः। भियं दधाना हृदयेषु शत्रवः पराजितासो अपनिलयन्ताम् ॥

प्रतिपाद्यविषयः—

क्रोधाभिमानिदेवतास्वरूपशक्तथादिप्रशंसनपूर्वकं शत्रुजयादिकमत्र संप्रार्थ्यते ॥

वक्तव्यविशेषः—

अष्टमाष्टकस्थतृतीयाध्यायगतषोडशवर्गमारभ्य एकोनविंशवर्गसमाप्तिपर्यन्तमेतत्सूक्तं मन्युसूक्तनाम्नाऽत्र लिखितं दृश्यते। तत्तन्मन्त्रार्थभाष्यादिपर्यालोचनायां तु षोडशसप्तदशवर्गद्वयात्मकं विश्वकर्मसूक्तं, अष्टादशैकोनविंशवर्गद्वयात्मकं च मन्युसूक्तमिति प्रतिभाति। अत एव मन्युसूक्तारोहणावरोहणविधौ तयोरेवाष्टादशैकोनविंशवर्गयोः क्रमो निर्दिष्टः। अतो न वर्गचतुष्टयात्मकं मन्युसूक्तम्, अपि तु वर्गद्वयात्मकमेवेत्यवसीयते। वर्गचतुष्टयस्यात्र मन्युसूक्तत्वलेखनं लेखकप्रमादायत्तमिति ॥

No. 571 (292/1.)

मन्युसूक्तारोहणावरोहणविधिः ससूक्तः.

Manyusūktārohaṇāvarohaṇavidhiḥ.

Substance—Palm-leaf.
Size—$12\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Nāgarī.
Folios—5.
Lines on a page—5.
Letters in a line—48.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

यस्ते मन्योरिति सप्तऋचं प्रथमं सूक्तम् । तस्य तापसपुत्रो मन्युऋषिः मन्युनामकमुख्यप्राणान्तर्गतश्रीलक्ष्मीनृसिंहो देवता त्रिष्टुप्छन्दः । त्वया मन्योरिति सप्तऋचं द्वितीयं सूक्तम् । तापसपुत्रो मन्युऋषिः । मन्युनामकमुख्यप्राणान्तर्गतश्रीलक्ष्मीनरसिंहो देवता त्रिष्टुप्छन्दः । अन्त्याश्चतस्रो जगत्यः । यजमानस्य अभीष्टसिद्ध्यर्थं जपे विनियोगः ॥

उपसंहारः—

आभूत्या सहजा वज्र सायक . . . यन्ताम् । एको बहूनामसि मन्यवीळितो . . . . . आबभूव । आभूत्या सहजा यन्ताम् । आभूत्या सहजा यन्ताम् । आभूत्या सहजा . . . . यन्ताम् । यस्ते मन्यो . . . . . अपनिलयन्ताम् । इति सूक्तद्वयमेकवारम् । अवरोहणक्रमस्तु लिखितपत्रिकायां द्रष्टव्यः । त्रिवारं चैकं जपः । जपत्रिवारं चैकं पुनश्चरणम् । गोक्षीरेण तर्पणम् । परमान्नेन होमः ॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् दृश्यमानस्य मन्युसूक्तस्य प्रातपाद्यावषयः No. 570 कोशे द्रष्टव्यः । अत्र च शत्रुविजयादिकाम्यनुष्ठेयमन्युसूक्तजपे आरोहणावरोहणक्रमविशेषश्च निर्दिष्टो दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् दृश्यमानं सूक्तं मुद्रितं समग्रं च ॥

No. 572 (4377)

महान्यासः.

Mahānyāsaḥ.

Substance—Palm-leaf.
Size—$6\frac{7}{8} \times 1\frac{3}{8}$ inches.
Character—Telugu.
Folios—56.
Lines on a page—6.
Letters in a line—26.
Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

हरिओम्। अथातः पञ्चाङ्गरुद्राणाम्। नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥ या त इषु-श्शिवतमा शिवं बभूव ते धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय। ओं नमो भगवते रुद्राय। ओं अं ओं कं खं गं घं ङं ओं आं पूर्वाङ्गरुद्राय नमः॥

उपसंहारः—

शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोपस्पृशत त्वचं मे सर्वाꣳ अग्नीꣳरप्सुषदो हुवे वो मयि . . बलमोजो निधत्त। यददस्सं-प्रयतीरहावनदता हते। तस्मादा नद्यो नामस्थ ता वो नामानि सिन्धवः। यत्प्रेषिता वरुणेन ताः शीभꣳसमवल्गत। तदाप्नोदिन्द्रो वो यतीस्त-स्मादापो अनुस्थन। अपकामꣳ स्यन्दमाना अवीवरत वो हिकम्। इन्द्रो वश्शक्तिभिर्देवीस्तस्माद्वार्णा . . . . .

प्रतिपाद्यविषयः—

महेश्वरपूजासमये अङ्गन्यासादिषूपयुक्तान् महेश्वरप्रीतिकरान् बहून् मन्त्रान् यजुर्वेदात्समुद्धृत्य एकत्र सङ्गृहीतेऽस्मिन् सप्रयोगक्रमं पूजाविधिरभिधीयते॥

वक्तव्यविशेषः—

समग्रप्रायो मुद्रितश्चायम्॥

No. 573 (1299/1).

महासौरं सध्यानश्लोकादिकम्.

Mahā Souram.

Substance—Palm-leaf. | Character—Nāgarī.
Size—14⅝ × 1⅜ inches. | Folios—7.

Lines on a page—6.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—
Correct.

Complete or incomplete—
Complete.

उपक्रमः—

अथ सूर्याणां मन्त्राणामृषिदेवताच्छन्दांस्यनुक्रमिष्यामः पुनर्वक्ष्यामः पूर्वाचार्यक्रमेणैतत्सर्वं पुरा दृष्टं शौनकादिभिराचार्यैर्जपतां तु प्रत्यक्षार्थं इदानीं तन्मयोच्यते ॥

उदुत्यं जातवेदसमिति त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्व-ऋषिः सूर्यो देवता नवाद्या गायत्रीछन्दः उद्वयं तमसस्परीति चतस्रोऽ-नुष्टुभः ॥

उपसंहारः—

जयतु जयतु सूर्यं सर्वलोकैकदीपं
किरणसहितपादं क्लेशदुःखस्य मोक्षम् ।
अरुण . . गतगम्यं आदिमध्यान्तशून्यं
परमपरमदूरं भास्करं तं नमामि ॥
आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् ।
षडेतानि पठेन्नित्यं चक्षुस्तस्य न हीयते ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मॅमॅ ।
तस्मात्कारुण्यभावेन रक्ष रक्ष दि[वा]कर ॥

प्रतिपाद्यविषयः—

सूर्यप्रार्थनायां उपयुक्ता ऋग्वेदगता मन्त्राः तत्तन्मन्त्राणामृषिदे-वताच्छन्दोध्यानश्लोकाद्यभिधानपूर्वकं मत्र निर्दिश्यन्ते ॥

वक्तव्यविशेषः—

अत्र परिदृश्यमानास्सर्वेऽपि मन्त्रा मुद्रिताः ॥

No. 574 (905/7).

महाशन्तिमन्त्राः वैश्वदेवसूक्तं च.

Mahā Śānti Mantras and Vaiśvadeva Sūktam.

Substance—Palm-leaf.
Size—$13\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—6.
Lines on a page—7.
Letters in a line—62.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः । देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे । देवानां भद्रा सुमतिर् ऋजूयतां देवानां रातिरभि नो निवर्तताम् । देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥

उपसंहारः—

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्च जनाः अदितिर्जातमदितिर्जनित्वम् ॥

प्रतिपाद्यविषयः—

आपन्निवारणार्थजपकर्मसु विनियुक्तेष्वेषु मन्त्रेषु मङ्गलादिकं प्रार्थ्यते ॥

वक्तव्यविशेषः—

ऋक्संहितायां प्रथमाष्टकगतषष्ठाध्यायेऽष्टादशे वर्गे दृश्यन्त एते मन्त्राः ॥

No. 575 (1299/2).

महाशान्तिमन्त्राः.

Mahā Śāntimantrāḥ.

Substance—Palm-leaf.
Size—14⅝ × 1⅜ inches.
Character—Nāgarī.
Folios—8–11.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 574 कौशवत्.

उपसंहारः—

दैवीः स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे शं चतुष्पदे। ओं शान्तिः शान्तिः शान्तिः। यजमानस्य सर्वारिष्टशान्तिरस्तु ॥

॥ महाशान्तिस्समाप्ता ॥

प्रतिपाद्यविषयः—

अत्र ऋग्वेदगता आपन्निवारणफलकाः शान्तिमन्त्राः पठिताः।

वक्तव्यविशेषः—

मुद्रितोयं शान्तिमन्त्रगणः।

No. 576 (905/5).

मार्जनमन्त्राः.

Mārjana Mantrāḥ.

Substance—Palm-leaf.
Size—$13\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—3.
Lines on a page—7.
Letters in a line—62.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect— Not so very correct.
Complete or incomplete— Incomplete.

उपक्रमः—

आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम् ।
इदं हिरण्यं वर्चस्कं जैत्रायाविशतादिमाम् ॥
उच्चैर्वाजिपृतनाषाट्शतासाहं धनञ्जयम् ।
सर्वास्समग्रा ऋद्धयो हिरण्येऽस्मिन् समाहिताः ॥

उपसंहारः—

महान्तं त्वा महीनां सम्राजं चर्षणीनां। देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां इन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे अन्नाद्याया [भिषिञ्चामि] भूर्भुवस्स्वः। भद्रं नो अपि वातय मनः ॥

प्रतिपाद्यविषयः—

अलक्ष्म्यादिनिवारणफलकमार्जनकर्मसु एते मन्त्रा विनियुक्ताः ॥

वक्तव्यविशेषः—

एते मन्त्रा मुद्रिता दृश्यन्ते ॥

No. 577 (1299/31).

मृतसञ्जीविनीसूक्तम्.

Mṛtasañjīvinī Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—96-97.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

उपक्रमः—

मा प्रगाम पथो वयं मा यज्ञादिन्द्र सोमिनः। माऽन्तस्थुर्नो अरातयः ॥

उपसंहारः—

अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥

प्रतिपाद्यविषयः—

ऐक्ष्वाकेणासमातिनाम्ना राज्ञा दूरीकृतपूर्वपुरोहितेन पुरोहितान्तरवरणे कृते पूर्वपुरोहितानुष्ठिताभिचारकृद्धनूनपुरोधोमारितपूर्वपुरोहितान्यतमपुनरुज्जीवनाय विनियुक्ता एते मन्त्रा अत्र निर्दिष्टाः ॥

वक्तव्याविशेषः—

अष्टमाष्टकस्थप्रथमाध्याये एकोनविंशवर्गमारभ्य पञ्चविंशवर्गसमाप्तिपर्यन्तमिदं सूक्तमत्र दृश्यते, मुद्रितं च ॥

No. 578 (1299/34).

रमासूक्तम्.

Ramā Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī
Folios—103.
Lines on a page—5.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

रमासूक्तम् ।

निर्वर्तध्वं मानुगातास्मान्त्सषक्त रेवतीः ।
अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिम् ॥

उपसंहारः—

आनिवर्तन वर्तय निनिवर्तन वर्तय भूम्याश्व-
र्तस्त्रः प्रदिशस्ताभ्य एना निवर्तय ॥
भद्रं नो अपिवातय मनः ॥

॥ ओं शान्तिश्शान्तिश्शान्तिः ॥

प्रतिपाद्यविषयः—

अत्र गोप्रार्थनादिकं दृश्यते ॥

वक्तव्यविशेषः—

सप्तमाष्टके सप्तमाध्याये प्रथमवर्गे दृश्यत इदं सूक्तं, मुद्रितं च ॥

No. 579. (905/8)

राक्षोघ्नसूक्तम्.

Rākṣoghna Sūktam.

Substance—Palm-leaf.
Size—13½ × 1½ inches.
Character—Nāgarī.
Folios—6–8.
Lines on a page—7.
Letters in a line—62.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन । तृष्वीमनुप्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥

उपसंहारः—

अया ते अग्ने समिधा विधेम प्रतिस्तोमꣳ शस्यमानं गृभाय । दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥

प्रतिपाद्यविषयः—

अग्नेः सकाशात् रक्षोबाधानिवारणमस्मिन् सूक्ते प्रार्थ्यते ।

वक्तव्यविशेषः—

राक्षोघ्नसूक्तपञ्चकेषु तृतीयाष्टकस्थचतुर्थाध्यायगतत्रयोविंशचतुर्विंशपञ्चविंशवर्गस्थं कृणुष्वपाज इत्येतत्सूक्तं समग्रं केवलमस्मिन् कोशे दृश्यते, मुद्रितं च ॥

No. 580 (1299/13).

राक्षोघ्नसूक्तम्.

Rākṣoghna Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{5}{8}$ inches.
Character—Nāgarī.
Folios—37-41.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

रक्षोघ्नं पञ्चकम्। कृणुष्व पाजः प्रकृणुष्वपानां? रक्षोघ्नं वामदेवोऽग्नेस्त्रिष्टुप्—

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ, इभेन। तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः॥

उपसंहारः—

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते प्रजां यस्ते जिघांसति तमितो नाशयामसि। यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि॥

॥ पञ्चराक्षोघ्नं समाप्तम् ॥

प्रतिपाद्यविषयः—

ऋग्वेदगते राघोघ्नसूक्तपञ्चकेऽस्मिन् राक्षसबाधापरिहारादिकं अग्न्यादिभ्यः प्रार्थ्यते ॥

वक्तव्यविशेषः—

मुद्रिते ऋक्संहिताकोशे तृतीयाष्टकस्थचतुर्थाध्यायगतत्रयोविंशवर्गे, अष्टमाष्टकस्थचतुर्थाध्यायगतपञ्चमवर्गे, अष्टमाष्टकस्थाष्टमाध्यायगतैकविंशवर्गे चेदं परिदृश्यते ॥

No. 581 (1299/19).

रात्रिसूक्तम्.

Rātri Sūktam.

Substance—Palm-leaf.	Age of Ms.—Old.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.	Condition of Ms.—Good.
Character—Nāgarī.	Correct or incorrect—Correct.
Folios—54–57.	Complete or incomplete—Complete.
Lines on a page—6.	
Letters in a line—60.	

उपक्रमः—

रात्रिः कुशिकः सौभरी रात्रिर्वा भारद्वाजी रात्रिस्तवं गायत्रं अग्निभयचोरभयसर्पभयभूतप्रेतादिसमस्तभयनिवारणार्थं रात्रिसूक्तमन्त्रजपं करिष्ये—

रात्री व्यख्यदायती पुरुत्रा देव्याक्षभिः । विश्वा अधि श्रियोऽधित ॥

उपसंहारः—

बृहत्साम क्षत्रभृद्वृद्धवृष्णि तृष्टुभोजः शुभतमुग्रवीरम्। इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ॥

रात्रिसूक्तं जपेन्नित्यं तत्काल उपपद्यते ॥

॥ रात्रिसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

अग्निसर्पभूतप्रेतादिभयनिवारणार्थं रात्र्याभिमानिनी देवताऽत्र प्रार्थ्यते ॥

वक्तव्यविशेषः—

अष्टमाष्टकस्थसप्तमाध्यायगतचतुर्दशपञ्चदशवर्गयोर्दृश्यत इदं, मुद्रितं च ॥

No. 582 (1299/28).

रामपट्टाभिषेकसूक्तानि.

Rāmapattābhiṣeka Sūktāni.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{1}{8}$ inches.
Character—Nāgarī.
Folios—73-78.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

आदौ पञ्चामृतस्नानं। फलोदकस्नानं। हिरण्योदकस्नानं। रत्नोदकस्नानं। पुरुषसूक्तम्—सहस्रशीर्षा पुरुषः—साध्यास्सन्ति देवाः। वर्ग २ ॥ श्रीसूक्तं—हिरण्यवर्णां—ऋक् १५ ॥ भूसूक्तम्—स्योना पृथिवि भव—ऋक् १ ॥ बलित्था पर्वतानां—वर्ग १ ॥ मेदिनी देवी वसुन्धरा—नारायणि नमोऽस्तु ते। अब्लिङ्गसूक्तम्—आपोहिष्ठा मयोभुवः—ऋक् ९ ॥ वर्ग १ ॥ विष्णुसूक्तं—अतो देवा अवन्तु नः—वर्ग १ ॥

उपसंहारः—

दैत्यो राजा जघान तस्मादेवं विदुषे ब्राह्मणायैवं चकृषे न क्षयो दुह्येन्नद्राष्ट्रादवपद्येयनेद्वामा? प्राणो जहदिति जहदिति ॥

प्रतिपाद्यविषयः—

रामपट्टाभिषेककाले अभिषेकार्थमुपयुक्ता मन्त्राः तत्र तत्र परिदृष्टा अत्र संगृहीताः ॥

वक्तव्यविशेषः—

मुद्रिताश्चैते मन्त्राः ॥

No. 583 (1299/36).

रुद्रसूक्तम्.

Rudra Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—105–108.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

कद्रुद्रायेति वर्गद्वयस्य अघोरऋषिः कण्वो रुद्रो देवता गायत्रीच्छन्दः—

कद्रु॒द्राय॒ प्रचे॑तसे मी॒ह्ळुष्टमाय॒ तव्य॑से वो॒चेम॒ शन्त॑मं हृ॒दे ॥

उपसंहारः—

मा नो॑ वधी रुद्र॒ मा परा॑ दा॒ मा ते॑ भूम॒

प्रसितौ हीळितस्य। आ नो भज बर्हिषि जीवशंसे
युयं पात स्वस्तिभिः सदा नः ॥

॥ रुद्रसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

अत्र प्राधान्येन रुद्रस्तवनपूर्वकमभीप्सितं प्रार्थ्यते ॥

वक्तव्यविशेषः—

मुद्रितायामृक्संहितायां प्रथमाष्टकस्थतृतीयाध्यायगतषड्विंशसप्तविंशवर्गयोः द्वितीयाष्टकस्थसप्तमाध्यायगतसप्तदशाष्टादशवर्गयोः प्रथमाष्टकस्थाष्टमाध्यायगतपञ्चमषष्ठवर्गयोः पञ्चमाष्टकस्थतुरीयाध्यायगतत्रयोदशवर्गे च एतत्सूक्तं दृश्यते ॥

No. 584 (1299/4).

लक्ष्मीसूक्तम्.

Lakṣmī Sūktam.

Substance—Palm-leaf.
Size—$14\frac{3}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—14.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं
दधानाः। यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां
निहितं गुहाविः ॥

उपसंहारः—

ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः ॥

प्रतिपाद्यविषयः—

अत्र वागभिमानिदेवतास्तुतिपूर्वकं परमात्मज्ञानादिकं प्रार्थ्यते ।

वक्तव्यविशेषः—

मुद्रितायामृक्संहितायां अष्टमाष्टकस्थद्वितीयाध्यायगतत्रयोविंश-चतुर्विंशवर्गयोः परिदृश्यत इदं सूक्तम् ॥

No. 585 (1299/18).

वामनसूक्तम्.

Vāmana Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—51-54.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः । तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥

उपसंहारः—

दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् । अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥

॥ इति वामनसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

अत्र वाय्वादित्यपरमात्मप्रवर्ग्यहोमोपयुक्तगवाद्याः स्वरूपमहिमादिवर्णनपूर्वकं स्तूयन्ते ॥

वक्तव्यविशेषः—

मुद्रितायामृक्संहितायां द्वितीयाष्टकस्थतृतीयाध्यायगतचतुर्दशवर्गमारभ्य त्रयोविंशवर्गान्तमिदं सूक्तं दृश्यते ॥

No. 586 (1299/7).

वायुसूक्तम्.

Vāyu Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{5}{8}$ inches.
Character—Nāgarī.
Folios—26-27.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

वि हि सोतोः परा हीन्द्रं किमयं त्वां यमिमं त्वं प्रिया तष्टानि मे पञ्च ॥

वि हि सोतोरसृक्षत नेन्द्रां देवमंमंसत । यत्राम-

दद्हूषाकंपिरयः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥

उपसंहारः—

पशौहे नाम मानवी साकं ससूव विंशतिम् । भद्रं भलत्यस्या अभूद्यस्या उदरमामयद्विश्वस्मादिन्द्र उत्तरः ॥

प्रतिपाद्यविषयः—

वायुसूक्तमिति नाम्ना अस्मिन् कोशे एते मन्त्राः परिलिखिताः । भाष्यपर्यालोचनायामिदमिन्द्रदेवताकमिति ज्ञायते । अत्र चेन्द्राणीन्द्रवृषाकपीनां संवादमुखेन इन्द्रः स्तूयते ॥

वक्तव्यविशेषः—

मुद्रितायामृक्संहितायां अष्टमाष्टकगतचतुर्थाध्याय आदितो वर्गचतुष्टये इदं सूक्तं परिदृश्यते ॥

No. 587 (905/4).

वास्तोष्पत्यादिशान्तिमन्त्राः.

Vāstoṣpatyādi Śāntimantrās.

Substance—Palm-leaf.
Size—$13\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—1-2.
Lines on a page—7.
Letters in a line—62.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

वास्तोष्पतिश्चतुर्भिश्च कुम्भं स्पृष्ट्वा जपेदथ ।

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः।
सबुध्न्या उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः ॥

वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशो अनमीवो भवानः। यत्त्वेमहे प्रतितन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥

उपसंहारः—

इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम्। भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥

प्रतिपाद्यविषयः—

नूतनगृहप्रवेशकर्मोपयुक्तेऽस्मिन् मन्त्रकदम्बे गृहवास्तुपुरुषभूम्यादिप्रार्थनादिक्रमो दृश्यते ॥

वक्तव्यविशेषः—

मुद्रिता एते मन्त्रा दृश्यन्ते ॥

No. 588 (905/7).

वास्तोष्पत्यादिसूक्तानि.

Vāstoṣpatyādi Sūktāni.

Substance—Palm-leaf, Size—13½ × 1½ inches, | Character—Nāgarī, Folios—8–8.

Lines on a page—7.
Letters in a line—62.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

'वास्तोष्पतिश्चतुर्भिश्च कुंभं स्पृष्ट्वा जपेदथ । ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वे न आवः । स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च वि वः । वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे ॥

उपसंहारः—

अया ते अग्ने समिधा विधेम प्रतिस्तोमꣳ शस्यमानं गृभाय । दहाशसो रक्षसः पाह्यस्मान् द्रुहो विदो मित्रमहो अवद्यात् ॥

प्रतिपाद्यविषयः—

वास्तोष्पतिसूक्तश्रीसूक्तायुष्यसूक्तशान्तिसूक्तान्तर्गतेषु गृहप्रवेशादिषु शान्तिकर्मसु चोपयुक्तेष्वत्र सङ्गृहीतेषु मन्त्रेषु तत्तत्प्रार्थनपूर्वकशुभाशंसनक्रमः प्रतिपाद्यते ॥

वक्तव्यविशेषः—

मुद्रिता इमे मन्त्राः ॥

No. 589 (1299/12).

विष्णुसूक्तम्.

Viṣṇu Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.

Character—Nāgarī.
Folios—33–37.

Lines on a page—6.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—
Correct.

Complete or incomplete—
Incomplete.

उपक्रमः—

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥

उपसंहारः—

वषट् ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्टहव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिस्सदा नः ॥

प्रतिपाद्यविषयः—

कोशेऽस्मिन् आदौ परिदृश्यमाने वर्गत्रितये विष्णोः स्वरूपमहिमादिकमनुवर्ण्यते । ततो दृश्यमाने एकस्मिन् वर्गे इन्द्राविष्णू स्तूयेते । ततः परिदृश्यमाने एकस्मिन् वर्गे विष्णोरेव शक्त्यादिकमभिधीयते ॥

वक्तव्यविशेषः—

मुद्रितायामृक्संहितायां द्वितीयाष्टकस्थद्वितीयाध्याये चतुर्विंशवर्गमारभ्य त्रिषु वर्गेषु, पञ्चमाष्टकगतप्रथमाध्याये त्रयोदशवर्गे पञ्चमाष्टकगतषष्ठाध्याये चतुर्विंशवर्गे चेदं सूक्तं दृश्यते ॥

No. 590 (1299/5).

वृषभसूक्तम्.

Vṛṣabha Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—14-15.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

ऋषभं मा समानानां सपत्नानां विषासहिम् । हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥

उपसंहारः—

यदुदो वात ते गृहेऽमृतस्य निधिर्हितः । ततो नो देहि जीवसे ॥

प्रतिपाद्यविषयः—

कोशोऽस्मिन् दृश्यमाने वर्गचतुष्टये—सपत्नबाधनसामर्थ्यालक्ष्मीनाशनारोग्यसौख्यादिकमिन्द्रवाय्वादिसकाशात्संप्रार्थ्यते ॥

वक्तव्यविशेषः—

मुद्रितायामृक्संहितायां अष्टमाष्टकगताष्टमाध्याये चतुर्विंशैकत्रिंशत्रयोदशचतुश्चत्वारिंशवर्गेष्विदं सूक्तं दृश्यते ॥

No. 591 (1299/35).

वृषभसूक्तम्.

Vṛṣabha Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{5}{8}$ inches.
Character—Nāgarī.
Folios—104-105.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

ऋषभं मा समानानां सपत्नानां विषासहिम् ।
हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥
अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः ।
अधः सपत्ना मे पदोरिमे सर्वे अभिष्टिताः ॥

उपसंहारः—

योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमम् । अधस्पदान्म उद्वदत मण्डूका इवोदकान्मण्डूका उदकादिव ॥

प्रतिपाद्यविषयः—

अत्रेन्द्रसकाशात्सपत्नबाधनं प्रार्थ्यते ॥

वक्तव्यविशेष.—

मुद्रितायामृक्संहितायां अष्टमाष्टकस्थाष्टमाध्यायगतचतुर्विंशवर्गे इदं सूक्तं दृश्यते। कोशेऽस्मिन् एकवर्गात्मकमिदं सूक्तं दृश्यते। No. 590 कोशान्तरे च वर्गत्रितयगतं संगृहीतम् ॥

No. 592 (A297).

*वैखानसमन्त्रप्रश्नः.

* Vaikhānasa Mantrapraśnaḥ.

Substance—Paper.
Size—$12\frac{1}{2} \times 7\frac{3}{4}$ inches.
Character—Telugu.
Folios—169.
Lines on a page—19.
Letters in a line—19.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Subject in brief:—

The first four Praśnas or chapters in this work contain Vaikhānasa mantras relating to the performance of the purificatory ceremonies during and after the life of a man and the next four Praśnas contain the mantras which are recited at the installation and worshipping ceremonies of the image of Viṣṇu.

उपक्रमः—

नारायणः पिता यस्य यस्य भार्या सरस्वती।
भृग्वादिमुनयः पुत्राः तस्मै विघ्न(ख)नसे नमः ॥

इन्द्रोऽहमस्मि यजमानाय देवाः। तं त्वा सत्यं वृणीमहे। उभाभ्यां देव सवितः प्रहरेम वीतये। आपः पादावनेजनीर्द्विषन्तं नाशयन्तु मे। अस्मिन् लोके ब्रह्मवर्चस्यसानि। आपः पुनन्तु पृथिवीं पृथिवी पूता पुना तु मां। पुनन्तु ब्रह्मणस्पतिः ब्रह्म पूता पुनातु माम्। यदुच्छिष्ट-

मभोज्यं यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहꣳ स्वाहा । आदशात्सूदितं मधूदितं महोदितम् ॥

उपसंहारः—

मामाप्नुतां सत्वस्य सर्वस्य वितानरूपां स जोर्जुषन्तीं परमां पवित्राम् । सन्तापयन्तीं स्वयमप्रवृत्तां संयोजनित्रे वरदाय पित्रे स्वाहा। विष्णुः सर्वेषां, यो वा, यस्त्वं, वाकः, सत्यं, स्वयं, तपोनिधीनाम्, यत्सारभूतं, चत्वारो, यागा, यो वा भूतिर्भूतिरेकादश ॥

॥ अष्टमः प्रश्नः ॥

॥ वैखानसमन्त्रप्रश्नः समाप्तः ॥

प्रतिपाद्यविषयः—

अत्रादितश्चतुर्षु प्रश्नेषु पूर्वोत्तरसंस्कारसमवेतार्थस्मारका मन्त्राः. ततश्चतुर्षु प्रश्नेषु विष्णुप्रतिष्ठाराधनाद्युपयुक्ताश्च मन्त्रा आम्नाताः ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् मध्ये मध्ये ग्रन्थपातः प्रदृश्यते । अमुद्रितश्चायम् । शुक्लयजुश्शाखीयगृह्यसूत्रं भगवच्छास्त्रैकदेशवैखानसागमं चानुरुध्य गृह्यकर्मदेवप्रतिष्ठापूजाद्युपयुक्ता मन्त्रा अत्र संगृह्य निर्दिष्टा दृश्यन्ते ॥

No. 593 (1359/2).

* वैखानसमन्त्रप्रश्नः.

* Vaikhānasa Mantra Praśnaḥ.

Substance—Palm-leaf.
Size—19½ × 1¾ inches.
Character—Grantha.
Folios—58.
Lines on a page—10.
Letters in a line—62.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

'न आपश्शँस्योना भवन्तु। यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम्। मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शँस्योना भवन्तु' इत्यादि No. 592 कोशवत्॥

उपसंहारः—

तन्नो मित्रो वरुणो मामहं तामदितिः सिन्धुः पृथिवी उत द्यौः। कया नश्चित्र आभुवदूती सदावृधस्सखा। कया शचिष्ठया वृता। कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः। अभीषुणः सखीनामविता॥

प्रतिपाद्यविषयः—

No. 592 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् असमग्रपञ्चमप्रश्नान्तोऽयं ग्रन्थ उपलभ्यते॥

No. 594 (2743/1).

शान्तिसूक्तसङ्ग्रहः.

Śānti Sūkta Saṅgrahaḥ.

Substance—Palm-leaf.	Age of Ms.—Old.
Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches.	Condition of Ms.—Good.
Character—Telugu.	Correct or incorrect—Correct.
Folios—5.	Complete or incomplete—Complete.
Lines on a page—7.	
Letters in a line—64.	

उपक्रमः—

अथ शान्तिकानां सूक्तानां सशैलीकानां मन्त्राणामृक्सङ्ख्यामृषिदेवताच्छन्दांसि पुनर्वक्ष्यामः पूर्वाचार्यक्रमेणैतत्सर्वं पुराऽऽदिष्टं गौतमादिभिराचार्यैर्जपतां तु प्रत्यक्षार्थमिदानीं तन्मयोच्यते। आ नो भद्रा इति दशर्चस्य सूक्तस्य रहुगणपुत्रो गौतमऋषिः विश्वेदेवा देवताः॥

उपसंहारः—

शान्ता पृथिवी शिवमन्तरिक्षं द्यौर्नो देव्यभयं नो अस्तु । शिवा दिशः प्रदिश उद्दिशो न आपो विद्युतः परिपान्तु सर्वतः । शान्तिः शान्तिः शान्तिः । सर्वारिष्टशान्तिरस्तु ॥

प्रतिपाद्यविषयः—

अत्र 'आ नो भद्रा' इत्यादीन्यष्टौ सूक्तानि महाशान्तिपारायणे विनियुक्तानि निर्दिष्टानि । तेषु च प्रथमस्य मङ्गलार्थत्वं द्वितीयस्य भयनिवारकत्वं तृतीयस्य सुखार्थत्वं तुरीयस्य रक्षोबाधानिवारकत्वं पञ्चमस्य आयुर्वर्धकत्वं षष्ठस्य रोगनिवारकत्वं सप्तमाष्टमयोः सर्वसमृद्धिफलकत्वमिति प्रत्येकं फलं निर्दिष्टम् । एतेषां च सूक्तानामत्र ऋषिदेवताच्छन्दांसि च कीर्तितानि दृश्यन्ते ॥

वक्तव्यविशेषः—

एतानि सूक्तानि ऋक्संहितातस्संगृह्यात्र निर्दिष्टानि मुद्रितानि चोपलभ्यन्ते ॥

No. 595 (2743/2).

शान्तिसूक्तसङ्ग्रहः (यजुर्वेदीयः)

Śāntisūkta Saṅgrahaḥ.

Substance—Palm-leaf.
Size—17½ × 1½ inches.
Character—Telugu.
Folios—2.
Lines on a page—7.
Letters in a line—52.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

सूर्यस्य उदुत्यं चित्रं देवानां उद्यन्नद्येति विंशतिवाक्यानि । सोमस्य त्वꣳ सोमेति आप्यायस्वेति नवो नव इत्यृक्, सोमो धेनुमिति

चतस्रः ऋचः । भौमस्य अग्निर्मूर्धेत्यनुवाकः । बुधस्य अग्नेर्मन्व इत्यनुवाकः ॥

उपसंहारः—

अञ्जन्तित्वामनुवाकः । ओषधीनां या जाता ओषधय इत्यनुवाकः । इत्यादिमन्त्रान् पूर्वोक्तानि सूक्तानि च आहोमसमाप्ति जपेताम् ॥

प्रतिपाद्यविषयः—

अत्र नवग्रहजपशान्तिहोमादिषु तुलापुरुषदानादिषु चोपयुक्तानां याजुषमन्त्राणां प्रतीकादिकं दर्शितम् ॥

वक्तव्यविशेषः—

मुद्रिता एते मन्त्रा दृश्यन्ते ।

No. 596 (1344).

श्रीरुद्रप्रश्नभाष्यम् .

Srī Rudraprasna Bhāsyam.

Author—Bhaṭṭabhāskara-miśra.
Substance—Palm-leaf.
Size—15 × 1½ inches.
Character—Telugu.
Folios—26-106.
Lines on a page—6.
Letters in a line.—56.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Complete.

उपक्रमः—

अतः परमग्निकाण्डमेव व्याख्येयम् । तत्र चरमायामिष्टकायां जुहोति शतरुद्रीयं जुहोति नमस्ते रुद्र मन्यव इति । रुद्रो वा एष यदग्निः, स एतर्हि जात इत्यादि ब्राह्मणम् । रुद्रो वा एष यदग्निस्तस्यैते तनु वा इत्यादि च ॥

उपसंहारः—

एवं सिद्धस्याभावास्यायां स्वाग्नौ कपिलाज्येनाष्टसहस्रं जुहुयात्। अथर्वशिरःप्रयुक्तविधानेनाराधनं कुर्यात्। ततः कृत्या रक्ताङ्गी रक्तमूर्धजा रक्तनयनोत्पद्यते। पूर्वमेवाजारुधिरपूर्णांश्चतुरः कुभान्निधाय तर्पयेत्। अन्यथा स्वात्मानं नाशयेत्। तया चाभिमतं सर्वं साधयेत्। अनेन मन्त्रेणाज्येनायुतं जुहुयात्। कालज्ञानमुत्पद्यते। कापिलेन पयसाऽष्टशतं जुहुयात्। जातिस्मरो भवेत्। ध्यानं पूर्ववत्॥

इति भट्टभास्करविरचिते यजुर्वेदभाष्ये अग्निकाण्डे पञ्चमप्रपाठके ज्ञानयज्ञाख्ये श्रीरुद्रप्रश्ने एकादशोऽनुवाकस्समाप्तः॥

प्रतिपाद्यविषयः—

तैत्तिरीयसंहितातुरीयकाण्डगतेऽस्मिन् एकादशानुवाकीपरिमिते रुद्रप्रश्ने-प्रथमानुवाकेन रुद्रक्रोधशमनं द्वितीयादिभिरष्टभिरनुवाकैस्तदीयानां संहृत्युपकरणानां नमस्कृतिपूर्वकं प्रसादनं दशमैकादशाभ्यामभययाचनमित्येतत्सर्वमभिधीयते। तस्यास्य रुद्रप्रश्नस्य पातकनिवृत्यभीप्सितादिफलकत्वप्रदर्शनपूर्वकं होमजपपारायणादौ विनियोगं प्रदर्श्य तत्तन्मन्त्रार्थाः सम्यगस्मिन् भाष्ये सायणीयभाष्यतो विस्तरेणाभिहिता द्रश्यन्ते॥

वक्तव्यविशेषः—

एतद्भाष्यप्रणेता भट्टभास्करमिश्रः सायणाचार्यात्प्राचीन एवेति विभाव्यते। अत एव माधवीयायां धातुवृत्तौ षूदधात्वर्थनिरूपणावसरे तैत्तिरीयसंहितापञ्चमकाण्डीयद्वितीयप्रश्नगतद्वादशानुवाकीयभट्टभास्करीयभाष्यग्रन्थोऽनूदितो द्रश्यते। ततश्च मुद्रितेऽस्मिन् रुद्रभाष्येपोद्घाते 'तथाऽपि भट्टभास्करोऽयं माधवाचार्यान्न प्राचीन इति तु निश्चितमेव, इति लेखने प्रमाणं परिचिन्तनीयमिति प्रतिभाति॥ इतोऽधिकं No. 110 तमकोशे द्रष्टव्यम्॥

No. 597 (573/1).

श्रीरुद्रप्रश्नभाष्यम्.

Srī Rudrapraśnabhāṣyam.

Author—Bhaṭṭabhāskara-miśra.
Substance—Palm-leaf.
Size—17½ × 1½ inches.
Character—Telugu.
Folios—2-47.
Lines on a page—8.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—The leaves are broken at one end.
Correct or incorrect—Appears to be Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

. . . . . शतं रुद्रा देवता अस्येति शतरुद्रीयम्। अनया रुद्रोपनिषदा ब्रह्मविद्या प्रतिपाद्यते। ब्रह्मणश्च त्रीणि रूपाणि सन्ति। एकं कार्यरूपम्। इतरत्पुरुषाख्यम्॥

उपसंहारः—

कापिलेन पयसाऽयुतं जुहुयात्। जातिस्मरो जायते। उवाच—
श्रुतं रुद्रप्रभावेण सर्वमेव यथातथम्।
एकादशैकादशगोदानमुक्तं त्वयाऽनघ।
पञ्चगोकर्णिकं दानं शम्भुदानं तथैव च।
सार्वभौमकरं भौमं कनकस्क . . . येत्।
अनेनाज्येनाक्तोऽयुतं जुहुयात् [त]र्पणं तथा।
शिखास्फुटितसंस्कारं मण्डनिर्माणदानकम्।
रुद्रैका . . . . . सोमवासुकिसंश्रिता।
जातिस्मरक्रिया पुण्या कुलदानं तथैव च।
राज्ञामभ्यर्चयेत्कुल्यं सर्वमुक्तविशेषतः।

भूयोऽपि रुद्रमन्त्रेण वदस्व भवनाशनम् ।
अपमृत्युहरं कर्म राज्ञामेव विशेषतः ।
: . : सोपदेशं तथैव च ।
सर्वमेतेनैव साध्यमिति ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे यजुस्संहितायां चतुर्थकाण्डे पञ्चमप्रपाठके एकादशोऽनुवाकः ॥

॥ समाप्तश्च पञ्चमप्रपाठकः ॥

प्रतिपाद्यविषयः—

No. 596 कोशवत्.

वक्तव्यविशेषः—

अत्र यद्यपि तत्तदनुवाकसमाप्तौ प्रशास्तिपङ्क्तयां सायणीयप्रणीतमिदं भाष्यमिति लिखितं दृश्यते । तथापि मुद्रिततैत्तिरीयसंहितातुरीयकाण्डगतसायणीयरुद्रप्रश्नभाष्ये पृथङ्मुद्रितरुद्रप्रश्नसायणीयभाष्येऽप्येतादृशानुपूर्व्यदर्शनात् मुद्रितलिखितभट्टभास्करीयरुद्रप्रश्नभाष्यकोशान्तरपरिदृश्यमानानुपूर्वीसाम्याच्चेदं भट्टभास्करमिश्रप्रणीतमेवेति ज्ञायते ॥

No. 598 (C 255).

श्रीरुद्रप्रश्नभाष्यम्.

Srī Rudrapraśnabhāṣyam.

Author—Bhaṭṭabhāskara-miśra.
Substance—Paper.
Size—8½ × 4 inches.
Character—Nāgarī.
Folios—6.
Lines on a page—10.
Letters in a line—22.
Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Incomplete.

उपक्रमः—

हरिः ओम्—

अविकाराय शुद्धाय निर्मलज्ञानमूर्तये ।
सच्चिदानन्दरूपाय मूर्तये ब्रह्मणे नमः ॥
मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥

हरिः ओम्—

अतः परमग्निकाण्डत्वे अग्न्याधेया (काण्डमेव व्याख्येयम्) । तत्र चरमायामिष्टकायां शतरुद्रीयं जुहोति नमस्ते रुद्र मन्यव इति । रुद्रो वा एष यदग्निः स एतर्हि जात इत्यादि ब्राह्मणम् ॥

उपसंहारः—

केचिदाहुः—प्रथमेनानुवाकेन रुद्रं देवं प्रसाद्य ततोऽष्टभिरनुवाकैः कर्मा(किम)धिष्ठामनधिष्ठाय देवस्तिष्ठतीत्यजानन् सर्वं चराचरं तदधिष्ठानशङ्कया नमस्कृत्यान्त्याभ्यामभयं याचत इति । देवो हि किंचिदधिष्ठाय निग्रहानुग्रहौ जगतः करोतीति यक्षरूपेणाविर्भूय

प्रतिपाद्यविषयः—

No. 596 कोशवत्.

वक्तव्यविशेषः—

कोशेऽस्मिन् दृश्यमानभाष्ये उपोद्घातग्रन्थभागमात्रं दृश्यते ॥

No. 599 (C 496/4).

* श्रीरुद्रप्रश्नभाष्यम्.

Srī Rudraprasnabhāṣyam.

Author—Vidyāraṇya. Character—Telugu.
Substance—Paper. Folios—20.
Size—12¼ × 7⅝ inches. Lines on a page—49.

Letters in a line—26.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief:—

This commentary on Rudrapraśna vividly points out the Rudramantras that are to be recited while performing the Rudra Nyāsa, Japa and Homa in addition to explaining the meaning of those mantras. This Rudraprasna-bhāṣya is found briefly quoted with the author's name in a legal treatise, called, Karmavipāka Mahārṇava by the king Māndhāta; but while differing from the Rudrabhāṣya of Sāyaṇa, this closely follows the method of Rudrabhāṣya of Bhaṭṭabhāskara.

उपक्रमः—

यश्च सागरपर्यन्तां सशैलवनकाननाम् ।
सर्वरत्नगुणोपेतां सवृक्षजलशोभिताम् ॥
सर्वर्तुगुणसम्पन्नां ब्राह्मणे वेदपारगे ।
दद्यात्काञ्चनसंयुक्तां भूमिमोषधिसंयुताम् ॥
तस्मादप्यधिकं पुण्यं सकृद्रुद्रजपाद्भवेत् ।
ममभावं परित्यज्य यश्च रुद्रान् जपेत्सदा ॥
अनेनैव तु देहेन रुद्रस्संजायते ध्रुवम् ।
जपेनानेन विप्रेन्द्र नृपाश्चान्ये द्विजातयः ॥
हित्वैव सकलं पापं गताश्शिवपुरं पुरा ।
नमकं चमकं चैव पुरुषसूक्तं तथैव च ॥
नित्यं त्रयं प्रयुञ्जानो ब्रह्मभूयाय कल्पते ।
यद्वा रुद्रान् जपेन्नित्यं प्रथमोत्तमसंज्ञकान् ॥
आपस्तम्बस्य वचनात् स मुक्तो नात्र संशयः ।
नमकं चमकं चैव जपन्तं पुरुषं सदा ॥
प्रविशेत्स महादेवो गृहं गृहपतिर्यथा ।

भस्मदिग्धशरीरस्तु भस्मशायी जितेन्द्रियः ।
सततं रुद्रजापी च परां मुक्तिमवाप्नुयात् ॥

उपसंहारः—

अत्रापरः प्रयोगस्तु दर्शे स्वाग्नौ हुतिर्भवेत् ।
द्रव्यं तु कापिलं सर्पिः सङ्ख्या त्वष्टसहस्रकम् ॥
अथर्वशिरसि प्रोक्तविधानेनार्चनं भवेत् ।
तत उत्पद्यते कृत्या रक्ताङ्गी रक्तमूर्धजा ॥
रक्तनेत्रा तया सर्वं साधयेत्स्वात्मसम्मतम् ।
कर्मणोऽस्य समारम्भ अजारुधिरपूरितान् ॥
अथ यत्कलशांस्तत्र स्थापयित्वाऽतिसंशयः ।
तर्पयेदन्यथा नूनं नाशयेन्नैव संशयः ॥
भवेद्यस्सकलाज्ञानकामनाशोऽयुताहुतीः ।
जुहुयात्सर्पिषा वह्नौ कलाज्ञानं ततोभवेत् ॥
जातिस्मरणकामस्तु जुहुयादयुताहुतीः ।
पयसा कापिलेनैव कामाज्जातिस्मरो भवेत् ॥

ध्यानप्रकारस्तु सहस्राणि सहस्रश इत्यत्रोक्तो ज्ञेयः । ध्यानम्—

वृषाधिरूढं देवेशं सर्वलोकैककारणम् ।
ध्यायेद्ब्रह्मादिभिस्तुत्यं पार्वतीसहितं शिवम् ॥

जपमात्रेण सर्वसिद्धिर्भवति । त्रिषवणस्नायी जपित्वा पञ्चपातकात्पूतो भवति । इति नमकेषु नमो रुद्रेभ्य इत्यस्य प्रयोगः ॥

इति विद्यारण्यविरचिते यजुर्वेदभाष्ये नमके एकादशोऽनुवाकः ॥

प्रतिपाद्यविषयः—

अत्र विस्तरेण प्रत्यनुवाकं न्यासजपहोमादिप्रयोगप्रदर्शनपुरस्सरं श्रीरुद्रप्रश्नस्य एकादशानुवाकात्मकस्य श्रीरुद्रकोपशमनतन्नमस्कृति-प्रार्थनादिपरस्य विवरणं दृश्यते ॥

वक्तव्यविशेषः—

कर्मविपाकमहार्णवे संगृहीतं मुद्रितसायणीयरुद्रभाष्याद्विलक्षणं भट्टभास्करीयभाष्यानुरोधि चेदं भाष्यं दृश्यते । अमुद्रितं चेदम् ॥

No. 600 (2283/1).

श्रीरुद्रप्रश्नभाष्यम्.

Srī Rudrapraśnabhāṣyam.

Author—Sayaṇācārya.
Substance—Palm-leaf.
Size—16 × 1½ inches.
Character—Grantha.
Folios—17.
Lines on a page—9.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
इष्टकाचितयस्सर्वाश्चतुर्थे हि समापिताः ।
रुद्राध्याये पञ्चमे तु चित्यग्नौ होम उच्यते ॥
कर्मप्रकरणे पाठात्कर्माङ्गत्वमपीष्यते ।
ज्ञानहेतुत्वमप्यस्य तथोपनिषदीरितम् ॥
किंजप्येनामृतत्वं नो ब्रूहीत्युक्तो मुनिर्जगौ ।
शतरुद्रीयकेणेति जाबाला आमनन्ति तत् ॥
स्मृत्यागमपुराणेषु रुद्राध्यायप्रशंसनम् ।
बह्वस्ति तद्विस्तरेण रुद्रकल्पेऽभिधास्यते ॥
इह कर्माङ्गता यादृग्वर्णिता ब्राह्मणेन ताम् ।
बोद्धुं शब्दार्थमात्रस्य विवृतिः क्रियते स्फुटा ॥

कल्पः—शतरुद्रीयं जुहोति जर्तिलयवाग्वा वा गवीधुकयवाग्वा वा जर्तिलैर्गवीधुकसक्तुभिः । जर्तिलाः आरण्यकतिलाः ॥

उपसंहारः—

ईदृशैरञ्जलिविशेषैस्तेभ्यो रुद्रेभ्यो नमोऽस्तु । ते च रुद्रा नोऽस्मान् मृडयन्तु सुखयन्तु । ते वयं नमस्कृतरुद्रास्सन्तो यं वैरिणं तूष्णीमवस्थित-

मपि द्विष्मः, यश्च वैरी नोऽस्मान् तूष्णीमवस्थितानपि द्वेष्टि तमुभयविधं वैरिणं हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि। तमिममेकादशानुवाकात्मकं रुद्राध्यायं विनियुङ्क्ते—रुद्रो वा एष यदग्निरित्यादि ॥

प्रतिपाद्यविषयः—

एकादशानुवाकात्मकोऽयं रुद्राध्यायः। तत्र प्रथमे रुद्रस्य क्रोधशमनं, द्वितीयादिषु तन्नमस्कारप्रार्थनादयश्च प्रतिपाद्यन्ते। एतज्जपहोमपारायणादिभिः साधकस्य पातकादिनिवृत्तिमहाफलप्राप्त्यादिप्रतिपादनपूर्वकं तत्तन्मन्त्रार्थो भाष्येऽस्मिन्नुपवर्ण्यते ॥

वक्तव्यविशेषः—

मुद्रितमिदं भाष्यम्। मुद्रितकोशे एतदपेक्षयाऽन्ते किंचिदधिको ग्रन्थभाग उपलभ्यते। एतद्भाष्यप्रणेता सायणाचार्य एतद्भाष्यान्तरप्रणेतृभट्टभास्करमिश्रादर्वाचीन इति No. 596 कोशे प्रतिपादितं द्रष्टव्यम् ॥

No. 601 (1796/2).

श्रीरुद्रप्रश्नभाष्यम्.

Srī Rudrapraśnabhāṣyam.

Author—Sāyaṇācārya.
Substance—Palm-leaf.
Size—19¼ × 1⅞ inches.
Character—Nāgarī.
Folios—60-67.
Lines on a page—11.
Letters in a line—110.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

ओं, शौनकः—

"ज्ञानेन यत्कृतं पापं ब्रह्महत्यादिभिर्नृभिः।
तस्य पापस्य मोक्षार्थं रुद्रैकादशिनीं जपेत् ॥

एकादशगुणान्वाऽपि रुद्रानावृत्य (वर्त्य) धर्मवित् ।
महापापैरपि स्पृष्टो मुच्यते नात्र संशयः ॥
वेदमेकगुणं जप्त्वा तदह्ना चैव शुध्यति ।
रुद्रैकादशिनीं जप्त्वा तत्क्षणेनैव शुध्यति ॥
होतॄन् रुद्रान् सकृज्जप्त्वा मुच्यते सर्वकिल्बिषैः ।
यश्च रुद्रान् जपेन्नित्यं ध्यायमानो महेश्वरम् ॥
यश्च सागरपर्यन्तां सशैलवनकाननाम् ।
सर्वकर्मगुणोपेतां सवृक्षफलशोभिताम् ॥
सर्वां तु गुणसम्पन्नां ब्राह्मणे वेदपारगे ।
दद्यात्काञ्चनसंयुक्तां भूमिमोषधिसंयुताम् ।
तस्मादप्यधिकं पुण्यं सकृद्रुद्रजपाद्भवेत्" ॥

इत्याद्याः शौनकीयरुद्रजपविषयकश्लोकाः संगृहीताः । ततः सर्वं No. 600 कोशवत्.

उपसंहारः—

No. 600 कोशवत्.

वक्तव्यविशेष.—

No. 600 कोशवत्.

प्रतिपाद्यविषयः—

No. 600 कोशवत.

No. 602 (110/1).

श्रीरुद्रप्रश्नभाष्यम्.

Rrī Sudrapraśnabhāṣyam.

Author—Sāyaṇācārya.
Substance—Palm-leaf.
Size—16½ × 1½ inches.
Character—Nāgarī.
Folios—23.
Lines on a page—7.

Letters in a line—52.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Almost complete.

उपक्रमः—

No. 601 **कोशवत्.**

उपसंहारः—

No. 601 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 601 **कोशवत्.**

वक्तव्यविशेषः—

No. 601 **कोशवत्.**

No. 603 (110/2).

श्रीरुद्रप्रश्नभाष्यम्.

Srī Rudrapraśnabhāṣyam

Author—Sāyaṇa.
Substance—Palm-leaf.
Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—20.
Lines on a page—7.
Letters in a line—56.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 601 **कोशवत्.**

उपसंहारः—

No. 601 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 601 कोशवत्.

वक्तव्यविशेषः—

No. 601 कोशवत्.

No. 604 (1817).

* श्रीरुद्रप्रश्नभाष्यम्.

Srī Rudrapraśnabhāṣyam.

Author—Venkaṭanātha.
Substance—Palm-leaf.
Size—19 × 1⅝ inches.
Character—Telugu.
Folios—34.
Lines on a page—9.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms.—Good, but some folios are worm-eaten.
Correct or incorrect—Correct.
Complete or incompletet—Incomplete.

Subject in brief :—

This commentary beautifully explains the meaning of such of the mantras of the Rudrādhyāya as are uttered while performing the Vedic rites of Śāntika, Pauṣṭika, Kāmya and Ābhicārika, besides pointing out the Adhikārin, the method and the fruits of performing the above rites.

उपक्रमः—

इत्थं श्रीरुद्रस्य सकलपापनिवर्तकत्वेन सर्वोपासनफलप्रदत्वेन सकृज्जपादेव ज्ञानप्रदत्वेन च कर्मोपासनादि उपासनं ज्ञानकाण्डात्मक" मेव सकलमेव तत्त्वम्। तत्र च श्रुतिस्मृतीतिहासपुराणानि तत्तात्पर्य-तन्न्यासविधिश्चेत्येतत्सर्वं निरूपितम्। इदानीं श्रीरुद्रोपनिषदमर्थतो

व्याख्यास्यामः । अत्र हि एकादशानुवाकाः–तत्राद्ये भगवतः प्रसादनम् । द्वितीयादिष्वष्टसु सर्वैश्वरत्वसर्वात्मकत्वसर्वान्तर्यामिरूपेण भगवन्तं(तो) नमस्कारः, ततो दशमे भगवतः प्रार्थना, एकादशे भगवदंशरुद्रसङ्घप्रार्थनेत्येकादशानुवाकात्मकश्रीरुद्राध्यायार्थः ॥

तत्र तावन्निजपापकुपितमीश्वरं प्रसादयितुं नमस्करोति—नमस्ते रुद्रेति । हे रुद्र प्रणतदुःखद्रावक ते तव मन्यवे क्रोधाय नमोऽस्तु । न च निरस्तसमस्तदोषे निखिलकल्याणसमुद्रे च भगवति कथं क्रोधप्रसक्तिरिति वाच्यम् । दुष्टनिग्रहशिष्टानुग्रहस्वभावे निग्राह्यविषयक्रोधस्यालङ्कारत्वेनादोषत्वात् ॥

उपसंहारः—

अत्र नमो रुद्रेभ्य इत्यादि समामनन्तं यजुस्त्रयमेको मन्त्रः । अस्य देवलऋषिः श्रीरुद्रो देवता । ध्यानं तु सहस्राणि सहस्रश इत्यत्रोक्तमेव ग्राह्यम् । अन्नसमृद्धिप्रदोऽयं मन्त्रः । पुरश्चरणप्रकारः कृत्योत्पादनजातिस्मरत्वादिफलभेदाश्च रुद्रकल्पार्णवादिषु प्रपञ्चिता द्रष्टव्याः ॥

इति श्रीमत्परमहंसपरिव्राजकसार्वभौमश्रीमदद्वैतविद्याप्रतिष्ठाभिनवशङ्कराचार्यसर्वतन्त्रश्रीरामब्रह्मानन्दभगवत्पूज्यपादानन्दशिष्येण श्रीवेङ्कटानाथेन विरचिते यजुर्वेदोपनिषद्भाष्ये श्रीरुद्रोपनिषद्भाष्यं समाप्तम् ॥

प्रतिपाद्यविषयः—

शान्तिकपौष्टिकादिषु काम्येष्वाभिचारिकेषु च कर्मसु तत्तदधिकारिभेदेन जपाभिषेकहोमेषु च विनियुक्तानां रुद्राध्यायान्तर्गतानां मन्त्राणां प्रतिमन्त्रं तत्तत्कर्मविधिफलनिरूपणपुरस्सरमर्थः सम्यगत्र प्रदर्शितः ॥

वक्तव्यविशेषः—

असुद्रितोऽयं कोशः ॥

No. 605 (2669).

*श्रीरुद्रप्रश्नभाष्यं रुद्रामृततरङ्गिण्याख्यम्.

*Srī Rndrapraśnabhāṣyam, styled Rudrāmṛtataraṅgiṇī.

Author—Subrahmaṇya. | Size—18 × 1¼ inches.
Substance—Palm-leaf. | Character—Āndhra.

Folios—39.
Lines on a page—6.
Letters in a line—70.
Age of Ms.—Not very old.

Condition of Ms.—Good.
Correct or incorrect—
Appears to be correct.
Complete or incomplete—
Complete.

Subject in brief :—

This is again a commentary in a versified form, on Srī Rudraprasna. It is written by one Subrahmaṇya who describes himself as the son of Sāvitrī and Annaya, the brother of Nārāyaṇāvadhānin, and the desciple of Venkaṭasūrī. He further writes that he composed this work in the Paiṅgala Year of the Kali Age 4898.

उपक्रमः—

वेणीनूपुरकङ्कणाञ्जनलसद्धामाङ्गकत्वात्पुमान्
इत्याख्यातुमशक्ततां श्रुतिरगाद्यद्वस्तु नारीति च ।
भूतिश्मश्रुभुजङ्गभूषिततया ब्रह्मादिदेवोद्भवे हेतुत्वाच्च
नपुंसकं तदमलं श्रेयो विधत्तां मम ॥ १ ॥

कृत्वाऽलंकरणं मनोहरतरं प्रस्थापिताया गृहं
हेलालोकनकौतुकाळिनिकरे द्वारि स्थिते संघशः ।
रत्यालोलुपशङ्करेऽथ करटीवक्षोजचञ्चत्करे
पार्वत्या नवसंगमेऽक्षियुगलं पारिप्लवं पातु नः ॥ २ ॥

व्याकोचन्नवनीलनीरजनिभश्रीचञ्चलामण्डितो
नित्यं तापसचातकावलिकृताह्लादः कृपाजीवनः ।
नानाम्नायधराधरेष्वपि चरन् वैकुण्ठनामाऽम्बुदः
श्रीमच्छेषधराधरेन्द्रशिखरे जेजीयते सन्ततम् ॥ ३ ॥

उन्मीलन्मधुमासवासरलसन्माकन्दगुच्छोच्चल-
द्धारापातमरन्दमञ्जुलतरा विद्वन्मनोह्लादिनी ।
व्याकोचन्नवमल्लिकापरिमलाहंकारसर्वंकषा
श्रीमच्छैलसुताकटाक्षसुधया मद्वाग्झरी जृम्भताम् ॥ ४ ॥

श्रीरुद्रोपनिषत्कभाष्यसरणिं छन्दोमयीं कल्पितुं
मातस्त्वां प्रणमामि भारति शिशोः स्वल्पाऽपि वाणी मम ।
पीयूषोद्गमकालमन्दरशिलासंघर्षजाग्रत्पयः-
पारावारतरङ्गपङ्क्तिसदृशी भूयात्प्रसादात्तव ॥ ५ ॥

यत्सारभूतं तदुपासितव्यमितिश्रुतेः प्राक्तनटिप्पणीषु ।
मुख्यार्थमादाय करोम्यनेकरत्नेषु मुक्ताभिरिवाक्षमालाम् ॥ ६ ॥

भट्टभास्करमालोक्य विद्यारण्यमधीत्य च ।
आलोड्य रुद्रकल्पाब्धिमवेक्ष्यान्याश्च टिप्पणीः ॥ ७ ॥

बुधानां परितोषार्थं रुद्रामृततरङ्गिणीम् ।
श्रीरुद्रोपनिषद्व्याख्यां छन्दोरूपां मनोरमाम् ॥ ८ ॥

निन्दन्त्वद्य सहस्रशः कुमतयो नो सन्ति किं पण्डिताः
सारज्ञाः करुणालवालहृदयास्सन्तः क्षमामण्डले ।
संगृह्णन्तु दयां निधाय मयि ते स्वल्पामपीमां कृतिं
यच्छृण्वन्ति च शारिकाशुकपिकव्याहारमप्याविलम् ॥ ९ ॥

ओम् ॥ श्रुतिस्मृतिपुराणानां श्रीरुद्रोपनिषत्सताम् ।
मता सर्वोत्तमत्वेन पठतामामृतप्रदा ॥ १० ॥

उपसंहारः—

ये रुद्रा दिवि वर्तन्ते येषां वर्षं शरा मताः ।
वृष्ट्यनावृष्टिरूपेण ये पापान् घ्नन्ति सर्वदा ॥
शेषं पूर्ववदेव स्यात्सर्वमासीन्मनोहरम् ।
एतद्यजुस्त्रयं सर्वमेको मन्त्र इतीरितः ॥
ऋषिर्देवल इत्युक्तः श्रीरुद्रो देवता मतः ।
ध्यानश्लोकादिकं सर्वं पूर्ववत्परिकीर्तितम् ॥
अन्नवृद्धिप्रदो मन्त्रो जातिसंस्मृतिदायकः ।
पुनश्चर्याविधिश्चेत्तु रुद्रकल्पार्णवेऽस्ति हि ॥
रुद्रामृततरङ्गिण्यां सुब्रह्मण्यस्य सत्कृतौ ।
एकादशस्तरङ्गोऽयमभवद्बुधहर्षदः ॥

सावित्री जननी यस्य गायत्रीसदृशी भुवि ।
जनकोऽन्नयसूरिः स्याद्ब्रह्मज्ञानवतां वरः ॥
नारायणावधानीतिं पूर्वजो वेदवित्तमः ।
लक्ष्मीपतिर्मातुलस्स्यात्तर्कवेदान्तवारिधिः ॥

श्रौते शास्त्रचतुष्टये वितरणे वाक्चातुरीकल्पने
भक्तौ चन्द्रकलावतंसचरणे स्वीयान्वयात्तं भुवि ।
व्यातन्वन् प्रवराक्षतत्वमनिशं नंजुण्डनामा बुधो
भावो यस्य विराजते कविकुलालंकारचूडामणिः ॥

यस्यां ब्रह्मपुरन्ध्रिकापदललन्मञ्जीरशिञ्जायितो
विद्वन्मण्डलवाग्झरीकलकलः क्रीडाशुकाः शारिकाः ।
चम्पूनाटकचित्रबन्धरचनापाण्डित्यपारं गताः
सेयं यस्य धरासुधाशनपुरी बालापुरी जन्मभूः ॥

सोऽयं पान्यकुलाग्रधर्वेंकटसुधीशिष्याग्रगण्यः कृती
सुब्रह्मण्य इति प्रथामुपगतो बाडालवंशोद्भवः ।
श्रीमन्नन्दिगिरीशदारविलसन्नेत्राञ्चलोद्वीक्षिको-
न्मीलन्नीलसरोजपुञ्जविलसद्दामावलीभूषितः ॥

नागाङ्कद्विपसिन्धुभिः परिमिते वर्षे कलौ
पैङ्गले नाकाभ्यांगमिते च मासि शुभदे माघे दशम्यां तिथौ ।
वेदेषुद्विपसंख्यया सुविलसत्पद्यावलीमञ्जुलां
श्रीरुद्रोपनिषत्कभाष्यसरणिं छन्दोमयीं व्यातनोत् ॥

इमां मम कृतिं नवां सरसवाक्सुधामाधुरीं
प्रसन्नहृदयां बुधाः प्रकटयन्ति ये वा भुवि ।
तदीयपदपङ्कजं गिरिवरात्मजापादुका-
प्रसादकुसुमालिवच्छिरसि सन्ततं न्यस्यते ॥

॥ रुद्रामृततरङ्गिणी सम्पूर्णा ॥

प्रतिपाद्यविषयः—

पातकपरिहरणाभीप्सितावाप्त्यादिफलककर्मसु विनियुक्तस्य श्रीरुद्रमन्युप्रसादनपूर्वकं तन्नमस्कृतिप्रार्थनाद्यभिधायिनः तैत्तिरीयसंहितातुरीयकाण्डीयपञ्चमप्रश्नस्य एकादशानुवाकात्मकस्य श्रीरुद्रप्रश्नस्य विवरणरूपेऽस्मिन् भाष्ये भट्टभास्करविद्यारण्यवेंकटनाथभाष्याद्यनुरोधेन श्लोकरूपेण तत्तन्मन्त्रार्थाः प्रतिपाद्यन्ते ॥

वक्तव्यविशेषः—

सावित्र्यन्नयसूरिसूनुः नारायणावधानिनोऽनुजो लक्ष्मीपतेर्भागिनेयः नंजुंडसूरेः स्यालः पान्यकुलजवेंकटसूरेः शिष्यः बाडालवंशोद्भूतो बालापुरीवास्तव्यं सुब्रह्मण्यसूरिः 4898 तमे कलिवत्सरे 854 श्लोकैरेतद्भाष्यं प्राणैषीदिति एतद्भाष्यान्तपरिदृश्यमानैः पद्यैरवसीयते ॥

तथाऽन्ते—भरणीतारयुक्ते च प्रथम्याम्? बुधवासरे ।
तिरुमलाख्याग्रहारे कृष्णार्याख्येन वासिना ।
सन्निधौ रङ्गनाथस्य कैंकर्यनिरतेन च ।
रुद्रामृततरङ्गिणी नामा? ग्रन्थोऽयं लिखितो मया ॥

इति लेखकेन एतद्ग्रन्थलेखनकालो निर्दिष्टो दृश्यते ॥

No. 606 (2349/2).

श्रीसूक्तम्.

Srī Sūktam.

Substance—Palm-leaf.
Size—11½ × 1½ inches.
Character—Grantha.
Folios—6–9.
Lines on a page—7.
Letters in a line—42.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Appers to be Correct.
Complete or incomplete—Complete.

उपक्रमः—

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

उपसंहारः—

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां प्रभूतं हिरण्यं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥

प्रातपाद्यावषयः—

पञ्चदशर्चात्मकेऽस्मिन् श्रीसूक्ते अलक्ष्म्यपनोदनसंपदुपगमलक्ष्म्यनुग्रहादिफलकः श्रीदेवीप्रार्थनादिप्रकारः श्रीस्वरूपशक्तिमाहात्म्यादिप्रकाशनपूर्वकं प्रपञ्चयते ॥

वक्तव्यविशेषः—

मुद्रितमिदं सूक्तम् । एतत्कोशान्ते श्रीसूक्तजपहोमादिविधिरपि शौनकाद्युक्तस्संगृहीतो दृश्यते ॥

No. 607 (1299/9).

श्रीसूक्तम्.

Srī Sūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{5}{8}$ inches.
Character—Nāgarī.
Folios—29–31.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

अस्य श्रीश्रीसूक्तमहामन्त्रस्य महालक्ष्मी ऋषिः परेषां चतुर्दशमन्त्राणां आनन्दकर्दम[1]चिक्लीतेन्दिरा ऋषयः ॥

उपसंहारः—

No. 606 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 606 **कोशवत्.**

प्रतिपाद्यविषयः—

प्रायः No. 606 **कोशवत् । क्वचित्क्वचित्तु पाठवैलक्षण्यं ग्रन्थन्यूनाधिक्यं च दृश्यते ॥**

No. 608 (B 660).

श्रीसूक्तभाष्यम्.

Srī Sūktabhāṣyam.

Author—Vidyāraṇya.
Substance—Paper.
Size—$7\frac{3}{8} \times 3\frac{3}{4}$ inches.
Character—Nāgarī.
Folios—6.
Lines on a page—10.
Letters in a line—30.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Almost complete.

उपक्रमः—

हिरण्यवर्णां—म आवह ॥ हे जातवेदः अग्ने त्वं हिरण्यवर्णां हिरण्यस्य स्वर्णस्य वर्णः कान्तिः तद्वद्वर्णो यस्यास्तां हरिणीं हरितवर्णां हरिणीरूपधरां वा । श्रीर्भूत्वा हरिणीरूपमरण्ये सञ्चरतीति (संचचार हेति) पुराणवचनात् । सुवर्णरजतस्रजां सुवर्णस्य पुष्पाणि रजत-

[1] 'चिक्लीता इन्दिरासुता ऋषयः' इति भाव्यमिति भाति.

तानि तेषां स्रजा माला यस्यास्ताम्। स्रक्साहचर्यात्पुष्पाणामित्येवमवगम्यते ॥

उपसंहारः—

यष्टिकरां वेत्रहस्तामित्यर्थः [टि] लोपश्छान्दसः। तद्वतीं दण्डकारिणीम्। यष्टिं दण्डरूपां वा। सुवर्णां शोभनवर्णाम्। हेममालिनीं हेमविकृतमणीश्रृङ्खलादिरूपावतीं (मालावतीं) सूर्यां सूर्यवत्प्रकाशमानां स (त) द्रूपां वा। स्थितमन्यत्। तां म —— नहम् ॥ इति द्वितीयया चि (व्या)ख्यातम्। प्रभूतं भूयिष्ठं गावः गाः, दास्यः परिचारिकाः। उभयत्र शसर्थे योजिनीया (जस्, इया)न्विशेषः। अस्य सूक्तस्य स्वरनियमो वैयाकरणवैदिकविशिष्टसंप्रदायात् ज्ञेयः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
प्रभा (पुम)र्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

॥ श्रीसूक्तभाष्यं समाप्तम् ॥

आनन्दः कर्दमश्चेति चिक्लीत इति श्रुताः।
ऋषयस्ते श्रियः पुत्राः श्रीः स्वयं चैव देवता ॥

अनुष्टुप्छन्दः। चतुर्थी प्रस्तारपङ्क्तिः। उत्तरे त्रिष्टुभाविति। श्रौते काम्येष्टयादौ वैदिकेऽपि विनियोगः। स्मार्तेषु शौनको विष्णुपूजां पुरुषसूक्तेनाभिधाय—

एवमेव श्रियं देवीं श्रीसूक्तेनार्चयेद्बुधः।

इति। काम्ये त्वाश्वलायनः—काम्यकर्माणि तावच्च कुर्या

प्रतिपाद्यविषयः—

अलक्ष्मीनिराकरणसंपदवाप्तिलक्ष्मीप्रसादकामकर्तव्यजपहोमपारायणादिषूपयुक्तेऽस्मिन् पञ्चदशर्चात्मके सूक्ते परिदृश्यमानाः श्रियः स्वरूपशक्तिमाहात्म्यादिप्रतिपादका मन्त्रा ललितयैव वाक्यशैल्याऽत्र भाष्ये विवृता दृश्यन्ते ॥

वक्तव्यविशेषः—

एतल्लिखितकोशान्तरादत्र क्वचित्क्वचित्पाठभेदो दृश्यते । समग्रमिदं भाष्यमत्र कोशे दृश्यते, मुद्रितं च ॥

No. 609 (1452/2).

श्रीसूक्तभाष्यम् .

Srī Sūktabhāṣyam.

Substance—Palm-leaf.
Size—$16\frac{3}{4} \times 1\frac{1}{4}$ inches.
Character—Telugu.
Folios—52–54.
Lines on a page—7.
Letters in a line—78.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

संप्रणम्य श्रियं देवीं सर्वलोकेश्वरेश्वरीम् ।
पुमर्थसिद्ध्यै श्रीसूक्तं व्याक्रिये(व्याकुर्वे) श्रीप्रसादतः ॥
ऋग्वेदे शाकलाधीतसंहितायां तुरीयके ।
अष्टके च तथाऽध्याये पदक्रमविवर्जिते ॥

तत्र प्रथमा ऋक्—हिरण्यवर्णां—जाम् । चन्द्रां——वह । हे जातवेदः जातप्रज्ञ अग्ने त्वं हिरणवर्णां हिरण्यस्य स्वर्णस्य वर्णः कान्तिः तद्व[द्व]र्णो यस्यास्तां हरिणीं पीतवर्णां हारिणरूपधरां वा 'श्रीः कृत्वा हरिणीरूपमरण्ये संचचार ह' इति पुराणात् ॥

उपसंहारः—

यष्टिकरां वेत्रहस्तामित्यर्थः [टि] लोपश्छान्दसः । तद्वतीं दण्डकारिणीं दण्डकरां वा यष्टिरूपां सुवर्णां शोभनवर्णां हेममालिनीं हेमविकारशृङ्खलामालाधारिणीं सूर्यां सूर्यवत्प्रकाशमानां तद्रूपां त्रा । सिद्धमन्यत् ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ।

इयं पूर्वोक्तसिद्धमिति शेषः । अस्य सूक्तस्य स्वरनियमो वैयाकरणसंप्रदायाज् ज्ञेयः ॥

प्रतिपाद्यविषय·—

No. 608 कोशवत् .

वक्तव्यविशेषः—

समग्रप्रायमिदं आदितः चतुर्दशमन्त्रभाष्यपर्यन्तमेव दृश्यते 'संप्रणम्य,' 'ऋग्वेदे शाकलाधीते' इति श्लोकद्वयमत्रातिरिच्यते । अन्यत्सर्वं लिखितमुद्रितविद्यारण्यभाष्यसदृशमेव दृश्यते ॥

No. 610 (2349/3).

*श्रीसूक्तभाष्यम्.

*Srī Sūktabhāṣyam.

Substance—Palm-leaf.
Size—$11\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—9–16.
Lines on a page—7.
Letters in a line—42.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This commentary gives a lucid explanation of the meanings of the fifteen Ṛks which deal with the characteristic energy and greatness of the Goddess of wealth—Lakṣmī and tend to earn the favour of that Goddess stamping out poverty. The name of the commentator is not known.

उपक्रमः—

हिरण्यवर्णा श्रीर्नाम हिरण्यवर्णामित्येतत्सूक्तं पञ्चदशर्चमपश्यत्। सैव देवता। अनुष्टुप् प्रथमास्तृचः। *त्रिष्टुभौ। उत्तम(उत्तरा)बृहती। शेषा अनुष्टुभः। लिङ्गोक्तं दैवतं† वा, हिरण्यस्येव वर्णो यस्यास्सा हिरण्यवर्णा, हितरमणीयवर्णा, अथवा हर्यतेः प्रेप्साकर्मणो रूपम्। हिरण्यमिति सर्वैर्जनैः प्रेप्सितत्वात्, हिरण्यवर्णां हरिणीं लुप्तोपमैतत्। हरिणी कृष्णमृगी सा यथा पवित्रभूता प्रेम्णा सर्वैः सन्दृश्यते, तद्वत्। अथवा हरिणा देवेन सर्वावतारेषु देवीत्वेन नीयते। उक्तं च पुराणे 'राघवत्वेऽभवत्सीता' इत्यादिना। एवं देवेनानपगामिनीत्वमुक्तम्। सुवर्णरजतस्रजां सुवर्णरजतस्रग्भिरलङ्कृताम्॥

उपसंहारः—

सूर्येण भगवता नित्यसम्बन्धात्सूर्या। तथा च पुराणे—

मैत्रेय केशवः सूर्यः प्रभा वै कमलालया।

प्रभासूर्ययोरैक्यात्सूर्येत्युच्यते। हिरण्मयीमित्यादि व्याख्यातम्। तां म आवह—पूर्वार्धो व्याख्यातः। यस्यां . . . . . हिरण्यं . . . . . भूतं। पञ्चम्यर्थे सप्तमी। यस्या देव्यास्सकाशाद्धिरण्यं प्रभूतं प्रवृद्धतरं, गावो दास्यः, द्वितीयार्थे प्रथमा, गाश्च दासीश्च विन्देयं लभेय, अश्वान् पुरुषान् समर्थान्, चकारो द्रष्टव्यः। पुरुषांश्च परिचारकपुरुषांश्च लभेय। हे जातवेदः तां लक्ष्मीं मदर्थमावहेति सम्बन्धः। यस्याः प्रसादात्सर्वसम्पत्समृद्धिर्भवति तां लक्ष्मीमस्मदर्थं हे जातवेद आवहेति समस्तार्थः॥

॥ श्रीसूक्तभाष्यं समाप्तम्॥

प्रतिपाद्यविषयः—

अलक्ष्मीनिराकरणसंपदवाप्तिलक्ष्मीप्रसादादिफलकस्य लक्ष्मीस्वरूपशक्तिमाहात्म्यादिप्रदर्शनपरस्य चास्य पञ्चदशर्चात्मकस्य सूक्तस्य विवरणरूपेऽस्मिन् भाष्ये तत्तन्मन्त्रार्थाः सप्रमाणं निरूपिता दृश्यन्ते॥

---

* अत्र No 611 कोशे 'प्रस्तारपङ्क्तिश्चतुर्थी। पञ्चमीषष्ठ्यौ' इत्यधिकग्रन्थदर्शनात्स लुप्तोऽत्र लेखकप्रमादिति ज्ञायते॥ † 'परमात्मा' इत्यत्र लुप्तमिति भाति.

वक्तव्यविशेषः—

समग्रममुद्रितं चेदं भाष्यं श्रीवैष्णवसंप्रदायानुरोधीत्येतद्भाष्यपरिशीलनादवसीयते । एतद्भाष्यप्रणेतुर्नामधेयमत्र न दृश्यते ॥

No. 611 (4114).

*श्रीसूक्तभाष्यम्.

*Srī Sūktabhāṣyam.

Substance—Palm-leaf.
Size—7 × 1⅞ inches.
Character—Grantha.
Folios—7.
Lines on a page—11.
Letters in a line—26.

Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

'हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो* ममावह ॥

हिरण्यवर्णा श्रीर्नाम हिरण्यवर्णामित्येतत्सूक्तं पञ्चदशर्चमपश्यत् । सैव देवता । अनुष्टुभः प्रथमास्तृचः । प्रस्तारपङ्क्तिश्चतुर्थी ।पञ्चमीषष्ठ्यौ त्रिष्टुभौ । उत्तरा बृहती । शिष्टा अनुष्टुभः । लिङ्गोक्तं दैवतम् । परमात्मा वा विष्णुराद्ययोरुभयोः ऋचोः । हिरण्यस्येव वर्णो यस्यास्सा हिरण्यवर्णा, हितरमणीयवर्णा वा' इत्यादि No. 610 कोशवत् ॥

उपसंहारः—

प्रभासूर्ययोरैक्यात् सूर्येत्युच्यते । हिरण्मयीमित्यादि व्याख्यातम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ।

प्रतिपाद्यविषयः—

No. 610 कोशवत्.

---

*'म आवह' इति मुद्रितमूलकोशे पाठो दृश्यते.

वक्तव्यविशेषः—

समग्रप्रायमुद्रितं चेदं भाष्यं श्रीवैष्णवसंप्रदायानुरोधीति एतद्भाष्यपरिशीलनाज् ज्ञायते । एतद्भाष्यकर्तुर्नामधेयमत्र नोपलभ्यते ॥

No. 612 (5043/1).

*श्रीसूक्तभाष्यम् .

*Sri Sūktabhāṣyam.

Substance—Palm-leaf.	Age of Ms.—Old.
Size—$14\frac{7}{8} \times 1\frac{1}{4}$ inches.	Condition of Ms.—Good.
Character—Telugu.	Correct or incorrect— Incorrect.
Folios—14+2	
Lines on a page—6.	Complete or incomplete— Complete.
Letters in a line—50.	

Subject in brief—

This commentary indicates the arrangement of the mantras of Srī Sūkta and explains the meanings as well as the derivation of the words that constitute each of the mantras of the above Sūkta. Since the commentator mentions the name of Vidyāraṇya he must necessarily be posterior to Vidyāraṇya.

उपक्रमः—

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

हिरण्यवर्णामिति । जातानि विश्वानि भुवनानि धामानि वा वेदयति इति जातवेदाः अग्निः तत्सम्बोधनं हे जातवेदः जातप्रज्ञ अग्ने त्वं एवंरूपां

श्रियं मे मम त्वं मदर्थमिति यावत् आवह आह्वय * अग्नेर्विवहेातृत्वं दाह्वानां ? तद्धीनामिति भावः। यद्वा आवह समन्तात् प्रापयेति। ममेत्यपपाठः। गृहे इत्याद्यध्याहारगौरवापत्तेः, विद्यारण्यस्वाम्यनभिमतत्वाच्च॥

उपसंहारः--

किञ्च सः पवमानं उत्तमं लोकं पवित्रं स्थलं वा अतिपवित्रतां वा महीयते प्राप्नोति। महीङ् पूजायामिति कण्ड्वादेः धातोरनेकार्थत्वात् प्राप्त्यर्थता बोध्या। किञ्च धान्यं व्रीह्यादिधनं हिरण्यादि पशुं गवाश्वादि बहुपुत्रलाभं शतसंवत्सरं शतवर्षपरिमितं साग्रमायुश्च प्राप्नोति॥

पञ्चविंशद्वचानां च व्याख्यानं सप्रमाणकम्।
यथामति मया प्रोक्तं प्रीयतां श्रीस्ततः परम्॥
श्रीसूक्तभाष्यं सामाप्तम्॥

प्रतिपाद्यविषयः—

भाष्येऽस्मिन् श्रीसूक्तान्तर्गतानां मन्त्राणां प्रतिमन्त्रं शब्दव्युत्पत्तिनिरूपणपुरस्सरं अर्थः सम्यग्विवृतः। अन्ते च पत्रद्वये श्रीसूक्तमन्त्रविन्यासक्रमः प्रकाशितः॥

वक्तव्यविशेषः—

अमुद्रितं समग्रं चेदं भाष्यमत्र दृश्यते। अत्र विद्यारण्यस्वामिनामोल्लेखदर्शनात्तदनन्तरकालिकमिदं भाष्यामिति ज्ञायते। भाष्यप्रणेतुर्नामधेयमत्र नोपलभ्यते। No. 613 तमकोशे दृश्यमानभाष्यस्य क्वचिदत्रानुवादखण्डनदर्शनात्तदनन्तरकालिकमपीदं भाष्यामिति ज्ञायते। कोशान्ते पत्रद्वये श्रीसूक्तजपादिप्रयोगश्च संगृहीतो दृश्यते॥

No. 613 (C 76).

* श्रीसूक्तविवरणम्.

* Srī Sūktavivaraṇam.

Substance—Paper.	Character—Nāgarī.
Size—$10 \times 3\frac{3}{4}$ inches.	Folios—3.

* अत्र 'अग्नेर्देवहोतृत्वादाह्वानं' इति शुद्धः पाठो भाति.

Lines on a page—10.
Letters in a line—44.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—
Incorrect.
Complete or incomplete—
Complete.

Subject in brief :—

This work explains, word by word, the meaning of the fifteen mantras which invoke the Goddess Srī to bestow on the worshipper all his desires-temporal, spiritual etc.

उपक्रमः—

तत्रेयमाद्या—हिरण्यवर्णामिति । जातानि विश्वा भुवनानि धनानि वा वेदयति जातवेदाः अग्निः तत्सम्बोधनम्, हे जातवेदः गृह कुल चेत्यध्याहारः । मम गृहे लक्ष्मीं धनाधिष्ठात्रीं देवतामावह । आ समन्ताद्भावेन प्रापय । किंभूतां—हिरण्यस्य सुवर्णस्येव वर्णो यस्यास्सा ताम् । पुनः किंभूतां—हरिणस्य मृगस्येव स्वभावश्चञ्चलो यस्यास्ताम् ॥

उपसंहारः—

तथा श्रीकामः श्रियः पञ्चयशर्चं पूर्वोक्तं सततं निरन्तरं जपेत् । तस्य फलमेभ्र ॥ 22 ॥ श्रीर्वर्चः स्वमिति ॥ तस्य जपादिशीलस्य श्रीः लक्ष्मीः स्वं स्वकीयं तेजः आयुष्यमारोग्यं चाविधात् दद्यात् । तथा* पवमानं पवित्रं स्थलं महीयते प्राप्नोति । धान्यं व्रीह्यादि धनं पशुं पुत्रलाभं पुत्रप्राप्तिं शतसंवत्सरपरिमितं आयु· आयुष्यं च लक्ष्मीप्रसादं प्राप्नोतीत्यर्थः ॥

॥ श्रीसूक्तविवरणम् ॥

प्रतिपाद्यविषयः—

उपासकस्य ऐहिकामुष्मिकादिसकलेष्टार्थवितरणशीलायाः श्रीदेवतायाः प्रार्थनारूपाणां तत्स्वरूपशक्तिमाहात्म्यादिप्रकाशनपराणां पञ्चदशमन्त्राणां तत्स्तुतिरूपषद्यसप्तकस्य च प्रतिपदार्थविवरणपुरस्सरं सम्यगत्र विवरणं कृतम् ॥

---

* 'शोभमानं' इत्येकस्मिन् मुद्रितमूलपुस्तके पाठो दृश्यते.

वक्तव्यविशेषः--

अमुद्रितोऽयं ग्रन्थः समग्रश्चात्र दृश्यते। एतद्व्याख्यायाः No. 612 तमकोशे दृश्यमानभाष्ये क्वचित्क्वचिदनुवादखण्डनादिकं दृश्यते । एतद्विवरणकर्तुर्नाम चात्र न दृश्यते ॥

No. 614 (1299/20).

सरस्वतीसूक्तम्.

Sarasvatīsūktam.

Substance--Palm-leaf.
Size—14⅝ × 1⅝ inches.
Character—Nāgarī.
Folios—58—59.
Lines on a page--6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

पावका नस्सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धिया वसुः। चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती ॥

उपसंहारः—

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः। ताभिर्नो-विता भव। पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः। भक्षीमहि प्रजामिषम् ॥

॥ इति सरस्वतीसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

ऋक्संहितायां ततस्ततस्संगृहीतेऽस्मिन् सूक्ते सरस्वतीस्तुतिप्रार्थनादिकं परिदृश्यते ॥

वक्तव्यविशेषः—

ऋक्संहितायां तत्रतत्रोपलभ्यमानाः सरस्वतीदेवताका मन्त्रा अत्र संगृहीता दृश्यन्ते । मुद्रिताश्चेमे सर्वे मन्त्राः ॥

No. 615 (2613/3).

* वैश्यसन्ध्यावन्दनादिप्रयोगसंग्रहः.

*Vaiśya Sandhyāvandanādi Prayogasaṁgrahaḥ.

Substance—Palm-leaf.
Size—$11\frac{1}{4} \times 1\frac{1}{4}$ inches.
Character—Nāgarī.
Folios—61—63.
Lines on a page—7.
Letters in a line—48.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

Subject in brief:—

This work points out the method of Sandhyā adoration and Mādhyānhika duties of Vaiśyas and epitomises the textual recitations in connection with the performance of the ceremonies of tonsure, thread-bearing and marriage among the Vaiśyas.

उपक्रमः—

अपवित्रः । केश ।दिचतुर्विंशतिनाम । आसनमन्त्रः—

भूतप्रेतपिशाचादिविघ्नकर्तृनिवारणम् ।
सकृत्तं मन्त्रमुच्चार्य आसनं परिकल्पयेत् ॥

प्रणवमन्त्रः—

भूम्यादि ऊर्ध्वलोकस्य उपनयने दिवाकर? ।
दशप्रणवसंयुक्तः प्राणायामः प्रकीर्तितः ॥

उपसंहारः—

अश्मप्रदक्षिणम्—

प्रदक्षिणक्रमेणैव अश्मस्थापनपूर्वकम् ।
प्रत्याहुतिभिः सप्तपदोऽनुक्रमयेत्सुधीः ॥

अरुन्धतीदर्शनम्—

ध्रुवश्चारुन्धती चैव दर्शेयार्या च कोपमा? ।
दैवतायनं दत्त्वा? देवताश्च प्रणामयेत् ॥

प्रतिपाद्यविषयः—

अत्र वैश्यानां सन्ध्योपासनक्रमं माध्याह्निकाचरणक्रमं च श्लोकरूपतत्तन्ममन्त्रनिर्देशपूर्वं संगृह्य चौलोपनयनविवाहप्रयोगाश्च तथैव संगृह्याभिहिता दृश्यन्ते ॥

वक्तव्यविशेषः—

अमुद्रितोऽयं ग्रन्थः ।

No. 616 (C 626).

सन्ध्यावन्दनप्रयोगः (ऋग्वेदीयः).

Sandhyāvandanaprayogaḥ (Rigvedīyam).

Substance—Paper.
Size—6 × 4⅛ inches.
Character—Nāgarī.
Folios—35.
Lines on a page—11.
Letters in a line—19.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

सकृदाचम्य—

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरश्शुचिः ॥

द्विराचम्य । प्रणवस्य परब्रह्म ऋषिः, परमात्मा देवता, देवीगायत्री-छन्दः, प्राणायामे विनियोगः । 'ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमाहि धियो यो नः प्रचोदयात् । ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्स्वरोम्, इति मन्त्रेण प्राणायामत्रयं कृत्वा ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वर-प्रीत्यर्थं प्रातस्सन्ध्यामुपासे ॥

उपसंहारः—

ओं नमः प्राच्यै दिशे नमः . . नमो नमः । यां सदा सर्वभूतानि . . युगधारिणे नमः । भद्रं नो अपिवातय मनः । ओं शान्तिः । यथा ऋषिसङ्ख्याप्रवरमुक्त्वा, अहं भो अभिवादये । द्विराचम्य । यस्य स्मृत्या च नामोक्त्या . . . प्रीयताम् ॥

॥ इति सायंसन्ध्याविधिः ॥

प्रतिपाद्यविषयः—

अत्र प्रातर्मध्याह्नसायंकालेषु बह्वृचानुष्ठेयसंध्यावन्दनक्रमो गायत्री-कवचादिकथनसहितोऽभिहितः ॥

वक्तव्याविशेषः—

समग्रमिदमस्मिन् कोशे दृश्यते, मुद्रितं च ॥

No. 617 (B 229).

सन्ध्यावन्दनप्रयोगः.

Sandhyāvandanaprayogaḥ.

Substance—Paper.
Size—$7\frac{1}{8} \times 6$ inches.
Character—Telugu
Folios—16.
Lines on a page—11.
Letters in a line—16.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

Subject in brief :—

This is a manual of textual recitations in connection with the Sandhyā adoration and points out the authorities for those recitations.

उपक्रमः—

विप्रो वृक्षो मूलकं यत्र सन्ध्या
वेदाश्शाखा धर्मकर्माणि पत्रम् ।
तस्मान्मूलं सर्वतो रक्षणीयं
मूले नष्टे नैव शाखा न पत्रम् ॥

श्रुतिस्मृत्युदितं कृत्यं यदाराधनसाधकम् ।
तद्विधायकमन्त्राणां वृत्तिं वक्ष्ये यथाक्रमम् ॥

यावन्तोऽस्यां विकर्मस्थाः पृथिव्यां बालिशा द्विजाः ।
तेषां पावित्र्यसिद्ध्यर्थं सन्ध्या सृष्टा स्वयंभुवा ॥

उपसंहारः—

अङ्गुष्ठतर्जन्युपमध्यमाख्यां(भ्यो)
नासाक्षियुग्मं श्रवणद्वयं च ।
नाभिं ततोऽङ्गुष्ठकनिष्ठिकाभ्यां
करस्य मध्याद्धृदयं ततश्च ॥

सर्वाङ्गुळीभिश्च शिरस्तथांसौ
मूर्धानमन्ते स्पृशतीति केचित् ।
इति दर्पणस्मृतिः ॥

॥ इति संध्याविधिः ॥

प्रतिपाद्यविषयः—

सप्रमाणप्रदर्शनमत्र सन्ध्योपासनप्रयोगः संगृह्यते ।

वक्तव्यविशेषः—

असमग्रोऽयं ग्रन्थः, अमुद्रितश्चात्र कोशे दृश्यते ।

No. 618 (C 624).

सन्ध्यावन्दनमन्त्रभाष्यम्.

Sandhyāvandnamantrabhāṣyam.

Substance—Paper.
Size—$7\frac{1}{2} \times 4\frac{3}{4}$ inches.
Character—Telugu.
Folios—7.
Lines on a page—10.
Letters in a line—20.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

No. 617 **कोशवत्.**

उपसंहारः—

No. 617 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 617 **कोशवत्.**

वक्तव्यविशेषः—

No. 617 **कोशवत्.**

No. 619 (B 399).

सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम्.

Sandhyāvandanamantrabhāṣyam.

Author—Kṛṣṇapaṇḍita.
Substance—Paper.
Size—$8 \times 6\frac{1}{4}$ inches.
Character—Telugu.
Folios—37.
Lines on a page—15.
Letters in a line.—34.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

इह खलु सकलसत्कर्मपरिगणनायामादितः परिगणनार्हस्य सन्ध्या वन्दनकलापस्य स्वरूपविशेषजिज्ञासा यथाकथञ्चिद्विगुणोऽपि—

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।

इति भगवदुपदेशात्स्वधर्मत्वेन श्रेयसीति हृदि निधाय निरन्तरशुश्रूषा-परितोषितसदाचार्यमुखकमलोदीरितसिद्धान्तसारसागरान्निर्गलितमति-रहस्यामृतमाकलय्य यथायोगं प्रकाश्यते । तत्र तावत्सन्ध्यावन्दनं नित्यम्, 'अहरहस्संध्यामुपासीत' इति श्रुतावहरहरिति वीप्सा-वगमात् ॥

उपसंहारः—

आत्महादौ तथा भूमिं स्पृष्ट्वेति वचनात् ।
नक्षत्रं च तथा सूर्यं द्विजानप्यभिवादयेत् ।
कनिष्ठानपि वेदज्ञान् सन्ध्याकालेऽभिवादयेत् ॥
विना पुत्रं च शिष्यं च दौहित्रं दुहितुः पतिम् ।

इत्यादिवचोभिस्सन्ध्यादेवताभिवादनस्यानुक्तत्वात् द्विजाद्याभिवा-दनस्योक्तत्वाच्च तदभिवादनं न प्रस्तुतमिति वाक्यार्थः, ननु (तु) सन्ध्याया गरीयस्या अभिवादनमस्त्विति ॥

श्रीमान् राघवदैवज्ञवंश्यः श्रीकृष्णपण्डितः ॥
कारयामास हि स्पष्टं सन्ध्यावन्दनपद्धतिम् ।
पूर्णानन्दस्वरूपाय दक्षिणामूर्तये नमः ॥
प्राज्ञान् प्राज्ञान् करोमीति दीक्षिताय स्वचिन्तया ॥

प्रतिपाद्यविषयः—

अत्र सन्ध्योपास्तेर्नित्यत्वोपपादनपूर्वकं तस्य मन्त्रार्थपरिज्ञानपूर्व-कानुष्ठेयत्वं संसाध्य तदनुष्ठानकालफलादिकं निर्वर्ण्य आशौचे सन्ध्या-नुष्ठानप्रकारं प्रकाश्य सन्ध्याप्रयोगकथनपूर्वकं संन्ध्योपासनविनियुक्त-मन्त्राणामर्थञ्च अद्वैतसंप्रदायानुरोधेन सम्यग्विशदीकृतो दृश्यते ॥

वक्तव्यविशेषः—

मुद्रितमिदं भाष्यम् । मुद्रितकोशाद्यन्तयोः परिदृश्यमानाः श्लोका अत्र न दृश्यन्ते । इदं च भाष्यं यजुश्शाखीयसन्ध्यामन्त्रविवरणरूपमिति ज्ञायते ॥

No. 620 (C 465/1).

सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम्.

Sandhyāvandanamantrabhāṣyam.

Author—Kṛṣṇapaṇḍita.
Substance—Paper.
Size—$9\frac{1}{4} \times 3\frac{7}{8}$ inches.
Character—Telugu.
Folios—39.
Lines on a page—13.
Letters in a line—32.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incompletet—Complete.

उपक्रमः—

स्मृत्यन्तरे तु विशेष उक्तः—

अहोरात्रस्य यस्सन्धिः सूर्यनक्षत्रवर्जितः ।
तत्र सन्ध्यामुपासीत सायं प्रातस्समाहितः ॥

इति—

उदयात्प्राक्तनी सन्ध्या घटिकात्रयमुच्यते ।
सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ॥

उपसंहारः—

No. 619 कोशवत्.

प्रतिपाद्यविषयः—

No. 619 कोशवत्.

वक्तव्यविशेषः—

मुद्रितमिदं भाष्यम्। अन्ते 40-41 पत्रयोः श्रीविद्यारण्यशंकराचार्याभ्यां प्रणीतं गायत्रीमन्त्रमात्रभाष्यमपि लिखितं दृश्यते ॥

No. 621 (4733).

संध्यावन्दनमन्त्रभाष्यं सप्रयोगम्.

Sandhyāvandanamantrabhāṣyam.

Author—Kṛṣṇapaṇḍita.
Substance—Palm-leaf.
Size—$12\frac{3}{4} \times 1\frac{1}{4}$ inches.
Character—Telugu.
Folios—51.
Lines on a page—6.
Letters in a line—46.
Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

अथाचमनविधिप्रकारः प्रतिपाद्यते। आचमनं त्रिविधम्—श्रौतं स्मार्तं पौराणिकं चेति। तत्र प्रत्यक्षश्रुतिबोधितं श्रौतम्। सूत्रोक्तं स्मार्तम्। 'केशवाद्यैस्त्रिभिः पीत्वा' इतिवचनोक्तं पौराणिकम्। तत्राद्यं तैत्तिरीयारण्यके प्रसिद्धम्। तच्च ब्रह्मयज्ञाङ्गम्। तच्चाश्वलायनानामपि ब्रह्मयज्ञाङ्गतया कर्तव्यम्। द्वितीयं पुनस्सन्ध्यादिनित्यकर्माङ्गम्। तृतीयं पुनर्निष्ठीवनशौचाद्यङ्गमिति विवेकः ॥

शौचान्ते च तथा पाने स्पृष्टास्पृष्टे च कर्मणि।
पौराणाचमनं कुर्यान्नामभिः केशवादिभिः ॥

इति स्मृत्यन्तरे दर्शनात्। विशेषेण श्रुत्याचमनं षट्कर्मचन्द्रिकायाम्—

देव्याः पादैस्त्रिभिः पीत्वा अब्लिङ्गैर्नवभिः स्पृशेत्।
सप्तव्याहृतिसंयुक्तां गायत्रीं त्रिपदां शिरः ॥

शिरोमन्त्रं द्विधा कृत्वा एते समस्य चतुर्विंशतिमन्त्रा भवन्ति । एतेषां विनियोगः केशवादीनामिव द्रष्टव्यः ॥

उपसंहारः—

'वीर्यं वै भर्गः' इति श्रुतेः वीर्यं तेज इति श्रुत्यर्थः । भर्ग इति तेजोवचनामिति वृद्धैः पूर्वं व्याख्यातत्वाच्च । अत्र प्राचीनाः भर्गो वृचिनभर्जनादिति भर्गपदं निराहुः । ब्रह्मणस्तेजोरूपत्वे एषोऽस्य परमानन्द इति भेदव्यपदेश औपचारिक इति द्रष्टव्यम् । तथाचाद्यानन्दलक्षणं सर्वजगदुपादानं परिपूर्णज्योतीरूपं बिम्बस्थानीयं ब्रह्म वाक्यार्थतया पर्यवस्यन्नम् । एतादृग्ब्राह्मं तद्रूपत्वेनेति शेषः । धीमहि ध्यायेमहि । स कोऽसौ यस्य ब्रह्मभेदो विवक्षित इत्याशङ्क्य प्रत्यग्रूप इत्याह—धिय इति । यः प्रत्यङ् नः अस्माकं धियः अन्तःकरणवृत्तीरित्यर्थः । प्रचोदयात् प्रेरयति । अन्तःकरणवृत्त्यादिकं प्रकाशयतीति यावत् । तथाचान्तः . . . . . ॥

प्रतिपाद्यविषयः—

No. 619 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं मुद्रितरीत्या द्वितीयगुच्छमारभ्य चतुर्थगुच्छैकदेशपर्यन्तं विद्यते ॥

No. 622 (2509)

सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम्.

Sandyāvandanamantrabhāṣyam.

Author—Kṛṣṇapaṇḍita.
Substance—Palm-leaf
Size—16 × 1¼ inches.
Character—Nāgarī.
Folios—39.
Lines on a page—6.
Letters in a line—70.

Age of Ms.—Old.
Condition of Ms.—Last five leaves are damaged.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 619 कोशवत्.

उपसंहारः—

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ॥

इति वचनेन तच्छब्दस्य ब्रह्मवाचकत्वात् [वरेण्यं] पुरुषार्थकामिभिरर्थ्यमानं श्रेष्ठं भर्गः अविद्यादोषभर्जकं तेजः 'वीर्यं वै भर्गः' इति श्रुतेः वीर्यं तेज इति श्रुत्यर्थः। भर्ग इति तेजोवचन इति वृद्धैः पूर्वं व्याख्यातत्वाच्च ॥

प्रतिपाद्यविषयः—

No. 619 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं आचमनविधिप्रकरणमारभ्य गायत्रीविवरणपर्यन्तं दृश्यते ॥

No. 623 (C 253).

सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम्.

Sandhyāvandanamantrabhāṣyam.

Author—Kṛishṇapaṇḍita.
Substance—Palm-leaf.
Size—$7\frac{1}{2} \times 4\frac{7}{8}$ inches.
Character—Nāgarī.
Folios—19.
Lines on a page—8.
Letters in a line—18.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

[शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

विनायकपदाम्भोजं विधिशंकरवन्दितम् ।
वन्दारुजनमन्दारं वन्दे स्यन्दन्मरन्दकम् ॥]

यस्मिन् दर्पणबिम्बजृम्भितपुरीसंदर्भतुल्यं जगत्
भातं यत्परसंविदा यत इदं रूप्यादिवल्लीयते ।
यस्याज्ञानविजृम्भिता पराभिदा वारीन्दुभेदादिवत्
तं भूमानमुपास्महे हृदि सदा वामार्धजानिं शिवम् ॥

श्रीराघवेन्द्रदैवज्ञवंश्यः श्रीकृष्णपण्डितः ।
प्रकाशयाम्यहं स्पष्टं सन्ध्यावन्दनपद्धतिम् ॥

तत्र तावत्सन्ध्यावन्दनं नित्यं 'अहरहस्सन्ध्यामुपासीत' इति श्रुतौ वीप्सावगमात् ॥

उपसंहारः—

अकाले चेत्कृतं कर्म काले प्राप्ते पुनः क्रिया ।
कालातीते तु यत्कुर्यादकृतं तद्विनिर्दिशेत् ॥

इति । अस्यार्थः—अकाले अनागतकाले यदि कर्म कुर्यात् तस्य मुख्यकाले प्राप्ते पुनः क्रिया पुनः करणं भवेत् । कालातीते तु गौण-कालातिपत्तौ तत्कर्म न कुर्यादिति, किन्तु उक्तप्रायश्चित्तमेव कुर्यात् । तदुक्तम्—

नित्यानामत्यये गौणः काल आगामिकालतः ।
गौणेऽतीते संचितं स्यान्नातीतं मुख्य आगते ॥ इति ।

प्रतिपाद्यविषयः—

No. 619 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं सन्ध्याकालात्ययप्रायश्चित्तनिरूपणपर्यन्तं दृश्यते । अत्र ग्रन्थादौ दृश्यमानं हंसपादान्तर्गतं पद्यद्वयं कोशान्तरेष्वदर्शनात् लेखकालेखितमिति भाति ॥

No. 624 (B 683).

* सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम् .

* Sandhyāvandanamantrabhāṣyam.

Substance—Paper.
Size—$8\frac{1}{4} \times 4$ inches.
Character—Telugu.
Folios—15.
Lines on a page—10.
Letters in a line—26.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very incorrect.
Complete or incomplete—Incomplete.

Subject in brief

The author of this work is not known. The work seems to be an epitomisation of Kṛṣṇa Paṇḍita's Sandhyābhāṣya.

उपक्रमः—

संध्याभाष्यप्रारम्भः-सकलसत्कर्मपरिगणनायामादितः परिगणनार्हसंध्यावन्दनकलापस्य स्वरूपविशेषजिज्ञासा श्रेयसीति हृदि निधाय यथायोगं प्रकाश्यते । तत्र तावत्संध्यावन्दनं नित्यम् 'अहरहस्संध्यामुपासीत' इति श्रुतेः । संध्यावन्दनाकरणे बहुप्रत्यवायस्मरणाच्चेति । तदाह गोभिलः—

संध्या येन न विज्ञाता संध्या येनानुपासिता ।
जीवमानो भवेच्छूद्रो मृतः श्वानोऽभिजायते ॥

विष्णुपुराणेऽपि—

उपसंहारः—

कोऽसौ यस्य ब्रह्मभेदो विवक्षित इत्याशङ्क्य प्रत्यग्रूप इत्याह—धिय इति । यः प्रत्यक्चेतनः अस्माकं धियः धीः अन्तःकरणवृत्तीरित्यर्थः । प्रचोदयात् प्रेरयति । अन्तःकरणवृत्त्या(वृत्त्या)दिकं प्रकाशयतीति यावत् । तथा च अन्तःकरणतद्भावभासकसाक्षित्वेन पूर्वोक्तं ब्रह्म ध्यायेमहीति निष्कृष्टार्थः ॥

प्रतिपाद्यविषयः—

अत्र कृष्णपण्डितभाष्यानुरोधेन संध्यानित्यत्वतत्कालतत्फलाद्युपवर्णनपूर्वकं तद्विनियुक्तमन्त्राणां विवरणं दृश्यते ॥

वक्तव्यविशेषः—

आन्तमेतत्पर्यालोचनायामिदं भाष्यं कृष्णपण्डितीयसंध्याभाष्यसंग्रहरूपमिति ज्ञायते । कर्तृनाम चात्र न दृश्यते । अमुद्रितं चेदम् ॥

No. 625 (C 366).

* सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम् .

* Sandhyāvandanamantrabhāṣyam.

Author—Timmaṇṇācārya.
Substance—Paper.
Size—$9\frac{1}{4} \times 4\frac{1}{2}$ inches.
Character—Kannda.
Folios—108.
Lines on a page—10.
Letters in a line—26.

Age of Ms.—Old.
Condition of Ms.—Not so very good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This work fixes up the time of offering morning and evening prayers and explains the meaning of the word Sandhyā and of the Saṇkalpavākya as well as of the mantras recited while performing the three sandhyās according to Ṛk and Yajus Śākhā. The author seems to belong to the Dwaita school of Philosophy.

उपक्रमः—

श्रीमत्सत्याधिराजं सुखमुखसुगुणं भाविसत्याधिराजं
वायुं सत्याधिराजं बुधगणविनुतं वेङ्कटार्यं प्रणम्य ।

सन्ध्यामन्त्रान्मनोज्ञान् त्रिसमयविहितान् ऋग्यजुर्वेदिनां च
व्याकुर्वे बुद्धिशुद्ध्यै मम गुरुवरगश्रीहरिप्रीतयेऽलम् ॥
ऋग्भाष्ये सूत्रभाष्ये दशनिगमशिरोदिव्यभाष्येषु गीता-
भाष्ये तन्त्रादिसारे स्मृतिमुखसुकृतौ भारतार्थप्रकाशे ।
विक्षिप्तोक्तानुवक्तुर्मम स हि न भवेदन्यथाधीजदोषो
भाषारीत्युक्षणादेः परिचयरहितस्यागमार्थाभिधातुः ॥

अथ सन्ध्योपास्तिः कर्तव्या 'अहरहस्सन्ध्यामुपासीत' इति श्रुतेः। प्रातरुत्थाय सन्ध्यामुपासीतेति भाष्योदाहृतश्रुतेश्च ॥

सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु ।
यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥
नानुतिष्ठति यः पूर्वामुपास्ते न च पश्चिमाम् ।
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥

उपसंहारः—

आ सत्येनेति शाखान्तरपाठः। आ सम्यक् सत्येन श्रीहरिणा कार्योन्मुखीकृतेन रजसा रजोगुणेनेत्यर्थः, ऋतं यथार्थज्ञानं, सत्यं तत्पूर्विका कृतिरित्युक्तेः यथार्थज्ञानपूर्वकं कर्म सत्यमित्युच्यते ॥

॥ इति सन्ध्याभाष्यं सम्पूर्णम् ॥

प्रतिपाद्यविषयः—

अत्र सन्ध्याकालनिर्णयपूर्वकं तदीयसंकल्पवाक्यस्य सन्ध्याशब्दस्य चार्थमुपवर्ण्य सन्ध्येतिकर्तव्यताप्रमाणोपन्यसनपूर्वकं ऋग्यजुर्वेदिसन्ध्यात्रयविनियुक्तमन्त्राणामर्थ उपवर्णितो दृश्यते ॥

वक्तव्यविशेषः—

एतन्निर्माता द्वैतमतीय इत्येतद्ग्रन्थपरिशीलनादवगम्यते। अमुद्रितं चैतत् ॥

No. 626 (C 1861).

*सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम्.

* Sandhyāvandanamantrabhāṣyam.

Author—Timmaṇṇācārya.
Substance—Papre.
Size—$9\frac{5}{8} \times 7$ inches.
Character—Nāgarī.
Folios—54.
Lines on a page—16.
Letters in a line—28.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 625 **कोशवत्.**

उपसंहारः—

No. 625 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 625 **कोशवत्.**

वक्तव्यविशेषः—

No. 625 **कोशवत्.**

No. 627 (674).

*सन्ध्यावन्दनमन्त्रभाष्यम्.

* Sandhyāvandanamantrabhāṣyam.

Author—Tirumala yajvā.
Substance—Palm-leaf.
Size—$18 \times 1\frac{3}{4}$ inches.
Character—Nāgarī.

Folios—6.
Lines on a page—7.
Letters in a line—70.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Subject in brief :—

This commentary explains the mantras that are recited in Sandyā prayers, according to the Adwaita school of Philosophy.

उपक्रमः—

सन्ध्यावन्दनमन्त्राणां वेदभाष्यानुसारतः ।
क्रियते बालबोधार्थं भाष्यं तिर्मलयज्वना ॥

आदौ प्राणायाममन्त्रमाह—ओं भूरिति । भूलोकाद्यभिमानिन्यो देवताः स्तूयन्ते । एता देवता मया कृतमाह्निकमनुजानन्त्वित्यत्र वा तात्पर्यम् । अवतीत्यों ब्रह्म भूः भूलोकाभिमानिनी देवता ओं ब्रह्मैव । अथवा एताः भूलोकाभिमानिनी(न्यो)देवताः सन्ध्यावन्दनादिकं मया कृतं ओं अनुजानन्तु । ओमित्यङ्गीकारे । एवमुत्तरत्र योजनीयम् । ओं तत्सवितुरिति गायत्रीप्रतिपाद्यस्य ब्रह्मत्वविवक्षया आदौ प्रणवोच्चारणम् । सवितुः सर्वप्रेरकस्य देवस्य दीव्यतीति देवः तस्य वरणीयं श्रेष्ठं सर्वैः प्रार्थनीयं तत् भर्गः तेजः धीमहि ध्यायेम । यः सविता परमेश्वरः नः धियः बुद्धिवृत्तीः ताः प्रचोदयात् प्रकर्षेण तत्त्वबोधे प्रेरयतु(ति) तस्य भर्गो धीमहीत्यन्वयः ॥

उपसंहारः—

हे पितः द्युलोक हे मातः हे पृथिवि 'इयं वै माता असौ पिता द्यौः पिता पृथिवी मात' इति श्रुतेः, वां युवामभिलक्ष्य इह कर्मणि यद्वचनमुपललते(ब्रुवे) ब्रवीमि, हे द्यावापृथिव्यौ इदं मदीयं वचनं सत्यमस्तु । किं तद्वचनमिति तु उच्यते—अवोभिः अस्मदीयरक्षणैः सह देवानां सर्वेषां युवां अवसे रक्षणे भूतं भवन्तं वयमपि भवत्प्रसादात्

इषं अन्नं वृजिनं तापवार्जितं जीरदानुं जीवनस्य दातारं विद्याम आलभेम। विद्लृ लाभे ॥

इति श्रीमाधवसोमयाजिकुलावतंसमल्लयज्वतनयेन तिरुमलसर्वतोमुखयाजिना विरचितं सन्ध्यावन्दनमन्त्रभाष्यं सम्पूर्णम् ॥

प्रतिपाद्यविषयः—

संध्यात्रयोपासनविनियुक्तमन्त्राणां अद्वैतसंप्रदायानुसारेण विवरणमत्र नातिविस्तरं नातिसंगृहीतं च दृश्यते ॥

वक्तव्यविशेषः—

अमुद्रितमिदं भाष्यमस्मिन् कोशे समग्रं च दृश्यते ॥

No. 628 (B 922).

* सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम्.

* Sandhyāvandanamantrabhāṣyam.

Author—Vibudhānanda Sarasvati.
Substance—Paper.
Size—8 × 6 inches.
Character—Kannada.
Folios—127.
Lines on a page—13.
Letters in a line—16.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This commentary also vividly explains all the mantras, recited at the time of Sandhyopāsanā, according to the Yajus Śākhā. The commentator, Vibudhānandasaraswati is an Adwaitin and is the disciple of Srī Vāsudevānandasaraswati.

उपक्रमः—

यत्पादरजसस्सङ्गाच्छिलाऽभूदबला द्रुतम् ।
नौमि तं जानकीजानिमप्रमेयमहर्निशम् ॥
यस्य स्मरणमात्रेण भवन्ति विगतभ्रमाः ।
जनास्तं श्रीविरूपाक्षं गोरीकान्तमहं भजे ॥
यद्भाष्याद्यवलोकेन मूढास्सर्वेऽपि पण्डिताः ।
भवन्ति तान् शङ्करार्यान् नमामि ज्ञानसिद्धये ॥
विद्यारण्यमुखान् सर्वान् यतीन् नत्वा यथामति ।
भाष्यं करिष्ये सन्ध्याया वेदवेदान्तमार्गतः ॥

अथ कदाचन वासुदेवानन्दसरस्वतीपदकमलसमाराधको विबुधानन्दसरस्वतीनामकोऽहमाश्रमधर्ममनुसृत्य ग्रामैकरात्रविधिना पर्यटन् विजयमङ्गलं नाम अग्रहारमगमम् । अर्थापरिज्ञानेन वेदाध्ययनं निरर्थकमिति जानद्भिस्तत्रत्यैर्जनैः प्रतिदिनं स्वानुष्ठीयमानसन्ध्याया अर्थावबोधकमेकं ग्रन्थमारचय्यास्मभ्यं देयमिति क्रियासमभिहारेण प्रार्थितः भाष्यमिदं ग्रथितुमारभम् (भे) ॥

ननु सन्ध्यावन्दनं कथंभूतेन कर्तव्यम् । उच्यते—यज्ञोपवीती नित्योदकस्सन्ध्यामुपासीतेत्याश्वलायनके तथा दर्शनात् यज्ञोपवीतिना कृतस्नानेन मार्जनादिकं कुर्वता प्रदक्षिणं सन्ध्यावन्दनं कर्तव्यम् ॥

उपसंहारः—

प्रकृते तु सन्ध्यावन्दनस्य बहुलकालातिक्रमणे सप्तरात्रात् पूर्वमतीतसन्ध्यानुष्ठानं प्रायश्चित्तपूर्वकं कार्यमिति वक्तुं न शक्यते, तथा शिष्टाचाराभावात्, स्मृतिकारैरनङ्गीकाराच्च । किन्तु यथोक्तप्रायश्चित्तमेव कृत्वा तत्कालोचितानुष्ठानमेव कार्यमिति स्मृतिविदां स्थितिः ॥

कृत्याऽनया महादेवो भवानीकमिता प्रभुः ।
प्रीयतां मम सर्वात्मा सर्वलोकेश्वरेश्वरः ॥
किञ्च श्रीशङ्कराचार्यविद्यारण्यमुखा बुधाः ।
अनुगृह्णन्तु मां विद्यादानेन प्रत्यहं भृशम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यपदवाक्यप्रमाणपारावारपारीणज्ञानानन्दमुनीश्वरान्तेवास्यन्यतमश्रीवासुदेवानन्दसरस्वतीशिष्यविबुधानन्दसरस्वतीविरचितं सन्ध्याभाष्यं समाप्तम् ॥

प्रतिपाद्यविषयः—

अत्र सप्रमाणप्रपञ्चं संध्योपासनप्रकारमुपवर्ण्य संध्यात्रयोपयुक्तानां सर्वेषामपि मन्त्राणां विस्तरेण अद्वैतसंप्रदायमनुसृत्य विवरणं प्रणीतं दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं समग्रं दृश्यते, अमुद्रितं च। इदं च यजुस्संध्याभाष्यं श्रीवासुदेवानन्दसरस्वतीशिष्येण विबुधानन्दसरस्वत्याख्ययतिना प्रणीतमिति ग्रन्थान्तदृश्यमानप्रशस्तिपङ्क्त्या ज्ञायते ॥

No. 629 (47ა7/1).

* सन्ध्यावन्दनमन्त्रभाष्यम्.

* Sandhyāvandanamantrabhāṣyam.

Author—Louhitya Nīlakaṇṭha.
Substance—Palm-leaf.
Size—$12\frac{1}{2} \times 1\frac{1}{8}$ inches.
Character—Telugu.
Folios—10.
Lines on a page—6.
Letters in a line—50.
Age of Ms.—Old.
Correct or incorrect—Not so very correct.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief—

This comnentay by Louhitya Nīlakaṇṭha is written in a very easy style and explains the mantras recited in Sandhyā worship according to Yajus Śākhā.

उपक्रमः—

नत्वा महाजगद्भूतिविभूतिपरिभूतिकृत्।
लौहित्यनीलकण्ठेन क्रियते मन्त्रपीठिका ॥

आपोहिष्ठादिमन्त्रस्य सिन्धुद्वीपऋषिः स्मृतः ।
छन्दो गायत्रमापस्तु देवताः प्रोक्षणे च सः ॥

आपोहिष्ठेत्यादि । मयोभुवः हे आपः यूयं मयोभुवः स्थ सर्वभूतस्य सुखभूमयः खलु । मयः सुखम् । 'यद्वै शिवं तन्मयः' इति श्रुतेः । किञ्च, ता न ऊर्जे दधातन—ता एवंभूताः सुखभूमयः यूयं नोऽस्माकमूर्जे ऊर्जमन्नं दधातन धत्त । ऊर्ज इत्यूर्क्छब्दात् द्वितीयैकवचनस्यैकारो व्यत्ययेन । दधातनेति दधातेर्दानवाचिनो लोट्परस्मैपदमध्यमपुरुषबहुवचनस्य तप्तनप्तनथनाश्चेति तनादेशः । किमर्थमन्नमस्मभ्यमिति चेत्, महे रणाय चक्षसे-महते रणाय रमणीयेन्द्रियाय इन्द्रियाणां महत्त्वरमणीयत्वसिद्ध्यर्थं, अन्नेन हीन्द्रियाणि महत्त्वरमणीयत्वशक्तियुक्तानि भवन्ति । किञ्च, यो वश्शिवतमो रसस्तस्य भाजयतेह नः—हे आपः वः युष्माकं यः शिवतमो रसः तस्य भाजयतेह नः—इह जन्मनि नः अस्मान् तस्य भाजयत तं रसं सेवयत ॥

उपसंहारः—

एवमस्माभिर्बहुधा कृतानि यान्येनांसि, सर्वा ता विष्य शिथिरेव देव—हे देव तानि सर्वाण्येनांसि विष्य अस्मत्सकाशाद्विसृज । शिथिरा शिथिलानि कुरु । अथा ते स्याम वरुण प्रियासः—हे वरुण अथ एवं भवत्कटाक्षानन्तरं ते तव प्रियासः स्याम । यथोपदेशं मन्त्रार्थो व्याख्यातः ॥

प्रतिपाद्यविषयः—

अत्र याजुषसंध्यात्रयविनियुक्तमन्त्राणां पातकपरिहरणादिप्रार्थनपराणां ललितयैव वाक्यशैल्या अद्वैतमतानुरोधेन विवरणं कृतम् ॥

वक्तव्यविशेषः—

अत्र 9-14 पत्रेषु अगस्त्यसंहितास्मृतिचन्द्रिकादिसंगृहीतगायत्रीमन्त्रार्थक्रमः, गोपीचन्दनेनोर्ध्वपुण्ड्रधारणक्रमः, आचमनसंध्याङ्गतर्पणादिक्रम इत्यादिकं संगृहीतं दृश्यते । अमुद्रितं चैतत् ॥

No. 630 (384/1).

* सन्ध्यावन्दनमन्त्रभाष्यम्.

* Sandhyāvandanamantrabhāṣyam.

Author—Vidyāraṇya.?
Substance—Palm-leaf.
Size—$16\frac{1}{2} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—8.
Lines on a page—7.
Letters in a line—68.

Age of Ms.—Old.
Condition of Ms.—Good, but worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This commentary closely resembles that of Lauhitya Nīlakaṇṭha though the colophon says that the writer is Vidyāraṇya. The authorship, therefore, remains unsettled.

उपक्रमः—

"आपोहिष्ठेति मन्त्राणां सिन्धुद्वीपऋषिः स्मृतः ।
छन्दो गायत्रमप्सु (मापस्तु) देवताः प्रोक्षणे च सः ॥

आपो हि ष्ठा मयोभुवः—हे आपः यूयं मयोभुवः स्था हि सर्वभूत-सुखभूमयः खलु । मयः सुखम्, 'यद्वै शिवं तन्मयः' इति श्रुतेः । किञ्च, ता न ऊर्जे दधातन–ता एवंभूताः सुखभूमयः यूयं नः अस्माकं ऊर्जे अन्नं दधातन धत्त" इत्यादि No. 629 कोशवत् ॥

उपसंहारः—

सर्वा ता विष्य शिथिरेव देव–हे देव ता तानि सर्वा सर्वाणि एनांसि विष्य अस्मत्सकाशाद्विसृज़ । शिथिरा शिथिराणि(लानि)कुरु । इवेति वाक्यालङ्कारे । अथा ते स्याम वरुण प्रियासः–हे वरुण ! अथ एवं भवत्प्रक्षा (त्कटाक्षा) नन्तरं ते तव प्रियासः प्रियाः स्याम ॥

इति श्रीविद्यारण्यकृतं सन्ध्यावन्दनभाष्यं सम्पूर्णम् ॥

प्रतिपाद्यविषयः—

अत्राद्वैतसम्प्रदायानुसारेण प्रातर्मध्याह्नसायंसन्ध्यावन्दनेषूपयुक्तानां मन्त्राणां अर्थः सम्यक् विशदीकृतो दृश्यते ॥

वक्तव्यविशेषः—

अमुद्रितमिदं भाष्यम्। No. 629 कोशान्तरे तु इदं भाष्यं लौहित्यनीलकण्ठप्रणीतमिति प्रतिज्ञातमेतत्समानानुपूर्वीकं दृश्यते । अत्र त्वन्ते विद्यारण्यकृतमिति लेखनं दृश्यते । अतः कर्तृनामधेयसंशयचिह्नं निर्दिष्टम् ॥

No. 631 (3096).

*सन्ध्यावन्दनमन्त्रभाष्यं सप्रयोगम्.

* Sandhyāvandanamatrabhāṣyam.

Author—Vidyāraṇya.
Substance—Palm-leaf.
Size—$13\frac{3}{4} \times 1\frac{3}{8}$ inches.
Character—Telugu.
Folios—68.
Lines on a page—5.
Letters in a line—36.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—correct.
Complete or incomplete—Incomplete.

Subject in brief :—

This commentary by Vidyāraṇya explains the mantras of the Ṛk Sandhyopāsanā, authoritatively indicating their application and pointing out the Ṛṣi, Devatā and Chandas of every mantra.

उपक्रमः—

अथ सन्ध्याविधिरुच्यते । आदौ सन्ध्याशब्दार्थनिर्णयः ।

दक्षः—

अहोरात्रस्य या सन्धिः सूर्यनक्षत्रवर्जिता ।
सा च सन्ध्या समाख्याता मुनीभिस्तत्त्वदर्शीभिः ॥

राज्यन्तयामे नाडी द्वे सन्ध्यायाः काल उच्यते ।
दर्शनाद्रविरेखायास्तदन्तो मुनिभिस्स्मृतः ॥

रविरेखाया दर्शनाद्युपलक्षितः कालः सन्ध्येत्यर्थः ।

स्मृत्यन्तरे—

मुहूर्तमुदयात्पूर्वं मुहूर्तमुदयात्परम् ।
सन्ध्याकालः स विज्ञेयः सायाह्ने तु विपर्ययः ॥

अत एव—

काले च वन्दिता सन्ध्या सा सन्ध्या फलदायिनी ।
अकाले निष्फला ज्ञेया सन्ध्या वन्ध्या वधूरिव ॥

उपसंहारः—

मित्रो देवेष्विति । मित्रो भगवा . . . . . द्योतमानमनुष्येषु मध्ये यो जनः वृक्तबर्हिषे वृक्तं लूनं बार्हिर्येन सः, बर्हिर्लवनासादनपूर्वकं हविषो दाता ऋत्विगित्यर्थः, तस्मै इष्टव्रताः इष्टानि कल्याणानि याभिः सिध्यन्ति ॥

प्रतिपाद्यविषयः—

अत्र प्रयोगप्रमाणोपन्यासपूर्वकं तत्तन्मन्त्रऋषिदेवताच्छन्दोनिरूपणपूर्वकं च बह्वृचसंध्यावन्दनोपयुक्तमन्त्राणां अद्वैतसंप्रदायमनुसृत्य विस्तरेण विवरणं कृतम् ॥

वक्तव्यविशेषः—

एतत्कोशान्ते 69–71 पत्रेषु श्रौतस्मार्तपौराणाचमनलक्षणानि लिखितानि दृश्यन्ते । No. 632 कोशे तत्तत्पत्राश्लेषु विद्यारण्यभाष्यमिति लेखदर्शनात्प्रायस्तत्समानानुपूर्व्या एवात्र दर्शनादिदं विद्यारण्यप्रणीतमिति निर्दिष्टम् ॥

No. 632 (C 464).

* सन्ध्यावन्दनमन्त्रभाष्यम्.

* Sandhyāvandanamantrabhāṣyam.

Author—Vidyāraṇya.
Substance—Paper.
Size—$8\frac{1}{8} \times 5\frac{1}{4}$ inches.
Character—Telugu.
Folios—13.
Lines on a page—20.
Letters in a line—28.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incompleet—Incomplete.

उपक्रमः—

आपोहिष्ठेति नवर्चस्य सूक्तस्य अम्बरीषस्सिन्धुद्वीपः त्वाष्ट्रः त्रिशिरा आपो गायत्री । द्वे अनुष्टुभौ । पञ्चमी वर्धमाना । सप्तमी प्रतिष्ठा । आपो हि ष्ठेति । हि यस्मात् कारणात् हे आपः या यूयं मयोभुवः सुखस्य भावयित्र्यो भवथ ताः तादृशा यूयं नः अस्मान् ऊर्जे अन्नाय दधातन धत्त, अन्नप्राप्तियोग्यान् कुरुत ॥

उपसंहारः—

भूर्भुवःस्वः पुरुषं तर्पयामि । द्विराचम्य । कालाग्निरुद्रोपनिषद्विधिना त्रिपुण्ड्रधारणं कुर्यात् ॥

प्रतिपाद्यविषयः—

No. 631 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

No. 631 कोशे दृश्यमानग्रन्थ एवात्र कोशे क्रमव्यत्यासेन लिखितस्ततो न्यूनश्च दृश्यते । एतच्च भाष्यं विद्यारण्यकृतमित्यस्मिन् कोशे पत्राङ्केषु निर्दिष्टं दृश्यते ॥

No. 633 (C 465/2).

*संध्यावन्दनमन्त्रभाष्यम्.

* Sandhyāvandanamantrabhaṣyam.

Substance—Paper.
Size—$8\frac{1}{2} \times 4\frac{3}{16}$
Character—Telugu.
Folios—42-48.
Lines on a page—18.
Letters in a line—32.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

Subject in brief :—

This is also a commentary written in an easy style, on the Yajus Sandhyā mantras. The author is not known.

उपक्रमः—

प्राणायाममन्त्रस्य भाष्यमाह—ओं भूरिति । भूलोकाभिमानिन्यो देवता ब्रह्मैक्येन स्तूयन्ते । भूः भूलोकाभिमानिनी देवता ब्रह्मवदित्योमिति विग्रहः । एवमुत्तरत्र योज्यम् । ओं तत्सवितुरिति (तत्सवितुरिति) गायत्रीप्रतिपाद्यस्य ब्रह्मत्वविवक्षया आदौ प्रणवोच्चारणम् । सवितुः सर्वप्रेरकस्य देवस्य दीव्यमानस्य, दीव्यतीति देवः तस्य, वरेणीयं श्रेष्ठं सर्वैः प्रार्थनीयं तत् तथा प्रसिद्धं भर्गः तेजः धीमहि ध्यायामः ॥

उपसंहारः—

ज्योक् उज्ज्वलं दीर्घकालं सूर्यं दृशे द्रष्टुं समर्थो भूयासम् । यः सूर्यः महतोऽर्णवात् समुद्रादुदगात् तादृशः विभ्राजमानः दिवि दीप्यमानः सरिरस्य सलिलस्य मध्यात् ऋषभः कामानां लोहिताक्षः वर्षिताक्षः ? रक्तरश्मिरित्यर्थः । विपश्चित् सर्वज्ञः सूर्यः मां मनसा पुनातु वर्णनीयेन रश्मिसंघेनेत्यर्थः । स्पष्टमन्यत् ॥

॥ इति संध्याभाष्यम् ॥

प्रतिपाद्यविषयः—

अत्र याजुषसंध्यामन्त्राणां सरलया वाक्यशैल्या नातिविस्तृतं नातिसंगृहीतं च विवरणं कृतम् ॥

वक्तव्यविशेषः—

अमुद्रितमिदं भाष्यं समग्रं चात्र दृश्यते । कर्तुर्नाम च न दृश्यते ॥

No. 634 (970/2).

संध्यावन्दनमन्त्रभाष्यम् (नित्यमन्त्रार्थानुसंधानदीपिका).

Sandhyāvandanamantrabhāṣyam.

Author—Nārāyaṇamuni.
Substance—Palm-leaf.
Size—18 × 1½ inches.
Character—Telugu.
Folios—6-14.
Lines on a page—7.
Letters in a line.—80.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

[1]यत्प्रसादेन वेदार्थो हस्तामलकतां गतः ।
नमामि शठजिद्योगिचरणाम्बुरुहं हि तत् ॥
आपोहिष्ठादिमन्त्राणां व्याख्यास्यन्ति सहस्रशः ।
त्रय्यन्तार्थानुसारेण व्याख्येयं क्रियते मया ॥

आपोहिष्ठेति मन्त्रस्य सिन्धुद्वीपऋषिः गायत्रीच्छन्दः आपो देवताः । अपां प्रोक्षणे विनियोगः । आपोहिष्ठादिमन्त्राणां पाञ्चरात्रादिसच्छास्त्रेषु परमात्मा देवतेत्यभिधानादत्रत्यदेवताशब्दाः परमात्मनारायणवाचकाः । अतोऽन्यपरतया प्रतीयमानानामपि शब्दानां नामरूपव्याकरणश्रुत्या पर-

[1] 'नमामि शठजिद्योगिचरणाम्बुरुहं हि मे ।
यत्प्रसादेन वेदार्था हस्तामलकतां गताः ॥'
इति कोशान्तरे पाठ उपलभ्यते ।

मात्मपरत्वं वेदान्ते निर्णीतम्। आपो हि ष्ठा मयोभुवः—हे आपः यूयं मयोभुवः स्थ हि सर्वस्य प्राणिजातस्य सुखभूमयो हि। 'यद्वै शिवं तन्मयः' इति मयश्शब्दस्य सुखसाधनवाचित्वात् तत्कार्यस्य तच्छब्देनाभिधानमत्र द्रष्टव्यम्॥

उपसंहारः—

हे वरुण अथ अनन्तरं तव प्रियाः स्याम। त्वया सकलपापविमोचने कृते मुक्तसमस्तबन्धा वयं 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इतिवदुत्तरोत्तरं तव प्रीतिवर्धकास्त्वदिच्छानुविधायिनः त्वत्स्वरूपगुणविभूत्यनुभवैकरसा भवेमेत्यर्थः॥

षष्टिप्रबन्धनिर्मातुः (निर्माता) शठकोपमुनीशितुः।
दासो (शिष्यो) नारायणमुनिर्नित्यमन्त्रानुद(दा)श्चयत्॥

प्रतिपाद्यविषयः—

अत्र सन्ध्याकालनिर्णयादिपूर्वकं यथाशास्त्रमनुष्ठितकर्मणः फलाभिधानसहितं च श्रीवैष्णवसम्प्रदायानुरोधात् याजुषाणां प्रातर्मध्याह्नसायंसन्ध्यावन्दनविनियुक्तमन्त्राणां वेदान्तभगवच्छास्त्रानुरोधेन विवरणं सम्यक्कृतम्॥

वक्तव्यविशेषः—

मुद्रितमिदं भाष्यम्। एतत्कोशान्ते एकस्मिन् पत्रे चक्राङ्कनयोग्यमासकालादिकं निर्णीतं दृश्यते। एतत्प्रबन्धप्रणेतारः श्रीमदहोबलमठास्थानपरम्परायां द्वैतीयिकं स्थानमधिष्ठिता यतिपुङ्गवा इति ज्ञायते। भाष्यस्यास्य नित्यामन्त्रार्थानुसंधानदीपिकेत्यपि व्यपदेशो दृश्यते॥

No. 635 (4883).

सन्ध्यावन्दनमन्त्रभाष्यम् (नित्यमन्त्रार्थानुसन्धानदीपिका).

Sandhyāvandanamantrabhāṣyam.

Author—Nārāyaṇamuni.	Size—16 × 1½ inches.
Substance—Palm-leaf.	Character—Telugu.

Folios—37—48.
Lines on a page—6.
Letters in a line—74.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—In-complete.

उपक्रमः—

'पुण्डरीकसमासीनं पाण्डुराभ्रेन्दुसंनिभम् ।
अखण्डबोधजनकं हयग्रीवमुपास्महे ॥'

इत्यादावेकं श्लोकमात्रमधिकं दृश्यते । अन्यत्सर्वं No. 634 कोशवत्. ॥

उपसंहारः—

No. 634 कोशवत्.

प्रतिपाद्यविषयः—

No. 634 कोशवत्.

वक्तव्यविशेषः—

No. 634 कोशवत्.

No. 636 (743/8).

सन्ध्यावन्दनमन्त्रभाष्यम् (नित्यमन्त्रार्थानुसन्धानदीपिका).

Sandhyāvandanamantrabhāṣyam.

Author—Nārāyaṇamuni.
Substance—Palm-leaf.
Size—$10\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Telugu.
Folios—3–12.
Lines on a page—10.
Letters in a line—54.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 634 **कोशवत्.**

उपसंहारः—

No. 634 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 634 **कोशवत्.**

वक्तव्यविशेषः—

मुद्रितमिदं भाष्यम्। कोशेऽस्मिन् भाष्यकर्तुः कूरनारायण इति नाम निर्दिष्टं दृश्यते। कूरदेशाभिजनत्वात्तथा व्यपदेशः स्यादिति भाति। एतत्कोशादौ 3 पत्रेषु संग्रहेण गायत्रीप्राणायाममन्त्राणां विवरणं कृतं दृश्यते। तत्कर्तुर्नाम च न दृश्यते॥

No. 637 (1480/1).

सन्ध्यावन्दनमन्त्रभाष्यम् (नित्यमन्त्रार्थानुसन्धानदीपिका).

Sandhyāvandanamantrabhāṣyam.

Author—Nārāyaṇamuni.
Substance—Palm-leaf.
Size—15½ × 1½ inches.
Character—Telugu.
Folios—16.
Lines on a page—6.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 634 **कोशवत्.**

उपसंहारः—

No. 634 **कोशवत्.**

प्रतिपाद्यविषयः—

No. 634 **कोशवत्**.

वक्तव्यविशेषः—

No. 634 **कोशवत्**.

No. 638 (511/3).

सन्ध्यावन्दनमन्त्रभाष्यम् (नित्यमन्त्रार्थानुसन्धानदीपिका).

Sandhyāvandanamantrabhāṣyam.

Author—Nārāyaṇamuni.
Substance—Palm-leaf.
Size—$16\frac{5}{8} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—8.
Lines on a page—10.
Letters in a line—66.

Age of Ms.—Old.
Condition of Ms.—Worm-eaten here and there.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 634 **कोशवत्**.

उपसंहारः—

No. 634 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 634 **कोशवत्**.

वक्तव्यविशेषः—

No. 634 **कोशवत्**.

No. 639 (930/1).

सन्ध्यावन्दनमन्त्रभाष्यम् (नित्यमन्त्रार्थानुसन्धानदीपिका).

Sandhyāvandanamantrabhāṣyam.

Author—Nārāyaṇamuni.
Substance—Palm-leaf.
Size—$14\frac{3}{8} \times 1\frac{5}{8}$ inches.
Character—Grantha.
Folios—6.
Lines on a page—9.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 634 **काशवत्.**

उपसंहारः—

उकारो लक्ष्मीवाचकः, अवधारणवाचको वा 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' इत्यत्रैवकारस्य स्थाने उकारस्य प्रयोगात् ॥ पञ्चविंशत्यक्षरो मकारः चतुर्विंशत्तत्वात्मकप्रधानाद्यतिरिक्तं जीवात्मानमाह । मन अवबोध—

प्रतिपाद्यविषयः—

No 634 **कोशे द्रष्टव्यः.**

वक्तव्यविशेषः—

No. 634 **कोशवत्.**

No. 640 (1362/2).

*** सन्ध्यावद्न्नमन्त्रभाष्यम्.**

* Sandhyāvandanamantrabhāṣyam.

Author—Śankarācārya.
Substance—Palm-leaf.
Size—$16\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.

Folios—26.

Lines on a page—8.

Letters in a line—62.

Age of Ms.—Old.

Condition of Ms.—Worm-eaten here and there.

Correct or incorrect—Appears to be correct.

Complete or incomplete—Complete.

उपक्रमः—

सन्ध्याभाष्यमिदं गुह्यं ब्रह्मज्ञानप्रदीपकम् ।
शंकरार्येण भगवत्पादाचार्येण निर्मितम् ॥

सिद्धमिह देवतिर्यङ्मनुष्यस्थावरसंज्ञानामात्मनां भगवानेवात्मेति भगवदाधारत्वात् भगवच्छेषतया भगवत्प्रकारत्वात् । भगवांश्च तेषां जीवात्मनां स्वामीति सिद्धम् । कुतः, तेषां नियामकत्वात्, तदाधारत्वाच्च । आत्मपरमात्मनोश्च शरीरशरीरिभावेन तादात्म्यम् । तद्यथा—अन्तर्यामिब्राह्मणे *"य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्मा अन्तर्याम्यमृतः" इति ॥

उपसंहारः—

सूर्यः सुष्ठु स्वकर्मसु प्राणिनः प्रेरयन् विपश्चित् सर्वज्ञः स भगवान् क्षीरसागरशायी नारायणो मनसा अस्मद्विषयप्रसादप्रवणेन चित्तेन मा मां स्वाराधनयोग्यत्वाय पुनः पुनातु । पूर्वोक्तानां पश्येमेत्यादिबहुवचनानां मामित्येनैनैकार्थत्वेऽपि वाक्यभेदेन सामानाधिकरण्याभावादस्मानिति विपरिणामो न कृत इत्याखिलमनवद्यम् ॥

इति श्रीशंकराचार्यभगवता विरचितं सन्ध्याभाष्यं समाप्तम् ॥

प्रतिपाद्यविषयः—

No. 645 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

एतद्भाष्यानुपूर्वी च आन्तं प्रायः सुदर्शनसूरिभाष्यानुपूर्वीसदृश्येव दृश्यते, परं त्वाद्यन्तयोः क्वचित्क्वचिन्मध्ये च किञ्चित्किंचित्पाठभेद उपल-

* बृहदारण्यके माध्यंदिनपाठानुसार्येतत् ।

भ्यते । तावन्मात्रेण तत्रत्यमङ्गलपद्यादर्शनेन भाष्यकृन्नामभेददर्शनेन च इदं भाष्यं ततः पृथङ्निर्दिष्टम् । कोशेऽस्मिन् भाष्यकर्तुः शंकराचार्यभगवान् इति नामधेयमन्ते लिखितमस्ति । एवमेवादौ च मङ्गलपद्ये प्रतिज्ञातम् । न तावताऽस्य प्रसिद्धशंकराचार्यपरत्वं संभाव्यते । यतोऽत्र भाष्ये मन्त्रार्थविवरणं विशिष्टाद्वैतसंप्रदायानुरोधेनैव दृश्यते । अत एतत्कर्तुः विशिष्टाद्वैतसंप्रदायानुयायिनः शंकराचार्य इति नामधेयमिति ज्ञायते । No. 641 कोशे तु आदौ मङ्गलश्लोके 'शंकरार्येण' इत्यस्य स्थाने शठकार्येण इति शोधनं कृतं दृश्यते । परं तु तन्निरवलम्बनामित्यस्माभिः परित्यक्तम् । 'शठार्यार्येण' इति पाठश्चेदुपलभ्येत तदा सुसंगतं स्यादिति ॥

No. 641 (B 138).

सन्ध्यावन्दनमन्त्रभाष्यम् .

Sandhyāvandanamantrabhāṣyam.

Author—Śankarācārya.
Substance—Paper.
Size—8 × 6 inches.
Character—Telugu.
Folios—28.
Lines on a page—22.
Letters in a line—22.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Almost correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 640 **कोशवत्**.

उपसंहारः—

No. 640 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 645 **कोशे द्रष्टव्यः**.

वक्तव्यविशेषः—

कोशेऽस्मिन् मङ्गलपद्ये 'शंकरार्येण' इत्यत्र 'शठकार्येण' इति शोधनं कृतं दृश्यते। अत्रत्यकोशेषु तादृशपाठानुपलम्भाद्स्माभिः न तत् ग्रन्थकर्तृनामधेयं निर्दिष्टम्। 'शठार्यार्येण' इति पाठश्चेदुपलभ्येत तदा सुसंगतं स्यादिति भाति॥

No. 642 (3427/1).

सन्ध्यावन्दनमन्त्रभाष्यम्.

Sandhyāvandanamantrabhāṣyām.

Author—Śankarācārya.
Substance—Palm-leaf.
Size—$9\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Grantha.
Folios—62.
Lines on a page—6.
Letters in a line—36.

Age of Ms.—Old.
Condition of Ms.—Good, but last folio is broken.
Correct or incorrect—Almost correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 640 **कोशवत्**.

उपसंहारः—

No. 640 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 645 **कोशे द्रष्टव्यः**.

वक्तव्यविशेषः—

No. 640 **कोशवत्**.

No. 643 (4578/4).

सन्ध्यावन्दनमन्त्रभाष्यम्.

Sandhyāvandanamantrabhāṣyam.

Author—Śankarācārya.
Substance—Palm-leal.
Size—$12\frac{1}{8} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—67–95.
Lines on a page—7.

Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Almost correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 640 **कोशवत्.**

उपसंहारः—

आपः पूर्वोक्ताः पृथिवीं पुनन्तु। पृथिवीशब्दः पृथिव्यादिपञ्चमहाभूतोपलक्षणार्थः, तेन च तत्सङ्घातोऽनुष्ठातृपरिग्रहो देह उपलक्ष्यते, तदनुष्ठातृवचनत्वादस्य मन्त्रस्य। तां पृथिवीं मदीयामित्यर्थः। ताभिरद्भिः पूता सा पृथिवी क्षेत्रभूता मां क्षेत्रज्ञं पुनातु। किं चापश्च मां पुनन्तु। अपि च ब्रह्मणस्पतिः ब्रह्मणो वेदस्य पतिः पाता

प्रतिपाद्यविषयः—

No. 640 **कोशवत्.**

वक्तव्यांशेषः—

कोशेऽस्मिन्निदं भाष्यं माध्याह्निकसन्ध्यावन्दनारम्भपर्यन्तं दृश्यते॥

No. 644 (A 391/3).

* सन्ध्यावन्दनमन्त्रभाष्यं कर्णाटकभाषात्मकम् .

* Sandhyāvandanamantrabhāṣyam.

Author—Srī Rañgācārya.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—20–29.
Lines on a page—28.
Letters in a line—20.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief :—

This work explains, in Kannada, the meaning of the mantras of Sandhyāvandana.

उपक्रमः—

श्रीभूनीळापातिं वन्दे गायत्रीप्रतिपादितम् ।
सर्वकर्मसमाराध्यं श्रीमन्नारायणं सदा ॥

मूलस्य पदविभागक्रमः—आपः हि स्था मयोभुवः । ताः नः ऊर्जे दधातन । महे रणाय चक्षसे । यः वः शिवतमः रसः । तस्य भाजयत इह नः । उशतीः इव मातरः । तस्मै अरं गमाम वः । यस्य क्षयाय जिन्वथ । आपः जनयथा च नः ।

कर्णाटभाष्यम्—हे आपः एलै उदकगळिरा नीवु परमात्मने मयोभुवः स्था हि—सर्वप्राणिसमूहक्कू सुखसाधनभूमिगळल्लवे ॥

उपसंहारः—

'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' एंबरीत्या उत्तरोत्तरप्रीतिवर्धकरागि निन्न इच्छानुयायिगळागि निन्न स्वरूपरूपगुणविभूत्यनुभवैकरसरागि आगुवेवु एंदु अर्थवु । इल्लि सर्वत्र प्रयोगिसल्पट्टिरुव वरुणसूर्याप्शब्दगळिगे तदन्तर्यामियादनारायणपरवाद अर्थवेंदु श्रुतिस्मृत्यादिप्रमाणगळ बलदिंद तिळियबेकु ॥

इति कर्णाटकभाषाभाष्यसहितं सन्ध्यागायत्रीभाष्यं सम्पूर्णम् ॥
श्रीनिवासपुरस्थेन वादिभीकृत्कुलेन्दुना ।
श्रीरङ्गार्येण सन्ध्याया भाष्यं भाषामयं कृतम् ॥

प्रतिपाद्यविषयः—

अत्र श्रीमन्नारायणमुनिप्रणीतभाष्यानुरोधेन संस्कृतभाषानभिज्ञानामपि मन्त्रार्थबोधाय पदविभागप्रदर्शनपूर्वकं सन्ध्यात्रयविनियुक्तमन्त्राणां श्रीवैष्णवसंप्रदायमनुसृत्य कर्णाटभाषया विवरणं कृतम् ॥

वक्तव्याविशेषः—

अमुद्रितोऽयं ग्रन्थः ॥ ग्रन्थकृदयं महीशूरदेशान्तर्वर्तिचामराजपुरनिकटस्थश्रीनिवासपुरवासी श्रीवैष्णवसंप्रदायानुसारीति ज्ञायते ॥

No. 645 (B 753).

सन्ध्यावन्धनमन्त्रभाष्यम् .

Sandhyāvandanamantrabhāṣyam.

Author—Sudarśanasūri.
Substance—Paper.
Size—8 × 6 inches.
Character—Grantha.
Folios—27.
Lines on a page—26.
Letters in a line—18.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

वरदमिश्रपदाब्जसमाश्रयप्रथितसम्भृतसम्पदुपागमः ।
अहमवाङ्मनसावसरं हरेश्चरणपद्मयुगं शरणं व्रजे (श्रये) ॥
लक्ष्मीलक्ष्मीशपादाभ्यामियमस्तु नमस्कृतिः ।
श्रुतिस्मृत्युदितं कर्म यदाराधनसंश्रयम् ॥
वरदश्रीनृसिंहार्यस्योपदेशबलोदिताम् ।
सन्ध्यावन्दनमन्त्राणां विदधे वृत्तिमन्विताम् ॥

सिद्धमिह देवतिर्यङ्मनुष्यस्थावरस्थानामात्मनां भगवन्नियाम्य-भगवद्भार्यभगवच्छेषतया भगवत्कैंकर्यकारकत्वात् (त्प्रकारत्वात्) भगव-तश्च तत्प्रतिसंबन्धितया तन्नियामकतद्द्वारकतच्छेषितया तत्प्रकारि-त्वादाकृतिवाचिनां शब्दानामपर्यवसानवृत्त्या भगवत्पर्यन्तस्वार्थाभिधा-यित्वात्परमपुरुषस्य शब्दैकगोचरत्वेन शब्दस्य च विशेषणविशेष्य-भावसामानाधिकरण्यमुखेन गमकत्वव्यवस्थापनाज्जीवपरमात्मनोः शरी-रशरीरिभावेन तादात्म्यम्। तथाचान्तर्यामिब्राह्मणे—

उपसंहारः—

पुनरपि कीदृशः? लोहिताक्षः तरुणतरणिकिरणविकसितसरसी-रुहवद्रुणेक्षण इत्यर्थः, सूर्यः पूर्वोक्तनिर्वचनः विपश्चित् स भगवान् क्षीरार्णवशायी नारायणः मनसा अस्मद्विषयप्रसादप्रवणेन मानसेन मां स्वाराधनयोग्यत्वाय पुनः पुनातु। पूर्वोक्तानां पश्येमेति बहुवचनानां मामित्येनैनैकार्थत्वेऽपि वा सामानाधिकरण्याभावो विपरिणामो वा। अखिलजनवन्द्यगुरुषु बहुवचनमित्यनुशासनान्मामित्येने[नै]कार्थत्वेऽपि वाक्यभेदेन सामानाधिकरण्याभावान्न दोषः॥

हरितान्वयदीपेन व्यासनाम्ना विपश्चिता।
मन्त्रभाष्यमिदं गुह्यं लिखितं (निखिलं) निरणायि तत्॥

इति श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयस्य श्रीसुदर्शनाचा-र्यस्य कृतिषु सन्ध्यावन्दनभाष्यं सम्पूर्णम्॥

प्रतिपाद्यविषयः—

अत्र भगवन्नामकीर्तनमहिमोपवर्णनपूर्वकं भगवतो हरेस्सर्वान्त-रात्मत्वमभिधाय मन्त्रलक्षणतद्भेदादिकं प्रकाश्य श्रीवैष्णवसम्प्रदायानु-सारेण यजुर्वेदाम्नातानां सन्ध्यावन्दनमन्त्राणां सम्यग्विवरणं कृतम्॥

वक्तव्यविशेषः—

मुद्रितमिदं भाष्यं श्रीवैष्णवसंप्रदायानुसारि च दृश्यते॥

No. 646 (B 190).

सन्ध्यावन्दनमन्त्रभाष्यम्.

Sandhyāvandanamantrabhāṣyam.

Author—Sudarśanasūri.
Substance—Paper.
Size—$7\frac{5}{8} \times 6$ inches.
Character—Telugu.
Folios—58.
Lines on a page—12.
Letters in a line—16.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Almost correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 645 **कोशवत्**.

उपसंहारः—

No. 645 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 645 **कोशवत्**.

वक्तव्यविशेषः—

No. 645 **कोशवत्**.

No. 647 (1462/2).

सन्ध्यावन्दनमन्त्रभाष्यम्.

Sandhyāvandanamantrabhāṣyam.

Author—Sudarśanasūri.
Substance—Palm-leaf.
Size—$17\frac{1}{4} \times 1\frac{3}{8}$ inches.
Character—Telugu.

Folios—53-80.
Lines on a page—5.
Letters in a line—84.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Almost correct.
Complete or incomplete—Complete.

उपक्रमः—

'वरदमिश्र' इत्यादिमपद्यमात्रमत्र न दृश्यते । अन्यत्सर्वं No. 645 कोशवत् ॥

उपसंहारः—

No. 645 कोशवत्.

प्रतिपाद्यविषयः—

No. 645 कोशवत्.

वक्तव्यविशेषः—

No. 645 कोशवत्.

No. 648 (B 746).

सन्ध्याभाष्यं ऋक्शाखीयम्.

Sandhyābhāṣyam.

Author—Venkaṭakṛṣṇācārya.
Substance—Paper.
Size—$7\frac{3}{4} \times 5\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—36.
Lines on a page—14.
Letters in a line—26.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

लक्ष्मीलक्ष्मीशपादाभ्यामियमस्तु नमस्कृतिः ।
यया निखिलभाग्यानि भवेयुर्भजतां हरिम् ॥ १ ॥

श्रुतिस्मृत्युदितं कर्म यदाराधनसाधनम् ।
तद्विधायकमन्त्राणां वृत्तिं वक्ष्ये यथाक्रमम् ॥ २ ॥
यावन्तोऽस्यां विकर्मस्थाः पृथिव्यां बालिशा द्विजाः ।
तेषां पावित्र्यसिद्ध्यर्थं सन्ध्या सृष्टा स्वयम्भुवा ॥ ३ ॥

व्यासः—

उपास्तिः सन्धौ सूर्यस्य निशायां दिवसस्य च ।
तामेव ताभ्यां तस्मात्तु प्रवदन्ति महर्षयः ॥ ४ ॥
सूर्यान्तर्गतभगवद्ध्यानं सन्ध्येत्युक्तं भवति ।

सन्ध्याधिकारकालः—

मौञ्जीबन्धनमारभ्य सायंप्रातश्च कालयोः ।
मध्याह्नेऽपि च कर्तव्यं यावत्प्राणविमोक्षणम् ॥
प्रातस्सन्ध्यां सनक्षत्रामुपासीत यथाविधि ।
सावित्रीं पश्चिमां सन्ध्यामनस्तमितभास्करे ॥

उपसंहारः—

यत्किञ्चिदुरितं यच्चान्यत्पापं मयि निष्पन्नमिदं पापजातं तत्कर्तारं माममृतयोनौ मरणरहिते जगत्कारणे सत्ये बाधरहिते ज्योतिषि स्वयम्प्रकाशे जुहोमि प्रक्षिपामि अहमनेन होमेन सर्वं भस्मीकरोमीत्यर्थः । तदर्थमिदमभिमन्त्रितं जलं स्वाहा मदीये वक्त्राग्नौ सुष्ठु हुतमस्तु ॥

इति श्रीरामचन्द्रपरिव्राट्पादारविन्दपरिचारकश्रीमद्व्यासमुनिवरदगोपालकृष्णमठाभिमानिनो नागावधानि[नः] पुत्रेण श्रीमद्रघुनाथतीर्थयतिपतिकृपापात्रेण वेंकटकृष्णाचार्येण कृतमृक्सन्ध्याभाष्यं सम्पूर्णम् ॥

प्रतिपाद्यविषयः—

द्वैतमतानुसारेण सप्रमाणोपन्यासं सन्ध्याकालनिर्णयादिपुरस्सरं संध्यानुष्ठानफलप्रकाशनसोहंत च सन्ध्यात्रयान्तर्गतनिखिलमन्त्राणामर्थः सम्यगत्राभिहितो दृश्यते ॥

एतद्भाष्यप्रणेता वेंकटकृष्णार्यः श्रीव्यासमुनिवरदगोपालकृष्णमठाभिमानिनागावधानिपुत्रः श्रीरघुनाथतीर्थयतिशिष्यश्चेति ग्रन्थान्तपरिदृश्यमानप्रशस्तिपङ्क्त्या ज्ञायते ॥

वक्तव्यविशेषः—

इदमेव भाष्यं मध्वाचार्यकर्तृकमिति आनन्दाश्रममुद्रणालये माध्याह्निकसंध्याप्रकरणारम्भपर्यन्तं मुद्रितं दृश्यते । अत्र तु बहुषु कोशेषु वेंकटकृष्णार्यकर्तृकमेवेदमित्युल्लिखितं दृश्यते ॥

No. 649 (4001/3).

सन्ध्याभाष्यं ऋक्शाखीयम्.

Sandhyābhāṣyam.

Author—Venkaṭakṛṣṇācārya.
Substance—Paper.
Size—16 × 1½ inches.
Character—Nāgarī.
Folios—23.
Lines on a page—10.
Letters in a line—60.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 648 कोशवत्.

उपसंहारः—

No. 648 कोशवत्.

प्रतिपाद्यविषयः—

No. 648 कोशवत्.

वक्तव्यविशेषः—

No. 648 कोशवत्.

No. 650 (1108/2).

सन्ध्याभाष्यं ऋक्शाखीयम्.

Sandhyābhāṣyam.

Author—Venkaṭakṛṣṇācārya.
Substance—Palm-leaf.
Size—$15\frac{1}{4} \times 1\frac{1}{4}$ inches.
Character—Nāgarī.
Folios—123-155.
Lines on a page—7.
Letters in a line—68.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

No. 648 **कोशवत्**.

उपसंहारः—

No. 648 **कोशवत्**.

प्रतिपाद्यविषयः—

No. 648 **कोशवत्**.

वक्तव्यविशेषः—

No. 648 **कोशवत्**.

एतत्कोशान्ते नन्दनाश्वयुजशुक्लपञ्चम्यां सौम्यवासरे एतद्ग्रन्थलेखनसमाप्तिकालो निर्दिष्टो दृश्यते ॥

No. 651 (2437/4).

सन्ध्याभाष्यं ऋक्शाखीयम्.

Sandhyābhāṣyam.

Author—Venkaṭakṛṣṇācārya.
Substance—Palm-leaf.
Size—$13\frac{3}{4} \times 2\frac{1}{8}$ inches.

Character—Nāgarī.
Folios—3-26.
Lines on a page—11.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

प्रक्षाळ्य हस्तौ चाभ्युक्ष्य पादं शीर्षं तथैकतः ।
मध्यमाङ्गुलिपृष्ठैश्च संस्पृशेद्घ्राणमूर्धकम् ॥
हस्तौ प्रक्षाळ्य संस्पृश्य घ्राणादिद्वादशं पृथक् ।
अङ्गुष्ठेन प्रदेशिन्या घ्राणौ पश्चादुपस्पृशेत् ॥

उपसंहारः—

No. 648 कोशवत्.

प्रतिपाद्यविषयः—

No. 648 कोशवत .

वक्तव्यविशेषः—

कोशेऽस्मिन् एतद्भाष्यादिमभागो न दृश्यते.

No. 652 (C 634).

सन्ध्याभाष्यं ऋक्शाखीयम्.

Sandhyābhāṣyam.

Author—Venkaṭakṛṣṇācārya.
Substance—Paper.
Size—9½ × 4½ inches.
Character—Nāgarī.
Folios—24.
Lines on a page—12.
Letters in a line—38.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 648 कोशवत्.

उपसंहारः—

अधोदिशि—शेषः वारुणी मित्रः मैत्री एभिरुपास्यः शेषशायी। अवान्तरदिशि—गणेशः तदुपास्यः सङ्कर्षणः। एकोनपञ्चाशन्मरुतः। तदुपास्योऽनिरुद्धः। स्वर्नामकः अनिरुद्धसङ्कर्षणः। प्रतिहारनामको अनिरुद्धः निधननामकसङ्कर्षणरामः॥

॥ इति प्रातस्सन्ध्याप्रकरणं सम्पूर्णम् ॥

प्रतिपाद्यविषयः—

No. 648 कोशे द्रष्टव्यः.

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं प्रातस्सन्ध्याप्रकरणान्तमेव दृश्यते।

No. 653 (B 968).

* सन्ध्याभाष्यं यजुश्शाखीयम्.

* Sandhyābhāṣyam.

Author—Venkaṭakṛṣṇācārya.
Substance—Paper.
Size—8 × 6½ inches.
Character—Nāgarī.
Folios—80.
Lines on a page—12.
Letters in a line—16.
Age of Ms.—Not very old.
Condition of Ms.—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.

Subject in brief :—

This Bhāṣya gives out the meanings of the Sandhyā mantras according to Yajus Śākhā, following the Dwaita system of philosophy.

उपक्रमः—

लक्ष्मीलक्ष्मीशपादाभ्यामियमस्तु नमस्कृतिः ।
यया निखिलभाग्यानि भवेयुर्भजतां हरिम् ॥
श्रुतिस्मृत्युदितं कृत्यं यदाराधनसाधनम् ।
तद्विधायकमन्त्राणां वृत्तिं वक्ष्ये यथाक्रमम् ॥
यावन्तोऽस्यां विकर्मस्थाः पृथिव्यां बालिशा द्विजाः ।
तेषां पावित्र्यसिद्ध्यर्थं सन्ध्या सृष्टा स्वयंभुवा ।
उपास्तिः सन्ध्या सूर्यस्य निशाया दिवसस्य च ।
तामेव ताभ्यां तस्मात्तु प्रवदन्ति महर्षयः ॥

सूर्यान्तर्गतभगवद्ध्यानं सन्ध्येत्युक्तं भवति ।

सन्ध्याकालः—

प्रातस्सन्ध्यां सनक्षत्रामुपासीत यथाविधि ।
सावित्रीं पश्चिमां सन्ध्यामनस्तमितभास्करे ॥

उपसंहारः—

अथ त्वत्प्रसादेन पापविनाशानन्तरं त्वत्प्रसादलब्धज्ञानेन ते तव प्रियासः प्रियाः स्मः । वरुणेति संबोधनम् । एतदुक्तं भवति—हे देव क्रीडादिगुणविशिष्ट हे वरुण वरुणशब्दवाच्य त्वत्प्रसादात् ध्वस्तसमस्तकिल्बिषा इहलोकपरलोकयोः कृतकृत्या भवेमेत्युपस्थाता प्रार्थयते ॥

॥ इति यजुस्संध्याभाष्यं संपूर्णम् ॥

प्रतिपाद्यविषयः—

अत्र सप्रमाणप्रपञ्चनं सन्ध्योपासनाचरणप्रकारं प्रकाश्य याजुषानुष्ठेयसन्ध्यात्रयविनियुक्तमन्त्राणां केशवादिनाममन्त्राणां च ललितयैव वाक्यशैल्या द्वैतमतानुरोधेन विवरणपूर्वकं सन्ध्याचरणतदभावयोः फलप्रत्यवायादिकं चोपवर्णितं दृश्यते ॥

वक्तव्यविशेषः—

कोशोऽस्मिन्निदं भाष्यं समग्रं दृश्यते । अमुद्रितं चैतत् । यद्यप्यत्र एतद्भाष्यप्रणेतुर्नाम न दृश्यते । तथापि एतत्कोशालयोपलभ्यमानवेंकट-

कृष्णार्यप्रणीतबह्वृचसन्ध्याभाष्यग्रन्थानुपूर्व्या एव बहुशस्तत्रतत्र दर्शनात् तत्रत्यबह्वृचसन्ध्यामात्रासाधारणान् मन्त्रान् विहाय तत्रतत्र याजुषमात्रसाधारणमन्त्रान् विनिर्दिश्य तेषां विवरणाच्च वेंकटकृष्णार्यैणैव याजुषानुरोधीदं कृतं स्यादित्यस्यापि तत्कर्तृकत्वेनैव निर्देशः कृतः ॥

No. 654 (2283/6).

सिंहानुवाकः.

Simhānuvākaḥ.

Substance—Palm-leaf.
Size—16 × 1¾ inches.
Character—Grantha.
Folios—55.
Lines on a page—10.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

सिंहे मे मन्युः, व्याघ्रे मे अन्तरामयः, वृके मे क्षुत्, अश्वे मे घसिः, धन्वनि मे पिपासा, राजगृहे मे अशनाया, अश्मनि मे तन्द्रिः, गर्दभे मेऽर्शः ॥

उपसंहारः—

अप्सु मे श्रमः, ब्रह्मोज्झे मे किल्बिषं, अपेहि पाप्मन् पुनरपनाशितो भवा नः पाप्मन् सुकृतस्य लोके पाप्मन् धेह्यविहृतो यो नः पाप्मन्न जहाति तमु त्वा जह्मिो वयं अन्यत्रास्मिन्निविशतात् सहस्राक्षोऽमर्त्यो यो नो द्वेष्टि स रिष्यतु यमु द्विष्मः तमु जहि ॥

प्रतिपाद्यविषयः—

पातकपरिहरणफलकगणहोमाख्यकर्मणि विनियुक्तेऽस्मिन् मन्त्रकदम्बे मन्युरोगक्षुत्पिपासाशनायादीनामात्मसकाशादपसारणं प्रार्थ्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् समग्रोऽयं मुद्रितश्च ॥

No. 655 (2283/1ʊ).

सिंहानुवाकः.

Simhānuvākaḥ.

Substance—Palm-leaf.
Size—16 × 1¾ inches.
Character—Grantha.
Folios—68.
Lines on a page—10.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

No. 654 कोशवत्.

उपसंहारः—

No. 654 कोशवत्.

प्रतिपाद्यविषयः—

No. 654 कोशवत्.

वक्तव्यविशेषः—

No. 654 कोशवत्.

No. 656 (294/2).

सिंहानुवाकः.

Simhānuvākaḥ.

Substance—Palm-leaf.
Size—11 × 1½ inches.
Character—Telugu.
Folio—1.

Lines on a page—10.

Letters in a line—60.

Age of Ms.—Old.

Condition of Ms.—Worm-eaten.

Correct or incorrect—Not so very correct.

Complete or incomplete—Complete.

उपक्रमः—

No. 654 **कोशवत्.**

उपसंहारः—

यो नो द्वेष्टि स रिष्यतु यमु द्विष्मस्तमु जहि। सुमित्रा न आप ओषधयस्सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मः पाप्मन्। ओं शान्तिश्शान्तिश्शान्तिः॥

प्रतिपाद्यविषयः—

No. 654 **कोशवत्.**

वक्तव्यीविशेषः—

एतत्कोशान्ते वैश्वदेवमन्त्रा अपि संगृहीता दृश्यन्ते॥

No. 657 (294/3).

* सिंहानुवाकभाष्यम्.

* Simhānuvākabhāṣyam.

Substance—Palm-leaf.

Size—11 × 1½ inches.

Character—Telugu.

Folios—2-4.

Lines on a page—10.

Letters in a line—66.

Age of Ms.—Old.

Condition of Ms.—Not good; worm-eaten.

Correct or incorrect—Correct.

Complete or incomplete—Complete.

Subject in brief :—

This Bhāṣya explains the mantras "Simhe me manyuḥ," etc., that are recited while performing Gaṇa Homa.

उपक्रमः—

सिꣳहे मे मन्युः–मन्युः क्रोधः हिनस्तीति हिंसः पृषोदरादित्वाद्धकारसकारयोर्व्यत्यासः मकारस्य सकारः सकारस्य हकारः । सिꣳहः सिंहः जातिशब्दः । वाक्यत्वा(स्या)परिसमाप्तत्वाद्योग्यक्रियाध्याहारः । वर्ततामिति शेषः । मन्युः क्रोधः सः सिंहे प्राणिनां हिंसाकारिण्युग्रजन्तौ वर्ततां, न मयीति शेषः । एवं प्राणिनामपकारिण्युग्रसत्वे मदीयः क्रोधः प्रवर्ततां । व्याघ्रे मेऽन्तरामयः—आमयो व्याधिः मे इति सप्तम्यर्थे षष्ठी, मयि वर्तत्सामयो व्याघ्रमृगे महाशार्दूलाख्ये वर्ततां न मयीत्यर्थः ॥

उपसंहारः—

सहस्राक्षो अमर्त्यः—सहस्राक्षः बहुदृष्टिः अमर्त्यः अमरणधर्मदेवता स्वभाव इत्यर्थः । यो नो द्वेष्टि न प्रणयति सःरिष्यतु नश्यतु । यं च वयं द्विष्मः तमु जहि । दुर्मित्रा अप्रिया इमा आपः तस्मै भूयासुः योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥

प्रतिपाद्यविषयः—

No. 654 कोशनिर्दिष्टस्य पातकपरिहरणफलकगणहोमानुष्ठातृकर्तृकमन्यवामयक्षुत्पिपासाद्यपसारणप्रार्थनपरस्य 'सिंहे मे मन्युः' इत्यादिमन्त्रकदम्बस्य विवरणमत्र भाष्ये दृश्यते ॥

वक्तव्यविशेषः—

इदानींप्रसिद्धवेदराशावश्रूयमाणत्वादयं खिलमन्त्र इति भाति । अस्मिन् कोशे मूलं तद्भाष्यं चेत्येतद्द्वयमपि दृश्यते । भाष्यकर्तुर्नाम च न लिखितम् । No. 658 कोशदृश्यमानभाष्याद्विलक्षणं चेदं भाष्यम्॥

No. 658 (2283/7).

* सिंहानुवाकभाष्यम्.

* Simhānuvākabhāṣyam.

Substance—Palm-leaf.
Size—16 × 1¾ inches.
Character—Grantha.
Folios—55-57.
Lines on a page—10.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Subject in brief:—

Same as the above; but this is written by a different author.

उपक्रमः—

एषामर्थः—मदीयो मन्युः क्रोधः पापहेतुरस्ति सिंहे सहजमन्युमति विनिहतोऽस्त्विति शेषः। एवमुत्तरवाक्येष्वपि द्रष्टव्यम्। तथा च व्याजहार बोधायनः—पितृयज्ञे पाप्मनो विधीन्वाचयतीति। व्याघ्रः शार्दूलः, अन्तरामयः मानसी व्यथा, व्याघ्रस्यासन्तुष्टत्वेन सदा तद्योगत्वात् (गात्)

उपसंहारः—

हे पाप यः पापविशेषः अस्मान् द्वेष्टि प्रतिकूलो वर्तते स एव रिष्यतु नश्यतु। वयमपि यमु द्विष्मः यमेव पापविशेषं द्विष्मः त्वमपि तमेव पापं जहि विनाशयेत्यर्थः॥

प्रतिपाद्यविषयः—

No 657 **कोशवत्.**

वक्तव्यविशेषः—

अस्मिन् कोशे सिंहानुवाकमूलं तद्भाष्यं च असमग्रं दृश्यते ॥

एतत्कोशान्ते सिंहानुवाकविनियोगयोग्यगणहोमप्रयोगोऽपि संगृहीतो दृश्यते । No 657 कोशे दृश्यमानभाष्याद्भिन्नमेतद्भाष्यम् । भाष्यकर्तुर्नाम चात्र न दृश्यते ॥

No. 659 (1299/32).

सोमसूक्तम्.

Somasūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—98-99.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.

उपक्रमः—

नानानमित्यस्य सूक्तस्य कश्यपः सोमः पङ्क्तिः नानानं जरतीतिः कारुरुर्हमस्वोर्वोर्हाचत्वारि—

नानानं वा उ नो धियो विव्रतानि जनानाम् । तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव । जरतीभिरोषधीभिः पर्णेभिः शकुनानाम् । कामारिरो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥

उपसंहारः—

यत्र गङ्गा च यमुना च यत्र प्राची सरस्वती ।
यत्र विश्वेश्वरो देवस्तत्रमाममृतं कृधि । इन्द्रा . . ॥

॥ सोमसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

अत्र संगृहीतास्वृक्षु इन्द्रोद्देश्यकसोमरसदानाय सोमपरिक्षरणं प्रार्थ्यते ॥

वक्तव्याविशेषः—

मुद्रितायामृक्संहितायां सप्तमाष्टकगतपञ्चमाध्याये पञ्चविंशवर्गमारभ्य अष्टाविंशवर्गान्तमिदं सूक्तं दृश्यते । अन्ते परिदृश्यमानानां तिसृणामृचां मुद्रितायामृक्संहितायामदर्शनात्ताः खिलेष्वन्तर्गताः स्युरिति भाति ॥

No. 660 (1299/8).

हरिसूक्तम्.

Harisūktam.

Substance—Palm-leaf.
Size—$14\frac{5}{8} \times 1\frac{5}{8}$ inches.
Character—Nāgarī.
Folios—28-29.
Lines on a page—6.
Letters in a line—60.

Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषा

हर्यतं मदम् । घृतं न यो हरिभिश्चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः ॥

उपसंहारः—

अपाः पूर्वेषां हरिवस्सुतानामथो इदं सवनं केवलं ते । ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व ॥

॥ इति हरिसूक्तं समाप्तम् ॥

प्रतिपाद्यविषयः—

ब्राह्मणाच्छंसिशंसनीये अतिरात्रविनियुक्तेऽस्मिन् सूक्ते इन्द्रवाहकाश्वस्तुतिद्वारेन्द्रः स्तूयते ॥

वक्तव्यविशेषः—

मुद्रितायामृक्संहितायां अष्टमाष्टके पञ्चमाध्याये पञ्चमषष्ठसप्तमवर्गेषु इदं सूक्तं परिदृश्यते ॥

परिशिष्टम्.

वेदः—1. संहिता.

No. 661 (C 2320).

* ऋक्संहिताभाष्यम्.

* Ṛk Saṁhitābhāṣyam.

Author—Mudgala.
Substance—Paper.
Size—$8\frac{1}{8} \times 5\frac{1}{8}$ inches.
Character—Nāgarī.
Folios—14-221.
Lines on a page—14.
Letters in a line—34.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Subject in brief :—
Similarly as No. 7.

उपक्रमः—

स्यन्दमानं सोममावदन् अस्मिन् सोमयागे त्वदीयां धनदानकीर्तिं प्रकटयन्नित्यर्थः। ते गिर्वणः [1] गीर्भिर्वर्तनीयेन्द्र कारवः कर्तारः ऋत्विग्यजमानाः उपातिष्ठन्त पुरा धनलाभार्थं त्वामुपस्थितवन्तः। उपस्थाय च तस्य तादृशस्यौदार्योपेतस्य ते तव धनदानं विदुः जानन्ति ॥

मायाभिरिति ॥ हे इन्द्र त्वं मायिनं नानाविधकपटोपेतं शुष्णं भूतानां शोषणहेतुं एतन्नामकमसुरं मायाभिः तत्प्रतिकूलैः कपटविशेषैः अवातिरः हिंसितवानसि । मेधिराः मेधावन्तः तस्य तादृशस्य ते

[1] 'गीर्भिर्वननीयेन्द्र' इति सायणीयभाष्ये पाठः। युक्तश्चायमेव पाठः 'गीर्भिरेनं वनयन्ति' इति यास्कीयनिर्वचनदर्शनात् ॥

तव महिमानं विदुः जानन्ति । तेषां जानतां अनुष्ठातॄणां श्रवांसि अन्नानि उत्तिर वर्धय । इन्द्रमीशानमिति ॥

उपसंहारः—

मा सा त इति । वाजप्रमहः वाजैर्धनैः प्रमहनीयेन्द्र ते त्वदीया सा सुमतिः शोभनानुग्रहरूपा बुद्धिः अस्मत् अस्मासु मा विदसत् मा विशुष्यतु । तथा इषः अन्नानि अस्मान् संवरन्त संवृतान् कुर्वन्तु । हे मघवन् इन्द्र अर्यः धनपतिः त्वं नः अस्मान् गोषु आभज प्रापय । ते तव महिष्ठाः अतिशयेन स्तुतिभिः प्रवर्धयितारो वयं सधमादः स्याम पुत्रपौत्रादिभिः सह माद्यन्तो भवेम ॥ इति प्रथमस्य अष्टमे षड्विंशो वर्गः । इति ऋक्प्रथमाष्टके अष्टमोऽध्यायः ॥

॥ प्रथमाष्टकं सम्पूर्णम् ॥

प्रतिपाद्यविषयः—

अत्र अग्नथादिदेवतास्तुतिपराणां तत्तत्क्रतुषु विनियुक्तानामृचां विवरणं दृश्यते ॥

वक्तव्यविशेषः—

अमुद्रितमिदं भाष्यम् ॥ कोशेऽस्मिन्निदं भाष्यं प्रथमाष्टके एकविंशे वर्गे षष्ठीमृचमारभ्य प्रथमाष्टकसमाप्तिपर्यन्तं दृश्यते । ऋक्संहितासायणभाष्यपरिदृश्यमानान् व्याकरणप्रक्रियादिविशेषान् परित्यज्य तत्रत्य एव ऋगर्थवर्णनक्रमोऽत्र बालबोधाय मुद्गलनाम्ना केनचिदाधुनिकेन संगृहीत इति भाति ॥

अत एव चादौ—

आलोच्य पूर्वभाष्यं च बह्वृचस्य समन्ततः ।
गहनं मन्यमानेन सुबोधेन समुद्धृतम् ।
नवनीतं यथा क्षीरात्सिकतायाश्च काञ्चनम् ।
तथा समुद्धृतं सारं बालानां बोधसिद्धये ।
मौद्गल्यगोत्रेण च मुद्गलेन ह्यात्मानुभूतेन सुसंस्कृतेन ।
यथार्थभूतेन सुसाधकेन समुद्धृतं सारमिदं वरिष्ठम् ॥

इति प्रतिज्ञातं दृश्यते ॥

No. 662 (B 1).

* ऋक्संहिताविवरणम् (ऋगर्थदीपिका).

* Ṛgarthadīpikā.

Author—Mādhavārya.
Substance—Paper.
Size—$7\frac{5}{8} \times 5\frac{3}{4}$ inches.
Character—Kannada.
Folios—163.
Lines on a page—13.
Letters in a line—16.
Age of Ms.—Ancient.
Condition of Ms.—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

Subject in brief :—

This manuscript describes in grammatical order, the meaning of the words in the Ṛk Saṁhitā beginning with the last Ṛk of the first varga of the third Adhyāya in the first Aṣṭaka. The first two Adhyāyas of the first Aṣṭaka have been printed in two volumes under the Trivandrum Sanskrit Series. The author 'Mādhavārya' has given his geneology in the colophon at the end of each Adhyāya. He belongs to the family of Viśvāmitra and is born of Veṅkatārya and Sundari. Traditionally, he is said to have been a direct disciple of Rāmānujācārya, the founder of the Viśiṣṭādvaita system of Philosophy. In the introduction to the Trivandrum edition mentioned above, the editor, relying on the above tradition, has counted Mādhavārya as one of Rāmānujācārya's disciples and ascribed to him a date not later than the first half of the 12th century A.D. But this tradition is discountenanced by the author's invoking the favour of the God Vināyaka in one of his verses as well as by his not giving obeisance to his Guru at the beginning of his work as is the wont with all the disciples of Rāmānujācārya.

However, Sāyaṇa, in his Bhāṣya on the Ṛg Veda mentions the name of Mādhavārya and actually quotes

from his work. Since Kesavaswāmi and Devarāja who are anterior to Sāyaṇa refer to Mādhavārya by name, Mādhavārya should belong to a period for removed from Sāyaṇa.

उपक्रमः—

त् विष्वक् ते वृत्रसहायाः विविधं गताः अयजमानाः पृक्तास्ते मरणं गताः । 1-3-5 पराचित्—परा[व]वृजुः परावृत्तानि शीर्षाणि के इन्द्रपराङ्मुखानि युद्धादयज्वानो यज्वभिः स्पर्धमानाः यदा त्वं दिवः स्थापयितारं धन उन्नूनप्रार्तिष्टथाः ? शत्रून् प्रति तदानीमयजमानान् तान् द्यावापृथिव्योर्निरधमः ॥ (1-3-6) अयुयुत्सन्—ये असुराः योधयितुमिच्छावन्तः अनवद्यस्य दोषरहितस्य इन्द्रस्य सेनामाश्रिताः नवग्वाः क्षितयः तानयातयन्त हतवन्तः नवभिर्मासैस्सिद्धिं गता नवग्वाः प्रजननसमर्थो वृषभः तेन ताडिता वध्रयो यथा नश्येयुः तद्वत्प्रजननासमर्थबलीवर्दवद्वुरनिष्ठा अत्यन्तवृद्धाः अथैनमिन्द्रं नवसाक्षिकयो (नवग्वाःक्षितयो) युद्धार्थं निगमयन् वने वृषा ? आयुधच्छिन्नवृषणा इव वर्धस्व दुष्टस्साण्डाः ? न युध्यमानाः प्रकर्षगमनवद्भिरश्वैर्बलवानयमिन्द्र इति जानन्तो युद्धात् प्रतिगताः ॥

उपसंहारः—

त्वं नस्त्वमस्मानस्यास्सेनाया दुर्हणायाः पाहि वाज्रि(ज्रि)वो दुरिताद्य सङ्ग्रामे प्रयधि वाऽस्मभ्यं (प्रयन्धि वाऽस्मभ्यं) ? बलानिरध्यत्वमश्वमश्वैर्बद्धव्यनि ? अन्नाय प्रशसे श्रवसे च सत्यायास्मान् प्रेरयेति ॥

मा सा ॥ मा सा तव स्तोत्रविषया सुमतिरस्मासु शुष्यतु अतियेन पूजनीयानस्मानज्ञानि सुवृण्वन्त भज चमवन्गोष्वन्मानीश्वरे दातृतमये च यं तुभ्यं ? गोभिः पुत्रैश्च सधमादः स्यामेति ॥

ऋगर्थदीपिका चेयं प्रथमश्चायमष्टकः ।
कर्ता श्रीवेङ्कटार्यस्य तनयो माधवाह्वयः ॥

इति श्रीमाधवार्यविरचितऋगर्थदीपिकाप्रथमाष्टकः समाप्तः ॥

प्रतिपाद्यविषयः—

ऋक्संहितायां प्रथमाष्टके तृतीयाध्याये प्रथमवर्गान्तिमामृचमारभ्य एतदष्टकसमाप्तिपर्यन्तमत्र कोशे समुपलभ्यमाने ऋक्संहिताविवरणे अन्वयक्रमेण तत्तत्पदार्थवर्णनमात्रं दृश्यते ॥

वक्तव्यविशेषः—

एतद्विवरणप्रणेता माधवार्यः कौशिकगोत्रसम्भूतो वेंकटार्यसुन्दर्योः सूनुरिति तत्तदध्यायान्ते परिदृश्यमानैः—

इत्थं तृतीयमध्यायं व्याकरोत्प्रथमेऽष्टके ।
विश्वामित्रकुले जातो माधवस्सुन्दरीसुतः ॥
इत्थं चतुर्थमध्यायं व्याकरोत्प्रथमाष्टके ।
अष्टकस्य कुले जातो माधवो वेंकटात्मजः ॥
इति पञ्चममध्यायं व्याकरोत्प्रथमेऽष्टके ।
लोहितस्य कुले जातो माधवो वेंकटात्मजः ॥
इतीमं षष्ठमध्यायं व्याकरोत्प्रथमेऽष्टके ।
भरतस्य कुले जातो माधवो वेंकटात्मजः ॥
ऋगर्थदीपिका चेयं प्रथमश्चायमष्टकः ।
कर्ता श्रीवेंकटार्यस्य तनयो माधवाह्वयः ॥

इति पद्यैरवसीयते । अत्र कौशिकगोत्रस्य 'विश्वामित्राष्टकलोहित' इत्यादि प्रवरस्मरणात् 'विश्वामित्रकुले' 'अष्टकस्य कुले' 'लोहितस्य कुले' इति निर्देश इति प्रतिभाति । अनन्तशयनमुद्रितैतत्प्रथमाष्टकप्रथमाध्यायोपोद्घाते उपलब्धैतन्मातृकागतत्तद्ग्रन्थावलम्बेनायं माधवार्यः माधवार्यस्य पौत्रः वेंकटार्यसुन्दर्योः पुत्रो भवगोलदौहित्रः संकर्षणस्याग्रजो वेंकटगोविन्दयोर्जनकः चोलदेशीयकावेरीदक्षिणतीरस्थगोमदाख्यग्रामनिवास्यासीदिति निर्धारितम् । किंवदन्तीबलात् विशिष्टाद्वैतसिद्धान्तस्थापनाचार्यभगवद्रामानुजाचार्यशिष्यत्वं चास्याभ्यूहितम् ॥

तत्रेदं चिन्तनीयम्—यतस्तत्रैवोपलब्धमातृकानुरोधेनैतद्ग्रन्थादौ—

श्रीवेंकटार्यतनयो व्याचिकीर्षति माधवः ।
ऋक्संहितामस्य देवः प्रसीदतु विनायकः ॥

इति ग्रन्थकृत्प्रणीतमात्मनो विनायकप्रसादप्रार्थनपरं पद्यमेकं प्रकाशितं दृश्यते । न ह्येवं श्रीमद्रामानुजीयप्रणीतप्रबन्धेषु क्वचिदपि विनायकप्रसादप्रार्थनपरं पद्यमुपलभ्यते । यद्यपि श्रीमद्रामानुजीयैर्विष्वक्सेनप्रसादस्संप्रार्थ्यते, तथापि न स विष्वक्सेनो विनायकपदेन प्रतीयमानः प्रसिद्धः । किंच साक्षाद्रामानुजाचार्यशिष्यश्चेदयं ग्रन्थकारः

तच्छिष्यपरंपराचरणक्रममनुरुध्य कुतो वा स्वगुरुनमस्कृत्यादिकं ग्रन्थादौ न प्राणैषीत्। अतोऽस्य माधवार्यस्य श्रीमद्रामानुजाचार्यशिष्यत्वे प्रमाणं गवेषणीयमिति ॥

अयं च वेंकटमाधवार्यः सायणीये ऋग्भाष्ये अष्टमाष्टकीयचतुर्थाध्यायादौ "माधवभट्टास्तु—वि हि सोतोरित्येषर्गिन्द्राण्या वाक्यमिति मन्यन्ते। तथाच तद्वचनम् 'इन्द्राण्यै कल्पितं हविः कश्चिन्मृगोऽदूदुषत् इन्द्रपुत्रस्य वृषाकपेर्विषये वर्तमानः। तत्रेन्द्रमिन्द्राणी वदतीति" इत्येतन्नामग्रहणपूर्वकमेतद्ग्रन्थानुवादादर्शनात् सायणार्यात्प्राक्तनैः केशवस्वामिदेवराजादिभिरप्येतन्नामोत्कीर्तनाच्च सायणार्यात्प्राचीन इति ज्ञायते ॥

अस्यां च वेंकटमाधवीयव्याख्यायां पदानां विवरणे अन्वयादौ च तत्र तत्र सायणीयभाष्याद्वैलक्षण्यमपि दृश्यते। तत्रेदं दिङ्मात्रं प्रदर्श्यते। यथा—

अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः।

वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन् ॥ (ऋक्संहिता 1-3-6) अस्येदं सायणीयभाष्यम्—

"अनवद्यस्य गर्हणीयदोषरहितस्येन्द्रस्य सेनां प्रति अयुयुत्सन् वृत्रस्यानुचरा योद्धुमैच्छन्। तदानीं नवग्वा नवनीयगतयः स्तोतव्यचरित्राः, यद्वा अङ्गिरसां सत्रमासीननां मध्ये ये नवभिर्मासैरवाप्तफला उत्थितास्तेषां नवग्वा इति संज्ञा। 'नवग्वास्सुतसोमास इन्द्रं' इत्यादिषु तथाऽभिहितत्वात्। क्षितयः मनुष्या अङ्गिरःप्रभृतयः अयातयन्त युद्धार्थमिन्द्रं नानाविधैर्मन्त्रैः प्रोत्साहितवन्तः। इन्द्रे योद्धुं गते सति निरष्टाः तेनेन्द्रेण निराकृता वृत्रानुचराः चितयन्तः स्वकीयामशक्तिं ज्ञापयन्तः इन्द्रात् इन्द्रस्य सकाशात् प्रवद्भिः प्रवणैः पालयितुं सुशकैर्मार्गैः आयन् दूरे गतवन्तः। तत्र दृष्टान्तः—वृषायुधः वृषेण सेचनसमर्थेन पुंस्त्वयुक्तेन शूरेण सह युद्धं कुर्वन्तो वध्रयो न नपुंसका इव" इति ॥

अस्येदं वेंकटमाधवीयं विवरणम्—

"अयुयुत्सन् येऽसुरा योधयितुमिच्छावन्तः अवद्यरहितस्य इन्द्रस्य सेनामाश्रिता नवग्वाः क्षितयः तानयातयन्त हतवन्तः, नवभिर्मासैस्सिद्धिं गता नवग्वाः, प्रजननसमर्थो वृषभः तेन ताडिता वध्रयो

यथा नश्येयुः । तद्वत्प्रजननासमर्थबलीवर्दवन्निरष्टा अत्यन्तं वृद्धाः प्रकर्षगमनवद्भिरश्वैः बलवानयमिति जानन्तः युद्धात्प्रतिगताः " इति ॥

कोशेऽस्मिन् 38 तमपत्र 144-146 पत्रेषु च दृश्यमानं शाट्यायननामस्मरणं तद्वाक्यानि चात्रोपात्तानि सायणीयेऽपि दृश्यन्ते । एवं बहुषु स्थलेष्वेतत्संवादः सायणीयेऽप्युपलभ्यते । अतः श्रीसायणार्यैः विवरणमेतदप्यवलम्ब्य प्रायस्तत्रतत्रैतत्संवादि ऋग्भाष्यं प्रणीतमिति ज्ञायते ॥

अस्मिंश्च वेंकटमाधवीये विवरणे सायणीयभाष्य इव न व्याकरणप्रक्रियादिकं दृश्यते, किं त्वन्वयक्रमेण पदार्थविवरणमात्रम् । अत इदं व्युत्पित्सूनां सुखेन वेदे व्युत्पत्तिं जनयति । कोशेऽस्मिन् लेखकप्रमादाश्च बहीयांस उपलभ्यन्ते । विवरणं चैतदत्र कोशे प्रथमाष्टके तृतीयाध्याये पञ्चमीमृचमारभ्य तदष्टकपरिसमाप्तिपर्यन्तमात्रं दृश्यते ॥

एतद्विवरणं च प्रथमाष्टकद्वितीयाध्यायान्तमधुना अनन्तशयनराजकीयकोशालयात्संमुद्रय प्रकाशितमुपलभ्यते ॥

No. 663 (573).

तैत्तिरीयसंहिताभाष्यं (कृष्णयजुस्संहिताभाष्यम्) वेदार्थप्रकाशाख्यम्.

Taittirīyasaṁhitābhāṣyam.

Author—Sāyaṇācārya.
Substance—Palm-leaf.
Size—17½ × 1½ inches.
Character—Grantha.
Folios—47-74.
Lines on a page—8.
Letters in a line—64.
Age of Ms.—Old.
Condition of Ms.--Good.
Correct or incorrect—Almost correct.
Complete or incomplete—Incomplete.

उपक्रमः—

परिषेचनमारभ्य संस्कारा ये चिकीर्षिताः ।
ते पञ्चस्वनुवाकेषु प्रोक्ताः शेषश्चमे गतः ॥

तत्र प्रथमेऽनुवाके परिषेचनविकर्षणादयोऽभिधीयन्ते। कल्पः—'उदकुम्भमादायाश्मन्वूर्जमिति त्रिः प्रदक्षिणमग्निं परिषिञ्चन् पर्येति' इति॥

उपसंहारः—

कल्पः 'तीव्रान् घोषान् कृण्वते वृषपाणय इत्यश्वान्' इति। पाठस्तु—'तीव्रान् घोषान्——व्ययन्तः' इति। एतेऽश्वाः तीव्रान् अत्युच्चान् घोषान् हेषाशब्दान् कृण्वते कुर्वते। कीदृशा अश्वाः? वृषपाणयः सेचनवाचिना वृषशब्देन शक्तिरुपलक्ष्यते। पाणिशब्दः पादलक्षकः। गन्तुं शक्ताः पादा येषाम्

प्रतिपाद्यविषयः—

अग्निचित्यङ्गमन्त्राणामत्र विवरणं दृश्यते।

वक्तव्यावशेषः—

कोशेऽस्मिन्निदं भाष्यं चतुर्थकाण्डगतषष्ठप्रश्ने आदितः प्रभृति असमग्रषष्ठानुवाकान्तं दृश्यते॥

2. ब्राह्मणम्.

No. 664 (4968/2).

आर्षेयब्राह्मणभाष्यम्.

Ārṣeyabrāhmaṇabhāṣyam.

Author—Sāyaṇācārya.
Substance—Palm-leaf.
Size—$16\frac{5}{8}\times1\frac{1}{2}$ inches.
Character—Nāgarī.
Folios—104.
Lines on a page—6.
Letters in a line—72.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद्भक्तमहीपतिः ।
आदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुस्सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥
व्याख्यातावृग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणस्याथ व्याख्यानं सम्प्रवर्तते ॥
अष्टौ हि ब्राह्मणग्रन्थाः प्रौढब्राह्मणमादिमम् ।
षड्विंशाख्यं द्वितीयं स्यात्ततस्सामविधिर्भवेत् ॥
आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशग्रन्था अष्टावुदीरिताः ॥

तत्र अथ खल्वयमार्षः प्रदेशो भवतीत्यादिकमार्षेयब्राह्मणं क्रमप्राप्तं व्याख्यायते । तत्रादौ ब्राह्मणार्थं सङ्गृह्य प्रदर्शयति—'अथ खल्वयमार्षः प्रदेशो भवति' इति । अथेत्यानन्तर्ये। खल्विति प्रसिद्धौ । अयमनेन ब्राह्मणेन प्रतिपाद्योऽर्थः आर्षः ऋषिसम्बन्धी प्रदेश उपदेशो भवति । कः पुनरसौ तमाह 'ऋषीणां नामधेयगोत्रोपधारणम्' इति । ऋषीणां नामधेयैः गोत्रैश्च, उपलक्षणमेतत् । ऋषिनामधेयगोत्रच्छन्दोदेवतादिवाचकेन शब्देन साम्नां वाच्यत्वानुज्ञानमुपधारणं, ईदृशोऽर्थोऽनेन ब्राह्मणेन प्रतिपाद्यत इत्यर्थः ॥

नन्वेवं ब्राह्मणान्तरवदत्रानुष्ठेयस्य कस्यचिदप्रतिपादितत्वात् तदध्ययनार्थज्ञानयोः पुरुषो न प्रवर्तत इत्याशङ्क्याह—'स्वर्ग्यं यशस्यं धन्यं पुण्यं पुत्र्यं पशव्यं ब्रह्मवर्चस्यं स्मार्तमायुष्यम्' इति ॥

उपसंहारः—

ऐन्द्र्यः इन्द्रसम्बन्धिन्यः माहानाम्न्यः इन्द्रवृत्रासुरयोः सङ्ग्रामे इन्द्रस्य जयार्थं महान् घोष आसीदिति माहानाम्न्य इति नामैतासां सम्पन्नम् । अथवा एता ऋचः प्रजापतेस्सम्बन्धिन्यः प्राजापत्यऋषिक[1] इत्यर्थः ॥

यद्वा विष्णोः विष्णुर्वा एतासामृषिः, विश्वामित्रस्य वा सम्बन्धिन्यः तदृषिका इत्यर्थः। यद्वा एता ऋचः सिमाः एताभिः वृत्रासुरस्य सीमानं शिरोमध्यदेशमिन्द्रोऽभिनदिनि सिमानाम । यद्वा मह्नयाः अनुकरणशब्दोऽयम्, एताभिः मह्नयाशब्दमिन्द्रोऽकार्षीदिति एता मह्नयानामिकाः । अथवा अ . . . रतो योगवत्य इत्यर्थः । अथवा शक्वर्यः एताभिर्वृत्रं हन्तुं इन्द्रश्शक्तोऽभूदिति एताश्शक्वरीसंज्ञिताः । एतत्सर्वं पञ्चविंशब्राह्मणे त्रयोदशाध्याये प्रदर्शितम्। "इन्द्रः प्रजापतिमुपाधावत् वृत्रं हनामीति तस्मा एतच्छन्दोभ्य इन्द्रियं वीर्यं निर्माय प्रायच्छदेतेन शक्नुहीति तच्छक्वरीणां शक्वरीत्वं सिमानमभिनत्तत्सिमा मह्नयमकरोत्तन्मह्नया महान् घोष आसीत् तन्महानाम्न्यो दिशः," इति। विश्वामित्रस्य सम्बन्धः शाखान्तराभिप्रायेण दर्शितः। शक्वर्यो वेत्यभ्यास आर्षेयब्राह्मणसमाप्तिद्योतनार्थः ॥ षष्ठाध्याये चतुर्थपर्वणि द्वितीयः खण्डः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कभूपाल
साम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाशे आर्षेयब्राह्मणे षष्ठाध्यायस्समाप्तः ॥
॥ आर्षेयब्राह्मणव्याख्यानं समाप्तम् ॥

प्रतिपाद्यविषयः—

सामसाक्षात्कर्तृतत्तदृषिनामगोत्रादिनिर्देशपरस्यार्षेयब्राह्मणस्य सामवेदीयस्य ललितया वाक्यशैल्या विवरणमत्र भाष्ये दृश्यते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् भाष्यमिदं समग्रं दृश्यते मुद्रितं च ॥

No. 665 (4969).

षड्विंशब्राह्मणभाष्यम्.

Ṣaḍviṁśa Brāhmaṇa Bhāṣyam.

Author—Sāyaṇācāryā. | Size—14⅞ × 1$\frac{1}{16}$ inches.
Substance—Palm-leaf. | Character—Nāgarī.

Folios—1-84.
Lines on a page—6.
Letters in a line—59.
Age of Ms.—Old.
Condition of Ms.—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

उपक्रमः—

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद्भक्तमहीपतिः ।
आदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुस्सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥
व्याख्याताबृग्यजुर्वेदौ सामवेदोऽपि संहिता ।
व्याख्याता [1] ब्राह्मणस्याद्य प्रौढव्याख्यानमादरात् ॥
अथ द्वितीयं षड्विंशब्राह्मणं व्याचिकीर्षति ॥

अस्मिन् षड्विंशे ब्राह्मणे पूर्वत्रानुक्तानि यानि कर्माण्युक्तानामपि ये भेदास्तेऽनुवर्ण्यन्ते। तत्र प्रथमं सुब्रह्मण्योच्यते, ततः सवनत्रये विज्ञेयं, ततो विश्वरूपागानं, ततो ब्रह्मकर्तव्यम्, ततो व्याहृतिहोमादिकम्, ततः प्रायश्चित्तम्, ततस्सौम्यचरुविधिः, ततो बहिष्पवमानधर्माः, ततः किञ्चित्प्रकीर्णकम्, ततो होत्राद्युपहवाः, तत आर्त्विज्येषु ऋत्विगादि-विज्ञेयम्, ततो नैमित्तिका होमाः, ततः ऋत्विग्वरणप्रशंसा, ततो विज्ञेयं कर्म, ततोऽवभृथः, ततोऽभिचारादिशंसिता विष्टुतयः, ततो द्वादशाह-स्तुतिः, अथ ष्येनादिविधिः ततो वैश्वदेवसत्रम्, इत्येवं प्रतिपाद्यानाम-र्थानामनुक्रमणी। तत्र प्रथमं तावत् उत्तरदेशे सुब्रह्मण्यो नाम ऋत्विक् सुब्रह्मण्यामाह्वयतीति विवक्षयेदमाम्नायते—ओं ब्रह्म च वा इदमग्रे सुब्रह्म चास्तामिति ॥

उपसंहारः—

अग्निहोत्रे सवनत्रयं सम्पादयति, यद्गार्हपत्ये जुहोति तत्प्रातस्सवनं, यद्दक्षिणाग्नौ जुहोति तन्माध्यन्दिनं सवनम्, यदाहवनीये जुहोति तत्तृतीयसवनमिति ॥

[1] 'ब्राह्मणं चाद्यं प्रौढं व्याख्यातमादरात्' इति शुद्धः पाठः.

गार्हपत्येऽग्नौ जुहोतीति यत्तदेव प्रातस्सवनं प्राथम्यसाम्यात्। एवमन्यदपि। अत्रैवोदयनीयादिसम्पत्तिं दर्शयति—'यदन्ना ददाति तेनोदयनीयस्योदयनीय(दवसानीयस्य)समाप्त्यै' इति। अन्ना अन्नानि हवींष्याददातीति यत्तेनोदयनीयस्य एतदाख्यस्य कर्मणः उदवसानीयस्य च समाप्त्यै कृतं भवतीत्यर्थः॥

अग्निहोत्र एव मथनेऽग्नेरुत्पादे विकल्पेन प्रायश्चित्तं दर्शयति—'अथ यस्याग्निर्मथ्यमानो न जायेताहृत्यान्यस्मिन्नवकाशे जुहुयाद्ब्राह्मणस्य वा हस्तेऽजस्य वा कर्णे कुशस्तम्बे वाऽप्सु वा जुहुयात्' इति॥

अथ पुनर्यस्य यजमानस्य अग्निर्मथ्यमानो यदि न जायतेतिह (तर्हि) आहृत्य लौकिकमग्निमानीय अन्यस्मिन्नवकाशे आहवनीयाधारे व्याहृतिभिः जुहुयात्। लौकिकाग्नेरप्यभावे ब्राह्मणस्य हस्ते जुहुयात्। एवमन्यदपि व्याख्येयम्। तथाचाश्वलायनः—'अग्निहोत्राय कालेऽग्नावजायमानेऽन्यमानीय जुहुयुः पूर्वालाभ उत्तरोत्तरं ब्राह्मणपाण्यजकर्णदर्भस्तम्बाप्सु' इत्यादि॥

प्रतिपाद्यविषयः—

No. 138 तमे एतन्मूलकोशे प्रदर्शितानामंशानां ललितया वाक्यशैल्या विवरणमत्र भाष्ये दृश्यते॥

वक्तव्यविशेषः—

कोशेऽस्मिन्निदं भाष्यं पञ्चमप्रश्नगतासमग्रप्रथमखण्डान्तं दृश्यते, मुद्रितं च।

No. 666 (4968/1).

सामविधानब्राह्मणभाष्यम्.

Sāmavidhānabrāhmaṇabhāṣyam.

Author—Sāyaṇācārya.
Substance—Palm-leaf.
Size—16⅝ × 1½ inches.
Character—Nāgarī.
Folios—1–62.
Lines on a page—6.

Letters in a line—72.
Age of Ms.—Old.
Condition of Ms.—Good.

Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद्भक्तमहीपतिः ।
आदिशत्सायणाचार्ये वेदार्थस्य प्रकाशने ।
ये पूर्वोत्तरमीमांसे ते व्याख्यातिसङ्ग्रहात् ।
कृपालुस्सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥
व्याख्याताभृग्यजुर्वेदौ सामवेदोऽपि संहिता ।
व्याख्याता ब्राह्मणस्याद्य व्याख्यानं सम्प्रवर्तते ॥
अष्टौ हि ब्राह्मणग्रन्थाः प्रौढब्राह्मणमादिमम् ।
षड्विंशाख्यं द्वितीयं स्यात् ततस्सामविधिर्भवेत् ॥
आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्ब्रंशग्रन्था अष्टावितीरिताः ॥

तत्र महाब्राह्मणषड्विंशाख्ययोर्ग्रन्थयोर्यज्ञाधिकारिणां स्वर्गादिफलप्राप्तये एकाहाहीनसत्रात्मका महाक्रतवः प्रतिपादिताः । अथास्मिन् सामविधानाख्ये तृतीये ब्राह्मणग्रन्थे तेष्वनधिकृतानां वक्ष्यमाणानां पृश्निवैखानसादीनां तेष्वशक्तानां अन्येषां शुद्ध्यर्थं कृच्छ्रादिप्रायश्चित्तानि तैरपहृतपाप्मनां स्वर्गादिफलप्राप्तये जप्यानि बहुविधान्याधानाग्निहोत्रादिप्रत्याम्नायरूपाणि सामानि विधास्यन्ते । अत एवास्य सामविधानमिति नाम सम्पन्नम् ॥

आदौ तावत् प्रजापतिः कृत्स्नं भूतजातं सृष्ट्वा तस्य सामोपजीवनं प्रायच्छदिति प्रतिपादयिष्यमाणत्वात्तदुपजीव्यभूतप्रपञ्चसृष्टिप्रतिपादनाय तत्प्रागवस्थानमाह—ब्रह्म ह वा इदमग्र आसीदिति ॥

उपसंहारः—

